Price Rs. 2-4 As.

BHATTI KAVYAM

CANTOS I-V.

SANSKRIT F. A. COURSE FOR 1893 &c.

CONTAINING

Analysis, Prose order, Substance, Explanation in Sanskrit in imitation of Mallinath, and in English, Alankar (figure of speech) Rhetorical errors explained, Metre, Change of voice, Derivation and other peculiarities. Bengali and English Translations, Important Questions with appropriate answers, with special reference to the requirements of candidates for the F. A. Examination, University questions with proper answers, Criticism, Grammatical notes with full elucidations of all allusions in the text &c. &c.—Special attention has been paid to the explanation of all grammatical peculiarities in the Text.

EDITED BY

KALIKRISHNA BHATTACHARYA,

PROFESSOR OF SANSKRIT, METROPOLITAN INSTITUTION.

Calcutta:

THE SCHOOL BOOK DEPOSITORY,

10, CORNWALLIS STREET.

BHATTIKAVYAM.

Derivative meaning and samas of भट्टिकाव्यम्,—भट्टस्य कृतिः भट्टिः "अत इञ्" इति इञ्। कवेः कर्म इति काव्यम्। ष्यञ्। ततः भट्टिनामकं काव्यम् भट्टिकाव्यम् अथवा भट्टिनाम्नः कवेः काव्यम् इति केचित्। भट्टिनः काव्यम् भट्टिकाव्यम् इति च केचित्।

The object of composing a poem :—"काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" इत्यादि आलङ्कारिकवचनप्रामाण्यात् काव्यस्य अनेकश्रेयःसाधनता। 'काव्यालापांश्च वर्जयेत्' इति यत् उच्यते तत् असत्काव्यविषयस्य, नतु भट्टिकाव्यवत् उत्कृष्टकाव्यस्य इति।

Benefits from studying a Kavya :—"धर्म्मार्थकाममोक्षेषु वैचक्षण्यम् कलासु च। करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवणम् ॥"

Requirements at the beginning of a काव्य—"आशीर्नमस्क्रियावस्तुनिर्द्देशो वापि तन्मुखम्" इति आशीर्व्वादाद्यन्यतमः प्रबन्धमुखलक्षणत्वेन, "अभून्नृपो विबुधसखः" इत्यादिवस्तुनिर्द्देशः। अपिच काव्यप्रारम्भे वर्णशुद्धिः गणशुद्धिश्च संप्रेक्ष्या। 'अभूत्' इति प्रारम्भे 'अ'कारनिर्द्देशात् "अकारो विष्णुरुद्दिष्टः" इति 'अ'कारस्य देवतावाचित्वात्, "देवतावाचकाः शब्दा ये च भद्रादिवाचकाः, ते सर्व्वे नैव निन्द्याःस्युर्लिपितो गणतोऽपि वा।" इत्यादिना 'अभून्न्' इत्यत्र 'ज'गणत्वे "जोऽर्कों रुजम्" इति 'ज'गणस्य पीड़ाविधायकत्वेऽपि गणशुद्धित्वम् गम्यते।

Definition of काव्य—"वाक्यं रसात्मकं काव्यम्।"

Classifications of काव्य—"काव्यं ध्वनिः गुणीभूतव्यङ्ग्यं चेति द्विधा मतम्।" "दृश्यश्रव्यत्वभेदेन पुनः काव्यम् द्विधा मतम्।" श्रव्यकाव्यं पुनर्द्विधा। तथाहि दर्पणकारः, "श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा।" तत्र पद्यमयं काव्यञ्च द्विविधम्। महाकाव्यं खण्डकाव्यञ्चेति।

Definition of महाकाव्य—

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।
* * * *
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्द्देश एव वा।
* * * *
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।
नामास्य। इत्यादि।

Application of the definition of महाकाव्य to भट्टिकाव्यम्...

द्वाविंशसर्गैरुपेतम् भट्टिकाव्यम् महाकाव्यानाम् अन्यतमम्। तत्र धीरोदात्तः श्रीरामचन्द्रः दिव्यादिव्यः नायकः। यतः स दिव्योऽपि आत्मनि नराभिमानी। रामायणेतिहासोक्तम् वृत्तमत्र वर्णितम्। दशरथ इति उदाहृतः नृपः आसीत् इति काव्यप्रारम्भे वस्तुनिर्द्देशः। कवेर्नाम्ना च काव्यनाम प्रदत्तम्।

Tradition on the origin of Bhatti :—वङ्गेषु वार्त्तेयं प्रचलिता यथा कदाचित् तत्रभवान् भट्टनामा कविः छात्रान् व्याकरणशास्त्रेषु अध्यापयन् आत्मनः छात्राणाञ्च मध्ये गजमेकं गच्छन्तमालोक्य वर्षमेकम् तदनध्यायकालः समुपस्थित इत्यालोच्य च काव्यच्छलेन व्याकरणम् अध्यापयितुम् इच्छुः भट्टिनामकं काव्यं प्रणिनाय इति।

Get by heart the following signs in a metre :—

मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः।

भौ गुरुमध्यगतौ रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥
गुरुरेको गकारस्तु लकारो लघुरेककः ॥

म | न | भ | य | ज | र |
− − − ∪ ∪ ∪ − ∪ ∪ ∪ − − ∪ − ∪ − ∪ −

स | त | ग | ल |
∪ ∪ − − − ∪ − ∪

Tho long vowels :–

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्णः संयोगपूर्व्वश्च तथा पादान्तगोऽपि वा ॥

प्रथमः सर्गः—Derivation of प्रथम—प्रथन्ते अनेन द्वितीयादयः इति प्रथमः, "प्रथेरमच्" इति प्रथधातोः अमच्। Declension—प्रथमे प्रथमाः इति प्रथमाबहुवचने विकल्पेन सर्व्वनामता। स्त्रियां प्रथमा। सर्गः—Diff meanings—"सर्गः स्वभाव निर्म्मोक्ष निश्चयाध्यायसृष्टिषु।" इत्यमरः। सृज-धातोः घञ्।

भट्टिकाव्यम्।



अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः।
गुणैर्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत् स्वयम्॥ १॥

Principal sentence :—दशरथ इति उदाहृतः नृपः अभूत्। A jectives to नृपः,—विबुधसखः, परन्तपः, श्रुतान्वितः। Enlargement the subject नृपः—गुणैः वरं यम् (नृपम्) सनातनः भुवनहितच्छलेन स्व पितरम् उपागमत्।

Prose order :—विबुधसखः परन्तपः श्रुतान्वितः दशरथ इति उदाहृ नृपः अभूत्। सनातनः भुवनहितच्छलेन गुणैः वरं यं स्वयं पितरम् उपागमत

Substance in simple Sanskrit—दशरथनामा कश्चित् रा आसीत्। देवाः इन्द्रो वा तस्मिन् सुहृदि इव परमां प्रीतिम् अवापुः। वीर्ये तस्य शत्रवः प्रशमाः आसन्। स च शास्त्राणाम् पारमगच्छत्। तथा गुणान् अर्जय यथा विष्णुरपि तद्गुणैः समाकृष्टः तं पितरम् लेभे। यत्तु रावणादिभ्यः भुव संरक्षितुम् किल अवतारोऽभूत् तत्तु छलमात्रम्।

Explanation in tika form :—विबुध्यन्ते सम्यक् जानन्तीति विबुध देवाः ["अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः" इत्यमरः] तेषां सखा विबु सखः [अथवा सामान्यदेवतावाचिनोऽपि विबुधशब्दस्य विशेषपरत्वात् प्राधान्या इन्द्रवाचित्वम्। तथा विबुधस्य इन्द्रस्य सखा इति "राजाहः सखिभ्यष्टच्" इ

टच्प्रत्ययः। अथवा विषु पक्षिषु बुधः गरुड़ः इत्यर्थः तस्य सखेति। अनेन धर्म्मः विजयित्वं सूचितम्] परं शत्रवः ["दस्युशात्रव शत्रवः। अभिघाति परारातिः" इत्यमरः] तान् उच्छेदनीयान् उपपीड़नीयान् वा तापयतीति परन्तपः अरिमर्द्दक इत्यर्थः [नासौ विनयेन विबुधसखः किन्तु वीर्य्येण इति परन्तपशब्दस्य सार्थक्यम्।] "श्रुतं शास्त्रावधृतयोः" इत्यमरः। तैरन्वितः युक्तः अधीतशास्त्र इत्यर्थः ["सोऽध्यैष्ट वेदान्" इति वक्ष्यमाणश्लोके वेदाध्ययनस्य नित्यत्वज्ञापनार्थं पुनरुक्तिः श्रुतमत्र वेदाद्यन्यत् शास्त्रम्] दशरथः दशसु दिक्षु रथा यस्य स दशरथः [सर्व्वत्र तस्य रथगतिः अप्रतिहता आसीत् इत्यर्थः। तथाहि रघुः "दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम्। दशपूर्व्वरथं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः"] इति अनेन नाम्ना उदाहृतः लोके गीतः। ['इत्युदाहृतः' इत्यत्र केचित् व्याचक्षते, इतं ज्ञानं तदस्यास्तीति इती ज्ञानी उदाहृतः ख्यातः। यद्वा इतिषु ज्ञानिषु उदाहृतः इति। इतीति इणगताविल्यस्मात् भावे क्तः, ततोऽस्त्यर्थे इन्] नॄन् पातीति नृपः [आतोऽनुपसर्गे कः" इति कः] नृपो राजा [अत्र नृपशब्देन क्षत्रियधर्म्मः उक्तः, क्षत्रियधर्म्मो यथा—अध्ययनम् यजनम् दानं शस्त्राजीवो भूतरक्षणञ्चेति। 'सोऽध्यैष्ट वेदान्' इत्यादिना सर्व्वञ्चैतत् द्वितीयश्लोके सुस्पष्टं वर्णितम्।] अभूत् भूतः। [भूधातोः अस्तेर्वा भूतसामान्ये लुङ्। अन्यथा राज्ञश्चिरातीतत्वात् कवेः परोक्षत्वाच्च लिट् स्यात्।] सनेति अव्ययपदं सदार्थे वर्त्तते। ["सनानित्ये" इत्यमरः।] सना भवतीति सनातनो विष्णुः ["सायं चिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च" इति अव्ययात् ट्युल्।] भवन्ति उत्पद्यन्ते इति भुवनानि भूर्भुवःस्वरिति त्रयो लोकाः, तेभ्यो हिताः भुवनहिताः विष्णोर्दशावताराः [इह तु रामो द्रष्टव्यः।] तच्छलेन व्याजेन भुवनहितच्छलेन, [अथवा भुवनानां हितं रावणवधादिरूपं तदेव छलं व्याजस्तेन त्रिभुवनमङ्गलमपदिश्य इत्यर्थः। इदानीं रावणादिकण्टकोद्धरणात्। तथा चोक्तम् "परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे" इति।] गुण्यन्ते आरभ्यन्ते इति गुणा धैर्य्यगाम्भीर्य्यादयः तैः वरं श्रेष्ठं यं दशरथं ["देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवं मनाक्प्रिये" इत्यमरः।] स्वयम् आत्मना, [नतु प्राकृतवत् कर्म्मणा अन्येन वा प्रेरित इत्यर्थः।] पितरं जनकम् उपागमत् उपजगाम स्वीचकार इति यावत्।

सत्स्वपि अन्येषु राजसु विष्णुः राज्ञो मङ्गलेनैव तं जनकमङ्गीकृतवान् इत्यर्थः ।
[उपपूर्व्वात् गमेर्लुङि रूपम् । वृत्तम् रुचिरा । अपह्नुतिरलङ्कारः]

N. B.—If the wording of question be 'Explain' or 'Explain in simple Sanskrit' the portions containd in the brackets [ ] should be left out.

Metre :- ज भ स ज ग

अभूनृ । पो विवु । धसख: । परन्त । पः

अतः रुचिरा वृत्तम् । लक्षणम् यथा, जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ।
'चतुर=४,, ग्रह=९ इति त्रयोदशाक्षराङ्घ्रिः, चतुर्थवर्णे त्रयोदशवर्णे च यतिः ।

Change of Voice :—अभावि नृपेण विबुधसखेन परन्तपेन गुणान्वितेन दशरथ इति उदाहृतेन । वरः यः सनातनेन पिता उपागामि ।

Derivations, Conjugations &c.—विबुध—वि-बुध-कः । बुध्यते लट्, अबोधि-अबुद्ध-लुङ् । परन्तप—पर+तप-णिच्-खच् । अतीतप्रत्-लुङ् । सनातन—सना-ट्यु ल् । भुवन—भू-(उनादि) क्युन् । प्राप्त्यर्थे भूधातोः रूपम्—भवति, भवते लट् । Declension :—परशब्दस्य रूपम्—उत्कृष्ट-वाचित्वे नरशब्दवत् रूपम्, अन्यत्र सर्व्वनामता । अतः, परः परौ परे पराः इत्यादि । नृ—नीधातोः ऋन् । अनैषीत्-लुङ् । वरः—व्रियते असौ इति वरः, वृधातोः कर्म्मणि अप् । लट् यथा कविरहस्ये—"तेजोभिर्जगदावृणोति वरति भ्रातॄन् यथार्हैर्धनैः । सत्कीर्त्तिञ्च वृणाति यो वरयति चेमं यशो व्रीयते । युद्धे क्ष्मयति द्विषो निवरते नित्यं प्रियोपद्रवम् ॥" लुङ् अवारीत्, अवरिष्ट अवरीष्ट अवृत । हितः—'हिन्वर्द्धने गतौ' इति अवतारार्थे हिधातोः कर्त्तरि क्तः । मङ्गलार्थे हितमिति धाधातोः भावे क्तः ।

দশরথ নামে সুপণ্ডিত শত্রুমর্দ্দন দেবসুহৃৎ এক রাজা ছিলেন। তিনি নানা গুণে এরূপ শ্রেষ্ঠত্ব লাভ করেন যে সনাতন বিষ্ণু অবতার-চ্ছলে স্বয়ং তাঁহাকে পিতৃত্বে বরণ করেন।

There was a King named Dasaratha, who was a friend to the gods, who afflicted his enemies, and was well versed in Sastras.

So eminent was he in virtues that the Eternal Visnu accepted him as his father under the pretext of an incarnation.

Important Questions with Answers :—

Q. Write gram. notes on अभूत्—Ans. (See above). Q. If the विग्रहवाक्य of विबुधसख be as that of बहुव्रीहि, what should be the form of the word ?—Ans. विबुध: सखा यस्य इति बहुव्रीहिसमासे विबुधसखि: इत्येवं स्यात् । Q. Parse भुवनहितच्छलेन, दशरथ:, and स्वयम् and explain the force of स्वयम् । Ans. छलेन प्रकृत्यादित्वात् हेतौ वा तृतीया । दशरथ इत्यत्र अव्ययेन अभिहितत्वात् प्रथमा । स्वयमित्यत्र प्रकृत्यादित्वात् तृतीया । For force see above. Q. Show the fitness of विबुधसख: and नृप:—Ans. (See above). Q. Show the propriety of परन्तप: । Ans. एतेन तस्य बाह्या: आभ्यन्तरीणाश्च शत्रव: निर्जिता इत्युक्तम् । तथाहि द्वितीयश्लोके "अजेष्ट षड्वर्गम्...समूलघातं न्यवधीत् अरींश्च ।" Q. To what incident does the epithet विबुधसख allude ? Ans. पुरा देवासुरे युद्धे देवराजस्य साहाय्याय सम्बरनाम्ना असुरेण महायुद्धमकरोत् राजा दशरथ: इति पौराणिकी वार्त्ता । Q. Of the two meanings of भुवनहितच्छलेन which do you prefer ? Ans. प्रथम एव सङ्गतार्थ: । यत: सनातन: अवतारम् विना, जगन्मङ्गलं साधयितुं समर्थोऽपि स दशरथं पितरं स्वीकर्त्तुम् अवतारछलमादत्ते । भुवनमङ्गलन्तु अवश्यकर्त्तव्यतया न कदापि छलं भवितुमर्हति । Q. Is there any defect of style in the use of यद् without तद् ? Ans. यत्तदोर्नित्यसम्बन्ध: । तथापि "यद्-शब्द: उत्तरवाक्यानुगतत्वेन उपात्त: सामर्थ्यात् पूर्ववाक्यानुगतस्य तद्-शब्दस्य उपादानं नापेक्षते" इति मम्मटभट्ट: । Q. Explain the propriety of the word सखि in विबुधसख: । Ans. "अत्यागसहनो बन्धु: सदैवानुमत: सुहृत् । एकक्रियं भवेन्मित्रं समप्राण: सखा मत: ॥" इति सखिशब्देन इन्द्रस्य समप्राणत्वम् द्योतितम् । १ ।

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट
पितॄनपारीत् सममंस्त बन्धून्।
व्यजेष्ट षड्वर्गमरंस्त नीतौ
समूलघातं न्यवधीदरींश्च ॥ २ ॥

2. [The whole consists of principal sentences]

Prose order :—स वेदान् अध्यैष्ट१ त्रिदशान् अयष्ट२, पितॄन् अपारीत्३ अतार्सीत् वा, बन्धून् सममंस्त४, षड्वर्गं व्यजेष्ट५, नीतौ अरंस्त६, अरीन् समूलघातं न्यवधीत्७।

Substance in simple Sanskrit :—स हि सर्व्वगुणोपेतः आसीत्। तथाहि स वेदाध्ययनशीलः अभूत्, देवान् यागेन प्रीणयति स्म, पितृलोकान् अतर्पयत्, आत्मीयान् आद्दृतवान्, रिपुषड्वर्गं जिगाय, राजनीतिपर्य्यालोचनया प्रीतिमवाप, वीर्य्येण च शत्रुकुलं निहतमकरोत् इति।

Explanation in tika form :—स नृपः वेदयन्ति ज्ञापयन्ति धर्म्माधर्म्मौ इति वेदाः सामादयः। पचाद्यच्। तान् अध्यैष्ट अधीतवान् [एतेन स्वाध्याय उक्तः। पक्षे अध्यगीष्ट।] तिस्रः दशा वाल्यादयो येषां तान् त्रिदशान् देवान् अयष्ट अग्निष्टोमादिभिः पूजितवान् [एतेन यजनमुक्तम्। केचित्तु यजेरेव देवपूजावाचित्वात् त्रिदशानित्यस्य वैयर्थ्यापत्तेस्त्रिदशान् अयष्ट सङ्गतवान् इत्याहुः। वस्तुतस्तूपचारात् पूजामात्रवाचित्वेऽपि "यजञौ देवार्चादानसङ्गतौ इत्यत्र देवो देवनं क्रीड़ा अर्च्चा चेति द्वन्द्वः, देवस्यार्च्चेति तत्पुरुषोऽपि तात्पर्य्यभेदात् व्याख्याभेदो लौकिके न दोषः। स्वरितञित इति आत्मनेपदम्।] पितॄन् अपारीत् आप्यायितवान् ['पितॄनतार्सीत्' इति पाठान्तरम्। तत्र तृपिः सकर्म्मकः।] बन्धून् मातृपितृादिज्ञातीन् सममंस्त सम्मतवान्, सदा दानमानादिभिः पूजितवान्, इत्यर्थः। षण्णां कामक्रोधलोभमोहमदमात्सर्य्याणां वर्गः तं व्यजेष्ट अभिभूतवान् [कर्ह्हिः-शत्रुनिपातात् पूर्व्वम् अन्तःशत्रून् निजघान इत्यर्थः। "विपराभ्यां जेः" इत्यात्मनेपदम्।] नीतौ सामादिषु च अरंस्त क्रीड़ितवान्, रत इत्यर्थः। अरीन् शत्रून् समूलघातं न्यवधीत् समूलं हत्वा निहतवान्। [समूलोपपदात् हन्तेः "समूलकृत-

जीवेषु कृनमृश्रयहः" इति णमुल्। अथवा समूलानां मन्यूनां घातः प्राणवियोगफलकव्यापारो यत्र हिंसाक्रियायां तत् यथा तथा हतवान्, लुङि हन् धातोः वधादेशः। सर्व्वत्र लुङ्। इत्युपजातिः]।

Metre:— त त ज गग

सोऽध्यैष्ट। वेदान् त्रि। दशान्। यष्ट
ज त ज गग
पितॄन्। पारीत्स। मंमंस्त। बन्धून्

इत्यादि प्रथमपादे इन्द्रवज्रा, लक्षणं यथा, "स्यादिन्द्रवज्रा यदि तौ जगौ गः।" द्वितीयपादे उपेन्द्रवज्रा। लक्षणं 'उपेन्द्रवज्रा प्रथमे लघौ सा।' अतएव तयोः सङ्करूपा उपजातिः। तथाहि "अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः॥" पादशेषे ह्रस्वोऽपि वैकल्पेन दीर्घः भवति। "तथा पादान्तगोऽपि वा।" इति दीर्घनियमात्।

Change of V.—तेन वेदाः अध्यगायिषत, [अध्यगीषत अध्यैषत] त्रिदशा अयक्षत, पितरः अपारिषत, [अप्रषत] बन्धवः अमंसत, षड्वर्गः व्यजायि, अरामि, अरयः न्यहसत [अघानिषत अवधिषत]।

Deriv.—अध्यैष्ट—अधि-इ-लुङ् त। लट्, अधीते। लुङ्, अध्यगीष्ट, अध्यैष्ट। अयष्ट—यज+लुङ् त; लट् यजति, यजते। लुङ् अयाक्षीत्, अयष्ट। लिट् इयाज, ईजतुः &c.; ईजे। अपारीत्—पृ-लुङ् द। सममंस्त—सम्-मन्-लुङ् त। मन्यते लट्। मेने लिट्। व्यजेष्ट—वि-जि-लुङ् त। विजयते, लट्। विजिग्ये, लिट्। अरंस्त—रम-लुङ् त। रमते, लट्। रेमे, लिट्। समूलघातम्—समूल-हन-णमुल्। न्यवधीत्—नि-हन-लुङ् द। लट् हन्ति। जघान लिट्।

তিনি বেদ অধ্যয়ন করিতেন। যজ্ঞানুষ্ঠানে দেবগণকে তৃপ্ত করিয়াছিলেন। পিতৃলোক সন্তুষ্ট করেন। আত্মীয়দিগকে সম্মানিত করিতেন। ষড় রিপু দমন করেন। নীতিশাস্ত্রে আনন্দ লাভ করিতেন। শত্রুকুল সমূলে উচ্ছেদ করিয়াছিলেন।

वसूनि तोयं घनवद्व्यकारीत्
सहासनं गोत्रभिदाध्यवात्सीत् ।
न त्र्यम्बकादन्यमुपास्थितासौ
यशांसि सर्व्वेषुभृतां निरास्थत् ॥ ३ ॥

He studied the Vedas, offered oblations to the gods, satisfied the manes with offerings, honored his relatives, conquered his passions, delighted in politics and killed his enemies 'to their utter extirpation.'

Q. Show the propriety of the whole Sloka.

Ans. स इत्यस्य नृप इत्यनेन अन्वयित्वात् श्लोकेऽस्मिन् नृपगुणाः वर्णिताः। नृपगुणाश्च यथा 'अध्ययनम् यजनं दानं शस्त्राजीवः भूतरक्षणञ्च' इति। अतः 'सोऽध्यैष्ट' इत्यनेन अध्ययनं सूचितम्। 'त्रिदशान् अयष्ट' इत्यनेन यजनमुक्तम्। 'पितॄन् अतार्पीत्' इत्यादिना निवापादि पितृदानं बन्धुषु च सम्मानदानमुक्तम्। 'अरंस्त नीतौ' इति नीतौ रमणेन सौराज्यात् प्रजारक्षणमुक्तम्। 'न्यवधीदि'-त्यादिना शस्त्राजीवः प्रकटितः। Q. Can the word सः be used without यः? Ans. "प्रक्रान्त (अन्वयो) प्रसिद्धार्थः अनुभूतार्थविषयः तद्-शब्दः यद्-शब्दोपादानम् नापेक्षते" इति यद्-शब्दं विना तद्-शब्दप्रयोगः। [The word तद् can be used alone without यद् if it indicates something previously mentioned or signifies something well known to all, or picturesquely delineated.] २।

3. This consists of 4 simple sentences.

Prose order :—असौ वसूनि तोयं घनवत् व्यकारीत्१, गोत्रभिदा सह आसनम् अध्यवात्सीत्२। त्र्यम्बकात् अन्यं न उपास्थित३। सर्व्वेषुभृतां यशांसि निरास्थत्४।

Substance :—मेघो यथा जलं वर्षति, तथा स धनानि अर्थिभ्यः प्रायच्छत्। पराक्रमेण इन्द्रस्यापि सख्यम् लभमानः तस्य अर्द्धासनं भेजे। महा-

ऽैवात् ऋते न अन्यस्य पुरः प्रणतमभूत् तस्य शिरः। शास्त्रविषयेऽपि न तस्य उपमा आसीत्।

Explanation in tika form :—असौ दशरथः वसूनि धनानि ["ऋक्थमृक्थं धनं वसु" इत्यमरः] तोयम् उदकम् ["अम्भोऽर्णस्तोयपानीयनीर-क्षीराम्बुशम्बरम्" इत्यमरः] घनवत् मेघ इव ["तेन तुल्यं क्रिया चेत् वतिः" इति वतिप्रत्ययः। अत्र तद्धितगता आर्थी उपमा] व्यकारीत् दत्तवान्। मेघो यथा फलनिरपेक्षतया जलं वर्षति तथा सोऽपि धनानि सर्व्वेभ्यो दत्तवानित्यर्थः। [एतेन राज्ञः दानवीरत्वं प्रकटितम्। एवं सम्यक् पालनादिन्द्रेण तुल्यत्वमाह गोत्रभिदेति] गोत्रान् पर्व्वतान् ["अद्रि गोत्र गिरि ग्रावाचल शैल शिलोच्चयाः" इत्यमरः] भिनत्तीति गोत्रभिद् इन्द्रः, [एतेन इन्द्रस्य महावीर्य्यत्वम् ध्वनितम्। "सत्-सू-द्विष-द्रुह-दुह-युज-विद-भिद-छिद-जि-नी-राजामुपसर्गेऽपि क्विप्" इति क्विप्] तेन सह आसनमेकम् आसनम् अध्यवात्सीत् अध्युषितवान् [अनेन अत्यन्त-धर्म्मविजयित्वं प्रदर्शितम्। "उपान्वध्याङ्वसः" इति आसनमित्यस्य अधिकरणस्य कर्म्मसंज्ञा] त्रीणि अम्बकानि अक्षीणि यस्येति त्र्यम्बकः महादेवः [अथवा "तिस्रो देव्यो यदा चैनं भजन्ते भुवनेश्वरम्। द्यौरापः पृथिवी चैव त्र्यम्बकस्तु ततः स्मृतः॥" इति द्यौर्भूमिरापश्चेति तिस्रोऽम्बाः मातृत्वेन सन्ति यस्येति भारतम्। त्रयाणां लोकानामम्बकः पिता इत्यन्ये। तिस्रोऽम्बाः शक्तयः यस्येति केचित्] तस्मादन्यं देवं ["अन्यारादितरर्त्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते" इति पञ्चमी] न उपास्थित प्रधानत्वेन न पूजितवान्। गुणैः सर्व्वेषां पूजार्हतया न तस्य कश्चित् प्रणम्य आसीत् इत्यर्थः। ["उपात् देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्" इति आत्मनेपदम्] इषून् बिभर्त्तीति इषुभृतो धनुर्धराः, ["अन्येभ्योऽपि दृश्यते" इति क्विप्] सर्व्वेषाम् इषुभृतां यशांसि निरास्थत् निरस्तवान्। स हि धन्विनाम् श्रेष्ठो-ऽभूत् इत्यर्थः। [एतेन अस्य असाधारणीकृतास्त्रत्वम् प्रदर्शितम्। वृत्तम् उपजातिः।]

Change of V.—वसूनि व्यकारिषत व्यकारिषत। आसनम् अध्यवासि, अन्यः उपास्थायि अमुना यशांसि निरासिषत।

Derivation :—व्यकारीत्—वि-कॄ-लुङ् द। लटि किरति। गोत्र-भिद-

पुण्यो महाब्रह्मसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः।
जज्वाल लोकस्थितये स राजा
यथाध्वरे वह्निरभिप्रणीतः॥ ४॥

क्विप्। आसनम्—आस-ल्युट् अधिकरणे। अध्यवात्सीत्—अधि-वस-लुङ् द्। वसति लट्। उवास लिट्। उपास्थित—उप-स्था-लुङ् त। द्रु-भू-क्विप्। यशः—अश-असुन्, अश्नुते लट्। निरास्थत्—निर्-अस-लुङ् द्। अस्यति लट्।

মেঘ যেরূপ বারি বর্ষণ করে, তদ্রূপ তিনি ধন বিতরণ করিতেন। ইন্দ্রের সহিত একাসনে উপবেশন করেন। মহাদেব ব্যতীত অন্যের আরাধনা করেন নাই। সমুদয় ধনুর্ধারীদিগের যশঃ লোপ করিয়াছিলেন।

He showered wealth as clouds water. He sat on the same seat with Indra the piercer of Mountains. He did not salute other than the three-eyed Shiva, and put out the glories of all archers.

Q. Show the propriety of the whole sloka. Ans. अनेन वाक्यचतुष्टयेन असौ दानवीरो धर्मवीरो युद्धवीरश्चेति नायकस्य उत्तमगुणवत्त्वम् प्रदर्शितम्। Q. Give allusion to गोत्रभिद्। Ans. 'हिरण्याक्ष-मायया पर्व्वताः सपक्षाः बहुदेशान् उच्छेदम् अनयन्। इन्द्रस्तु वज्रेण तेषां पक्षान् चिच्छेद' इति पौराणिकी वार्त्ता। Q. Give the derivative meaning of यशस्। Ans. अश्नुते व्याप्नोति इति यशः। 'अशेर्देवने युट्च' इति अशधातोः असुन् प्रत्ययेन निष्पन्नम्। Q. Account for द्वितीया in आसनम्। Ans. (See above.) Q. Give the significance of गोत्रभिद्। Ans. (See above.) Q. Account for आत्मनेपद in उपास्थित। Ans. (See above.)

4. Principal sentence :—स राजा लोकस्थितये जज्वाल। Adjectives to राजा,—पुण्यः, महाब्रह्मसमूहजुष्टः, नाकसदां सन्तर्पणः, and वरेण्यः। Adjunct to राजा,—अध्वरे अभिप्रणीतः वह्निः यथा।

Prose order :—पुण्यः महाब्रह्मसमूहजुष्टः नाकसदां सन्तर्पणः, वरेण्यः स राजा लोकस्थितये अध्वरे अभिप्रणीतः वह्निः यथा (इव) जज्वाल ।

Substance :—यथा मन्त्रसंस्कृतः अग्निः यथा पुण्यः ब्राह्मणैः सेवितः, देवताप्रीतिपदस्सन् लोकरक्षार्थं समधिकम् उज्ज्वलो भवति, दशरथस्तथा पुण्यकर्म्मा, ब्राह्मणैः यज्ञे कृतसाहाय्यः, देवान् प्रीणयन् श्रेष्ठत्वमवाप्य लोकरक्षार्थे अतीव औज्ज्वल्यम् दधे इति ।

Explanation in tika form :—पुनातीति पुण्यं धर्म्मः, तदस्यास्तीति पुण्यः [अर्श आदित्वादच्] अत्यन्तपुण्यशीलत्वात् सत्स्वभावः इत्यर्थः । वह्निपक्षे पावनः इत्यर्थः । ["पुण्यं धर्म्मे मनोज्ञे च पावने च प्रयुज्यते ।"] महता वेदविदां ब्रह्मणां ब्राह्मणानां समूहेन जुष्टः सेवितः यागादिकर्म्मणि कृतसाहाय्य* इत्यर्थः । अग्निपक्षे सन्तर्पितः । ["ब्रह्मा विरिञ्चिविप्रयोरिति विश्वः ।" "शंखे तैले तथा मांसे वैद्ये ज्योतिषिके द्विजे । यात्रायां पथि निद्रायां महत् शब्दो न दीयते" इति निषेधात् महता ब्रह्मसमूहेन जुष्ट इति न विग्रहः । यद्वा महत् ब्रह्म तपो येषां तेषां समूहेन जुष्टः "वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः" इत्यमरः । यद्वा अमहा इति पाठः । तथात्वे असेव विष्णोरिव महस्तेजो यस्य असाविति । "अकारो विष्णुरुद्दिष्टः" इति वचनात् । यद्वा अमो रोगस्तं हन्तीति अमहा, तस्मिन् राजनि सति, लोकानां व्याधिभयं नासीदित्यर्थः । तथाहि कालिदासः—"जनपदे न गदः पदमादधौ" इति । अग्नेश्च व्याधिहन्तृत्वं प्रसिद्धमेव ।] कं सुखं तद्विपरीतमकं नास्ति अस्मिन्निति नाकः स्वर्गः ["स्वर्गनाक त्रिदिव त्रिदशालयाः" इत्यमरः । नाको नवेदा नमुचिरित्यादिना न अनञादेशः ।] तत्र सीदन्तीति नाकसदो देवाः [सत् सू द्विषेति क्विप्] तेषाम् । ["कर्तृकर्म्मणोः कृति" इति कर्म्मणि षष्ठी] सन्तर्पयति प्रीणयतीति सन्तर्पणः ["कृत्यल्युटो बहुलम्" * इति ल्युट् कर्त्तरि । राजा यागादिना देवान् तर्पयति, अग्निरपि अग्निमुखत्वाद्देवानामिति तान् तर्पयति इति भावः] वरेण्यः श्रेष्ठः स राजा लोकस्थितये लोकस्थित्यर्थं जगन्मर्य्यादायै इति यावत् । अध्वरे यज्ञे ["यज्ञः सवोऽध्वरो यागः" इत्यमरः] अभिप्रणीतः मन्त्रेण संस्कृतः वह्निरग्निर्यथा अग्निरिव जज्वाल प्रदीप्तवान् । [अग्नि-

* See foot notes sloka 21. I.

स्खलनमपि लोकस्थित्यर्थं स्यात्, तथाहि "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति।

श्रौतोपूर्णोपमालङ्कारः, वृत्तम् उपजातिः।

Change of V.—पुण्येन महाब्राह्मसमूहजुष्टेन सन्तर्पणेन नाकसदां वरेण्येन अध्वरार्जितेन राज्ञा वह्निना अभिप्रणीतेन।

Derivation :—पुण्यः=पू+यत्। "पूञो यण्णुक्ह्रस्वश्च।" जुष्टः=जुष+क्तः। सन्तर्पणः=सम्-तृप-णिच्-ल्यु। नाकसद्=नाक-सद्-क्विप्। वरेण्यः =वृ-एण्यः। अध्वरः—अध्वानं सत्पथं राति प्रयच्छति इति अध्वरः, अध्वोपपदात् राधातोः कः। वह्निः—वहति हविः देवेभ्यः यः स वह्निः। वह्धातोः निः।

যজ্ঞে মন্ত্র সংস্কৃত, অগ্নি যেরূপ ব্রাহ্মণ সেবিত, দেবগণের তৃপ্তিদায়ক ও শ্রেষ্ঠ হইয়া লোক স্থিতির জন্য উজ্জ্বল হয়, রাজা দশরথও সেইরূপ পুণ্যস্বভাব, ব্রাহ্মণ সেবিত, দেবগণের আনন্দপ্রদ ও শ্রেষ্ঠ ছিলেন ও পৃথ্বীলোক রক্ষার্থ প্রদীপ্ত হইয়াছিলেন।

The King blazed for the benefits of the world as the fire consecrated in a sacrifice, which as well as the former was full of purities, was attended by a large number of Brahmans, gave delight to the dwellers of heaven and was highly honored.

Q. Account for the Masculine Gender in पुण्यः।

Ans. पुण्यम् अस्य अस्ति इति पुण्यः, अर्श आदिभ्य अच। राजा इत्यस्य विशेषणत्वात् पुंस्त्वम्। **Q. Account for षष्ठी in नाकसदाम्।** Ans. 'कर्तृकर्मणोः कृति' इति सन्तर्पण इत्यत्र ल्यु-विधानात् तद्योगे नाकसदाम् इत्यत्र कर्मणि षष्ठी। **Q. Give allusion to राजन्, derive, and explain its significance.** Ans. Allusion—ऋषिभिः निहतात् अतिगर्व्वितात् वेणात् समुदितः पृथुः यदा प्रजाः अरञ्जयत् तदा "पृथुं वैण्यं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन्। ततो राजेति नामास्य अनुरागादजायत।" Deriv.— धातूनामनेकार्थत्वात् रञ्जनार्थस्य राजधातोः कनिन्। Significance—अत्र राजा इति पदेन प्रजारञ्जनं द्योतितम्। Cf.—"तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्।" रघुः।

स पुण्यकीर्त्तिः शतमन्युकल्पो
महेन्द्रलोकप्रतिमां समृद्ध्या।
अध्यास्त सर्व्वर्त्तुसुखामयोध्याम्
अध्यासिताम् ब्रह्मभिरिद्धबोधैः॥ ५॥

5. Principal sentence—स अयोध्याम् अध्यास्त। Adjectives to स—पुण्यकीर्त्तिः शतमन्युकल्पः। Adj. to अयोध्याम्—समृद्ध्या महेन्द्रलोकप्रतिमाम्, सर्व्वर्त्तुसुखाम्, and इद्धबोधैः ब्रह्मभिः अध्यासिताम्।

Prose order :—पुण्यकीर्त्तिः शतमन्युकल्पः स समृद्ध्या महेन्द्रलोकप्रतिमां सर्व्वर्त्तुसुखाम् इद्धबोधैः ब्रह्मभिः अध्यासिताम् अयोध्याम् अध्यास्त।

Substance :—इन्द्रोपमो यशस्वी राजा साधुभिः पूरिताम् अलकामिव समृद्धाम् सर्व्वेषु कालेषु मनोरमाम् अयोध्याम् अध्युवास।

Explanation in tika form :—पुण्या शोभना ["पुण्यं सुगन्धे संस्कृते पुण्यं शोभनमुच्यते" इति शाश्वतः] कीर्त्तिर्यस्यासौ पुण्यकीर्त्तिः यशस्वी। शतं मन्यवो यज्ञाः कर्म्माणि वा यस्यासौ शतमन्युरिन्द्रः ["मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः] तस्मादीषदसमाप्तः शतमन्युकल्पः इन्द्रतुल्य इत्यर्थः। ["ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" इति कल्पप्] स राजा [अनेन राज्ञः प्रभावः दर्शितः] समृद्ध्या सम्पत्त्या, प्रतिमीयते तुल्यते इति प्रतिमा ["आतश्चोपसर्गे" इति अङ्], महेन्द्रलोकेन अमरावत्या ["भगरीत्वमरावती" इत्यमरः] प्रतिमा सादृश्यं यस्यास्ताम् अमरावतीसदृशीमित्यर्थः। [जयमङ्गलमते तु महेन्द्रलोकेन प्रतिमा तुल्या इति तृतीया] सुखम् अस्याः अस्ति इति सुखा, अर्श आदिभ्यः अच्। अथवा सुखयतीति सुखा पचाद्यच्। सर्व्वेषु ऋतुषु सुखा तां, सर्व्वदैव सुखावहामित्यर्थः। [इद्धः दीप्तः बोधो ज्ञानं येषां तथोक्तैः सर्व्वशास्त्रार्थपरिज्ञानात् पटुबुद्धिभिरित्यर्थः ब्रह्मभिः ब्राह्मणैः ["ब्रह्मा विप्रः प्रजापतिः" इत्यमरः] अध्यासिताम् अध्युषिताम् अधिष्ठितामित्यर्थः। अयोध्यां स्वां राजधानीम् ["अधिशीङ्स्थासां कर्म्म" इति अधिकरणस्य कर्म्मसंज्ञा] अध्यास्त अध्युवास। [भूत सामान्ये लङ्। वृत्तम् उपजातिः।]

Change of V.—पुण्यकीर्त्तिना शतमन्युकल्पेन महेन्द्रलोकप्रतिमा सर्व्वर्त्तुसुखा अध्यासिता अयोध्या अध्यासि।

Derivations &c. :—कीर्त्ति—कॄत्-भावे क्तिन्। कीर्त्तयति-लट्, अचिकीर्त्तत् अचीकृतत्-लुङ्। प्रति-मा-अङ्। अधि-आस-लङ् त। लटि आस्ते; लुङि आसिष्ट। सुखा—सुख-अच्। अध्यासित—अधि-आस्-कर्म्मणि क्त। इद्ध—इन्ध-क्तः। लटि इन्धे। लिटि इन्धाञ्चक्रे। लुङि ऐन्धिष्ट। अयोध्या—नञ् +युध्+यत्। मन्यु—मन्धातोः उणादि-युच्। इन्द्र—इदि परमैश्वर्य्ये इन्द्रात् रन्। Diff m—"इन्द्रः शचीपतावन्तरात्मन्यादित्ययोगयोः" इति विश्वः। ऋतुः—ऋधातोः तुक्। "ऋतुः स्त्रीपुष्पकालयोः"। ब्रह्मन्—बृंहधातोः मनिन्। 'ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः।" इत्यमरः। Declension— पुंसि, ब्रह्मा ब्रह्माणौ &c. क्लीं, ब्रह्म ब्रह्मणी ब्रह्माणि &c.

ইন্দ্র তুল্য পুণ্যকীর্ত্তি রাজা দশরথ সর্ব্ব সময়েই সুখপ্রদ, বিদ্বান্ ব্রাহ্মণগণ কর্তৃক অধ্যুষিত, ইন্দ্রলোকের তুল্য অযোধ্যানগরে বাস করিতেন।

With 'glories unsullied' the King, a little lower than Indra, lived in Ayodhya, 'the very picture of Indra's world' in respect of wealth. It was inhabited by Bramhans of 'enlarged understanding' and was pleasing in all 'seasons.'

Q. Has the stanza any special poetical merit ?

Ans. पूर्व्वम् राजविशेषणद्वयम्, पश्चात् नगरीविशेषणम् तन्नामोल्लेखश्च युज्यते। 'स्वामिगुणपूर्व्विका हि निवासस्य गुणाः भवन्ति'. इति उक्तः। Q. Does the adjective 'इद्धबोधैः ब्राह्मणैः अध्यासिताम्' to अयोध्याम् enhance any merit of the hero ? Ans. अयोध्या विद्वद्भिः ब्राह्मणैः पूरिता इति प्रजानाम् गुणवत्त्वम् राज्ञः गुणाधिक्यम् च द्योतयति। स्वामिगुणान् भजन्ति हि प्रजाः इत्युक्तः। Q. Explain the significance of the adjectives to अयोध्या। Ans. वासभवनानुरोधात्, शीतग्रीष्मादिषु ऋतुषु उपभोगचमत्कारानुरोधात्, साधुसङ्गानुरोधाच्च वासस्थानं विशोभयति

निर्म्माणदक्षस्य समीहितेषु
सीमेव पद्मासनकौशलस्य ।
ऊर्द्धस्फुरद्रत्नगभस्तिभिर्या
स्थितावहस्येव पुरं मघोनः ॥ ६ ॥

मानवान् । सा च अयोध्या सर्व्वथा तद्गुणोपेतासीत् इति विशेषणतयैव सूचितम् । ५ ।

6. Principal sentence :—या (अयोध्या) ऊर्द्धस्फुरद्रत्नगभस्तिभिः मघोनः पुरम् अवहस्य इव स्थिता । Adjunct to या—समीहितेषु निर्म्माणदक्षस्य पद्मासनकौशलस्य सीमा इव ।

Prose order :—समीहितेषु निर्म्माणदक्षस्य पद्मासनकौशलस्य सीमा इव, या (अयोध्या) ऊर्द्धस्फुरद्रत्नगभस्तिभिः मघोनः पुरम् अवहस्य इव स्थिता ।

Substance :—यान्येव विधात्रा समुमीप्सितानि तेषु सर्व्वेषु एव अयोध्या निर्म्माणनैपुण्यम् अधिकम् ख्यापयति । अस्याः ऊर्द्धगताः रत्नकिरणाः हसतो जनस्य दन्तकिरणा इव प्रतिफलिताः इन्द्रस्य भवनं प्रति अवज्ञया हास्यं प्रकटितवन्तः इव ।

Explanation in tika form :—[कीदृशीम् अयोध्याम् अध्यास्त राजा इत्याह निर्म्माणेति ।] समीहितेषु ब्रह्मणः पक्षे स्रष्टुम् ईप्सितेषु, मघोनः पक्षे समर्थं चेष्टितेषु, निर्म्माणदक्षस्य, ब्रह्मणः पक्षे निर्म्मितिः निर्म्माणम् सृष्टिः, तत्र दक्षस्य पटोः ; मघोनः पक्षे, निर्म्माणम्, स्वपुरनिर्म्माणम् दक्षते हन्ति इति निर्म्माणदक्षः, पचाद्यच्, तस्य स्वपुरनिर्म्माणनिन्दकस्य इत्यर्थः । पद्मासनकौशलस्य, पद्ममेव आसनम् यस्य स पद्मासनः ब्रह्मा तस्य कौशलस्य नैपुण्यस्य सीमा मर्य्यादा इव इति उत्प्रेक्षा । ब्रह्मणा न ईदृशी शोभना अन्या पुरी निर्म्मिता इत्यर्थः । [यद्वा निर्म्माणदक्षस्य, पद्मासनस्येव कौशलं यस्य तादृशस्य विश्वकर्म्मणः समीहितेषु निर्म्मितेषु सीमा इव । इतःपरं शोभनं न निर्म्मितमित्यभिप्रायः । यद्वा पद्मासनस्य कौशलं सौन्दर्य्यं यस्य तस्य ब्रह्मणः समीहितेषु वाञ्छितेषु सीमा इव । यद्वा, कौ पृथिव्याम् शलते चलति इति कौशलः पचाद्यच्, अलुक्समासश्च, पृथिव्यां विहितसृष्टिरित्यर्थः । पद्मासन-

यासी कौशलयेति इति पद्मासनकौशल:, विवचाबशात् कर्म्मधारये विशेष्यस्य प्राग्भाव: ।] या अयोध्या, ऊर्द्ध स्फुरत: ये रत्नानाम् गभस्तय: रश्मय: तै: हासभूतै: मघोन: इन्द्रस्य पुरम् अमरावतीम् विहस्य इव स्थिता। [अमरावती न मां शोभया विजेतुं शक्नुयात् इति विविच्य अयोध्या हसतीव इत्यर्थ: । तथाहि...

माघकाव्ये—"गगनस्पृशां मणिरुचां चयेन यत्
सदनान्युदस्मयत नाकिनामपि ॥"

अलङ्कार:—उत्प्रेक्षाव्यतिरेकयो: संसृष्टि: । इन्द्रमुपजाति: ।]

Change of V.—शोभया इव यया स्थितम् ।

Derivations &c.—कौशलम्—कुशं लाति गृह्णाति इति कुशल:, लाधातो: क: (one expert in taking the Kusagrass) तस्य भाव: इति कौशलम्, अण्प्रत्यय: । गभस्ति—गम्यते ज्ञायते इति ग:, गम्धातो: ड: । गम् बभस्ति प्रकाशयति, इति ग-उपपदात् भस्धातो: क्तिच् । अभस्तीत् अभसीत् लुङ् । मघवन्...मह पूजायाम्, तस्मात् कनिन् । महति लट्, अमहीत् लुङ् ईहित—ईहङ् चेष्टायाम्, ईहते लट्, ऐहिष्ट लुङ् ।

স্রষ্ট পদার্থ নির্ম্মাণে বিশেষ দক্ষতার পরিচায়ক যে ব্রাহ্মার কৌশল অযোধ্যা তাহার সীমা স্বরূপ। উক্ত অযোধ্যা ঊর্দ্ধ স্ফুরৎ রত্নকিরণ দ্বারা যেন ইন্দ্রের পুরীকে উপহাস করিয়া অবস্থান করিতেছে।

The city expressed the highest degree of skill shown on things to be created by Brahman the lotus seated, one that has acquired great adept in construction of things. It appeared to laugh as it were, at the city of Indra by means of the rays of its gems 'beaming' upwards.

Q. Is there any impropriety of समास in पद्मासनकौशलस्य? Ans. "पूरणगुणसुहितार्थ सद(त्-अ)व्यय तव्य समानाधिकरणेन" इति गुणवाचकेन षष्ठीसमास: न युज्यते । तथापि 'अर्थगौरवम्' 'बुद्धिमान्द्यम्' इत्यादिवत् पद्मासनकौशलम् इत्यपि सिद्धम् । तत्सिद्धत्वे हेतुमाह । "तत्स्थैश्च गुणै: समासो वक्तव्य:" इति कात्यायन: । [Words denoting attributes

सद्रत्नमुक्ताफलवज्रभाञ्जि
विचित्रधातूनि सकाननानि।
स्त्रीभिर्युतान्यप्सरसामिवौघैः
मेरोः शिरांसीव गृहाणि यस्याम्॥ ७॥

such as कार्यम् can not be compounded in a षष्ठीसमास unless they are attributes in the abstract as कौशलम् &c.] **Q.** **Decline the base of** मघोनः **and give the feminine form.** Ans. मघवान् मघवा, मघवन्तौ मघवानौ, मघवन्तः मघवानः इत्यादि। स्त्रियाम् मघवती मघोनी। **Q. Write gram. notes on** सीमा **and decline it.** Ans. Gram. note—सिनोतेः (सिधातोः), मनिन् इति सीमन्। "डाप् उभाभ्याम् अन्यतरस्याम्" इति डाप् वा। अतः सीमन् सीमा वा। Declension—सीमा सीमानौ सीमानः, वा, सीमा सीमे सीमाः इत्यादि। ६।

7. Principal sentence :—"यस्यां गृहाणि मेरोः शिरांसीव अभूवन्। Adjuncts to the subject *i. e.* to गृहाणि and शिरांसि,—सद्रत्नमुक्ताफलवज्रभाञ्जि, विचित्रधातूनि, सकाननानि, अप्सरसाम् ओघैरिव स्त्रीभिः युतानि।

Prose order :—यस्यां सद्रत्नमुक्ताफलवज्रभाञ्जि विचित्रधातूनि सकाननानि अप्सरसाम् ओघैरिव स्त्रीभिः युतानि गृहाणि मेरोः शिरांसीव (अभूवन्)।

Substance :—स्वर्णमयस्य सुमेरुपर्व्वतस्य शृङ्गाणीव अयोध्यायाः गृहाणि आसन्। तथाहि यथा सुमेरुशृङ्गे नानारत्नानि धातवः काननानि च सन्ति तथैव अस्याम् वर्त्तन्ते। सुमेरुशृङ्गाणि यथा अप्सरोभिः सेवितानि तथैतानि गृहाणि स्त्रीरत्नैः अध्युषितानि आसन्।

Explanation in tika form :—यस्याम् अयोध्यायां सन्ति शोभनानि रत्नानि मरकतपद्मरागवैदूर्य्यादीनि मुक्ताफलानि मौक्तिकानि वज्राणि हीरकाणि च भजन्ते इति सद्रत्नमुक्ताफलवज्रभाञ्जि; [मुक्ताफलवज्रयोः रत्नान्तर्भावेऽपि प्राधान्य-

ख्यापनार्थं वचनं। "भजो ण्विः" इति ण्विः। युञ्जीति वा पाठः।] विचित्राः नानाप्रकारा धातवो मनःशिलादयो येषु तथोक्तानि शिलाविमलात्, सुमेरुशृङ्गेषु सहजत्वाच। काननैः इह वर्त्तमानानि गृहसन्निधिविहितोद्यानात्, मेरुशृङ्गेषु सहजत्वात् च। अप्सरसां ओघैः वृन्दैः निकरैः समूहैरित्यर्थः। "ओघो वृन्देऽम्भसां रये" इत्यमरः। तैरिव स्त्रीभिर्युतानि तत्त्वाभिः स्त्रीभिरप्सरोभिरिव इत्यर्थः। [स्त्रीणां अप्सरःसादृश्येन अतिसौन्दर्यं दर्शितम्। अप्सरस्शब्दो बहुवचनान्तः इति क्रमदीश्वरः।] गृहाणि वेश्मानि मेरोः सुमेरोः शिरांसि शृङ्गाणीव अभूवन्। [यस्याम् अभूवन् ताम् अयोध्यामध्यास्त इति यत्तदोः सम्बन्धः। गृहशब्दो वेश्मनि नपुंसकलिङ्गः, तत्स्थायिषु पुंलिङ्गो नित्यं बहुवचनान्तश्च। श्रौती पूर्णोपमालङ्कारः। वृत्तम् उपजातिः।]

Change of V.—सद्रत्नमुक्ताफलवज्रभाग्भिः, विचित्रधातुभिः, सकाननैः स्त्रीभिः युतैः, शिरोभिः गृहैः अभूयत।

Derivation :—रत्न—रमते अत्र इति रत्नम्, रम्धातोः [नः। अरंस्त लुङ्। धातु—धा-धातोः तुन्। दधाति धत्ते लट्, अधात् अधित लुङ्। अप्सरस्—अप्सु मथ्यमानासु जाता इति अप्सरसः। अद्भ्यः सरन्ति इति वाक्यम्। अप्शब्दात् सृधातोः [असिः। "अप्सु निर्मथनादेव रसात्तस्माद्वर-स्त्रियः। उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन्।" इति उक्तेः। युत:—यु मिश्रणे तस्मात् क्तः। यौति लट्, अयावीत् लुङ्। शिरस्—श्रिधातोः असुन्। शिर इति अकारान्तोऽपि अस्ति, यथा "निचकर्त्त शिरान् द्रौणिः।"

সুমেরু পর্ব্বতের শিখরদেশের ন্যায় যে নগরীর প্রাসাদ সকল মুক্তাফল ও হীরক প্রভৃতি উৎকৃষ্ট রত্নে বিভূষিত, গৈরিকাদি বিচিত্র ধাতু দ্বারা চিত্রিত, কানন যুক্ত, ও অপ্সরাতুল্য রমণীকুল কর্ত্তৃক অধ্যু-ষিত ছিল।

Like so many peaks of Sumeru, its palaces were possessed of fine gems, such as pearls and diamonds, were decorated with variegated metals, had gardens attached to them, and contianed women as handsome as so many Apsaras.

अन्तर्निविष्टोज्ज्वलरत्नभासो

गवाक्षजालैरभिनिष्पतन्त्यः ।

हिमाद्रिटङ्कादिव भान्ति यस्याम्

गङ्गाम्बुपातप्रतिमा गृहेभ्यः ॥ ८ ॥

Q. Is the reading सद्रत्नमुक्ताफलयुञ्जि objectionable? Ans. "युजेरसमासे" इति यदस्ति प्रतिषेधः मात् तस्यावसरः। तस्य अनपुंसकविषयत्वात्। सद्रत्नमुक्ताफलानां युक् योगो येषु तानि इति बहुव्रीहिः सुगमः। Q. Write notes on गृहाणि in respect of Gender. Ans. See above. Q. Give the meaning of रत्न। Ans मणिमाणिक्यादीनि रत्नानि। यद्वा "जातौ जातौ यदुत्कृष्टम् तद्रत्नमिति कथ्यते।" इति वचनात् शोभनमध्ये उत्कृष्टानि इत्यर्थः। Q. Decline भाज्। Ans. पुंसि स्त्रियाञ्च भाक् भाजौ भाजः। क्लीं भाक् भाजी भाञ्जि इत्यादि। Q. Give the derivative meaning of, or allusion to अप्सरस्। Ans. 'अप्सु निर्मथनादेव रसात् तस्मात् वरस्त्रियः। उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन् ॥' ७।

8. Principal sentence :—यस्याम् (अयोध्यायाम्) अन्तर्निविष्टोज्ज्वलरत्नभासः भान्ति। Adjunct to भासः ;—गृहेभ्यः गवाक्षजालैः अभिनिष्पतन्त्यः, हिमाद्रिटङ्कात् इव अभिनिष्पतन्त्यः and गङ्गाम्बुपातप्रतिमाः।

Prose order :—अन्तर्निविष्टोज्ज्वलरत्नभासः गृहेभ्यः गवाक्षजालैः अभिनिष्पतन्त्यः (सत्यः) हिमाद्रिटङ्कात् (अभिनिष्पतन्त्यः) गङ्गाम्बुपातप्रतिमा इव भान्ति। Or see below.

Substance :—यस्याम् अयोध्यायाम् उच्चगृहमध्यस्थिताः रत्नदीप्तयः तेभ्यः गवाक्षरन्ध्रैः आलकैः निष्पतन्त्यः तथा शोभामवापुः यथा गङ्गाजलपाताः हिमालयस्य विदीर्णप्रस्तरभागात् पतन्तः शोभाम् अधिगच्छन्ति।

Explanation in tika form :—यस्याम् अयोध्यायाम् अन्तर्गृहमध्ये निविष्टानां निहितानाम् अर्पितानामित्यर्थः। उज्ज्वलानाम्प्रदीप्तानां रत्नानां भासः

दीप्तय: ["स्व: प्रभा रुग् रुचिस्त्विड् भा भा छवि द्युति दीप्तय:" इत्यमर:] गृहेभ्य: गवामक्षीणीव गवाक्षा: ["अक्ष्णोऽदर्शनात्" इति अच्] वातायनानि ["वातायनं गवाक्ष: स्यात्" इत्यमर:] तेषां जालै: समूहै: जालकै: वा अभिनिष्पतन्त्य: नि:सरन्त्य: सत्य: हिमस्याद्रि: हिमाद्रि:, अथवा हिमेन युतोऽद्रि: हिमालय:, तस्य टङ्कात् 'पाषाणदारणात् विदीर्णप्रस्तरभागादित्यर्थ:, ["टङ्क: पाषाणदारणे" इति विश्व:] अभिनिष्पतन्त्य: गङ्गाम्बुपातप्रतिमा गङ्गाजलप्रवाहतुल्या इव भान्ति शोभन्ते। तामयोध्याम् अध्यास्त इति पूर्व्वेण अन्वय:। [एतै: चतुर्भि: श्लोकै: कलापकम् उक्तम्। तथाहि, "द्वाभ्याम् युग्मम् इति प्रोक्तम्, त्रिभि: श्लोकै: विशेषकम्, कलापकम् चतुर्भि: स्यात् तदूर्द्धम् कुलकम् स्मृतम्।" श्लोकेऽस्मिन् प्रतिमाशब्द: इवार्थे प्रयुक्त:। अतोऽत्र अनेकेवशब्देन उपमा। उक्तञ्च दण्डिना—"एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा।" वृत्तम् उपजाति:।]

[श्लोकस्य अस्य एवं वा अन्वय: क्रियतां यथा—यस्यां गङ्गाम्बुपातप्रतिमा: अन्तर्निविष्टोज्ज्वलरत्नभास: हिमाद्रिटङ्कादिव गृहेभ्य: गवाक्षजालै: अभिनिष्पतन्त्य: सत्य: भान्ति।]

Change of V:—भाभि: अभिनिष्पतन्तीभि: भायते गङ्गाम्बुपातप्रतिमाभि:।

Derivations &c.—रत्नम्—रमयति हर्षयति इति रत्नम् इति रमेर्ण्यन्तात् न प्रत्यय:। Diff nt.—"रत्नम् स्वजातिश्रेष्ठेऽपि रत्न' माणिक्यमिष्यते" निविष्ट—नि-विश्धातो: कर्त्तरि क्त:। लुङ् अविक्षत्। अद्रि:—अद्धातो: क्रिन्। टङ्क:—टकि बन्धे इत्यस्मात् घञ्। टङ्कयति लट्, अटटङ्कत् लुङ्।

যে অযোধ্যার গৃহাভ্যন্তরস্থিত উজ্জ্বল রত্নের দীপ্তি গবাক্ষজাল দ্বারা বহির্গত হইয়া হিমালয়ের ভগ্ন প্রস্তর নিঃসৃত গঙ্গার প্রপাত অনুকরণ করিতেছে।

In which city, the lustre of the bright jewels deposited within, shooting out through the windows from the houses, shine forth as the 'very image' of the fall of the waters of the Ganges through the declivity of the mount Himalaya, the seat of snow.

Q. Write notes on गङ्गाम्बुपातप्रतिमा:। (Ans. See above).

धर्म्याासु कामार्थयशस्करीषु
मतासु लोकेऽधिगतासु काले ।
विद्यासु विद्वानिव सोऽभिरेमे
पत्नीषु राजा तिसृषूत्तमासु ॥ ९ ॥

Q. Is there any gram. impropriety in गवाक्ष ? Ans. "गवेन्द्रगवाक्षौ नित्यम्" इति ओकारस्य 'अव' इति आदेशः, ननु भ्रम् । Q. Give the meaning of जाल in गवाक्षजालैः । Ans. गवाक्षसमूहैः, गवाक्षस्थितजालकैः वा । "जालं समूह आनायो गवाक्षचारकावपि" इत्यमरः । Q. Give the feminine form of the present participle of भा । Ans. भान्ती वा भाती । Q. Derive गङ्गा । Ans. गमनात् गङ्गा । गम्धातोः गन् । Q. Expound the samas in हिमाद्रिः । Ans. षष्ठीसमासः, मध्यपदलोपी कर्मधारयो वा । (See above.) ८ ।

9. Principal sentence :—स राजा पत्नीषु अभिरेमे । Adjunct to पत्नीषु and विद्यासु धर्म्यासु, कामार्थयशस्करीषु, लोके मतासु, काले अधिगतासु, तिसृषु and उत्तमासु । Simile to सः—विद्वान् विद्यासु इव ।

Prose order :—स राजा धर्म्यासु कामार्थयशस्करीषु, लोके मतासु काले अधिगतासु तिसृषु उत्तमासु पत्नीषु विद्वान् विद्यासु इव अभिरेमे ।

Substance :—विद्वान् यथा विद्याभिः परमां प्रीतिम् अधिगच्छति तथा स राजा पत्नीषु अरंस्त । पत्न्यश्च ताः विद्या इव धर्मानुगताः लोकसम्मताः कामार्थयशःप्रदाश्च आसन् ।

Explanation in tika form :—स राजा दशरथः धर्मादनपेतासु धर्म्यासु ["धर्मपथ्यर्थन्यायादनपेते" इति अनपेते अर्थात् अभ्रष्टे अर्थे यत्प्रत्ययः] एकत्र धर्मशीलासु, अन्यत्र धर्मोत्पादिकासु इत्यर्थः । कामश्च अर्थश्च यशश्च तानि कर्तुं शीलं यासां तासु ["कृञो हेतुताच्छील्यानुलोम्येषु" इति टः प्रत्ययः] लोके जने मतासु पूजितासु ["लोकस्तु भुवने जने" इत्यमरः] काले विवाहयोग्ये

काले अधिगतासु परिणीतासु, पक्षे शैशवकाले गृहीतासु,तिसृषु कौशल्याकैकेयी-सुमित्रासु, पक्षे ऋक्सामयजुराख्यासु इत्यर्थः। उत्तमास्तु सन्नारीगुणैः समेतासु पक्षे श्रेष्ठासु, पत्नीषु स्त्रीषु, विद्वान् विपश्चित् अधिगतविद्य इत्यर्थः [विदेः शतुर्वसुः। "विद्वान् विपश्चिद्दोषज्ञः" इत्यमरः।] विदन्ति याभिः धर्म्माधर्म्मौ इति विद्या ["संज्ञायां समजनिषदेत्यादिना क्यप्] तासु इव अभिरेमे चिक्रीड। विद्वान् यथा विद्यया तुष्यति तथा स पत्नीभिः तुतोष इत्यर्थः। [श्रौती पूर्णोपमा। वृत्तम् उपजातिः।]

Change of V.—विदुषा इव तेन रेमे।

Derivation—धर्म्म्या—धर्म्म+यत्। यशस्करी—यशस्-कृ-ट, स्त्रीत्वात् ङीप्। मता—मन कर्म्मणि क्तः। विद्या–विद्-क्यप्। विद्वान्–विद्-शतृ विदेः शतुर्वसुः। अभिरेमे–अभि-रम-लिट् ए। लटि रमते। लुङ् अरंस्त। पत्नी–पति ङीप् 'पत्युर्नो यज्ञसंयोगे' इति नकारः। राजा–रेजनार्थस्य राज्-धातोः कनिन्। उत्तमः–उद् इत्यस्मात् तमप्।

বিদ্বান যেরূপ বিদ্যাত্রয়ে প্রীতি লাভ করেন, সেইরূপ রাজা পত্নী-ত্রয়ে পরিতোষ লাভ করিয়াছিলেন। বিদ্যার ন্যায় তাঁহারাও ধর্ম্ম্যা অর্থাৎ ধার্ম্মিক স্বভাবা ছিলেন, অর্থ ও যশঃ বিধান করেন, লোকের শ্রদ্ধেয় ছিলেন, ও উচিত সময়ে অধিগত অর্থাৎ বিবাহিত হন।

He delighted in his three excellent wives, as the learned one does in the three branches of learning. The wives were, like the three branches of learning, full of virtues, brought, pleasure, profit, and fame; were honord in the world; and, were got in due time.

Q. Write gram. notes on मतासु **and give its nominative.** Ans. 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्त्तमाने कर्म्मणि क्तः लोकानामिति कर्तृपदम् उह्यम्। "क्तस्य च वर्त्तमाने" इति तत्र षष्ठी। **Q Is there any impropriety of** समासवाक्य **in** कामार्थयशस्करीषु Ans. "अजाद्यदन्तम्" इति अजन्तस्य पूर्व्वनिर्द्देश एव भवति अर्थकामयशांसि इत्येवं युज्यते। तथापि "बहुषु अनियमः" इति यथेष्टप्रयोगः। Q. Ex-

प्रणीयता तेन वराङ्गनाभि-
रानायि विद्वान् क्रतुषु क्रियावान्।
विपक्षिमज्ञानगतिर्मनस्वी
मान्यो मुनिः स्वां पुरमृष्यशृङ्गः ॥ १० ॥

plain in English the above stanza, Ans. स तिसृषु उत्तमासु पत्नीषु अभिरेमे He (the King Dasaratha) delighted in his three excellent wives, धर्म्मागासु full of virtues, कामार्थयशस्कारीषु who brought him (the King) pleasure, profit and ame, लोके मतासु who were honored in the world, काले, अधिगतासु and were married in due time (and as regards learning they were attained in due time, *i. e.* in infancy) विद्वान् विद्यासु इव as a learned man does (delights) in the three branches of learning. Q. Decline the base of विद्वान् n the feminine gender, in the 3rd case. Ans. विदुष्या विदुषीभ्याम् विदुषीभिः। ९।

10. Principal sentence :—तेन वराङ्गनाभिः ऋष्यशृङ्गः स्वां पुरम् आनायि। (He brought the ascetic to his capital by means of some handsome women). Adjective to तेन—प्रणीयता। Adjectives to ऋष्यशृङ्गः—मुनिः, विद्वान्, क्रतुषु क्रियावान्, विपक्षिमज्ञानगतिः, मनस्वी, and मान्यः।

Prose order :—प्रणीयता तेन वराङ्गनाभिः, विद्वान् क्रतुषु क्रियावान् विपक्षिमज्ञानगतिः मनस्वी मान्यः मुनिः ऋष्यशृङ्गः स्वां पुरम् आनायि।

Substance :—अपुत्रो दशरथः पुत्रेष्टिं निर्व्वाहयितुमिच्छुः पुत्रीयक्रतुमं ...नस्विनम् ऋष्यशृङ्गम् नाम कृतविद्यम् ऋषिकुमारं वराङ्गनाभिः विलोभ्य नगरम् आनीतवान्।

Explanation in tika form :—['ऋष्यशृङ्गनामा मुनिः पुत्रीयं क्रतु'

जानाति' इति, पुरोधसः वशिष्ठात् उपभुज्य राज्ञा वारविलासिनीभिः आनायितो मुनिः,इत्याह पुत्रीयतेति।] पुत्रीयता आत्मनः पुत्रमिच्छता [“सुप आत्मनः क्यच्”*] तेन राज्ञा प्रयोजककर्म्म वराङ्गनाभिर्वरस्त्रीभिः प्रयोज्यकर्त्तृभिः। [“नीवह्यो-र्न” इति नाययतेः अणिकर्त्तुः न कर्म्मत्वं। अतः प्रयोज्यकर्त्तरि तृतीया, नतु गतिबुद्धीत्यादिना द्वितीया।] विद्वान् वेदार्थतत्त्ववित् पण्डित इत्यर्थः। क्रतुषु यज्ञेषु क्रियावान् प्रशस्तक्रियः। [प्रशंसायां मतुप्। यदुक्तम् “भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥”] विपाकेन निर्वृत्ता ज्ञानस्य गतिर्मार्गो यस्येति विपक्त्रिमज्ञानगतिः विनोपदेशात् ज्ञानमस्य जात-मित्यर्थः, स्वयम् अतिपरिणतज्ञानमार्ग इति भावः।। [“गतिर्मार्गे दशायाञ्च ज्ञाने यात्राद्युपाययोः” इति विश्वः।] मनस्वी प्रशस्तमनाः [“अस् मायामेधास्रजो विनिः” इति विनिः।] मान्यः मानार्हः [“अर्हे कृत्यतृचश्च” इति ण्यत्।] ऋष्यस्य मृगस्य शृङ्गम् ऋष्यशृङ्गम्, ऋष्यशृङ्गमिव शृङ्गमस्य इति,[“सप्तम्युपमानपूर्व्वस्य च उत्तरपद-लोपः” इति उत्तरपदलोपी समासः।] ऋष्यशृङ्गो नाम मुनिः। [“गौणे कर्म्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्” इति वचनात्, मुख्ये कर्म्मणि प्रथमा।] स्वां पुरं स्वकीयां राजधानीं [“अकथितञ्च” इति गौणे कर्म्मणि द्वितीया।] आनायि आनायितः। [ण्यन्तात् आपूर्व्वकनीधातोः प्रधाने कर्म्मणि लुङ्।]

अलङ्कारः—छेकानुप्रासः,'वृत्तमुपजातिः।

Change of V.—पुत्रीयन् सः, विद्वांसं क्रियावन्तं विपक्त्रिमज्ञानगतिम् मनस्विनम् मान्यम् ऋष्यशृङ्गम् मुनिम् स्वां पुरीम् अनीनयत्।

Derivation—पुत्रीयता—(पुत्र+क्यच) पुत्रीय नामधातोः शतृ ३या। आनायि—आ-नी-कर्म्मणि लुङ् त। क्रतु—कृ-क्रतु। “कृञः क्रतुः।” क्रियावान्—क्रिया-प्रशस्तार्थे मतुप्। विपक्त्रिम—वि-पच-त्रिमक्। डुपच् पाके इति डुयोगात् “ड्वितस्त्रिमक्” इति त्रिमक्। अपाक्षीत्-लुङ्। मनस्वी—मनस्—विनिः प्रशस्तार्थे। मान्य—मन-ण्यत्।

---

* इषिकर्म्मणः एषितृसम्बन्धिनः सुबन्तात् इच्छायामर्थे क्यच् प्रत्ययो वा स्यात् इति क्यच्।

যে মাননীয় মনস্বী মুনি ঋষ্যশৃঙ্গের পূর্ব্বজন্মলব্ধ জ্ঞানরাশি ইহ জন্মে পরিপাক লাভ করিয়াছিল, রাজা পুত্রার্থী হইয়া সেই যজ্ঞ ক্রিয়া-শীল বিদ্বান্ ঋষিকে রূপলাবণ্যবতী রমণীগণ দ্বারা নিজ পুরীতে আনয়ন করিয়াছিলেন।

•The learned and highminded Riswasringa, the venerable ascetic, whose extensive knowledge of his previous life was now brought to maturity, and who was well acquainted with the ceremonies of a sacrifice, was, by the help of handsome women, brought to the city, by the King desiring a son.

Q. Account for the first case in मुनिः and 2nd in पुरीम्। Ans. See above. Q. Expound the samas in ऋष्यशृङ्गः। Ans. See above. Q. Show the propriety of the adjectives to ऋष्यशृङ्गः। Ans. सर्व्वेषामव विशेषणानां प्रत्येकं ऋषेः पुत्रेष्टिक्रियासम्पादनक्षमत्वं द्योतयति। Q. In what sense is विन् used in मनस्वी। In what other senses can such affixes be used ? Ans. See above and add, (विन् has the sense of मतुप) भूम्नि यथा, गोमान्। अतिशायने यथा, उदरवती। संसर्गे यथा, दण्डी। निन्दायां यथा पापी। नित्ययोगे यथा चीरी इत्यादि। Q. Can there be any syntactical change in स्वाम्। De-cline also the base. Ans. The syntactical change is स्वस्य पुरम्। Declension—"स्वोज्ञातावात्मनि" इति ज्ञातौ आत्मनि च अर्थे पुंस्त्वम्। "स्वम् अज्ञातिधनाभिधः" इति ज्ञातिभिन्ने अर्थे सर्व्वनामता। अतः आत्मनि अर्थे रूपं 'सर्व्व'शब्दवत् यथा, स्वः स्वौ स्वे, स्वं इत्यादि। "स्वं त्रिष्वात्मीये" इति विशेषणत्वे लिङ्गत्रयम्। सर्व्वशब्दवच्च रूपम्। "स्वोऽस्त्रियां धने" इति धनार्थे पुंस्त्वं क्लीवत्वञ्च। धनार्थे तु न सर्व्वनामता, अतः फलवत् रूपम्। Q. Explain fully विपक्विमज्ञानगतिः। Ans. विपाकेन निर्वृत्ता ज्ञानगतिः यस्य तादृशः। यस्य पूर्व्वजन्मार्जितं ज्ञानम् इह जन्मनि तम्

ऐहिष्ट तं कारयितुं कृतात्मा
क्रतुं नृपः पुत्रफलं मुनीन्द्रम् ।
ज्ञातार्थयस्तस्य ततो व्यतानीत्
स कर्मठः कर्म सुतानुबन्धम् ॥ ११ ॥

समुपस्थितम् । तथाहि "पूर्व्वजन्मार्ज्जिता विद्या पूर्व्वजन्मार्ज्जितं धनं । पूर्व्वजन्मार्ज्जितं पुण्यम् अग्रे धावति धावति ।" उक्तञ्च—"तां हंसमालाः शरदीव गङ्गां, महौषधीं नक्तमिवात्मभासः । स्थिरोपदेशाम् उपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥" कुमार: । १० ।

11. Principal sentence :—नृपः तं क्रतुं कारयितुम् ऐहिष्ट । Adjective to नृपः—कृतात्मा । Adj. to तम्—मुनीन्द्रम् । Adj. to क्रतुम्—पुत्रफलम् । Another principal sentence—ततः स तस्य कर्म्म व्यतानीत् । Adj. to सः—ज्ञाताश्रयः and कर्मठः । Adj. to कर्म—सुतानुबन्धम् ।

Prose order :—कृतात्मा नृपः तं मुनीन्द्रं पुत्रफलं क्रतुं कारयितुम् ऐहिष्ट । ततः कर्मठः सः ज्ञाताशयः (सन्) तस्य सुतानुबन्धम् कर्म्म व्यतानीत् ।

Substance :— राजा तेन मुनिना पुत्रेष्टिं सम्पादयितुं अभिलाषम् अकरोत् । ऋष्यशृङ्गश्च राज्ञः मनोभावं ज्ञात्वा पुत्रयज्ञमारब्धवान् ।

Explanation in tika form :—कृतः अनुष्ठितः आत्मा यत्नो येन तथोक्तः ["आत्मा यत्नो धृतिर्बुद्धि"रित्यमरः ।"] अथवा कृतात्मा वशीकृतचित्त इति भावः । [तथाच धरणिः "आत्मा कलेवरे यत्ने स्वभावे परमात्मनि चित्ते धृतौ च बुद्धौ च ।" इति] नृपः दशरथः तं मुनीन्द्रं मुनिश्रेष्ठं ऋष्यशृङ्गं ["ह्रक्रोरन्यतरस्याम्" इति कारयतेश्च अणौ यः कर्त्ता तस्य णौ विकल्पेन कर्मसंज्ञत्वात् द्वितीया । पक्षे मुनीन्द्रेण इति तृतीया स्यात् ।] पुत्रः फलं कार्य्यं यस्य तथाभूतं क्रतुम् यज्ञं ["यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः" इत्यमरः] कारयितुं ऐहिष्ट ईहितवान् । ततोऽनन्तरं कर्मठः कर्मणि घटते इति कर्मठः ["कर्म्मणि घटोऽठच् ।" इति अठच् ।] यागक्रियानिष्पादकः इत्यर्थः । स मुनीन्द्रः ज्ञातः

विदित: आशय: अभिप्रायो येन तथोक्त:, राज्ञो विदितचित्त: सन् तस्य राज्ञ: सुतान् अनुबध्नातीति सुतानुबन्धम्। [कर्म्मण्यण्। सुतानुबन्धीति पाठे—सुतान् अनुबन्धुं शीलमस्य इति "सुप्यजातौ णिनिस्ताच्छील्ये" इति णिनि:। अथवा सुतानुबन्ध: विद्यते अस्य इति इन्।] तथाभूतं कर्म्म व्यतानीत् प्रारब्धवान्।

अलङ्कार:—कर्म्मठ: कर्म्म इति व्यञ्जनसङ्घस्य सकृत्साम्येन छेकानुप्रास:। वृत्तमुपजाति:।

Change of V.—ऐहि......कृतात्मना नृपेण। ज्ञाताशयेन व्यतानि तेन कर्म्मठेन......।

Derivation :—ऐहिष्ट—ईह लुङ् त। लट् ईहते। लिट् ईहाञ्चक्रे कृतु—"क्रञ: कतु:" इति कृधातो: कतु:। व्यतानीत्—वि-तन्-लुङ्-द्। तनोति तनुते लट्। लुङ् अतत, अतनिष्ट, अतानीत्। लिट् ततान, तेने। कर्म्मठ:—कर्म्म-अठच्। सुतानुबन्धम्—सुत-अनु-बन्ध-अण्।

জিতেন্দ্রিয় নৃপতি সেই মুনীন্দ্র দ্বারা পুত্রেষ্টি সম্পাদন করাইতে অভিলাষ করিলেন। যজ্ঞক্রিয়ানিপুণ ঋষিও তাঁহার অভিপ্রায় জানিতে পারিয়া পুত্রলাভার্থক ক্রিয়া অনুষ্ঠান করিলেন।

The King with his passions subdued, desired him to perform ceremonies 'resulting in the blessing of' a son. The Rishi, skilful in sacrifice, knowing his intention, set up to perform the ceremonies relating a son.

Q. Give the significance of कृतात्मा and ज्ञाताशय:।
Ans. कृतात्मा—प्रयत्नकरणेच्छो: इन्द्रियसंयममनुचितम्। स च राजा तद्वान् आसीत् इत्यर्थ:। ज्ञाताशय:—स्वस्यानयनहेतुं ज्ञात्वा राज्ञ: ईप्सितं सम्पादयितुम् इच्छु: इत्यर्थ:। Q. Give the derivative meaning of मुनीन्द्र, its विग्रह and significance. What is the feminine form of मुनि। Ans. 'मनेरुच्च' इति मन्धातो: इन्प्रत्यये अकारस्य उकार:। धर्म्मादिमननात् मुनि:। इन्द्र:—इदि परमैश्वर्य्ये इति इन्द्धातो: रन्। "इन्द्र: शचीपतावन्तरात्मसूर्यादियोगयो:" इति विश्ववचनात्। मुनि: इन्द्र

रक्षांसि वेदीं परितो निरास्थ-
दङ्गान्ययाक्षीदभितः प्रधानम् ।
शेषाण्यहौषीत् सुतसम्पदे च
वरं वरेण्यो नृपतेरमार्गीत् ॥ १२ ॥

इव आदित्य इव इति उपमितसमासः । एतेन अस्य तपःप्रभावः सूचितः ।
स्त्रियाम् मुनिः मुनी च, यथा मुनिरियं ब्राह्मणी । ११ ।

12. This is a compound sentence composed of four simple sentences, given below one after the other.

Prose order :—वरेण्यः (मुनिः) वेदीं परितः रक्षांसि निरास्थत्। प्रधानम् अभितः अङ्गानि अयाक्षीत्। शेषाणि नृपतेः सुतसम्पदे अहौषीत्। वरं च अमार्गीत्।

Substance :—ऋषिः प्रथमं यज्ञविघाताय वेदीं समया समुपस्थितान् राक्षसान् निराकृत्य, अङ्गयागैः सार्द्धं प्रधानयागमकरोत् । पश्चात् पुत्राणां सौभाग्याय पिष्टकमयानि प्रतिकृतानि अग्नौ जुहाव, नृपतेः पुत्रार्थं वरञ्च प्रार्थितवान् ।

Explanation in tika form :—वरेण्यः श्रेष्ठः ["मुख्य वर्य वरेण्याश्च" इत्यमरः] स मुनिः वेदीं परितः यजनवेद्याः समन्तात् ["वेदिः परिष्कृता भूमिः" इत्यमरः ।] रक्ष्यन्ते एभ्यः इति रक्षांसि, असुन्प्रत्ययः । विघ्नार्थोपस्थितानि इत्यर्थः । निरास्थत् रक्षोघ्नमन्त्रैर्निराकृतवान् । प्रधानमभितः प्रधानयागस्योभयपार्श्वे आदावन्ते च, अङ्गानि अयाक्षीत् अङ्गयागानकार्षीत् । ["नवग्रहमखं कृत्वा ततः कर्म्म समाचरेत्" इति अङ्गयागानामवश्यकर्त्तव्यत्वात् । यद्वा पुत्रफलत्वादत्र विष्णुः प्रधानं तमिष्ट्वा तस्य उभयपार्श्वे, अङ्गानि चत्वरादीनि लोकपालादीन् वा अयाक्षीत इत्यर्थः । "परितः अभितः" इत्यत्र "पर्यभिभ्याञ्च" "सर्व्वोभयार्थाभ्यामेव" इति तसिल् । तयोर्योगे च "अभितः परितः समया निकषा हा प्रतियोगेऽपि" इति वेदीम् प्रधानञ्च उभयत्र द्वितीया । एतेन साक्षात् वैदिककर्म्मणः फलावश्य-

भाव इति सूचितम्।] शेषाणि ["शेषः परार्थत्वात्" इति मीमांसासूत्रम्। यः परस्य उपकारे वर्त्तते स शेषः इत्युच्यते इति च भाष्यवचनम्; इति शेषाणि] परमोपकारीणि सर्व्वाणि। साङ्गं विष्णुमिश्र प्रतिक्रतानि पिष्टकमयानि इति यावत्, सुतानां सम्पदे सम्पदर्थम् अहौषीत् अग्नौ हुतवान्। वरं, हे देवा अग्नि-प्रभृतयो नृपतेः सुता भूयासुरित्यादिरूपञ्च अमार्गीत् मार्गितवान्। ["देवाद्वृते वरः, श्रेष्ठे त्रिषु, क्लीवे मनाक् प्रिये" इत्यमरः। मार्गधातोः लुङ्। दीपकालङ्कारः। वृत्तमुपजातिः।]

Change of V.—रक्षांसि निरासिषत।

Derivation—रक्षांसि—रक्ष्-असुन्। परितः—परि-तसिल्। निरास्थत् —निर्-अस-लुङ्द्। लट् अस्यति। अयाक्षीत्—यज्-लुङ्द्। यजति यजते लट्। अहौषीत्—हु-लुङ्द्। लट् जुहोति। लिट् जुहवामास जुहवाञ्चकार, जुहवाम्बभूव जुहाव। वरेण्य—वृ-एण्यः। अमार्गीत्—चुरादौ अममार्गत; मार्ग के अन्वेषणे इति मार्गधातोः लुङ्। लटि मार्गति मार्गयति। तथाहि "यो मार्गयति सन्मार्गम् मार्गात क्षेममात्मनः" इति कविरहस्यम्।

माननीय ऋषि वेदीर चतुष्पार्श्वस्थ राक्षस विदूरित करिलेन। प्रधान यागेर पूर्व्ववर्त्ती ओ परवर्त्ती अङ्ग याग अनुष्ठान करिलेन। पुत्रेर सम्पदर्थ महोपकारी पिष्टकमय होमीय द्रव्य हुताशने आहुति दिलेन। एवं भूपतिर जन्य वर भिक्षा करिलेन।

The revered Rishi warded off the demons from all sides of the altar, performed the subordinate ceremonies both anticident and consequent to the principal one. He made an offering of the most beneficial ones for the fortune of his son and begged for conferring the boon on the prince.

Q. Give the लट् form of the base of अमार्गीत्। Ans. See above. Q. Write notes on अयाक्षीत्। Ans. यजे जी देवार्च्चादानसङ्गकतौ इति यजधातोः उभयपदित्वेनापि कर्त्तुः क्रियाफला-भावात् न आत्मनेपदम्। क्रियाफलं राज्ञि एव नतु यागकर्त्तरि ऋषौ। अतः

निष्ठां गते दत्रिमसभ्यतोषे
विहित्रिमे कर्म्मणि राजपत्न्यः ।
प्राशुर्हुतोच्छिष्टमुदारवंश्या-
स्तिस्रः प्रसोतुं चतुरः सुपुत्रान् ॥ १२ ॥

पस्मैपदम् । Q. Account for नपुंसक in शेषाणि । Ans. "शाकाश्च कुलिश्च भद्रश्च शेष वेशे" इत्यादिदृष्टेवचनबलात् नपुंसकत्वम् । Q. Show the significance of भङ्गानि भयाचीत् । Ans. See above. १२ ।

13. Principal sentence :—कर्म्मणि निष्ठां गते सति, सुपुत्रान् प्रसोतुम् राजपत्न्यः हुतोच्छिष्टं प्राशुः । Adjectives to कर्म्मणि—दत्रिम-सभ्यतोषे and विहित्रिमे । Adj. to पत्न्यः—तिस्रः and उदारवंश्याः । Adj. to सुपुत्रान्—चतुरः ।

Prose order :—दत्रिमसभ्यतोषे विहित्रिमे कर्म्मणि निष्ठां गते, उदार-वंश्याः तिस्रः राजपत्न्यः चतुरः सुपुत्रान् प्रसोतुं हुतोच्छिष्टं प्राशुः ।

Substance :—ब्राह्मणानां परितोषेण सह यागे यथाविधानं समाप्तिं गते चतुर्णां पुत्राणाम् जननार्थं तिस्रः महिष्यः हुतशेषं भक्षितवत्यः ।

Explanation in ṭīka form :—दानेन निर्वृत्तः दत्रिमः [दाधातोः क्त्रिः, ततः मप् ।] सभायां साधवः सभ्याः, ["सभायाः यः" इति यः] तेषां सभ्यानां ब्राह्मणानां तोषो यत्र तस्मिन्, तथा, विधानेन निर्वृत्तं विहित्रिमे [धा-धातोः क्त्रिः, मप् च । (त्रिमक्) तस्य च हिरादेशः ।] कर्म्मणि पुत्रेष्टियागरूपे निष्ठां समाप्तिं गते यागक्रियायां समाप्तायामिति यावत् । ["यस्य च भावेन भावलक्षणम्" इति भावे सप्तमी । ब्राह्मणेषु कृतसन्तोषेषु, यागे च यथाशास्त्रं सम्पूर्णे सति, इत्यर्थः] उदारः प्रसिद्धः वंशः तस्मिन् भवाः उदारवंश्याः महावंशोद्भवाः इत्यर्थः । ["शेषे" इति यत्] तिस्रः, राजपत्न्यः राज्ञः दशरथस्य पत्न्यः, [पतिशब्दस्य स्त्रियां यज्ञसम्बन्धे ङीप् नुक् च ।] कौशल्या कैकेयी सुमित्रा च । चतुरः सुपुत्रान् शोभनपुत्रान् प्रसोतुं प्रसवितुं [इट् विधानं वैकल्पिकम् । तादर्थ्ये तुमुन् ।] हुतस्य उच्छिष्टं हुतावशेष

भिष्टचरुमित्यर्थः। प्रायः भक्षितवत्यः। [अत्र रामायणम्—"कौशल्यायै नरपतिः पायसार्द्धं ददौ तदा। अर्द्धादर्द्धं ददौ चापि सुमित्रायै नराधिपः। कैकेय्यै चावशिष्टार्द्धं ददौ पुत्रार्थकारणात्। प्रददौ चावशिष्टार्द्धं पायसस्यामृतोपमम्। अनुचिन्त्य सुमित्रायै पुनरेव महामतिः।" इत्यादिचतुर्भागैः पुत्रचतुष्कम्। श्लोकेऽस्मिन् हतसुपलभ्यते।]

Change of V.—तिसृभिः राजपत्नीभिः......प्राशि।

Derivations:—दक्षिण—दा-द्विणक। सभ्य—सभा-यः। विहितिम—वि-धा-क्तिमक्। प्रायुः—प्र-अश्-लिट् उस्। लट् अश्नाति। लोट् हि अशान। वंश्या—वंश-यत्। प्रसोतुं —प्र-सू-तुमुन्, प्रसवितुम् वा।

N. B. श्लोकोऽयम् विमकप्रत्ययस्य उदाहरणम्।

ধনদানে ব্রাহ্মণদিগের পরিতোষ বিধানান্তর যজ্ঞ কার্য্য যথাবিধি সমাপিত হইলে, মহাকুলোদ্ভবা রাজপত্নীত্রয় সুপুত্র চতুষ্টয় প্রসবার্থ হুতশেষ ভক্ষণ করিলেন।

The ceremony properly conducted being over with the satisfaction of the Brahmans by gifts, the three queens born of high family, tasted the leaving of the sacrifice to give birth to four sons of high eminence.

Q. Account for सप्तमी in गते। Ans. कर्म्मणि इत्यत्र भावाधिकरणे सप्तमीविधानात्, तस्य च विशेषणतया 'गते' इत्यत्र सप्तमी। गोयीचन्द्रस्तु "येन वा लक्ष्यते भावो भावेनैवाव्ययकर्तृकः। सप्तमी विहिता तत्र तद्विशिष्टपदेऽपि च।" इति क्रियापदे एव भावाधिकरणत्वात् 'गते' इत्यत्र भावे सप्तमी, कर्म्मणि इत्यत्र तु तद्विशेष्ये सप्तमी। Q. Account for the formation of the word विहितिमे। Ans. See above. Q. Explain the significance of दक्षिणसभ्यतोषे। Ans. अत्र सभ्यपदेन ब्राह्मणानाम् अध्ययनविद्याहत्वादिसम्पन्नत्वं द्योतितम्। यज्ञकाले सत्पात्रप्रतिपादनमवश्यं कर्त्तव्यम् इति दक्षिणपदप्रयोगः। तथाहि याज्ञवल्क्यः "एवं मन्त्रविद्याभ्यां वृत्तेन च समुज्झिताः। त्रिसुक्तनाम विप्रेन्द्राः पूज्यन्ते सवनादिषु।"

कौशल्ययासावि सुखेन रामः
प्राक्केकयीतो भरतस्ततोऽभूत् ।
प्रासोष्ट शत्रुघ्नमुदारचेष्टम्
एका सुमित्रा सह लक्ष्मणेन ॥ १४ ॥

सधनं=यशः । Q. Show the fitness of राजपत्नाः here. Ans. पतिशब्दस्य स्त्रियाम् ङीप् । यज्ञसम्बन्धे नुक् विधानात्, पत्नीशब्देन तासां यज्ञाधिकारः गम्यते । १३ ।

14. It is a compound sentence composed of three simple sentences, as follow.

Prose order :—कौशल्यया प्राक् सुखेन रामः असावि । ततो भरतः केकयीतः अभूत् । एका सुमित्रा लक्ष्मणेन सह उदारचेष्टं शत्रुघ्नं प्रासोष्ट ।

Substance :—प्रथमम् कौशल्या रामम्, ततः केकयी भरतम्, पश्चात् सुमित्रा लक्ष्मणम् शत्रुघ्नञ्च जनयामास ।

Explanation in tika form :—कोशलस्य राज्ञोऽपत्यं कौशल्या ["वृद्धेत्कोशलाजादाञ्ञ्यङ्" इति ञ्यङ् । स्त्रीत्वादाप् ।] तया प्राक् प्रथमं सुखेन अक्लेशेनैव [प्रकृत्यादित्वात् तृतीया । महतां जन्मनि न काचिदपि पीड़ास्ति इति भावः ।] रामः असावि जन्यते स्म । ["बलभद्रे जामदग्न्ये रामो दाशरथौ सुतः ।" इति अजयकोषः । कर्मणि लुङ्] ततोऽनन्तरं भरतः केकयीतः अभूत् जातः इत्यर्थः ।' ["भुवः प्रभवः" इति केकयीतः इत्यत्र पञ्चमी । केकयानां राजा इति केकयः, अण् लोपः । ततः केकयशब्दे जनपदजनकभावोपचारात् केकयः केकयपुत्रः, स्त्रियाञ्च केकयी इति भवति] एका सुमित्रा । [एकैव्यत् एकैवेति गम्यमानत्वात् एव-शब्दो न प्रयुक्तः ।] लक्ष्मणेन सह, उदारा महती चेष्टा यस्य तथोक्तं, शत्रून् हन्तीति शत्रुघ्नस्तम् प्रासोष्ट प्रसूतवती । ["सहयुक्तेऽप्रधाने" इति सहयोगे लक्ष्मणेन इत्यत्र तृतीया ।]

Change of V.—कौशल्या रामम् असविष्ट or असोष्ट । भरतेन...... अभावि । सुमित्रया उदारचेष्टः शत्रुघ्नः......प्रासावि ।

आर्च्चीद्द्विजातीन् परमार्थविन्दान्
उदेजयान् भूतगणान् न्यषेधीत् ।

Derivation :—असावि—सू-कर्म्मणि लुङ् तन् । लट् सूते । रामः—रम्धातोः णः घञ् वा । शत्रुघ्न—शत्रु-हन्-मूलविभुजादित्वात् कः । भरतः—भरं तनोति इति भरतः । तन्धातोः डः ।

প্রথমে কৌশল্যা সুখে রাম প্রসব করিলেন, তৎপরে কেকয়ী হইতে ভরত উদ্ভূত হইলেন। অবশেষে সুমিত্রা, লক্ষ্মণের সহিত উদারচেষ্ট শত্রুঘ্নকে প্রসব করিলেন।

Ram was first brought forth with ease by Kousalya. Bharat was next begotten of Kekayi. Sumitra alone gave birth to magnanimous Satrughna preceded by Lakshman.

Q. Show from the syntactical construction that लक्ष्मण was elder than शत्रुघ्न । Ans. सुमित्रा लक्ष्मणेन सह शत्रुघ्नं प्रासोष्ट । अर्थात् सुमित्रा न केवलं लक्ष्मणम् अपि तु शत्रुघ्नं प्रसूतवती । अत्र लक्ष्मणशत्रुघ्नयोः प्रसवक्रियायाः कर्म्मत्वेऽपि शत्रुघ्नपदेन क्रियायाः साक्षादन्वयः, लक्ष्मणपदेन तु दूरान्वयः, । अतः लक्ष्मणेन इत्यत्र अप्रधानत्वद्योतिका तृतीया विभक्तिः । "सह युक्ते अप्रधाने" । अप्रधाने अर्थात् गौणे न क्रियासमाप्तिः किन्तु मुख्ये एव । अतः लक्ष्मणं प्रसूय न सुमित्रायाः प्रसवक्रियासमाप्तिः किन्तु शत्रुघ्नं जनयित्वा । अतः लक्ष्मणः पूर्व्वं जातः, पश्चात् शत्रुघ्न इति सर्व्वमवदातम् ।

Q. Account for the form of केकयी । Ans. See above.

Q. Derive and give the meaning of राम । Ans. रमयति मोदयति इति रामः, रम्धातोः णः । अथवा रमन्ते अत्र इति रामः अधिकरणे घञ् । Meaning—"ना राघवे च वरुणे रैणुकेये हलायुधे । हये च पशुभेदे च त्रिषु चारौ सितेऽसिते ।" इति मेदिनी । रामशब्दस्य निरुक्तं यथा—"राशब्दो विश्ववचनो मश्चापीश्वरवाचकः । विश्वानामीश्वरो यो हि तेन रामः प्रकीर्त्तितः ।" इति ब्रह्मवैवर्त्तपुराणम् । १४ ।

विद्वानुपानेष्ट च तान् स्वकाले
यतिर्वशिष्ठो यमिनां वरिष्ठः ॥ १५ ॥

15. This is a compound sentence composed of three simple sentences. (1) वशिष्ठः द्विजातीन् आर्चीत्, (2) भूतगणान् न्यषेधीत् and (3) तान् स्वकाले उपानेष्ट च। Adj. to वशिष्ठः—विद्वान्, यतिः and यमिनां वरिष्ठः। Adj. to द्विजातीन्—परमार्थविन्दान्। Adj. to भूतगणान्—उदेजयान्।

Prose order :—विद्वान् यतिः यमिनां वरिष्ठः वशिष्ठः द्विजातीन् परमार्थविन्दान् आर्चीत्, उदेजयान् भूतगणान् न्यषेधीत् तान् स्वकाले उपानेष्ट च।

Substance :—संयमिनां वरो वशिष्ठः ब्राह्मणादीन् परमधनं ग्राहयित्वा पूजितवान्, उद्वेगकारकान् भूतगणान् निवारयामास, गर्भैकादशे वर्षे च रामादीनाम् उपनयनादिकं संस्कारम् आचरितवान् इति।

Explanation in tika form :—विद्वान् विचिन्नः पौरोहित्यकर्म्मणि कुशल इत्यर्थः। तथा यतते यमनियमादिषु इति यतिः मुनिः [तथाहि, "अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कषम्। इति पञ्च यमा येषां सन्तीति यमिनः स्मृताः।"] तेषां यमिनां संयमवतां तपोधनानां [निर्द्धारे षष्ठी। "न निर्द्धारणे" इति समासनिषेधः।] वरिष्ठः उरुतमः ["प्रियस्थिरस्फिरोरुबहुल गुरु वृद्ध तृप्र दीर्घ वृन्दारकाणां प्रस्थस्फव-र्बंहिगर्वर्षित्रप्द्राघिवृन्दाः" इति उरुशब्दस्य वरादेशः।] प्रकृष्टो वशी वशिष्ठः कुल-गुरुः। [केचित्, 'वसिष्ठ' इति वस-निवासे इति दन्त्यमध्यं साधयन्ति।] द्वे जाती येषामिति द्विजातयस्तान् ब्राह्मणक्षत्रियवैश्यान्। विन्दन्तीति विन्दाः ["अनुप-सर्गाल्लिम्प विन्द धारि पारि वेद्युदेजि चेति साति साहिभ्यश्च" इति शः।] परमार्थस्य उत्कृष्टधनस्य विन्दा लाभिनः ["कृद्योगा षष्ठी समस्यते इति वाच्यम्" इति षष्ठी-समासः] तान् अर्चेति शेषः। आर्चीत् परमधनेन पूजितवान् इत्यर्थः। उदेजयान् उत्कम्पान् उद्वेगकारिणः इति यावत्। [अनुपसर्गादित्यादिना शः।] भयहेतुकान् भूतगणान् राक्षसादीन् न्यषेधीत् उत्सादितवान्। तथा, तान् रामादीन्, स्वकाले क्षत्रियोपनयनयोग्ये गर्भैकादशे वर्षे, उपानेष्ट च, तेषाम् उपनयनादिक्रियां चकार।

["सम्माननोत्सञ्जनाचार्य्यकरण ज्ञान भृति विगणन व्ययेषु नियः" इति आचार्य्यकरणे उपनयतेरात्मनेपदम्।]


Change of V:—आर्चिषत द्विजातयः परमार्थविन्दाः। उद्जया भूतगणा न्यषेधिषत। विद्वा उपानायिषत ते यतिना वशिष्ठेन यमिनां वरिष्ठेन।

Derivations:—आर्चीत्—अर्च-लुङ् द। लट् अर्चति, लिट् आनर्च। विन्द—विद् शः। "वेत्ति वेद विद ज्ञाने विन्ते विद विचारणे। विद्यते विदि सत्तायां लाभे विन्दति विन्दते॥" इति लटि विन्दति विन्दते। उदेजयान्—उत्-एज-णिच् श (द्वितीया)। न्यषेधीत्—नि-सिध-लुङ् द। विद्वान्—विद-शतृस्थाने क्वसुः। उपानैष्ट—उप-नी-लुङ् त। यति—यत-इ। यमिन्—यम्-इन्। वरिष्ठ—उरु-इष्ठः।

সংযমিগণের শ্রেষ্ঠ বিদ্বান্ যতি বশিষ্ঠ, অভিলষিত ধনলাভে পরিতুষ্ট ব্রাহ্মণদিগের অর্চ্চনা করিলেন, ভীষণ দেবযোনিদিগকে নিরাকৃত করিলেন, এবং ক্রমে যোগ্যকালে তাহাদিগের উপনয়ন কার্য্য সমাধা করিলেন।

The learned Vasistha the ascetic, the best of the sages, honord the twice born with riches, warded off the terrifying evil spirits, and invested Ram and others with sacred thread in their proper season.

Q. Compound the words यमिनाम् and वरिष्ठः। Ans. यमिनाम् इत्यत्र निर्द्धारणे षष्ठी। "न निर्द्धारणे" इति निर्द्धारे षष्ठीसमासप्रतिषेधे नात्र समासः विधेयः। Q. Give the derivative meaning of यति, यमिन् and वशिष्ठ and show the significance of विद्वान्। Ans. (See above.) Q. Give the different meanings of अर्थः। Ans. "अर्थोऽभिधेय रै वस्तु प्रयोजन निवृत्तिषु।" Q. Expound the samas in स्वकाले। Ans. स्वः कालः, इति कर्मधारयः, अथवा स्वेषां कालः इति षष्ठीसमासः। Q. What is the meaning of विद here in परमार्थविन्दान्? Has the root any other meaning? Conjugate it in लट् ति।



वेदोऽङ्गवांस्तैरखिलोऽध्यगायि
शस्त्राण्युपायंसत जित्वराणि ।
ते भिन्नवृत्तीन्यपि मानसानि
समं जनानां गुणिनोऽध्यवात्सुः ॥ १६ ॥

Ans. See above "लाभे विन्दति विन्दते ॥" इत्यत्र विदधातोः लाभार्थत्वम् । १५ ।

16. This is a compound sentence composed of three simple sentences, thus :—तैः वेदः अध्यगायि । तैः शस्त्राणि उपायंसत । ते जनानां मानसानि अध्यवात्सुः । Adj. to वेदः—अङ्गवान् and अखिलः । Adj. to शस्त्राणि—जित्वराणि । Adj. to ते—गुणिनः । Adj. to मानसानि—भिन्नवृत्तीनि । समम् adv.

Prose order :—तैः अङ्गवान् अखिलः वेदः अध्यगायि । जित्वराणि शस्त्राणि उपायंसत । गुणिनः ते जनानां मानसानि भिन्नवृत्तीन्यपि समं अध्यवात्सुः ।

Substance—रामादयः चत्वारः भ्रातरः साङ्गं वेदम् अधीतवन्तः, यैरस्त्रैः जयो लभ्यते तादृशानि अस्त्राणि शिक्षितवन्तः, भिन्नरुचीनामपि लोकानाम् मानसानि तुल्यतया आकृष्टवन्तः ।

Explanation in tika form :—तैः उपनीतैः रामादिभिः । अङ्गवान्, ["शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चितिः । ज्योतिषां निचयश्चेति वेदाङ्गानि वदन्ति षट् ॥" इति] षडङ्गानि विद्यन्ते यस्येति अङ्गवान् साङ्ग इत्यर्थः अखिलः समग्रः वेदः अध्यगायि अधीतः । [अधिपूर्व्वात् इङः कर्म्मणि लुङि । यद्वा 'इक् स्मरणे' इत्यस्मात् सिद्धम्, अतएव तैः रामादिभिः पूर्व्ववेदिताः साङ्गा वेदा वसिष्ठ-मुखात् अधीता इत्यर्थः ।] जित्वराणि जयशीलानि ["इण् नशजिसर्त्तिभ्यः क्वरप्" इति क्वरप् ।] शस्त्राणि उपायंसत अधिकृतानि । ततः गुणिनः ते रामादयः जनानां मानसानि] मन एव इति मानसं स्वार्थे अण्] चित्तानि हृदयानीति यावत् ["उपान्वध्याङ्वसः" इति अधिकरणस्य कर्म्मसंज्ञा] भिन्ना वृत्तिः व्यापारो

तेषां तद्गीत्तानि विषयेषु नानाविधवत्त्वीन्यपि। "भिन्नरुचिर्हि लोकः", समं तुल्यतया (क्रियाविशेषणम्) अध्यवात्सुः अध्युषितवन्तः।

Change of V.—तै वेदमङ्गवन्तमखिलम् अधीतम् अथवा अध्यगीषत। ..... उपायंसिषुः। तैः गुणिभिः ......अवात्सत। (Compare the sloka 2nd where the active forms of इ and यम् are used.)

Derivation :—अङ्गवान्—अङ्ग-मतुप्। अध्यगायि—अधि-इ कर्म्मणि लुङ्‌ त। अधीते। अध्यगीष्ट अध्यैष्ट। उपायंसत—उप-यम्-कर्म्मणि लुङ्‌ अन्त। यच्छति लट्। अयंसीत्, लुङ् परस्मैपदे। जित्वर—जि क्वरप्। अजैषीत् लुङ्। जिगाय लिट्। अध्यवात्सुः—अधि-वस-लुङ् अन्। अध्यवात्सीत्—एकवचने।

তাঁহারা সমস্ত সাঙ্গ বেদ অধ্যয়ন করিয়াছিলেন, জয়শীল শস্ত্র লাভ করিয়াছিলেন। লোকের চিত্ত বিভিন্ন স্বভাবের হইলেও গুণবান্ রামচন্দ্র প্রভৃতি সকলে সমভাবে অধিকার করিয়াছিলেন।

The complete Veda, with its 'collaterals' was studied by them, Weapons conquering were attained by them. 'Highly accomplished' as they were, they dwelt alike in the thought of men though of different inclinations.

Q. Explain in English the sloka 16. Ans. वेदोऽङ्गवान् तैः निखिलोऽध्यगायि The complete Veda with its collaterals (*viz.* pronunciation, grammar, prosody, explanation of obscure terms, description of religious rites and astronomy) was tought by them, अस्त्राणि उपायंसत जित्वराणि weapons conquering were attained by them, गुणवन्ति highly accomplished as they were जनानां मानसानि समम् अध्यवात्सुः they dwelt alike in the thought of men भिन्नरुचीनि अपि though of different inclinations *i. e.* they occupied all minds though of different propensities, for their good

ततोऽभ्यगाद्गाधिसुतः क्षितीन्द्रम्
रक्षोभिरभ्याहतकर्म्मवृत्तिः ।
रामं वरीतुं परिरक्षणार्थम्
राजार्जिहत् तम् मधुपर्कपाणिः ॥ १७ ॥

nature. In a word, men of different likings loved them alike. Q. Annotate on अभ्यगाद्। Ans. यतस्ते रामादयः विप्रोवंशप्रभवाः वेदानां पूर्व्वश्रोतार आसन् अतः 'पुज् अरणे' इति अरणार्थस्य इक्धातोः कर्म्मणि लुङ् इति प्रशस्तम्। Q. Explain the force of अपि। Ans. भिन्नस्वभावानाम् मानसानाम् रामादिषु पृथग्विधाचरणमुचितमेव, तथापि ते रामादिषु तद्गुणैराकृष्टाः तुल्यवृत्तयः आसन् इति अपि शब्देन द्योत्यते। Q. Decline सम in the 4th case. Ans. "समोऽतुल्ये" इति अतुल्यार्थत्वे एव सर्व्वनामता। अत्र तु तुल्यार्थत्वात् नरशब्दवत् रूपम्। तथाहि समाः समाभ्याम् समेभ्यः। Q. In what sense is used इन् in गुणिन्। Ans. "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्ति विवक्षायाम् भवन्ति मतुबादयः।" इति प्रशंसायाम् इन्। Do you see any application of the Sutra "उपाद्यमः स्वकरणे in उपायंसत above? Ans नहि, सूत्रेऽस्मिन् कर्त्तरि एव आत्मनेपदं विवक्षितम्। कर्म्मणि वाच्ये तु विनैव सूत्रान्तरेण सर्व्वत्र आत्मनेपदं स्यात्। १६।

17. This is a compound sentence composed of two principal sentences. (1) गाधिसुतः रामम् वरीतुम् क्षितीन्द्रम् अभ्यगात्, (2) राजा तं आर्जिहत्। Adjunct. to गाधिसुतः—रक्षोभिः अभ्याहतकर्म्मवृत्तिः। Adj. to राजा—मधुपर्कपाणिः।

Prose order :—ततः गाधिसुतः रक्षोभिः अभ्याहतकर्म्मवृत्तिः (सन्) परिरक्षणार्थं रामं वरीतुं क्षितीन्द्रं अभ्यगात्। राजा मधुपर्कपाणिः (सन्) तं आर्जिहत्।

Substance :—अथैकदा विश्वामित्रः रक्षोभिः विहतकर्म्मा, तेभ्यः परि-

त्राणार्थं रामं याचितुम् राजानमुपागतः। राजा च समुपागतं तं मधुपर्केण अर्घयामास।

Explanation in tika form : (*i.e.* in full)—ततोऽनन्तरं गाधिसुतः विश्वामित्रः रक्षोभिः राक्षसैः अभ्याहता अभिभूता, कर्म्मणः यागादेः क्रिया: प्रवृत्तिर्यस्येति, विघ्नकर्मक्रियाविधिः सन्, परिरक्षणार्थं, अभिभूतस्य कर्म्मण इत्यर्थः। रामं राज्ञो ज्येष्ठपुत्रं वरीतुं प्रार्थयितुं क्षितीन्द्रं भूपालं दशरथम् [गमनार्थे धातुभ्योनि कर्म्मणि द्वितीया] अभ्यगात् आजगाम। राजा, मधुपर्कपाणिः "दधिघृतमधूनि एकोकृतानि मधुपर्कं इत्युच्यते।" तस्मिन् स्थितः पाणिः यस्य स मधुपर्कपाणिः। ["सप्तम्युपमानपूर्व्वस्य च उत्तरपदलोपः" इति स्थितशब्दस्य लोपः।] ताद्दशः सन् तम् आर्हिहत् पात्रादुद्धृत्य मधुपर्केण तं पूजितवानित्यर्थः। अर्ह पूजायाम् इति अर्हधातोः चुरादिगणीयस्य लुङि रूपम्। काव्यलिङ्गमलङ्कारः, वृत्तमुपजातिः।

Change of V.—अभ्यगायि गाधिसुतेन क्षितीन्द्रः......अभ्याहतकर्म्मवृत्तिना। राज्ञा मधुपर्कपाणिना स आर्हि।

Derivation —आर्जिहत्, चुरादिगणीयस्य अर्हधातोः लुङ्। अर्हयति लट्। भ्वादेः आर्हीत् लुङ्। आनर्ह लिट्। सुतः—सुधातोः क्तः। सवति लट्। असावीत् लुङ्। पाणिः—पणङ् व्यवहारे स्तुतौ च, इति पणधातोः इः। पणायते लट् अपणायिष्ट अपणिष्ट, लुङ्।

অনন্তর রাক্ষসগণ যাগ কার্য্যের ব্যাঘাত করাতে গাধিতনয় রামকে লইয়া যাইবার জন্য ক্ষিতিপতির নিকট উপস্থিত হইলেন। রাজা মধুপর্ক হস্তে লইয়া তাঁহার অভ্যর্থনা করিলেন।

Then the son of Gadhi the 'performance of whose ceremonies was obstructed' by the demons, came to the lord of the earth to ask for Rama for protection. The king received him with a respectful offering consisting of honey, curds, water, clarified butter and sugar.

Q. Derive चिति **and conjugate the root in** लट्।

Ans. चियन्ति अस्याम् इति चितिः, चि-निवासे इति निवासार्थात् तुदादिगणीयात् चि-धातोः क्तिः। लट् रूपम्—"इष्टे वा गृह्णातीत्यर्थे चयतीत्यादिवं

ऐषो: पुनर्जन्मजयाय यत्त्वम्
रूपादिबोधान्न्यवृतश्च यत्ते ।
तत्त्वान्यबुद्धा: प्रतनूनि येन
ध्यानं नृपस्तच्छिवमित्यवादीत् ॥ १८ ॥

भवेत् । पृथिव्यां चियतीत्यादौ निवासार्थ: प्रकीर्त्तित: । पापं चिणोति लोकोऽसौ विनाशार्थ: चिणुर्मत: ।" Q. Expound the samas in मधुपर्कपाणि: । Ans. मधुपर्क: पाणौ यस्य इति विग्रहे, "प्रहरणार्थेभ्य: परे निष्ठासप्तम्यौ भवत:" इति सूत्रस्य अप्रसर: । यत: मधुपर्को न प्रहरणवाचक: । अत: मधुपर्क स्थित: पाणि: यस्य इत्येव विग्रह: प्रशस्त: । सूत्रं—"सप्तम्युपमान-पूर्व्वस्य च उत्तरपदलोप: ।" Q. Who was गाधि ? Ans. कुशिक: तपसा इन्द्रमिव पुत्रमवाप । "स गाधिरभवत् राजा मघवान् कौशिक: स्वयम्" इति हरिवंशम् । तस्य इन्द्रावतारस्य पुत्र: विश्वामित्रोऽजायत । Q. Give the derivative meaning of रचस् । Ans. रक्ष्यते हवि: अस्मात् इति रक्षस् । रक्षधातो: असुन् । Q. Give the different meanings of इन्द्र । Ans. "इन्द्र: शचीपतावन्तरात्मन्यादित्ययोगयो:" इति विश्व: । Q. Show the propriety of राजन् । Ans. धातूनामनेकार्थत्वे रञ्जनार्थस्य राज्धातो: कनिन् प्रत्ययेन सिद्धत्वात्, राजा इति पदेन अत्र मुनिरञ्जकत्वम् द्योतितम् । Q. Account for सत्व in पाणि: । Ans. "माणिक्यं निक्षपेण क्रय विक्रय वणिज: कड़्यं पाणितूर्णौ" इत्यादिवत् स्वाभाविक सत्वम् । . Q. What do you understand by मधुपर्क ? Ans. "दधिसर्पिर्जलं क्षौद्रं सिता चैतैश्च पञ्चभि: । प्रोच्यते मधुपर्कस्तु ।" Q. Account for the active sense in अभ्यगात् । Ans. "सर्व्वे गत्यर्था: प्राप्त्यर्थाश्च" इति गमनार्थ धातो: सकर्म्मकत्वम् । १७ ।

18. This is a complex sentence the principal sentence being तत् ध्यानं शिवम् इति नृप: अवादीत् । Subordinate ones—

(*a*) यत् पुनर्जन्मजयाय ऐषीः, (*b*) यत् ते रूपादिबोधात् व्युदतत् (*c*) येन प्रतनूनि तत्त्वानि अबुद्धाः।

Prose order :—त्वं यत् पुनर्जन्मजयाय ऐषीः, यत् ते रूपादिबोधात् व्युदतत्, येन प्रतनूनि तत्त्वानि अबुद्धाः, तत् ध्यानं शिवम् इति नृपः अवादीत्।

Substance :—येन ध्यानेन पुनर्जन्म निवार्य्यते, येन च इन्द्रियजनितं ज्ञानं निवर्त्तते, यत्प्रभावेण सूक्ष्माण्यपि पञ्चविंशति तत्त्वानि परिज्ञायन्ते, अपि कुशलं तद्ध्यानस्य? इत्यपृच्छत् राजा मुनीन्द्रम्।

Explanation in tika form :—त्वं यत् ध्यानं निर्विकल्पकसमाधिरूपं, पुनर्जन्म भूयो जन्म तस्य जयाय अभिभवाय पुनर्जन्म जेतुमित्यर्थः। ["तुमर्थाच्च भाववचनात्" इति चतुर्थी] ऐषीः अभिलषितवान्। पुनः पुनः अनुष्ठितवान् वा। ["ततः पदं तत् परिमार्गितव्यं यस्मिन् गता न निवर्त्तन्ते भूयः" इत्यनेन निदिध्यासनस्य मोक्षे कारणत्वं प्रदर्शितम्।] यच्च ध्यानं ते तव रूपादिषु शब्दस्पर्शरूपरसगन्धेषु चक्षुरादिद्वारेण यो बोधः अध्यवसायलक्षणा बुद्धिः तस्मात् ["पञ्चमी विभक्ते" इति पञ्चमी।] व्युदतत् निवृत्तम्। येन त्वं वाह्येन्द्रियज्ञानशून्यः भवसि इत्यर्थः। येन ध्यानेन प्रतनूनि दुर्बोधादतिसूक्ष्माणि, तत्त्वानि पुरुषप्रधानमहदहङ्कारादीनि पञ्चविंशतितत्त्वानि [(१) पुरुषः, (२) प्रधानम् वा प्रकृतिः, (३) महत्तत्त्वं वा बुद्धिः (४) अहङ्कारः, (५) मनः; ततः पञ्च तन्मात्राणि, इति दश। ततः दश इन्द्रियाणि—चक्षुः, कर्णः, नासिका, जिह्वा, त्वक्, वाक्, पाणिः, पादः, पायुः, उपस्थः, इति विंशतिः। ततः पञ्च भूतानि—क्षितिः, जलम्, तेजः, मरुत्, व्योम इति पञ्चविंशतितत्त्वानि] अबुद्धाः ज्ञातवानसि (बुधेः लुङि मध्यमपुरुषैकवचने) तत् ध्यानं चित्तैकाग्र्यम्, ध्यै-चिन्तने तस्मात् ल्युट्। शिवं निर्विघ्नम् इति पूर्वोक्तं वाक्यं नृपो राजा दशरथः। अत्र नृपशब्देन राज्ञः क्षत्रियगुणवत्त्वम् द्योतितम्। क्षत्रियगुणाश्च यथा "अध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणञ्चेति।"] अवादीत् अपृच्छत्, [वदेर्लुङ्। यत्तदोः नित्यसम्बन्धत्वात् उभयोरेव प्रयोगः। वृत्तम् इन्द्रवज्रा। लक्षणं यथा, "स्यादिन्द्रवज्रा यदि तौ जगौ गः।"]

Change of V.—ऐषि......तया। यैन...अवर्त्ति।...अभूत्सत...रूपेभ्य......अवादि।

Derivation :—ऐषी:—इष-लुङ् स, लटि इच्छति, लिट् इयेष। जन्म—जन मनिन्। बोध:—बुध घञ्। न्यवृतत्—नि-वृत्-लुङ् द। लटि वर्त्तते। लुङ् अवर्त्तिष्ट, अवृतत्। लट् वर्त्स्यति, वर्त्तिष्यते। अबुद्धा:—बुध लुङ् थास्, लटि बुध्यते। लुङि अबोधि, अबुद्ध। ध्यानम्—ध्यै ल्युट्। ध्यायति ध्यायते लट्। अध्यासीत् अध्यास्त लुङ्। अवादीत्—वद लुङ् द; वदति लट्। लिट् उवाद। शिवम्—शि-वन्।

রাজা বলিলেন, আপনি পুনর্জন্ম অতিক্রম করিবার নিমিত্ত যেধ্যান অবিরত অনুষ্ঠান করিয়াছেন, যাহাতে আপনার রূপাদি বিষয় জ্ঞান নিবৃত্ত হইয়াছে, এবং যাহা দ্বারা আপনি সূক্ষ্ম তত্ত্ব অবগত হইয়াছেন সেই ধ্যানের মঙ্গল ত?

'Is thy meditation prospering'? meditation, that thou dist practise so often for the conquest of metempsychosis, that 'ceased from' the perception of form &c. and that made thee 'comprehend subtle principles'.

Q. What are the तत्त्व? Ans. (See above). Q. Account for the 5th case in रूपादिबोधात्। Ans. अपादानात् पञ्चमी। Q. Give the different meanings of तनु। Ans. "त्वचि काये तनु: स्त्री स्यात् त्रिष्वल्पे विरले क्षशे" धरणि:। Q. Show the significance of रूप। Ans. See above. Q. Explain रूपादिबोधात् न्यवृतत्। Ans. येन ध्यानेन चित्तैकाग्रतया बाह्यज्ञानशून्यता जायते इत्यर्थ:। Cf.—"तं राघवं दृष्टिभिरापिबन्त्यो नार्य्यो न जग्मुर्विषयान्तराणि। तथाहि सर्व्वेन्द्रियवृत्तिरासां सर्व्वात्मना चक्षुरिव प्रविष्टा।" रघु: ७सं। Q. Conjugate the root of ऐषी: in लट्। Ans. इष् पुन: पुन: करणे इति क्र्यादिगणीयस इष्धातो: लटि रूपम् इष्णाति। Q. Decline and give the derivative meaning of ध्यान। Ans. "ब्रह्मात्मचिन्ता ध्यानं स्यात् धारणा मनसो धृति: इति।" गारुडे।

आख्यन्मुनिस्तस्य शिवं समाधे

विघ्नन्ति रक्षांसि वने क्रतूंश्च ।

तानि द्विषद्वीर्य्यनिराकरिष्णु:

तृणेढु रामः सह लक्ष्मणेन ॥ १९ ॥

निरुक्तम् यथा—"ध्यै चिन्तायां स्मृतोधातुः, विष्णुचिन्ता मुहुर्मुहुः । अनाकुलेन मनसा ध्यानमित्यभिधीयते ।" अग्निपुराणम् । १८ ।

19. This is a compound sentence, composed of three simple sentences. See below.

Prose order :—मुनिः तस्य समाधेः शिवम् आख्यत् । (किन्तु) रक्षांसि वने क्रतून् विघ्नन्ति । तानि द्विषद्वीर्य्यनिराकरिष्णुः रामः लक्ष्मणेन सह तृणेढु, (इति च आख्यत्) ।

Substance :—अथ ऋषिः तपसः कुशलम् उक्त्वा रक्षःकृतम् यज्ञादीनाम् उपप्लवमवोचत्, रामश्च लक्ष्मणेन सह गत्वा रक्षोविनाशेन यज्ञान् निरुपप्लवान् करिष्यति इत्यपि कथयामास ।

Explanation in tika form :—ततः पृष्टो मुनिः विश्वामित्रः तस्य समाधेः ध्यानस्य शिवम् अनुपद्रवमाख्यत् कथितवान् । [अविङः लुङि । तस्य नृपस्य आख्यत् इति वा सम्बन्धविवक्षया षष्ठी ।] किन्तु, अयं दोषः, रक्ष्यते हविरेभ्य इति रक्षांसि राक्षसाः मारीचादयश्च [चकारोऽत्र अन्वाचयार्थे प्रयुक्तः ।] वने तपोवने क्रतून् यज्ञान् ["यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः" इत्यमरः ।] विघ्नन्ति नाशयन्ति । विघ्नन्ति इति रक्षांसि इत्यस्य विशेषणम् वा । विघ्नकारीणि रक्षांसि आख्यत् च, रक्षोविषयम् उक्तवांश्च इत्यर्थः । तर्हि किं क्रियतामिति चेदाह तानीति । तानि रक्षांसि द्विषतां शत्रूणां वीर्यं सामर्थ्यं तस्य निराकरिष्णुः तस्य निराकरणशीलः ["अलंकृञ् निराकृञ् प्रजनोत्पतोन्मदरुच्यपत्रप वृतु वृधु सह चर इष्णुच्" इति इष्णुच्प्रत्ययः । [रामः लक्ष्मणेन सह तृणेढु हिनस्तु ।] "लोट् च" इति अधीष्टे अर्थात् सत्कारपूर्वकनियोगे लोट । 'विधौ' इति केचित् । वृत्तमुपजातिः ।]

Change of V.—आख्यायि मुनिना……विहन्यते रक्षोभिः क्रतुः। तानि द्विषद्वीर्य्यनिराकरिष्णुना रामेण तानि तृह्यन्ताम्……।

Derivation :—आख्यत्—आ-ख्या-लुङ् द। लटि आह, आख्याति &c.। लुङि अख्यत्, अख्येत, अख्यासीत अख्यास त्यागे समचक्षिष्ट। लिटि चख्यौ चक्षौ चख्यौ चख्यौ, चचक्षे। समाधिः—सम्-आ-धा इ। दधाति धत्ते लट्; अधात् अधित लुङ्। विघ्नन्ति—वि-हन लट् अन्ति। लटि हन्ति, हतः, घ्नन्ति। लुङि अवधीत्। लिटि जघान। रक्षस्—रक्ष असुन्। द्विषत्—"द्विषोऽमित्रे" इति शतृ। निराकरिष्णुः—निर्-आ-कृ-इष्णुच्। तृणेढु—तृह लोट् तु। लटि तृणेढि, तृण्ढः &c. लङ् अतृणेट्। लुङ् अतर्हीत्, अतृहत्।

মুনি কহিলেন, তাঁহার ধ্যানের মঙ্গল। কিন্তু রাক্ষসগণ বনে যজ্ঞের বিঘ্ন করিতেছে। শত্রুবীর্য্যনাশক রামচন্দ্র লক্ষ্মণের সহিত তাহাদিগকে বিনাশ করুন।

The Muni said, it was all right with the meditation, (adding) the demons were obstructing the ceremonies in the forest, 'and them let Ram competent for the overthrow of the enemy's power, destroy, with Laksman',

Q. Show reasons for using तानि instead of यानि in the sloka. Ans. प्रक्रान्तप्रसिद्धार्थानुभूतार्थविषयः (प्रक्रान्तः= अन्वयी, प्रसिद्धार्थः=ख्यातार्थः, अनुभूतार्थविषयः=प्रत्यक्षवद्विषयः) तद्-शब्दः यद्-शब्दोपादानम् नापेक्षते। इति अत्र रक्षांसि इत्यनेन अन्वयित्वात् यद् शब्दं विना तद् शब्दप्रयोगो भवति। Q. Show the application of च in the sloka. Ans. "समुच्चय-अन्वाचय-इतरेतरयोग-समाहारार्थाः" इति अन्वाचयं अर्थं, अर्थात् अन्यतरस्य आनुसङ्गिकत्वे द्योतिते 'च'कारप्रयोगः।' ऋषिः समाधेः शिवम् आख्यत्, तदानुषङ्गिकं रक्षःकृतम् आचरितञ्च अपृष्टोऽपि अवादीत्। Q. In what sense is used लोट् in तृणेढु। Ans. See above. १६।

स शुश्रुवांस्तद्वचनं मुमोह
राजासहिष्णुः सुतविप्रयोगम् ।
अहंयुनाथ क्षितिपः शुभंयु-
रूचे वचस्तापसकुञ्जरेण ॥ २० ॥

20. This is a compound sentence, composed of two simple sentences. (1) स राजा मुमोह । Adjuncts to the subject राजा—तद्वचनं शुश्रुवान् and सुतविप्रयोगम् असहिष्णुः (2) अथ तापसकुञ्जरेण क्षितिपः वचः ऊचे ।

Prose order :—तद्वचनं शुश्रुवान् स राजा सुतविप्रयोगम् असहिष्णुः (सन्) मुमोह । अथ अहंयुना तापसकुञ्जरेण शुभंयुः क्षितिपः वचः ऊचे ।

Substance :—रामं नेतुं कृतनिश्चयस्य ऋषेः वचनं श्रुत्वा राजा पुत्रवियोगं सोढुमसमर्थः मोहं गतः । अथ विश्वामित्रः अहङ्कारं प्रदर्शयन् अमानुषेण अनेनापि रामेण सर्व्वं सुसाध्यम् इति वक्तुं प्राक्रमत ।

Explanation in tika form :—तस्य मुनेः वचनं शुश्रुवान् श्रुतवान् ["भाषायां सदवसश्रुवः" * इति क्वसुः ।] स राजा सुतेन विप्रयोगः विरहः तम्, तम् पुत्रविरहमित्यर्थः । ["न लोकाव्ययनिष्ठाखलर्थतृनाम्" † इति षष्ठीनिषेधात् (अ) द्वितीया । "कर्त्तृकरणे कृता बहुलम्" ‡ इति तृतीयासमासः ।] असहिष्णुः असहन-

---

* भाषायाम् अर्थात् अवैदिकभाषायाम् सदादिभ्यो भूतसामान्ये लिट् वा स्यात्, तस्य च नित्यं क्वसुः ।

† ल=शतृशानजादि यथा कुर्व्वन्; उ=यथा हरिं दिदृक्षुः अलङ्करिष्णुः; उक— यथा दैत्यान् घातुकः । अव्ययं यथा — जगत् सृष्ट्वा, सुखं कर्त्तुम् (अव्ययम्=क्त्वा, तुम्); (निष्ठा=क्त, क्तवतु) यथा विष्णुना हताः दैत्याः । खलर्थाः यथा ईषत्करः । तृन् (शीलार्थे) यथा लोकानाम् कर्त्ता ।

‡ कर्त्तरि करणे च तृतीया कृदन्तेन बहुलं समस्यते । हरिणा त्रातः हरित्रातः । नखैर्भिन्नः नखभिन्नः । कर्त्तृकरणे किम् भिक्षाभिरुषितः । हेतावेषा तृतीया ।

ग्रीवः सन् सुग्रीव सीदमयगतः। अथानन्तरम् ["अनन्तरम् अथानन्तरार्थ ... अथो अथ" इत्यमरः।] अहंयुना स्वप्रार्थनाभङ्गसम्भावनया क्रोधात् अहङ्कारवता ["अहङ्कारवानहंयुः" इत्यमरः। "अहं शुभयोर्युस्" इति युस्।] तापसश्चासौ कुञ्जरश्चेति तापसकुञ्जरः तेन तापसश्रेष्ठेन ["स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभ-कुञ्जराः" इत्यमरः। "वृन्दारकनागकुञ्जरैः पूज्यमानम्" इति कर्मधारयः।] शुभंयुः शुभान्वितः ["शुभंयुस्तु शुभान्वितः" इत्यमरः।] क्षितिपो राजा ["गौणे कर्मणि दुह्यादेः" इति गौणे कर्मणि प्रथमा।] वक्ष्यमाणं वच ऊचे। ['युस्' प्रत्ययस्य उदाहरणार्थम् श्लोकोऽयम् उद्दिष्टः। इन्द्रजाति:।]

Change of V.—तेन शुश्रुवुषा......सुमुहे राज्ञा असहिष्णुना अहंयुः... क्षितिपं शुभंयुम् उवाच वचः तापसकुञ्जरः।

Derivation :—शुश्रुवान्—श्रु क्वसुः। सुमोह—मुह लिट् अ। मुह्यति लट्। अमुहत् लुङ्। असहिष्णु—न सह-इष्णुच्। अहंयुः—अहम् युस्। क्षितिपः—क्षिति-पा-कः। पाति लट्, अपासीत् लुङ्। शुभंयुः—शुभम् युस्। ऊचे—वच, लिट् ए। अवोचत् लुङ्। वक्ति वक्तः &c. लट्। तापसः—तपः अस्ति अस्य इति तापसः अण्। कुञ्जरः—कुञ्जम् अस्ति अस्य असौ कुञ्जरः, अस्त्यर्थे रः।

রাজা দশরথ সেই কথা শুনিয়া পুত্রবিয়োগ সহ্য করিতে অসমর্থ হওয়াতে মূর্চ্ছিত হইলেন। পরে তপস্বিশ্রেষ্ঠ গর্ব্বিত বিশ্বামিত্র কল্যাণবান্ ক্ষিতিপতিকে বলিতে লাগিলেন।

The King unable to bear his son's separation, fainted at the word. The blessed king was then addressed by the proud great ascetic in the following words.

Q. Decline शुश्रुवस्। Ans. शुश्रुवान् शुश्रुवांसौ शुश्रुवांसः। द्वितीया बहुवचने शुश्रुवुषः। Q. Annotate on सुतविप्रयोगम्। Ans. (1) "न लोके"त्यादिना असहिष्णुः इति इष्णुप्रत्ययेन षष्ठीनिषेधात् कर्मणि द्वितीया। (2) सुतेन विप्रयोगः इति तृतीयासमासः। "कर्तृकरणे कृता बहुलम्" इति सूत्रबलात्। सुतस्य विप्रयोगः इति वा षष्ठीसमासः। क्रमदीश्वरः,

मया त्वमाप्था: शरणं भयेषु
वयं त्वयाप्याप्स्महि धर्म्मवृद्धैः ।
आर्त्तं द्विजत्वञ्च परस्परार्थं
शङ्कां कृथा मा प्रहिणु स्वसूनुम् ॥ २१ ॥

समासपादे, सू, १५ । Q. If चर्ष्युनाथः be a single word ending in विसर्ग what interpretation can you give? Ans. 'चर्ष्युनाथः' इति एकपदविधानं चेत्, चर्ष्युनां क्षत्रियाणाम् नाथः इति चर्ष्युनाथः इत्येवं भवति । Q. Change the voice in the above. Ans. (See above.) Q. Derive चर्ष्युः and explain its significance as well as of धर्म्मयु । Ans. अहम् इति अव्ययपदं, तस्मात् अस्त्यर्थे युस् । For significance quote the sloka 20 and 21. ।२० ।

21. It consists of several simple sentences. (1) मया त्वम् आप्थाः, (2) त्वया वयं धर्म्मवृद्धैः आप्स्महि; (3) आर्त्तं द्विजत्वञ्च परस्परार्थं भवति । (4) शङ्कां मा कृथाः । (5) स्वसूनुं प्रहिणु ।

Prose order :—मया भयेषु त्वं शरणम् आप्थाः । त्वया (अपि) धर्म्मवृद्धैः वयम् आप्स्महि । (इत्थम्) आर्त्तं द्विजत्वञ्च परस्परार्थम् भवति । शङ्कां मा कृथाः । स्वसूनुं प्रहिणु ।

Substance :—आगते भये वयं राजानं शरणं गच्छामः, राजा च धर्म्मसंवर्द्धनार्थं द्विजान् समुपगच्छति । अतः ब्राह्मणाः क्षत्रियाश्च परस्परोपकारिणः । किं बिभेषि ? निःशङ्कं स्वपुत्रं प्रेरयै इति ।

Explanation in tika form :—मया भयेषु [विषये सप्तमी] त्वम् शरणं रक्षिता [विधेयविशेषणम्] आप्थाः प्राप्तः । [आप्नोतेः कर्म्मणि लुङि थास्] त्वयापि धर्म्मवृद्धैः धर्म्मोपचयाय वयम् अपय आप्स्महि प्राप्ताः । अतः इत्यं [ऋणु हिंसायामिति धातोः सम्पदादित्वात् क्विपि ऋत् इति सिद्धम् ।] अतः नाशात् त्रायते इति अतः तस्येदं आर्त्तं । "क्षतात् किल त्रायते" इति रघुः ।] क्षत्रियत्वं,

द्विजत्वं ब्राह्मणत्वञ्च परस्परस्य अर्थः प्रयोजनं यस्मिन् तत् परस्परार्थं, धर्म्मवृद्ध्यै अन्योन्यप्रयोजनकं भवतीति शेषः। [अत्र मनुः "नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्द्धते। ब्रह्म क्षत्रञ्च संयुक्तम् इहामुत्र च वर्द्धते॥" परस्परमित्यत्र, "कर्म्मव्यतिहारे सर्व्वनाम्नो द्वे वाच्ये" * इति द्वित्वम्, ततः "समासवच्च बहुलम्" † इति बहुल-ग्रहणात् अन्यपदयोः न समासवत्। अतः परस्परमिति सिद्धम्।] तस्मात् शङ्कां मा कृथाः, कथमस्मिन् सङ्कटे पुत्रं विनियोजयामीति मा भैषीः इत्यर्थः। "माङि लुङ्" इति लिङर्थे लुङ्। स्वसूनुं स्वपुत्रं "आत्मजस्तनयः सूनुः सुतः पुत्रः" इत्यमरः। प्रहिणु प्रस्थापय। प्रार्थनायां लोट्। उपजातिः वृत्तम्।

Change of V.—अहं त्वां शरणम् आपम्। अस्मान् त्वम् आपः, क्षात्रेण द्विजत्वेन च परस्परार्थेन भूयते। शङ्का मा कारि। स्वसूनुः प्रहीयताम्।

Derivation—आप्थाः—आप् कर्म्मणि लुङ् थास्। आप्महि—आप् कर्म्मणि लुङ् महि। लटि आप्नोति। लुङि आपत्। कृथाः—कृ लुङि थास्। मा योगे अड़ागमाभावः। प्रहिणु—प्र-हि-लोट् हि। लटि हिनोति। लिट् जिघाय।

ভয়ে আমি আপনার শরণ লইয়াছি, যাহাতে ধর্ম্মবৃদ্ধি হয় তজ্জন্য আপনিও আমাদের নিকট উপস্থিত হন। ক্ষত্রিয়ত্ব ও ব্রাহ্মণত্ব পরস্পরের উপকারক। শঙ্কা করিবেন না, পুত্র প্রেরণ করুন।

---

* कर्म्मव्यतिहारः क्रियाविनिमयः एकजातीयक्रियया परस्परमेकरूपेण सम्बन्धः। तेन याद्दशक्रियायां यद्रूपेण यस्य यत्कारकत्वं ताद्दश्यामेव तत्क्रियायामितरस्य तत्कारकत्वे क्रियाव्यतिहारः। अत्र एकस्य शरणदाने यथा अन्यस्य सम्पादनता, तथा अन्यकर्त्तृक-तद्दानेऽपि इतरस्य तथात्वमिति। (reciprocity in deed)

† क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव। विधेर्विधानं बहुधा समीक्ष्य चातुर्विधं बाहुलकं वदन्ति॥ इति सारस्वतव्याकरणम्। The rules are sometimes applied, sometimes are not applied and sometimes there is some other result. Thus instead of परपर we have परस्पर। Cf. "कृत्यल्युटो बहुलम्" P. 13. 1. 22.

यानिष्यते तेन महान् विपक्षः
स्थायिष्यते येन रणे पुरस्तात् ।
मा मां महात्मन् परिभूरयोग्यं
न मद्विधो न्यस्यति भारमग्रम् ॥ २२ ॥

'By me you have been resorted to as a refuge' in dangers. We too are 'sought' for the increase of 'righteousness.' The military and priesthood are for mutual good. Entertain no fear. Send your boy.

Q. Give the different meanings of सूनु। Ans. "सूनुः पुत्रेऽनुजे रवौ।" Q. Write notes on मा कृथाः। Ans. "माङि लुङ्" इति माङ्योगे लुङ् सर्व्वकाले भवति, अतः अत्र विधिलिङि लुङ्-प्रयोगः। "न माङ्योगे" इति अडागम निषेधः। Q. Explain the gram. anomaly in परस्पर। Ans. (See above) Q. Give the different meanings, of स्व and decline it. Ans. Different meanings "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने।" Decl.—"स्वम् अज्ञातिधनाभिधः," इति ज्ञातौ धने च अर्थे न सर्व्वनामता, अतः ज्ञातौ धने च—स्वः स्वौ स्वाः, स्वाय स्वात् इत्यादि। आत्मनि आत्मीये च अर्थे, स्वः स्वौ स्वे, स्वस्मै इत्यादि। Q. Is स्व in स्वसूनुम् used redundantly? Ans. अत्र स्वशब्देन वीरपुत्रस्य स्वयं वीरत्वं च रामस्य नास्ति शङ्काकारणमिति ध्वनितम्। Q. Change the voice. Ans. (See above.) Q. Explain the force of अपि in त्वयापि। Ans. न केवलमहं शरणार्थी त्वया तथा इति अपि शब्देन गम्यते। Q. Give the different senses of अपि and especially that in the above. Ans. "गर्हा समुच्चय प्रश्न शङ्का सम्भावनास्वपि।" अत्र तु समुच्चयार्थे अपिः। गर्हायां यथा, अपि सिञ्चेत् पलाण्डुं याज्ञिकः। प्रश्ने यथा, अपि जानाति भवान्? शङ्कायां यथा, अपि चौरं भवेत्? सम्भावनायां यथा, अपि शिरसा पर्व्वतं भिन्द्यात्। २१।

22. It consists of 4 sentences *viz.* (1) तेन महान् विपक्षः घानिष्यते ; (2) येन पुरस्तात् रणे स्थायिष्यते ; (3) 'महात्मन् मां मा परिभूः ; (4) मद्विधः अग्र्यं भारं अयोग्ये न न्यस्यति।

Prose order :—येन रणे पुरस्तात् स्थायिष्यते तेन महान् विपक्षः घानिष्यते। महात्मन् मां मा परिभूः। मद्विधः अग्र्यं भारम् अयोग्ये न न्यस्यति।

Substance :—यो रामः परशुरामेण सह युद्धे अपराङ्मुखो भविष्यति, स एव रावणं हनिष्यति तदर्थं शङ्कां कामपि मा कुरु। न मां प्रत्याख्यानेन अवमन्तुमर्हसि। नाहम् अयोग्ये भारमर्पयामि।

Explanation in tika form :—अनागतमर्थं ज्ञानेन समीक्ष्य शङ्काया अकरणे हेतुमाह। येन रामेण रणे युद्धे पुरस्तात् पूर्व्वस्यां दिशि, अग्रतः इत्यर्थः। ["दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः" इति अस्ताति। "अस्ताति च" इति पूर्व्वस्य पुरादेशः] स्थायिष्यते न च पराङ्मुखेन भविष्यते। [तिष्ठतेः भावे लृट्। यद्वा येन रामेण पुरस्तात् अग्रतः, यत् रणं युद्धं भावि परशुरामेण सार्द्धमिति भावः। तत्र स्थायिष्यते विजयिना भविष्यते ; यद्वा येन हेतुना रामेण एवं करिष्यते ततः शङ्का मा कृथा इति पूर्व्वेणान्वयः]। तेन रामेण महान् विपक्षः शत्रुः रावणः त्रैलोक्यविजयित्वात् इति भावः। सोऽपि घानिष्यते विनाशयिष्यते किमुत इतरे राक्षसाः। हन्तेः कर्म्मणि लृट्। अतः हे महात्मन् महामते "आत्मा-देहमनोब्रह्मस्वभावधृतिबुद्धिषु" इति विश्वः। मां मा परिभूः मावज्ञासीः। [परिपूर्व्वो भवतिर्निराकरणे वर्त्तते। 'माङि लुङ्', इति लोटि लुङ्। "न माङ्योगे" इति अड़ागमनिषेधः।] न मद्विधः ["विधाभेदः सादृश्यञ्च" मया विधा सादृश्यं यस्येति मद्विधः] मत्सदृशो जनः, यस्तु आर्षेण चक्षुषा सर्व्वं वेद सः इत्यर्थः। अग्र्यं श्रेष्ठं ["अग्राद्यत्" इति यत्।] भारं अयोग्ये असमर्थे न न्यस्यति निक्षिपति। [योगाय प्रभवति इति योग्यः, "योगाद्यत्" इति यत्। वाक्यार्थहेतुकम् काव्यलिङ्गमलङ्कारः। वृत्तम् उपजातिः।]

Change of V.—हनिष्यति स महान्तं विपक्षं, स्थास्यति......यः। माम् ......परिभाविषि, परिभविषि, मद्विधेन न्यस्यते भारोऽग्र्यः।

Derivation—घानिष्यते—हन्-कर्म्मणि लृट् स्यते। कर्म्मणि लट् हन्यते। लुङ् अघानि अवधि। स्थायिष्यते—स्था भावे लृट् स्यते। भावे लट् स्थीयते; लुङ् अस्थायि। पुरस्तात्—पूर्व्व अस्ताति:। परिभूः—परि-भू-लुङ् स। न्यस्यति—नि-अस् लट् ति। लुङ् न्यास्थत्। अग्र्य—अग्र-यत्। रणम्—रण्-कः। रणति लट्, अराणीत् अरणीत् लुङ्।

মহাত্মন্, আপনি আমাকে অবমান করিবেন না, কারণ তিনি (রামচন্দ্র) প্রচণ্ড শত্রু নিধন করিবেন ও অচিরভাবী রণে জয় লাভ করিবেন। মাদৃশ লোকে অযোগ্যে মহৎ ভার অর্পণ করেন না।

You should not, O high minded one, insult me with refusal. For, by him (Sama) shall be destroyed a great enemy and he will be victorious in a fight that has to happen shortly. A man like myself never imposes any important task on the unworthy.

Q. Expound the samas in अयोग्य। What are the different senses of नञ्? Cite instances. Ans. न योग्यः अयोग्यः इति नञ्तत्पुरुषः। अथवा योग्यात् अन्यः अयोग्यः इति वा पञ्चमीसमासः। अत्र "न्यं पूर्व्वम्" इति नञः प्राग्भावः। The different senses—"तत्सादृश्यम् अभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥" यथा ब्राह्मणस्य सदृशः अब्राह्मणः, पापस्य अभावः अपापम्, योग्यात् अन्यः अयोग्यः, नास्ति उदरं यस्याः सा अनुदरी कृशोदरी इत्यर्थः, निन्दितानि निमित्तानि इति अनिमित्तानि इति (अप्राशस्त्ये); असुराः सुरविरोधिनः। Q. Derive रणः। Ans. रण्यते शब्द्यते अत्र इति रणधातोः घञर्थे कः। Q. Show the syntactical connection of यद् and तद्। Ans. (See above.) Q. distinguish between महात्मन् and महदात्मन्। Ans. महान् आत्मा इति महात्मा। महान् आत्मा यस्य इति वा। "महा महतो विशेष्ये" इति महत् शब्दस्य विशेष्यपदे परे महादेशः। तथा, महताम् आत्मा इति 'महदात्मा'। (here महत् is not an Adj. to आत्मन्) २२।

क्रुध्यन् कुलं धक्ष्यति विप्रवह्नि-
र्यास्यन् सुतस्तप्स्यति मां समन्युम् ।
इत्थं नृपः पूर्व्वमवालुलोचे
ततोऽनुजज्ञे गमनं सुतस्य ॥ २३ ॥

23. It consists of 4 sentences :—(1) विप्रवह्निः कुलं धक्ष्यति ; (2) सुतः मां तप्स्यति ; (3) इत्थं नृपः पूर्व्वम् अवालुलोचे ; (4) ततः सुतस्य गमनम् अनुजज्ञे । Adj. to विप्रवह्निः—क्रुध्यन् ; Adj. to सुतः—यास्यन् ; Adj. to माम्—समन्युम् ।

Prose order :—विप्रवह्निः क्रुध्यन् कुलं धक्ष्यति । यास्यन् सुतः समन्यु मां तप्स्यति । नृपः इत्थं पूर्व्वम् अवालुलोचे । ततः सुतस्य गमनम् अनुजज्ञे ।

Substance :—प्रत्याख्यानेन चेत् विप्रः क्रुद्धो भवेत् ततः मे कुलं भस्मसात् करिष्यति, पुत्रश्चेत् प्रेषितो भवेत् महान् मे अदर्शनक्लेशः, न तु कुलक्षयः, इत्थं संचिन्त्य पश्चात् पुत्रगमनाय अनुमेने ।

Explanation in tika form :—[यद्यहं भूतरक्षणेऽधिकृतः अस्य वचनं न कुर्य्यां तदा] विप्र एव वह्निः विप्रवह्निः पावकरूपो ब्राह्मणः, [रूपककर्म्मधारयः] क्रुध्यन् सन् कुलं इक्ष्वाकुकुलं धक्ष्यति भस्मसात् करिष्यति [दहेर्लृट्] । यास्यन् गमिष्यन् सुतः समन्युं सशोकं पुत्रविरहकातरं मां तप्स्यति सन्तापयिष्यति । [तपेर्लृट् ।] नृपः इत्थम् एवं प्रकारं पूर्व्वमादौ अवालुलोचे आलोचितवान् । [अव्याङ्पूर्व्वात् लोचेः लिट् ।] ततोऽनन्तरं सुतस्य पुत्रस्य रामस्य गमनम् अनुजज्ञे । [अनुज्ञातं नृपेणेति विभक्तिपरिणामेन तेनेति योज्यम् । कर्म्मणि लिट् । यद्वा अनु पश्चात् सुतस्य गमनं जज्ञे जातम् । जन्धातोः लिटिरूपम् । यद्वा अनुशब्दस्य उपसर्गप्रतिरूपकत्वेन अनुपसर्गत्वात् कर्त्तरिवाच्ये फलवत्कर्त्तरि आत्मनेपदप्रयोगः अनुज्ञायाः फलाफलभोगी रामः एव अधिकार आसीत् इति विभाव्यम् ।*]

* The prefex अनु in the last case is used devoid of all the force of a prefix and so the word is looked upon as one without a prefix, and thus by a rule, the root ज्ञा can be used in the आत्मनेपद ।

छन्दः—उपजातिः ।

Change of V.—क्रुध्यता कुलं धक्ष्यते विप्रवह्निना । यास्यता सुतेन समन्युरहं तप्स्ये ।...नृपेण......। अनुजज्ञे...गमनम् ।

Derivations :—क्रुध्यन्—क्रुध् शतृ । क्रुध्यति लट् । धक्ष्यति—दह लृट् स्यति । लट् दहति; लुङ् अधाक्षीत् । वह्नि—वह-नि । वहति वहते लट्, अवाक्षीत् अवोढाम्, अवाक्षुः, अवोढ अवक्षाताम् अवक्षत लुङ् । यास्यन्—या स्यत । तप्स्यति—तप लृट् स्यति । तपति लट् । अवालुलोचे—अव-आ-लोच लिट् ए । सुतः—सुधातोः क्तः । सवति लट् । असावीत् लुङ् । अनुजज्ञे—अनु-ज्ञा-(जा) लिट् ए । मन्युम्—"दैन्ये मन्युः" इति इदम् मन्दात् मन्युः ।

(প্রত্যাখ্যান করিলে) ব্রহ্মতেজঃ ক্রুদ্ধ হইয়া সবংশে দগ্ধ করিবে, পুত্র গমন করিলে আমাকে শোকে প্রতপ্ত করিবে মাত্র। নৃপতি এইরূপ প্রথমে মনে মনে আলোচনা করিলেন, পরে পুত্রের গমনার্থ অনুমোদন করিলেন।

The firy potency of the Brahman will be kindled, (on refusal) to burn up the family. The son departing will pain me in affliction, The king at first thus cogitated and then gave permission for his son's departure.

Q. Write gram. notes on अनुजज्ञे । Ans. (See above.) Q. Show the propriety of नृप । Ans. (See sloka I. 1. Q. Expound the samas in विप्रवह्निः । Ans. (See above.) Q. Give the different meanings of मन्यु । Ans. "मन्युर्दैन्ये क्रतौ क्रुधि ।" Q. Write in simple Sanskrit the reason why the king sent away his son. Ans. प्रत्याख्यानेन क्रुद्धो मुनिः कुलं मे भस्मसात् करिष्यति, रामगमनेन ममैव सन्तापः जायेत न चापरमनिष्टं किञ्चन भवेत्, अतः रामप्रदानेन ऋषेः सन्तोषविधानम् अवश्यं कर्त्तव्यम् इति मनसि विचारयन् रामगमनाय अनुमेने । २२ ।

आशीर्भिरभ्यर्च्य ततः क्षितीन्द्रं
प्रीतः प्रतस्थे मुनिराश्रमाय ।
तं पृष्ठतः प्रष्ठमियाय नम्रो
हिंस्रेषु दीप्रास्त्रधरः कुमारः ॥ २४ ॥

24. This consists of two simple sentences. (1) मुनिः आश्रमाय प्रतस्थे। Adj. to मुनिः—प्रीतः। Extension of the predicate—क्षितीन्द्रम् आशीर्भिः अभ्यर्च्य। (2) कुमारः तम् पृष्ठतः इयाय। Adjective to कुमारः—हिंस्रेषु दीप्रास्त्रधरः and नम्रः। Adjective to तम्—प्रष्ठम्।

Prose order :—ततः प्रीतः मुनिः क्षितीन्द्रम् आशीर्भिरभ्यर्च्य आश्रमाय प्रतस्थे। नम्रः हिंस्रेषु दीप्रास्त्रधरः कुमारः प्रष्ठं तं पृष्ठतः इयाय।

Substance :—अथ रामं लब्ध्वा मुनिः अतीव हृष्टः सन् राजानम् आशीर्भिः अभिनन्द्य आश्रमं प्रति प्रस्थितः, रामोऽपि हिंस्रदमनाय अस्त्रम् धारयन् तम् अनुसरन् प्रतस्थे।

Explanation in tika form :—ततः रामस्य गमनानुज्ञानन्तरं, प्रीतः, रामगमनस्य अनुज्ञातत्वात् मुनिः विश्वामित्रः क्षितीन्द्रं क्षितेः इन्द्रः प्रभुः* तम् राजानं आशीर्भिः आशीर्वादैः अभ्यर्च्य अभिनन्द्य, आश्रमाय आश्रमं प्रति ["गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" इति चतुर्थी। पक्षे आश्रमम्।] प्रतस्थे प्रस्थितवान् ["समवप्रविभ्यः स्थः" इति आत्मनेपदम्।] नम्रः,विनीतः हिंस्रेषु हिंसकेषु,धरतीति धरः, पचाद्यच्, दीप्रं निशितम् अस्त्रं तस्य धरः। [हिंस्रेषु दीप्तास्त्रधनुरिति पाठे, हिंस्राः हिंसनशीलाः इषवः शराः, तैः दीप्तम् आप्तं विन्यस्तम् अभङ्गुरमित्यर्थः, अथवा गृहीतं धनुर्येनेति। नम्रादयः "नमि कम्पि स्म्यजस कम हिंस दीपो रः" इति रप्रत्ययान्ताः।] कुमारः रामः प्रष्ठं अग्रगामिनं ['प्रष्ठोऽग्रगामिनि'†

* क्षितिस्थितः इन्द्रः इति समासः। † प्रतिष्ठते इति प्रष्ठः, अग्रगमने अर्थे प्र-पूर्व्वकात् स्था-धातोः क-विधानात् प्रष्ठः इत्येवं स्यात्, अन्यथा 'प्रस्थः' इति भवति।

इति क्त:।] तं पृष्ठत: पृष्ठे, सप्तम्या तस्। पश्चात् इयाय अग्रगम्। [शोकोऽयं 'र' प्रत्ययस्य उदाहरणार्थमुद्दिष्ट:। वृत्तमिन्द्रवज्रा।

Change of V.—प्रीतेन मुनिना प्रतस्थे। अनुप्रयात: ईये अग्रगं च दीप्तास्त्रधरेण कुमारेण"।

* Derivation :—आशी:—आ-शास्-क्विप्। इन्द्र—इन्द्-र। अग्र—अग्-र। हिंस्र—हिंस्-र। दीप्र:—दीप्-र। दीप्यते लट्, अदीपि अदीपिष्ट लुङ्। इयाय—इण्धातु:, लिटि णल्। मुनि:—मन्-इ:।

মুনি আনন্দিত হইয়া নৃপতিকে আশীর্ব্বাদ দ্বারা সংবর্দ্ধন করিয়া আশ্রমোদ্দেশে প্রস্থান করিলেন। হিংস্রদিগের প্রতি দীপ্তাস্ত্রধর কুমার বিনম্র হইয়া অগ্রগামী মুনির অনুসরণ করিলেন।

Then the ascetic being pleased, and 'having greeted' the lord of the earth with benedictions set out for the hermitage. The humble prince holding sharp weapons against the injurious, followed him 'proceeding in front.'

Q. what is अधिकरणकारक? Show its application in हिंस्रेषु। Ans. "कर्तृकर्मव्यवहिताम् असाक्षात् धारयत् क्रियाम्। उपकुर्व्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।" इति कर्मणा कर्त्रा च व्यवहितां धारणक्रियां धारयत् 'हिंस्रेषु' इति पदम् अधिकरणसंज्ञं भवति। अत्र च औपश्लेषिकम् अधिकरणम्। उपश्लेष: आश्रय:। Q. What is कर्मकारक? How is it applied to तम् here.? Ans. "कर्तुरीप्सिततमं कर्म।" कर्तु: क्रियया आप्तुम् इष्टतमम् कारकम् कर्मसंज्ञं स्यात्। अत्र च इयाय इति गमनक्रियया ऋषि: आप्तुम्, कर्तु: रामस्य इष्टतम एव, ननु "धान्येषु गां बध्नाति" इति कर्मण: गो: धान्ये इष्टत्वमिव अत्र अन्यकारकस्य इष्टत्वम्। अपिच 'दुग्धेन अन्नं भुङ्क्ते" इत्यत्र अन्नेन सह दुग्धे पीतेऽपि तस्य न कर्मत्वम्, यत: न तत् भोजने कर्तु: इष्टतमम् यथा तु अन्नम् इति। Q. Is the reading हिंस्रेषु दीप्तास्त्रधनु: correct? Ans. "धनुषोऽनङ्" इति अनङ्विधानात् 'हिंस्रेषु दीप्तास्त्रधन्वा' इत्येवं स्यात्, तथापि समासान्तविधेरनित्यत्वात् 'हिंस्रेषु दीप्तास्त्रधनु:" इत्यपि

प्रयास्यतः पुण्यवनाय जिष्णो
रामस्य रोचिष्णुमुखस्य धृष्णुः ।
द्वैमातुरः कृत्स्नजितास्त्रशस्त्रः
सध्र्यङ् रतः श्रेयसि लक्ष्मणोऽभूत् ॥ २५ ॥

भवति । Q. Account for आत्मनेपद in प्रतस्थे । Ans. See above. Q. Show the significance of मुनिः । Ans "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते ॥" इति मुनिपदेन स्थिरधीत्वं गम्यमानेऽपि 'प्रीत' इति पदेन तस्य हर्षातिशयः व्यज्यते । Q. Account for the 4th case in श्रीमयाय । Ans. See above. Q. Derive कुमारः and show its fitness here. Ans. कुमारयति क्रीडति इति कुमारः, कुमारधातोः अच् । Fitness—क्रीड़ोचिते वयसि वर्त्तमानोऽपि मुनिकार्य्यसाधनार्थम् उद्यतः इत्यर्थः । Q. Parse तम् । Ans. इयाय इति गमनार्थधातोः कर्म्मपदम् । Q. Write gram. notes on प्रष्ठः । Ans. See the foot note. २४ ।

25. Principal sentence :—रामस्य लक्ष्मणः सध्र्यङ् अभूत् । Adjectives to रामस्य—पुण्यवनाय प्रयास्यतः, जिष्णोः and रोचिष्णुमुखस्य । Adjectives to लक्ष्मणः—द्वैमातुरः, कृत्स्नजितास्त्रशस्त्रः and श्रेयसि रतः ।

Prose order :—धृष्णुः द्वैमातुरः कृत्स्नजितास्त्रशस्त्रः श्रेयसि रतः लक्ष्मणः पुण्यवनाय प्रयास्यतः जिष्णोः रोचिष्णुमुखस्य रामस्य सध्र्यङ् अभूत् ।

Substance :—मातृणां तिसृणामेव प्रियो लक्ष्मणः अस्त्रेषु कृतविद्यः आसीत् । शत्रूणाम् उत्पीड़कः सः रामस्य मङ्गलार्थी, सानन्दम् आश्रमं प्रति प्रस्थातुकामं रामम् अनुससार ।

Explanation in tika form :—धृष्णुः शत्रुविध्वंसने प्रगल्भः ["त्रसि गृधि धृषि क्षिपेः क्नुः" इति क्नुः ।] तिसृणां मातृणामपत्यमिति द्वैमातुरः
(द्वैमातुरः:)

तद्धितार्थविषये द्विगु समासः। पश्चात् "मातुरुत् संख्या सम् भद्र पूर्व्वायाः" * इति उदादेशः अण्प्रत्ययश्च। स हि पितृद्वयप्राग्मनात् ताभ्याञ्च जनितः।] कृत्स्नमशेषं ["विश्वमशेषं कृत्स्नम्"] इत्यमरः। कृत्स्नमधिगतं अस्त्रं शस्त्रञ्च येन स कृत्स्न-जितास्त्रशस्त्रः अधिगतसमस्तास्त्रशस्त्रः, श्रेयसि कल्याणे रतः, लक्ष्मीः विद्यते यस्येति लक्ष्मणः। [पामादित्वात् † न प्रत्ययः। लक्ष्म्या अश्च इति 'ई'कारस्य अकारः।] पुनातीति पुण्यं पुण्यहेतुत्वात् पवित्रं वा वनं तस्मै पुण्यवनाय तपोवनाय। ["गत्यर्थ-कर्म्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" इति चतुर्थी।] प्रयास्यतः गमिष्यतः जिष्णोः जयशीलस्य "ग्लाजिस्थश्च ग्स्नुः" इति ग्स्नु प्रत्ययः। रोचिष्णु गमनरूपार्थे गमनानन्दात् दीप्यमानं ["अलङ्कृञ्" इत्यादिना ‡ इष्णुच्] मुखमस्येति तस्य रामस्य, सह अञ्चतीति सध्र्यङ् सहचरः, ["यः सहाञ्चति सध्र्यङ् सः" इत्यमरः। अञ्चधातोः क्विन्प्रत्ययः] अभूत् आसीत्।

छन्दः—उपजातिः।

Change of V.—धृष्णुना द्वैमातुरेण कृत्स्नजितास्त्रशस्त्रेण श्रेयसि रतेन लक्ष्मणेन सध्रीचा अभावि।

future participle.

Derivation :—प्रयास्यतः—प्र-या-स्यत्, षष्ठी। जिष्णोः—जि-ग्स्नु। रोचिष्णु—रुच्-इष्णुच्। धृष्णु—धृष-क्नु। सध्र्यङ्—सह-अञ्च-क्विन्। श्रेयस्—प्रशस्य-ईयसुन्।

(চরুর অংশ দান হেতু) যিনি মাতৃত্রয় সম্ভূত, সমস্ত অস্ত্র শস্ত্র যাঁহার অধিকৃত, মঙ্গল নিরত সেই লক্ষ্মণ, পুণ্যবনে গমনার্থ উদ্যত প্রফুল্ল বদন জয়শীল রামচন্দ্রের অনুগামী হইলেন।

---

* সংখ্যা-সম্-ভদ্রপূর্ব্বস্য মাতৃশব্দস্য উদাদেশঃ স্যাৎ অণ্প্রত্যয়শ্চ। যথা দ্বৈমাতুরঃ, ষাণ্মাতুরঃ, সাম্মাতুরঃ, ভাদ্রমাতুরঃ।

† "লোমাদি-পামাদি-পিচ্ছিলাদিভ্যঃ শ-ন-ইলচঃ" ইতি লক্ষ্মীশব্দস্য পামাদিপঠিতত্বাৎ তস্মাৎ নঃ। 'লক্ষ্ম্যাঃ অশ্চ' ইতি দীর্ঘ ঈকারস্য চ অকারঃ।

‡ "অলঙ্কৃঞ্ নিরাকৃঞ্ প্রজন উৎপচ উৎপত উন্মদ রুচি-অপত্রপ-বৃতু বৃধ সহ চর ইষ্ণুচ্।" যথা, অলঙ্করিষ্ণুঃ প্রজনিষ্ণুঃ উৎপচিষ্ণুঃ উৎপতিষ্ণুঃ উন্মদিষ্ণুঃ রোচিষ্ণুঃ অপত্রপিষ্ণুঃ বর্ত্তিষ্ণুঃ বর্দ্ধিষ্ণুঃ সহিষ্ণুঃ চরিষ্ণুঃ।

इषुमति रघुसिंहे दन्दशूकान् जिघांसौ
धनुररिभिरसह्यं मुष्टिपीडं दधाने।
व्रजति पुरतरुण्यो बद्धचित्राङ्गुलित्रे
कथमपि गुरुशोकान्मा रुदन् माङ्गलिक्यः ॥ २६ ॥

Lakshmana the destroyer of enemies, who was begotten of three mothers, had acquired all sorts of weapons, and was devoted to welfares, became a follower of Rama, the victorious, when he had to start for the holy forest with his face blooming.

Q. Derive and decline the base of, सध्र्यङ्। Ans. See above. सध्र्यञ्च् शब्दस्य रूपं यथा—सध्र्यङ् सध्र्यञ्चौ सध्र्यञ्चः, सध्र्यञ्चम् सध्र्यञ्चौ सध्रीचः, सध्रीचा सध्र्यग्भ्याम्, सध्र्यक्षु। क्लीबे यथा—सध्र्यक् सध्रीची, सध्र्यञ्चि। स्त्रियाम्—सध्रीची, सध्रीच्यौ, सध्रीच्यः, सध्रीचीम् इत्यादि। Q. Account for the fourth case in पुण्यवनाय। Ans. See above. Q. Justify the epithet त्रैमातुरः। Ans. तिसृणां मातॄणाम् अपत्यम्, अण्, मातुः 'उत्'। तिसृणां कौशल्याकैकेयीसुमित्राणाम् सङ्घभाजनत्वेन कौशल्याकैकेयीप्रदत्तपायसांशभोजनेन जनितत्वात् च लक्ष्मणस्य त्रैमातुराख्या। Q. Show the fitness of धृष्णुः। Ans. धृष्णुः प्रगल्भः, धारणकुशल इत्यर्थः। अनेन रक्षांसि उन्मूलयितुं कृतनिश्चयस्य रामस्य योग्योऽनुचरोऽभूत् इति सूच्यते। Q. Show the Euphonic combination in जिष्णो रामस्य। Ans. रकारे परे विसर्गजातस्य रकारस्य लोपः। "रोरि।" २५।

26. Principal sentence:—रघुसिंहे व्रजति (सति) पुरतरुण्यः कथमपि मा रुदन्। Adverb to दधाने—मुष्टिपीडम्। Adjective to रघुसिंहे—इषुमति, दन्दशूकान् जिघांसौ, धनुः दधाने and बद्धचित्राङ्गुलित्रे। Adj. to पुरतरुण्यः—माङ्गलिक्यः। Adj. to धनुः—अरिभिः असह्यम्।

Prose order:—इषुमति, दन्दशूकान् जिघांसौ, अरिभिरसह्यं धनुः मुष्टि-

पीड़ं दधाने बद्धचित्राङ्गुलित्रे रघुसिंहे व्रजति, पुरस्त्रियः माङ्गलिक्यः गुरुशोकात् कथमपि मा रुदन् ।

Substance :—राक्षसान् हन्तुमिच्छुः राघवः बाणान् धनुश्च आदाय बाणमोचार्थम् अङ्गुलित्रञ्च परिधाय यदा प्रस्थितः तदा पुरस्त्रियः गुरुशोकेन सन्तापिता अपि अश्रुपातेन अमङ्गलभयात् अतिकष्टेन क्रन्दनात् निवृत्ता आसन् ।

Explanation in tika form :—प्रशस्ताः रघवः यस्येति रघुमान् तस्मिन् रघुमति प्रशस्तवंशे [प्रशंसायां मतुप् ।] दन्दशूकान् राक्षसान् ["दन्दशूकस्तु पुंलिङ्गो राक्षसे च सरीसृपे" इति मेदिनी । "यज जप दशां यङ्" इति यङन्तात् दंशेः ऊकः ।] हन्तुमिच्छुः जिघांसुः तस्मिन् जिघांसौ ["सनाशंसभिक्ष उः" इति उः । तद्योगे "न लोकाव्ययनिष्ठाखलर्थतृनाम्" इति षष्ठीप्रतिषेधात् द्वितीयैव] अरिभिः शत्रुभिः असह्यं सोढुमशक्यम् ["शकिसहोश्च" इति यत्प्रत्ययः ।] धनुः मुष्टिना मुष्ट्या वा पीड़यित्वा इति मुष्टिपीड़ं ["समासत्तौ" इति णमुल्, नतु तृतीयान्ते उपपदे "सप्तम्यां चोपपीड़रुधकर्षः" * इति णमुल्प्रत्ययः । अथवा मुष्टिना पीडा यस्य तत् तथा, एतेन मुष्टेर्दार्ढ्यं सूचितम् ।] दधाने बिभ्राणे । ["ताच्छील्यवयोवचनशक्तिषु चानश्" इति शक्तौ चानश् ।] अङ्गुलिं त्रायते इति अङ्गुलित्रं । कप्रत्ययः । बद्धं चित्रं विचित्रम् अङ्गुलित्रं येन तथोक्ते, [बद्धगोधाङ्गुलित्रे इति पाठे, बद्धं गोधाचर्म्मनिर्म्मितम् अङ्गुलित्रं येन] रघुषु सिंह इव [उपमितसमासः ।] शौर्य्यादियोगात् रघुसिंहे रघुश्रेष्ठे रामे व्रजति सति [भावे सप्तमी ।] पुरि तिष्ठन्त्यः पुरस्त्रियः, यतः माङ्गलिक्यः मङ्गलप्रयोजनाः [तदस्य प्रयोजनमिति ठञ्, ततः ङीप्] अतः, गुरुः शोकः रामविरहदुःखं तस्मात् गुरुशोकमवाप्य इत्यर्थः, ल्यब्लोपे पञ्चमी । कथमपि अतिकष्टेन मा रुदन् न रुदितवत्यः । रुदेः लुङ् । काव्यलिङ्गमलङ्कारः । लक्षणं यथा "काव्यलिङ्गं हेतोर्वाक्यपदार्थता ।"

* उपपूर्व्वेभ्यः पीड़ादिभ्यः सप्तम्यन्ते तृतीयान्ते च उपपदे णमुल् स्यात् । यथा पार्श्वोपपीड़म् शेते । पार्श्वाभ्यां पार्श्वयोः वा उपपीड्य इत्यर्थः । मुष्टिपीड़मित्यत्र उप अभावात्, "समासत्तौ" अर्थात् सन्निकर्षे गम्यमाने णमुल् स्यात् इति णमुल् । मुष्टिना पीड़यित्वा अर्थात् मुष्टिसान्निध्यं प्रापय्य पीड़यित्वा इति विभाव्यम् ।

N. B. Bear in mind, that in a simple explanation the portions inclosed by brackets should be left out.

वृत्तम्—

न न म य य

इ षु म । ति र घु । सिं हे द । न्द शूकान् । जि घांसौ ।

अतः मालिनी वृत्तम् । लक्षणं यथा—"ननमयययुतेयं मालिनी भोगिलोकैः" भोगिन् = सर्प = ८, लोक = ७ ; अतः पञ्चदशाक्षरावृत्तिः, अष्टमे पञ्चदशे च यतिः ।

Change of V.—पुरतरुणीभिः मारोदि माङ्गलिकीभिः ।

Derivation.—इषुमति—इष्यते हिनस्ति गच्छति वा इति इषुः, इष्धातोः कुः "इषेः किच्च" प्रत्ययं । ततः मतुप् । दन्दशूक—यङन्त दन्श् ऊक । जिघांसुः—हन + सन-उ, अवधीत् लुङ् । असह्य—नञ्-सह-यत् । सहते, लट्, असहिष्ट लुङ् । मुष्टिपीड़'—मुष्टि-पीड़-णमुल । पीड़यति लट् अपीपिड़त् अपिपीड़त् लुङ् । दधान—धा-शानच्, अधात् लुङ् । वदन्—वद-लुङ् अन् । माङ्योगे अमागम प्रतिषेधः । रोदिति लट् । अरोदत्, अरोदीत्-लङ् । अरुदत्, अरोदीत्, अरुदिताम्, अरोदिष्टाम्, अरुदन् अरोदिषुः लुङ् ।

রঘুসিংহ রামচন্দ্র রাক্ষস বধার্থ শত্রুর অসহ্য মুষ্টিপীড় ধনুক ও বিচিত্র অঙ্গুলিত্রাণ ধারণ করিয়া প্রস্থান করিলে পুরনারীগণ মঙ্গলাভিলাষিণী হইয়া গুরুশোক উপস্থিত হওয়াতে অতি কষ্টেই ক্রন্দন সংবরণ করিয়াছিলেন।

"On 'the best of Raghus proceeding', desirous of killing the demons "holding firm in his grasp a bow unbearable by the enemies, having effective weapons and beautiful thimble attached, the ladies of the city wellwishers as they were, did not with difficulty shed tears from great anguish.

Q. Annotate on माऽवदन् । Ans. 'न वव्दुः' इति लिट् प्रयोग-स्थले 'माऽवदन्' इति लुङ् प्रयुक्तम् । "मा वारणे विकल्पे च" इति मेदिनीवचनेन

अथ जगदुरनीचैराशिषस्तस्य विप्रा-
स्तुमुलकलनिनादं तूर्य्यमाजघ्नुरन्ये ।
अभिमतफलशंसी चारु पुस्फोर बाहु-
स्तरुषु चुकुवुरुच्चैः पक्षिणश्चानुकूलाः ॥ २७ ॥

सन्ततं निवारणार्थेऽपि, अत्र अभावे एव प्रयुक्तम् । 'माङि लुङ्' इति माङ्योगात् सर्व्वत्र लुङ् विधानात् लिट् स्थले परोक्षायाम् लुङ् प्रयुक्तम् । Q. Show how मुष्टिपीड' can be derived without using the affix णमुल् । Ans. (१) मुष्टिं पीडयति इति पचाद्यच् । मुष्टिपीडमिति विशेषणेन धनुषोऽतिदार्ढ्यं सूचितमिति केचित् । (२) केचित्तु मुष्टिं मोषणं पीडयति खण्डयति इति, अनेन चौर्य्यापसारणं सूच्यते । (३) मुष्टिं हि सामर्थ्यात् धनुःकर्त्ता पीडयतीति केचित् । Q. Explain the significance of माङ्गलिक्यः । Ans. अश्रुपातेन पथि अमङ्गलं भवेत् इति भीताः सत्यः पुरस्त्रियः मङ्गलार्थं अश्रुस्तम्भनम् अकुर्व्वन् इत्यस्य सार्थक्यम् । तथाहि "तुषारलेखाकुलितोत्पलाभे पर्य्यश्रुणी मङ्गलभङ्गभीरुः । अगूढभावापि विलोकने सा न लोचने मीलयितुम् विषेहे ।" इति भारविः । Q. Show the fitness of दस्युमति । Ans. दस्यते छिनत्ति इति दस्युः, दसु धातोः उः । अनेन वाणानाम् हिंसाप्रयुक्तम् द्योतितम् । Q. Account for पञ्चमी in गुरुशोकात् and द्वितीया in दन्त्युकात् । Ans. See above. Q. Write gram. notes on परिभिः असह्यम् । Ans. "षहि मर्षणे" इति सहधातोः यत् अर्थात् कृत्यप्रत्ययः । "कृत्यानां कर्त्तरि विभाषा" इति च कृत्यप्रत्ययप्रयोगात् कर्त्तरि षष्ठीविधानाच्च अरीणाम् असह्यम् इत्यपि स्यात् । Q. Expound the samas in रघुसिंहे । Ans रघुः सिंह इव इति रघुसिंहः । "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति उपमितसमासः । Q. Annotate on दैन्त्यकात् । Ans. See above. Q. Show the syntactical connection with गुरुशोकात् । Ans. गुरुशोकात् कथमपि इत्येवमन्वयः । गुरुशोकात् माक्रदन् इति अन्वये कृते विपरीतार्थत्वम् गम्यते । २६ ।

27. It consists of four sentences. *viz* (1) अथ विप्राः तस्य आशिषः जगदुः, (2) अन्ये तूर्यम् आजघ्नुः, (3) वायुः प्राव पुस्फोर, (4) तरुषु पक्षिणः चुकुवुः। Adv. to जगदुः—अनीचैः, Adv. to आजघ्नुः—तुमुलकलनिनादम्, Adj. to वायुः—अभिमतफलशंसी, Adj. to पक्षिणः—अनुकूलाः। उच्चैः Adv. to चुकुवुः।

Prose order:—अथ विप्राः तस्य आशिषः अनीचैः जगदुः। अन्ये तूर्यम् तुमुलकलनिनादम् आजघ्नुः। अभिमतफलशंसी वायुः बाहु पुस्फोर। तरुषु अनुकूलाः पक्षिणः उच्चैः चुकुवुः।

Substance—अथ ब्राह्मणाः उच्चैः आशिषा रामम् संवर्धयामासुः, अपरे च केचित् मधुरशब्दं तूर्यं वादयामासुः, वाहुः स्फुरन्, वाञ्छा पूरिता भवेत् इति शंसयामास, विहगाश्च पादपेषु उपविश्य मनोहरं गायन्तः शुभं घोषयामासुः।

Explanation :—अथानन्तरं विप्रा ब्राह्मणाः ["विप्रश्च ब्राह्मणोऽसौ" इत्यमरः।] तस्य रामस्य व्रजत इति शेषः आशिषः इष्टवचनानि अनीचैः उच्चैः सशब्दं जगदुः उक्तवन्तः (नद्दिंट)। अन्ये वादकाः, तूर्यं वाद्यम् कांस्यतालपटहादिसमूहम् ["तूर्योऽस्त्री वाद्यनिर्घोषे वादित्रं वादनस्य तत्" इति कोषः।] तुमुलः महान् कलो मधुरास्फुटो निनादो ध्वनिर्यस्मिन् तत् यथा तथा आजघ्नुः ताडितवन्तः ["आङो यमहनः" इति अकर्मकात् स्वाङ्गकर्मकाद्वा आत्मनेपदविधानात् आत्मनेपदम् *।] अभिमतम् इष्टं फलं शंसति कथयतीति तथोक्तः तस्य वाहुः बाहु पुस्फोर स्फुरितवान्। [अत्र दक्षिणो बाहुः सामर्थ्यात् गम्यते। दक्षिणबाहुस्पन्दनं कान्तालिङ्गनसूचकमिति ज्ञाः। अनेन सीताप्राप्तिबीजमुपन्यस्तम्।] तरुषु वृक्षेषु अनुकूलाः माङ्गलिकाः पक्षिणः उच्चैः सुष्ठु चुकुवुः कूजितवन्तः। [एतेन गमनमङ्गलमुक्तम्। यदुक्तम् "वामे मधुरवाक् पक्षी दक्षः पक्षवितोऽयतः। अनुकूलो वहन् वायुः प्रयाणे शुभशंसिनः" इति। छन्दं पूर्ववत्।]

---

* "गाण्डीवी कनकशिलानिभं भुजाभ्याम् आजघ्ने विषमविलोचनस्य वक्षः" इति किराते अन्यथा दर्शनात् नैतत्सूत्रं महाकवयः सर्वथा अनुसरन्ति इति विभाव्यम्।

न न म य य

अ॑ थ॑ ज॑ । ग॑ दु॑ र॑ । नी चै र्ा । शि॑ ष स्त॑ । स्य॑ वि प्राः ।

अतः मालिनीवृत्तम् । लक्षणं यथा "ननमयययुतेयं मालिनीभोगिलोकैः ।"

Change of V.—जगदिरे...विप्रैः । तुमुलकलनिनादः तूर्य्यैः आजघ्ने अन्यैः । अभिमतफलशंसिना बाहुना पुस्फुरे । पक्षिभिः अनुकूलैः चुकुवे ।

Derivation.—जगदुः—गद-लिट् उस् । गदति-लट् । अगादीत् अगदीत्-लुङ् । आशिष्—आ-शास-क्विप् । आशिषत्-लुङ् । विप्र—वप-कर्त्तरि रः । अवाप्सीत्-लुङ् । आजघ्नुः—आ-हन-लिट् उस् । शंसी—शंस-णिन् । पुस्फोर—स्फुर-लिट् ण । स्फुरति लट् । चुकुवुः—कु-लिट् उस् । तुमुल—तु-मुलन् ।

অনন্তর ব্রাহ্মণগণ উচ্চৈঃস্বরে আশীর্ব্বাদ করিতে লাগিলেন। অপর ব্যক্তিগণ মহানিনাদ সুমধুর তূর্য্য নিনাদিত করিতে লাগিলেন। অভীষ্ট ফলজ্ঞাপক (দক্ষিণ) বাহু স্পন্দিত হইতে লাগিল। অনুকূল পক্ষিগণ বৃক্ষোপরি উচ্চৈঃস্বরে গান করিতে লাগিল।

Then the Brahmans uttered aloud blessings to him. Others struck musical instrument in great harmonious sounds'. The arm palpitated agreeably foretelling the desired result. The auspicious birds chirped loudly on the trees.

Q. Show the fitness of विप्र-। Ans. जन्मना ब्राह्मणो ज्ञेयः संस्कारैः द्विज उच्यते । विद्यया याति विप्रत्वम्" इत्यनेन तेषां विद्यावत्त्वं प्रकटितम् । Q. Account for the 6th case in तस्य । Ans. सम्बन्धविवक्षया षष्ठी । Q. Annotate on अथ । Ans. "मङ्गलानन्तरारम्भ प्रश्नकार्त्स्न्येष्वथो अथ" इति अमरवचनात् अत्र अथपदेन अनन्तरार्थत्वम् माङ्गल्यञ्च द्योतितम् । सर्गारम्भे सर्गशेषे च माङ्गल्यसूचकशब्द-प्रयोगः हिताय भवति । तथोक्तं भगवता भाष्यकारेण "मङ्गलादीनि मङ्गल-मध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाणि आयुष्मत्पुरुषाणि च भवन्ति ; अध्येतारश्च प्रवक्तारो भवन्ति ।" अथशब्दस्य मङ्गलार्थप्रमाणं यथा

"ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ।" Q. **Explain in English.** Ans. अथ जगदुः अनीचैः आशिषः तस्य विप्राः। The Brahmans uttered aloud blessings to him, (that there may not occur any mishap) तुमुलकलनिनादम् तूर्यमाजघ्नुरन्ये, others struck musical instruments in great harmonious sounds (to celebrate his departure) अभिमतफलशंसी चारु पुस्फोर बाहुः। The arm palpitated agreeably foretelling the desired result (*i.e.* the recurrence of his marriage with Sita) तरुषु चुकुवुरुच्चैः पक्षिणश्चानुकूलाः। The auspicious birds chirped aloud on the trees. २७।

इति भट्टिकाव्ये रामोत्पत्तिर्नाम

प्रथमः सर्गः।

द्वितीयः सर्गः ।

वनस्पतीनां सरसां नदीनां

तेजस्विनां कान्तिभृतां दिशाञ्च ।

निर्याय तस्याः स पुरः समन्ता-

च्छ्रियं दधानां शरदं ददर्श ॥ १ ॥

1. Principal sentence :—स पुरः निर्याय समन्तात् शरदं ददर्श । Adjunct to शरदम्—वनस्पतीनां, सरसां, नदीनां, तेजस्विनां, कान्तिभृतां दिशां च श्रियं दधानाम् ।

Prose order :—स तस्याः पुरः निर्याय समन्तात् वनस्पतीनां, सरसां, नदीनां, तेजस्विनां, कान्तिभृतां दिशाञ्च श्रियं दधानां शरदं ददर्श ।

Substance—अथ नगरात् निर्गत्य रामः शरदागमेन सुश्रीकान् तरून्, शोभितानि सरांसि, मनोहारिणीः नदीः, उज्ज्वलानि नक्षत्राणि, कान्तिमतीः दिशश्च समन्तात् अवलोकयामास ।

Explanation in tika form :—विजिगीषूणां कण्टकान् समुद्धर्तुं शरत्काले समुद्योग इति इदानीं तमेव वर्णयति । वनस्पतीनामिति । स रामः तस्याः पुरः [अपादाने पञ्चमी] अयोध्यायाः निर्याय निर्गत्य समन्तात् सर्वतः, वनस्पतीनां वृक्षाणां ["वानस्पत्यः फलैः पुष्पैस्तैरपुष्पाद्वनस्पतिः" इति कोषः । 'पारस्करप्रभृतीनि च संज्ञायाम्'' इति निपातनात् सुडागमः।] सरसां तड़ागानां ["पद्माकरस्तड़ागोऽस्त्री कासारः सरसी सरः" इत्यमरः ।] नदीनां गङ्गादीनां, तेजो विद्यते येषां ते तेजस्विनः ["अस्मायामेधास्रजो विनिः" इति विनिः ।] तेषां चन्द्रतारादीनां तथा कान्तिं नैर्मल्यं बिभ्रतां (क्विप्) धारयन्तीनां दिशाञ्च । तदा हि निर्मला दिशो भवन्ति । श्रियं शोभां । दधानां धारयन्तीम् शरदं ऋतुं ["ऋतौ संवत्सरे शरत्" इत्यमरः ।] ददर्श । [यद्यपि कालस्य प्रत्यक्षता नास्ति तथापि तद्व्यञ्जकदर्शनात् तथा व्यपदेशः । उपजातिः ।]

Change of V.—......तेन......दधाना शरत् ददृशे ।

Derivation :—तेजस्विनाम्—तेजस्-विन् षष्ठी। कान्तिभृता—कान्ति-भृ-क्विप् षष्ठी। निर्याय—निर्-या-ल्यप्। श्रियं—श्रि-क्विप् २या। लुङ् अशिश्रियत्। दधाना—धा-शानच्। शरत्—शृ-अदिः। शरत् शरदौ शरदः इत्यादि शब्दरूपम्। आपद्, विपद्, सम्पद् इत्यादिवत् स्त्रियां भवति। ददर्श—दृश-लिट् अ। लुङ् अद्राक्षीत्, अदर्शत्। सरस्—सृ-असुन्। असरत् असार्षीत् लुङ्।

রামচন্দ্র সেই পুরী হইতে বহির্গত হইয়া চতুর্দ্দিকে বৃক্ষ সরোবর নদী নক্ষত্রাদি ও সুশোভিতদিঙ্মণ্ডলের শোভাবিধাত্রী শরৎ অবলোকন করিলেন।

Stepping out of the city he saw on all sides the autumn fraught with the beauties of large trees, the ponds, the rivers, the luminaries and the quarters provided with embellishments.

Q. Derive and decline द्वितीय in the 4th case. Ans. "द्वेस्तीयः" इति द्विशब्दात् तीयः। "तीयो ङिति" इति विकल्पेन सर्व्वनामता, अतः द्वितीयस्मै द्वितीयाय &c.। Q. Give the different meanings of सर्ग। Ans. "सर्गः स्वभावनिर्म्मोक्षनिश्चयाध्यायसृष्टिषु।" Q. Of what gender is कान्तिभृताम्? Ans. दिश् शब्दस्य स्त्रीलिङ्गतया, तद्विशेषणस्य 'कान्तिभृताम्' इत्यस्य स्त्रीलिङ्गता। क्विबन्तानां स्त्रीपुंसयोः समरूपता। Q. Justify the expression शरदं ददर्श। [How can the time *viz.* autumn, be perceived by the eyes?] Ans. See above. Q. Show the fitness of the words वनस्पतीनाम्, सरसाम्, तेजस्विनाम् and दिशाम्। Ans. प्राग्भववर्षासु जलवर्षणेन धूलीनाम् अपसरणेन, जलप्राचुर्य्यात् पुष्टतया च, वृक्षाणाम् सौन्दर्य्यम् शरदि अधिकतरम् वर्द्धते। अगस्त्यनाम्नः नक्षत्रस्य शरदि उदयात् नदीनाम् सरसाञ्च जलं निर्म्मलं भवति। अतः तत्र निर्म्मलतया वृक्षादीनाम् प्रतिफलिततया अधिकं सौन्दर्य्यम्। आकाशस्य नैर्म्मल्यात् नक्षत्रादीनाम् अधिकम् दीप्तत्वं शोभनत्वञ्च भवति। तथाहि "प्रससादोदयादम्भः कुम्भयोनेर्महौजसः"। "हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु। विभूतयस्तदीयानाम्

तरङ्गसङ्गाच्चपलैः पलाशै-
र्ज्वालाश्रियं सातिशयान्दधन्ति ।
सधूमदीप्ताग्निरुचीनि रेजु-
स्ताम्रोत्पलान्याकुलषट्पदानि ॥ २ ॥


पर्य्यस्ता यमसामिव ।" रघुः । Q. Why is the season autumn described by the poet? Ans. (Look at the beginning of the explanation.) Q. What is an *ablative* in *Sanskrit*? From your answer show that पुरः in the above is in the *ablative* case. Ans. "ध्रुवमपायेऽपादानम् ।" अत्र रामनगरयोः अपाये (विश्लेषे) जाते रामगमः नगरन्तु ध्रुवं (निश्चलम्) एव । ध्रुवत्वात् नगरस्य अपादानत्वम् । १ ।

2. Principal part of the sentence :—ताम्रोत्पलानि रेजुः । Adjuncts to the Subject *viz* ताम्रोत्पलानि—पलाशैः, ज्वालाश्रियं दधन्ति, आकुलषट्पदानि, and सधूमदीप्ताग्निरुचीनि । Adj. to पलाशैः—तरङ्गसङ्गात् चपलैः । Adj. to ज्वालाश्रियम्—सातिशयाम् ।

Prose order :—तरङ्गसङ्गात् चपलैः पलाशैः सातिशयां ज्वालाश्रियं दधन्ति आकुलषट्पदानि (अतएव) सधूमदीप्ताग्निरुचीनि ताम्रोत्पलानि रेजुः ।

Substance :—लोहितवर्णानि तथा भ्रमद्भ्रमरयुतानि पद्मानि, तरङ्गैः चालितानि भूत्वा, सधूमाः अग्निशिखाः इव शुशुभिरे ।

Explanation in tika form :—शरदि पद्मादीनि वर्ण्यन्ते, अतः तदवर्णयन्नाह तरङ्गेति । तरङ्गा अम्भोर्मयः तेषां सङ्गात् सम्पर्कात् चपलैः चञ्चलैः, [चुप मन्दगतौ, अतः कलः । "चपलं चञ्चलं शीघ्रं चपला पिप्पली तडित् ।"]. पलाशैः पत्रैः ["पत्रं पलाशं छदनम्" इत्यमरः ।] सातिशयां अधिकतरां ज्वालायाः शिखायाः श्रियं शोभां ["वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्" इत्यमरः ।] दधन्ति धारयन्ति । चलितरक्तोत्पलदलानां वह्निज्वालासादृश्यमिति । तथा षट पदानि येषां ते षटपदा भ्रमराः ["षटपद भ्रमरालयः" इत्यमरः ।]



आकुला उपरि भ्रमन्तः षट्पदा भ्रमरा येषु तानि आकुलषट्पदानि। षट्पदानां कृष्णवर्णत्वात् धूमसादृश्यमिति। अतएव धूमेन सह वर्त्तमानस्य दीप्तस्य ज्वलितस्य अग्नेः रुचिः दीप्तिः सा इव रुचिः येषां तानि, ["सप्तम्युपमान पूर्व्वस्य च उत्तर पद लोपः" इति उत्तरपदलोपी समासः। "अभिष्वङ्गे स्पृहायाञ्च गभस्तौ च रुचिः स्त्रियाम्" इत्यमरः।] ताम्रोत्पलानि रक्तोत्पलानि रेजुः दीप्यन्ते स्म। [रराजुः इति पदान्तरम्। शरद्वर्णनीयवस्तूनि यथा, "अथ रुचः शरदर्कः श्वेताभ्रविमलं नभः। तथा सरांस्यम्बुरुहैर्भान्ति हंसांसघट्टितैः।" इत्यादि। निदर्शनालङ्कारः (Illustration.) लक्षणं यथा, "सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्। यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना।" वृत्तम् उपजातिः।]

Change of V.—......दधद्भिः सधूमदीप्ताग्निरुचिभिः रेजे ताम्रोत्पलैः आकुलषट्पदैः।

Derivation :—सङ्गः—सन्ज् घञ्। लट् सजति। असाङ्क्षीत् लुङ्। पलाशम्—पल गतौ, घञर्थे कः, पलम्, पलं चलनं अश्नुते इति पलाशम्, अश् धातोः अण्। तरङ्गः—तॄ-अङ्गच्। उत्पलम्—उत्-पल-अच्। रेजुः—राज् लिट् उस्। राजति राजते लट्। अराजीत्, अराजिष्ट लुङ्। रराज, रेजे, रराजे लिट्। आकुल—आ-कुल-क।

ভ্রমরাকুলিত লোহিতোৎপল, তরঙ্গসংসর্গে বিচলিত পত্র দ্বারা অগ্নিশিখার সমধিক সৌন্দর্য্য ধারণ করিয়া, ধূমসম্পৃক্ত দীপ্তাগ্নিবৎ সুশোভিত হইয়াছিল।

The red lotuses beset with black bees and thus holding great beauties of flames, by means of petals moving by contact with the waves, shone with the lustre of the blazing fire accompanied by smokes.

Q. Explain in English. Ans, ताम्रोत्पलानि आकुल-षट्पदानि The red lotuses beset with black bees, सातिशयां ज्वालाश्रियं दधन्ति, (thus) holding great beauties of the flames तरङ्गसङ्गात् चपलैः पलाशैः by means of petals 'moving by contact with the waves, सधूमदीप्ताग्निरुचीनि रेजुः shone with the

बिम्बागतैस्तीरवनैः समृद्धिं
निजां विलोक्यापहृतां पयोभिः ।
कूलानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः ॥ ३ ॥

lustre of the blazing fire accompanied by smokes. (The black bees hovering over the red lotuses imitated the smokes over flames.) Q. Comment grammatically on दधन्ति । Ans. "वा नपुंसकस्य" इति क्लीवे विकल्पेन नुम् विधानात्, दधन्ति इति स्यात्, पक्षे दधति । Q. Explain the figure "Illustration" in the above. Ans. कृष्णवर्णाः षट्पदाः लोहितवर्णानाम् पद्मानाम् उपरि भ्रमन्तः, अग्निशिखोपरि चञ्चलं धूमम् अनुकुर्वन्ति स्म इत्यर्थः । Q. Derive चपल, तरङ्ग, पलाश । Ans. See above. Q. Account for the 5th case ending in तरङ्गसङ्गात् । Ans. हेतौ पञ्चमी । अथवा तरङ्गसङ्गम् अवाप्य इति ल्यब्लोपे पञ्चमी । Q. Why is a black bee called षट्पद । Ans. भ्रमराणां षट् पदानि सन्ति अतः ते षट्पदाः कथ्यन्ते । Q. Why is lotus described ? Ans. See above. २ ।

3. Principal sentence :—कूलानि सामर्षतया इव स्थलपद्महासैः सरोजलक्ष्मीं तेनुः । Subordinate sentence—तीरवनैः समृद्धिम् पयोभिः अपहृतां विलोक्य । Adj. to तीरवनैः—बिम्बागतैः ; Adj. to समृद्धिम्—निजाम् ।

Prose order :—बिम्बागतैः तीरवनैः निजां समृद्धिम् पयोभिः अपहृतां विलोक्य कूलानि सामर्षतयेव स्थलपद्महासैः सरोजलक्ष्मीं तेनुः ।

Substance :—नदीकूलानि स्वच्छसलिले प्रतिबिम्बितानि तीरवनानि दृष्ट्वा अहो वारिभिः अस्माकम् सम्पत् चोरिता इति मत्वा वैरनिर्यातनेच्छया वारिस्थितं पद्मसौन्दर्यं स्थलपद्मविकाशेन दधुः ।

Explanation in tika form :—कूलानि नद्यादीनां तीराणि, कर्तृभूतानि, ["कूलं रोधश्च तीरञ्च प्रतीरञ्च तटन्त्रिषु" इत्यमरः ।] बिम्बं प्रतिबिम्बं तेन आगतैः निपतितैः, [तृतीयासमासः ।] तीरे स्थितानि वनानि तैः करणभूतैः कुसुमितैरिति अर्थात् गम्यते । पयोभिः सलिलैः कर्तृभिः निजाम् आत्मीयां समृद्धिं सम्पत्तिम् अपहृतां चोरितां विलोक्य दृष्ट्वा सामर्षतया सक्रोधतया, [इतौ तृतीया, इवेत्युत्प्रेक्षायाम् ।] स्थलपद्महासैः स्थलकमलविकाशैः सरोजलक्ष्मीं पयःसम्बन्धिनीं पद्मशोभां, ["लक्ष्मीः पद्मा विभूतिश्च" ।] तेनुः विस्तारितवन्ति । यथा पयसा कूलसौन्दर्य्यं चोरितम् तथा कूलानि स्थलपद्मैः पद्मशोभाम् अपाहरन् इत्यर्थः ।

भ्रान्तिमदालङ्कारः उत्प्रेक्षा च । वृत्तमुपजातिः ।"

Change of V.—कूलैः तेने सरोजलक्ष्मीः ।

Derivation.—बिम्बम्—वा-धातोः वन् । तीरम्—तीर अच् । पयस्—पा-असुन् । कूलम्—कूल-अच् । अमर्ष—न मृष-घञ् । लक्ष्मी—लक्ष-ई, "लक्षेर्मुट् च" इति मुडागमः । स्थलम्—स्थल-अच् । पद्म—पद-मन् ।

সলিল, প্রতিবিম্বিত তীরবন দ্বারা নিজ সমৃদ্ধি অপহরণ করিয়াছে দেখিয়া, নদীকূল সকল যেন ক্রোধ হেতু, স্থলপদ্ম বিকাশ দ্বারা পদ্ম শোভা বিস্তার করিল ।

The banks, finding their own grandeur stolen by the waters by means of the riparian forests being reflected in them, diffused, as if in rage, the beauties of lotuses by means of blooming land lotuses (Hibiscus Mutabilis).

Q. Derive पयस्; what is the proper affix to make it an adjective? Ans. पिबतेः असुन् । "अस् माया मेधास्रजो विनिः" इति विन्प्रत्ययेन पयस्विन् इति विशेषणशब्दः भवति । Q. Show the reason of water being described here. Ans. See the poem 2, above. Q. Expound the sámas in सरोजलक्ष्मीम् and स्थलपद्महासैः । Ans. सरसि जायन्ते यानि तानि सरोजानि । सर उपपदात् जनधातोः डः, उपपदसमासः, तेषां लक्ष्मीः ताम्, षष्ठी-

निशातुषारैर्नयनाम्बुकल्पैः
पत्रान्तपर्य्यागलदच्छबिन्दुः ।
उपारुरोदेव नदत्पतङ्गः
कुमुद्वतीं तीरतरुर्दिनादौ ॥ ४ ॥

समासः । स्थलपद्महासैः स्थलजातानि पद्मानि स्थलपद्मानि "शाकपार्थिव"वत् समासः । (शाकप्रियः=शक्तिप्रियः पार्थिवः, इति शाकपार्थिवः) । तेषां हासाः षष्ठीसमासः । Q. Show the significance of हासः । Ans. यथास्माकम् सौन्दर्य्यम् अपहृतम् युष्माभिः तथा पश्यत युष्माकमपि सौन्दर्य्यम् अहम् धारयामि इति उपहसदिव कूलम् स्मितम् इति हासपदस्य सार्थकम् । Q. Give the different meanings of पद्म according to gender. Ans. अर्द्धर्चादित्वात् वा पुंसि पद्मम् । "वा पुंसि पद्मं नलिनम्" "पद्मः स्यात् निधिसंख्ययोः ।" स्त्रियां, पद्मिनी पद्मसमूहे पद्मयुक्ते स्थाने वा ; "पुष्करादिभ्यो देशे" इति इनिः । पद्मा तु हरिप्रियायाम् "पद्मा हरिवधूः स्मृता ।" इति । ३ ।

4. Principal part :—तीरतरुः दिनादौ निशातुषारैः कुमुद्वतीम् उपारुरोद इव । Adj. to निशातुषारैः—नयनाम्बुकल्पैः । Adj. to तीरतरुः—पत्रान्तपर्य्यागलदच्छबिन्दुः and नदत्पतङ्गः ।

Prose order :—दिनादौ नयनाम्बुकल्पैः निशातुषारैः, पत्रान्तपर्य्यागलदच्छबिन्दुः नदत्पतङ्गः तीरतरुः कुमुद्वतीम् उपारुरोद इव ।

Substance :—कुमुदिनी निशायां शोभते, दिवसे तु सूर्य्यतापेन मलिनतां भजते । तीरतरुः दिनागमे कुमुदिन्याः दुर्दशामवलोक्य हिमजलच्छलेन अश्रु विमुञ्चन्, पक्षिशब्दच्छलेन उच्चैः क्रन्दन् इव स्थितः ।

Explanation in tika form :—दिनादौ दिनारम्भे प्रभाते इत्यर्थः । नयनाम्बुकल्पैः अश्रुतुल्यैः नयनानुकारिषु पत्रेषु स्थितत्वात् । ["ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" इति कल्पप् ।] निशायां सम्भूतैः तुषारैः रात्रिसम्बन्धिभिः हिमैः [हेतुभूतैः, "तुषारस्तुहिनं हिमम्" इत्यमरः । उत्तरपदलोपीसमासः षष्ठीसमासो

वा।] पत्रान्तेभ्यः पर्य्यन्तेभ्यः पतन्तः अच्छाः प्रसन्ना निर्म्मला इति यावत्, ["प्रसन्नोऽच्छः" इत्यमरः।] बिन्दवः पृषताः यस्य तुषाभूतस्य। एतेन नयनाम्बुतुल्यत्वं सूचितम्। तथा क्रन्दनं यौजयन्नाह, नदन्तः कूजन्तः पतङ्गाः पक्षिणो यत्र तथाभूतः। ["पतङ्गौ पक्षिसूर्य्यौ च" इत्यमरः।] नदत्पक्षिकः तीरस्थितः तरुः कुमुदतीम् कुमुदिनीं ["अथ कुमुदती कुमुदिन्याम्" इत्यमरः, "कुमुद नड वेतसेभ्यो ड्मतुप्" इति स्वार्थे ड्मतुप्। "भयः" इति मल्ल वः।] उपारुरोद आक्रन्दितवानिव, उत्प्रेक्षा। प्रियवियोगादीदृशी त्वं भूतासि इति दुःखात् क्रन्दितवानिव इति भावः। आक्रान्तविशिष्टाया रोदनक्रियायाः सुकर्म्मकत्वं, कैवल्यायास्त्वकर्म्मकत्वमिति ज्ञाः। उपमोत्प्रेक्षयोः संसृष्टिः। वृत्तमुपजातिः।

Change of V.—......बिन्दुना नदत्पतङ्गेन तीरतरुणा, उपारुरुदे कुमुदती।

Derivations:—निशा—नितरां श्यति तनूकरोति व्यापारान्, शोधातोः कः। तुषार—तुष-आरन्। पतङ्ग—पतन् उत्पतन् गच्छति, गम्धातोः खच् (see below)। उपारुरोद—उप-आ-रुद-लिट् अ। कुमुदती—कुमुद-ड्मतुप्। तरुः—तॄ-उः। तरन्ति नरकमनेन दीपकाः इति तरुः। अच्छः—न छ्यति दृष्टिम्, छो छेदने, कः।

তীরতরু দিবসের প্রারম্ভে, নয়নবারি সদৃশ নিশা-হিম-জল দ্বারা চক্ষুঃসদৃশ পত্রান্ত হইতে স্বচ্ছ অশ্রুপাত করিয়া পক্ষিকলরবে যেন কুমুদিনীর জন্য কাঁদিয়াছিল।

At the dawn the reparian tree, with birds chirping, sorrowed over the water lily shedding transparent drops from the extremities of the petals resembling eyes by means of night dews almost like tears.

Q. In what sense is ड्मतुप् used? Name some other affixes of equivalent expression. Ans. See above. **Q. Annotate on the transitive sense of** उपारुरोद। Ans. अत्र कर्त्तुः तरोः आक्रन्दनविशिष्टायाम् रोदनक्रियायाम्

वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण ॥ ५ ॥

कुमुद्वती इष्टतमा, अत: अत्र आत्मानविभिन्नरोदने सकर्मकत्वम्। तथाहि पञ्चमे सर्गे, "मामम्याइमरोदीत् सा भ्रातरी"। "गुरुशोकाम् अनुरोदितीव माम्" कुमार:। Q. Derive पतङ्ग: and give the different meanings. Ans. "पतेरङ्गच् पक्षिणि" इति पत्धातो: अङ्गच्। "पतङ्ग: शलभे शालिप्रभेदे विहगे रवौ" इति विश्व:। Q. Decline the base निशा। Ans. निशा, निशे, निशा:, निशाम्, निशे, निशा: निश:, निशया निशा, निशाभ्यां निड्भ्याम्, निशासु निट्सु। Q. What should be the form of निशा in the तत्पुरुष and in समाहारद्वन्द्व? Ans. तत्पुरुषे निशाशब्दस्य विभाषया क्लीवत्वम्। यथा, खनिशम् खनिशा। समाहारद्वन्द्वे क्लीवत्वम्। यथा दिवानिशम्। Q. Comment gram. on कुमुद्वतीम्। Ans. अत्र ड्मतुप्प्रत्यय: चातुरर्थिक:, अतोऽत्र स्वार्थे ड्मतुप्। See above for 2nd case &c. ।।४।।

5. Principal part :—वनानि तोयानि च, पुष्पै: सरोजैश्च परस्परां लक्ष्मीम् आदरेण आलोकयाञ्चक्रु: इव। Adj. to पुष्पै:—नेत्रकल्पै: and निलीनभृङ्गै:। Adj. to वनानि and तोयानि—विस्मयवन्ति।

Prose order :—वनानि निलीनभृङ्गै: नेत्रकल्पै:, पुष्पै:, तोयानि च (तथाभूतै:) सरोजै:, विस्मयवन्ति (सन्ति) परस्परां लक्ष्मीम् आदरेण आलोकयाञ्चक्रु: इव।

Substance :—शरदि जलशोभा स्थलशोभा च तुल्यासीत्, तथा सति, वनानि जलशोभां सविस्मयम् अवालोकयन्, जलानि च स्थलशोभां सकौतुकम् ददृशु:। तेषां स्थलपुष्पाणि पद्मानि च भृङ्गयुक्ततया सकनीनिकानि नेत्राणीव बभु:।

Explanation in tika form —वनानि महीतीरवनानि ["वनं नपुंसकं नीरे निवासालयकानने" इति मेदिनी ।] निलीना अभ्यन्तरस्थिता भृङ्गाः भ्रमरा येषु तैः । अनेन नेत्रसादृश्यं गम्यते । नेत्रकल्पैः नयनसदृशैः प्रफुल्लनयनवत् विकसितैः इत्यर्थः । पुष्पैः कुसुमैः, तोयानि सलिलानि च तथाभूतैः सरसि जायन्ते तैः सरोजैः पद्मैः, [जनधातोः डः ।] विस्मयवन्ति जातविस्मयानि सन्ति ["अत्यर्थे मतुप्, "मादुपधायाश्च मतोर्वोऽयवादिभ्यः"* इति मस्य वः ।] परस्परां लक्ष्मीम् अन्योन्यस्य शोभाम् ["लक्ष्मीः सम्पत्तिशोभयोः" इति मेदिनी ।] परस्परमिति पाठे क्रियाविशेषणम् । आदरेण यत्नेन, प्रकृत्यादित्वात् तृतीया । आलोकयाचक्रुः ददृशुरिव । [अलङ्कारः उत्प्रेक्षोपमेययोः सङ्करः । वृत्तम् उपजातिः । Cf. "तद्वल्गुना युगपदुन्मिषितेन तावत् सद्यः परस्परतुलामधिरोहतां द्वे । प्रस्पन्दमानपरुषेतरतारमन्तश्चक्षुस्तव प्रचलितभ्रमरञ्च पद्मम् ॥ रघुः ।]

Change of V.—वनैः तोयैः परस्परा लक्ष्मीः विस्मयवद्भिः आलोकयाचक्रे ।

Derivation—वन—वन+अच् ; स्त्रियां वनी । तोय—तु-विच्, ततः या धातोः कः । नेत्र—नयति, नीयते वा अनेन, इति नी धातोः ष्ट्रन् । पुष्प—पुष्प-अच् । भृङ्ग—भृ-गन् ; "भृञः कित् नुट् च" इति नुट् आगमः । लक्ष्मीः—See tika. 3.

বন ও জল, যেন বিস্মিত হইয়া চক্ষু স্বরূপ ভ্রমরযুক্ত স্থল-কুসুম ও পদ্ম দ্বারা সাদরে পরস্পরের শোভা অবলোকন করিয়াছিল।

The forests and waters as if looked wonderfully at each others beauty in great esteem, by means of flowers and lotuses having black bees attached to them and thus appearing a little less than eyes.

---

* Words ending in म् or अ i. e. अ and आ, (as किम्, धन, दया &c.) or words having their penultimate letter as म् or अ and आ (as लक्ष्मी, भास् &c.) have after them the म of मतुप् substituted for व्, which becomes then वतुप् । As किंवान्, धनवान् दयावान् लक्ष्मीवान् भास्वान् । The words यव &c are excepted.

प्रभात वाताहति कम्पिताकृतिः
कुमुद्वतीरेणुपिशङ्गविग्रहम् ।
निरास भृङ्गं कुपितेव पद्मिनी
न मानिनी संसहतेऽन्यसङ्गमम् ॥ ६ ॥

Q. In what senses is the indeclinable 'च' used? Show its application here. Ans. "चान्वाचये समाहारेऽन्योन्यार्थे समुच्चये" इति मेदिनी वचनात् अत्र 'च' अन्योन्यार्थे व्यवहृतमपि परस्परामिति पदप्रयोगात् समुच्चयार्थ एव प्रयुक्तम् भवेत् । (समुच्चय=and) Q. Name some verbs that are used as auxiliaries. Ans. These are कृ, भू and अस् । So कृ in आलोकयाञ्चक्रुः serves the purpose of an auxiliary. So also are भू and अस् in आलोकयाम्बभूवुः and आलोकयामासुः । Q. Show the propriety and significance of निलीनभृङ्गैः । Ans. Propriety—भ्रमराणां कृष्णवर्णतया, चक्षुषां तारकाणां तथात्वेन च परस्परतुल्यता । Significance—सकौतुकम् किमपि पश्यतां लोकानाम् नयनतारकाः स्थिरा भवन्ति । भ्रमराणाम् पुष्पेषु उपवेशनात् पुष्पनयनानाम् स्थिरतारकत्वम्, अतः विस्मयावलोकनञ्च ध्वनितम् । Q. Write gram.. notes on परस्पराम् । Ans. See the sloka 21. I. Q. Annotate on विस्मयवन्ति । Ans. See above. । ५ ।

6. It consists of 2 principal sentences—(1) पद्मिनी भृङ्गं निरास । Adj. to कुमुद्वतो—प्रभातवाताहतिकम्पिताकृतिः । Adj. to भृङ्गम्—कुमुद्वतीरेणुपिशङ्गविग्रहम् ; (2) मानिनी अन्यसङ्गमं न संसहते ।

Prose order—प्रभातवाताहतिकम्पिताकृतिः पद्मिनी कुपिता इव कुमुद्वतीरेणुपिशङ्गविग्रहं भृङ्गं निरास । मानिनी अन्यसङ्गमं न संसहते ।

Substance :—प्रभातमारुतेन पद्मिनी कम्पितासीत् अतः भृङ्गास्तत्र उपवेष्टुं न शक्ताः, कविस्तु उत्प्रेक्षते यथा, रात्रौ कुमुदिनीविकाशात् भ्रमरस्तु

तत्संसर्गेण पद्मिनी तं प्रति कुपिता सती तेन आत्मानं स्पृष्टम् अनिच्छन्ती तं यत् प्रत्याख्यातवती, तत् स्थाने, यतः मनस्विनी स्वामिनः अन्यसंसर्गं न सहते इति।

Explanation in tika form—प्रभाते प्रातः यो वातः वायुः तस्य आहत्या आघातेन कम्पिता चलिता आकृतिराकारो यस्याः सा पद्मिनी सरोजिनी कुपिता सती कुमुद्वत्याः कुमुदिन्या रेणुना परागेण "पिशङ्गः कपिशः पिङ्गल इत्यर्थः ["पिङ्ग पिशङ्गौ कद्रु पिङ्गलौ" इत्यमरः।] विग्रहः देहो यस्य तथाभूतं, भृङ्गं षट्पदं निरास निरस्यति स्म। प्रत्याख्यातवतीत्यर्थः। [निर् पूर्व्वात् अस्यतेः लिटि-रूपम्। यथा काचित् स्त्री अन्ययोषिता सह गमितरात्रिं पतिं तदङ्गलग्नचन्दन-चिह्नेन निर्णीय क्रोधकम्पिता निरस्यति तद्वत्।] यतः मानिनी अभिमानवती स्त्री ["गर्व्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः" इत्यमरः] अन्यया सह सङ्गमं अन्ययोषित्संसर्गं न संसहते न सम्यक् क्षमते। "न मानिनी संसहतेऽन्यसङ्गमम्" इति पाठे—मानिनी मानवती स्त्री अन्यया सह सङ्गमः संसर्गः यस्य तथाभूतम् ईदृशं पतिं न सहते क्षमते] अलङ्कारः—पूर्व्ववत् समासोक्तिमूला उत्प्रेक्षा, ततः सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः।

ज त ज र

प्रभाते। वाताह। तिकम्पि। ताकृतिः।

अतः वंशस्थम्। "जतौ तु वंशस्थमुदीरितं जरौ" इति वृत्तरत्नाकरम्।

अयन्तु श्लोकः प्रक्षिप्त इव आभाति, पूर्व्वतः विरुद्धविषयवर्णनात् भिन्नवृत्तत्वाच्च। तथापि वंशस्थेन्द्रवंशयोरपि साङ्कर्य्येण उपजाति विधानात् अत्र वंशस्थ वृत्तेन सर्गस्यास्य एकवृत्तमयत्वमेव। विभिन्नसमयतया च भिन्नविषयत्वम् इति सुधीभिर्विभाव्यम्।

Remarks on the sloka 6.—*The sloka appears to be an interpolation. By the rule of Rhetorio* "एकवृत्तमयैः पद्यैः अवसानेऽन्यवृत्तकैः" *a metre different from what is adopted in the oanto can not be inserted at the middle of it. Moreover the sense is quite opposite to that of the previous one,*

where, by the epithet निलीनभृङ्गः was shown, that the lotus was at perfect rest. In defence however see above.

Change of V.—कम्पिताङ्गया * * विवशः निरास भृङ्गः ज्ञापयत्येव पद्मिन्या मानिन्या अन्यसंगमः न संसह्यते ।

Derivation—आहति—आ-हन-भावे क्तिः । कुमुद्वती—कुमुद-ड्मतुप् । See sl. 4. निरास—निर्-अस्-लिट् अ । असति—लट् ; आस्यत्-लुङ् । मानिनी—मान-इन् ईप् । संसहते—सं-सह-लट् ते । लुङ् भवहित । लुट्—सहिता, सोढ़ा ।

প্রভাত-বায়ুবশে কম্পিতাঙ্গ পদ্মিনী যেন কুপিত হইয়াই কুমুদিনীর রেণু দ্বারা যাহার দেহ রঞ্জিত সেই ভ্রমরকে তাড়াইয়া দিল। অভিমানিনী অন্য সঙ্গম সহ্য করিতে পারে না।

The lotus plant shaken at the stroke of the morning breeze, as if repulsed in rage the black bee with his body rendered tawny by the dust of water lilies (like a lady of Padmini classe). The woman that feels self respect never tolerates (her lover's) association with others.

Q. What does the whole sloka signify. Ans. शरदृवर्णनच्छलेन त्रिगुणोपेतस्य मारुतस्य तथा सशब्दस्य भृङ्गस्य वर्णनात् रामस्य यात्रासाफल्यं प्रकटितम् । तथाहि वालकाव्ये, "शुभगन्धे च शब्दे च सानुकूले च मारुते । प्रस्थिते सर्व्वकार्य्याणाम् सर्व्वसिद्धिर्ध्रुवं भवेत् ॥" पवनादीनां शुभ ज्ञापने यथा, रघुः—"दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे ।" कुमारः — " प्रसन्नदिक् पांशुविविक्तवातं शङ्खस्वनानन्तरपुष्पवृष्टि, शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव । Q. Show the fitness of the word पद्मिनी । Ans. अत्र पद्मिनीपदेन पद्मिनी नाम्नी उत्कृष्टा स्त्री ध्वन्यते । पद्मिनीलक्षणं यथा, "भवति कमलनेत्रा नासिका क्षुद्ररन्ध्रा ; अविरल कुचयुग्मा दीर्घकेशी कृशाङ्गी । मृदुवचनसुशीला नीतनृत्यानुरक्ता सकलतनुसवेशा पद्मिनी पद्मगन्धा ।" ४

दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ।
आकर्णयन्नुत्सुकहंसनादान्
लक्ष्ये समाधिं न दधे मृगावित् ॥ ७ ॥

7. Principal part :—मृगावित् लक्ष्ये समाधिं न दधे । Adj. to मृगावित्—हरिणं जिघांसुः and उत्सुकहंसनादान् आकर्णयन् । Adj. to हरिणम्—मधुलेहिगीतौ दत्तावधानम् and प्रशान्तचेष्टम् ।

Prose order :—मधुलेहिगीतौ दत्तावधानं प्रशान्तचेष्टं हरिणं जिघांसुः मृगावित् उत्सुकहंसनादान् आकर्णयन् लक्ष्ये समाधिं न दधे ।

Substance :—शरदि हंसाः तथा कलं नेदुः भ्रमराश्च गुञ्जितवन्तः यथा व्याधः विमुग्धचित्तः, भ्रमरगुञ्जनं सावधानं आकर्णयति हरिणे लक्ष्ये स्थिरेऽपि न मनो दधे ।

Explanation in tika form :—मधु लेढुं शीलमेषामिति मधुलेहिनः मधुकराः [ताच्छील्ये णिनिः] तेषां गीतौ ध्वनिषु दत्तम् अर्पितं अवधानं मानसं येन तथोक्तं दत्तचित्तमित्यर्थः । ["मधुलिह गीतौ" इति पाठे मधु लिहन्तीति मधुलिहाः कर्म्मण्यण्] अतएव प्रशान्ता चेष्टा शरीरक्रिया यस्य तादृशमपि हरिणं जिघांसुः हन्तुमिच्छुः, मृगान् विध्यतीति, मृगावित् व्याधः ["क्विप् च" इति क्विप् । नहिवृतीत्यादिना पूर्व्वपद दीर्घः ।*] उत्सुकानां उन्मनसां हंसानां नादान् ध्वनीन् आकर्णयन् शृण्वन् तत्राभिरतचित्तत्वात् इत्यर्थः । ["लक्षणहेत्वोः क्रियायाः" † इति शतृ प्रत्ययः । लक्ष्ये वध्ये "लक्ष्यं वध्यं शरव्यञ्च" इत्यमरः । समाधिं चित्तैकाग्रतां न दधे न नियोजयामास । हंसध्वनिश्रवणेन स्वस्य उत्-

* "नहि वृति वृषि व्यधि रुचि सहि तनिषु क्वौ ।" क्विबन्तेषु एषु परेषु पूर्व्वपदस्य दीर्घः । यथा उपानह्, नीवृत्, प्रावृष्, मृगाविध्, नीरुच्, ऋतीषह्, परीतत् ।

† क्रियायाः परिचायके हेतौ च अर्थे वर्त्तमानात् धातोः लटः शतृशानचौ स्तः । यथा शयाना भुञ्जते यवनाः । हरिं पश्यन् मुच्यते ।

कल्पितत्वात् इति भावः। अलङ्कारः विशेषोक्तिः। लक्षणं यथा, "सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा।" वृत्तमुपजातिः।

Change of voice :—जिघांसुना मृगाविधा आकर्णयता समाधिः दधे।

Derivation :—मधुलिहि—मधु-लिह-क्विप्। लट्—लेढि, लीढे। लुङ्—अलेढ़, अलिक्षत अलीढ़। प्रशान्त—प्र-शम-क्त। जिघांसुः—हन-सन-उः। आकर्णयन्—आ-कर्ण-शतृ, प्रथमा। उत्सुक—उत्-सु-डु, ततः कन्। समाधि—सम्-आ-धा-किः। दधे—धा-लिट् ए। लुङ्—अधात्, अधित। मृगाविध्—मृग-व्यध-क्विप। लट्—विध्यति। लुङ् अव्यात्सीत्।

ব্যাধ, উৎসুক হংসগণের নিনাদ শ্রবণ করিয়া ভ্রমরগীতিতে অন্যমনস্ক ও স্থির হরিণকে নিহত করিতে অভিলাষী হইয়াও লক্ষ্যে মন দিতে পারে নাই।

The hunter, desiring to kill the antelope that had given attention to the songs of the black bees and thus stood motionless, could not fix his attention to the aim, hearing the notes of the eager swans.

Q. Parse गीतौ। Ans. विषये सप्तमी। Q. Show the Significance of प्रशान्तचेष्टम्। Ans. चललक्ष्येऽपि प्रहर्त्तुम् समर्थस्य व्याधस्य स्थिरलक्ष्ये अप्रहरणं तस्य सम्यक् अन्यमनस्कत्वम् द्योतयति। Q. Comment gram. on आकर्णयन् and मृगाविध्। Ans. See above. Q. Show the propriety of उत्सुक हंसनादात्। Ans. हंसनादेन रामस्य यात्रासिद्धिः गम्यते। तथोक्तं वसन्तराजशाकुने। "काष्ठासु सर्व्वास्वपि दर्शनेन हंसस्य शब्दस्तु सर्व्वसिद्धिः। नामानि हंसस्य शृणोति यस्तु प्रयान्ति नाशं दुरितानि तस्य॥" Propriety of उत्सुक—शरदागमे सरस्सु विहरन् हंसः मृणालपर्णेषु अन्तर्हितां प्रियाम् अदृष्ट्वा समुत्सुक आसीत्, तदाह्वानार्थं च शब्दमकरोत्। (The sound made by the swans to take notice of their mates is, as described by the hunters, really very attractive.) Q. Derive हंस।

गिरेर्नितम्बे मरुता विभिन्नं
तोयावशेषेण हिमाभमभ्रम्।
सरिन्मुखाभ्युच्चयमादधानं
शैलाधिपस्यानुचकार लक्ष्मीम्॥ ८॥

Ans. हन्धातोः अच्। वर्णागमो निपातनम्। तथाहि, "भवेत् वर्णागमात् हंसः सिंहो वर्णविपर्य्ययात्। गूढोत्मा वर्णविकृतेः, वर्णलोपात् पृषोदरम्॥" इति। ७।

8. Principal sentence :—गिरेः नितम्बे अभ्रं शैलाधिपस्य लक्ष्मीम् अनुचकार। Adjective to the subject अभ्रम्—मरुता विभिन्नं, हिमाभं and सरिन्मुखाभ्युच्चयम् आदधानम्।

Prose order :—गिरेः नितम्बे मरुता विभिन्नं, तोयावशेषेण हिमाभं, सरिन्मुखाभ्युच्चयम् आदधानम्, अभ्रं शैलाधिपस्य लक्ष्मीम् अनुचकार।

Substance :—वर्षासु मेघाः सजलतया कृष्णाः भवन्ति, शरदि तु जलहीनतया ते हिमवत् शुभ्राः भवन्ति। वायुना उत्तरलीकृतं तत् सितम् अभ्रम् गिरिमध्यदेशे प्रकाशमानं नदीमुखेषु एकाकृतित्वात् विस्तारं विदधत् च हिमालयशोभां दधौ।

Explanation in tika form :—गिरेरिति। गिरेः कस्यचित् पर्व्वतस्य नितम्बे कटके "कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः। मध्यदेशे स्थितमिति शेषः, तथा, मरुता वायुना विभिन्नं विश्लथीकृतं विचालितं गलत्तुषारजातं प्रवहत् स्रोत इव प्रतीयमानमित्यर्थः। [अथवा मरुता वायुना गिरेर्नितम्बे भिन्नं मिश्रं, वायुवशात् पर्व्वतेन सह सम्यक् विलग्नतया एकीभूतमित्यर्थः। विभिन्नम् इत्यस्य मिश्रार्थकत्वम् यथा कालिदासः "पल्लवभङ्गभिन्नम्"।] तथा, तोयावशेषेण तोयानाम् जलानाम् अवशेषेण अवशिष्टतया निर्गूढलघुतया हिममिव आभाति यत्तत् हिमाभम्, क-प्रत्ययः। हिमवत् शुभ्रम्। ["हिमं चन्दनमाख्यातं हिमं शीततुषारयोः" इति विश्वः।] तथा, सरितां स्रोतस्विनीनां मुखानि निर्गमनस्थानानि तेषाम् अभ्युच्चयम् वृद्धिम् आदधानं कुर्व्वाणम्। [इतः पूर्व्वं वर्षासु नदीमुखवर्द्धनं कृतवति। अथवा वर्षितेन मेघजलजनमना नदीमुखदेशे विटपटिताः।

अथवा तोयावशेषेण सरित्सु स्नाभ्युच्चयमादधानम् इत्यन्वयः । तथात्वे, वर्षणात् शिष्टजलेन सरित्सु स्त्रोतस्य कुर्व्वन् इत्यर्थः ।] एवंविधम् अभ्रम् (कर्त्तृ) मेघः ["अभ्रं मेघो वारिवाहः" इत्यमरः ।] शैलानाम् अधिपः राजा तस्य हिमालयस्य लक्ष्मीम् शोभाम् अनुचकार विडम्बयामास, सदृशीचकार इत्यर्थः । [अभ्र: मेघः गिरिमध्य प्रदेशे विलग्नः सन् हिमालयवत् अशोभे । हिमालयस्य ऊर्द्धप्रदेशः हिमसमाच्छन्नः, तद्वत् श्वेताभ्रमपि कस्यचित् गिरेः नितम्बात् ऊर्द्धदेशमाच्छन्नं कुर्व्वदिव भूमिगतैः जनैः अलक्ष्यत । हिमालयस्य गलत्तुषारधारया नदीमुखवृद्धिः भवति, अत्र च तुषारवत् शुभ्रेण मरुच्चालितेन मेघेन नदीमुखसञ्जनतया नदीमुखवृद्धिः इव प्रतीयमानासीत् इति उपमासिद्धिः । वृत्तमुपजातिः ।

Change of V.—विभिन्नेन हिमाभेन अभ्रेण आदधानेन लक्ष्मीः अनुचक्रे ।

Derivation :—गिरिः—गॄ-कि । नितम्बम्—नि-तम्ब-अच् । मरुत्—मृ-उति । हिमम्—हन्-मक् । सरित्—सृ-अति । शैल—शिला-अण् (प्रज्ञादित्वात् ।)

পর্ব্বতের মধ্যদেশে স্থিত, বায়ু চালিত, জলাবশেষ হেতু তুষারবৎ শুভ্রবর্ণ, নদীমুখের বৃদ্ধিপ্রদ মেঘরাজি হিমালয়ের শোভা অনুকরণ করিয়াছিল।

The clouds rendered snow-white by the remains of water, attached to the middle part of a mountain, agitated by the wind, and causing augmentation at the openings of the rivers, imitated the beauty of the Himalayas the lord of the mountains.

Q. **Explain fully in Sanskrit.** Ans. (Explanation in tika form.) Q. **Give the derivative meaning of** अभ्र । Ans. अभ्रति गच्छतीति अभ्रं पचाद्यच् । यद्वा न भ्रश्यन्ति जलानि अस्मात् इति "न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्युत" इति निरुक्तिः । आपो भ्रश्यन्ति अस्मादिति वा । आपो बिभर्त्तीति अभ्रमिति केचित् । Q. **Explain the simile.** Ans. Put the last few lines of

गर्ज्जन् हरिः साम्भसि शैलकुञ्जे
प्रतिध्वनीनात्मकृतान्निशम्य।
क्रमं बबन्ध क्रमितुं सकोपः
प्रतर्कयन्नन्यमृगेन्द्रनादान्॥ ९॥

the explanation from 'हिमालयस्य ऊर्द्ध' &c. Q. Show the gram. connection of तोयावशेषेण। Ans. See above.। ८।

9. Principal part:—हरिः प्रतिध्वनीन् निशम्य सकोपः क्रमितुं क्रमं बबन्ध। Adj. to हरिः—शैलकुञ्जे गर्ज्जन् and अन्यमृगेन्द्रनादान् प्रतर्कयन्। Adj. to प्रतिध्वनीन्—आत्मकृतान्। Adj. to शैलकुञ्जे—साम्भसि।

Prose order:—हरिः साम्भसि शैलकुञ्जे गर्ज्जन् आत्मकृतान् प्रतिध्वनीन् निशम्य अन्यमृगेन्द्रनादान् प्रतर्कयन् सकोपः क्रमितुं क्रमं बबन्ध।

Substance:—सिंहः स्वगर्ज्जनस्य प्रतिनादं शैलकुञ्जे श्रुत्वा सलिले च आत्मनः प्रतिविम्बं दृष्ट्वा अन्यसिंहधिया तम् आक्रमितुम् उद्यममकरोत्।

Explanation in tika form:—हरिः सिंहः ["यमानिलेन्द्र चन्द्रार्कविष्णु सिंहांशु वाजिषु। शुकाहि कपिभेकेषु हरिर्ना कपिले त्रिषु" इत्यमरः।] साम्भसि सजले शैलकुञ्जे पर्व्वतसम्बन्धिलतादिपिहितस्थाने ["निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे" इत्यमरः।] गर्ज्जन् शब्दं कुर्व्वन् आत्मकृतान् स्वयं कृतान् आत्मकृतशब्दजातानित्यर्थः। (लक्षणा)। प्रतिध्वनीन् प्रतिशब्दान् निशम्य श्रुत्वा अन्यमृगेन्द्रस्य नादान् अन्यसिंहगर्ज्जमानि प्रतर्कयन् वितर्कयन् ["तर्कंकदीप्तौ" इति दीप्त्यर्थोऽपि तर्कधातुर्वितर्कमाह।] सकोपः सरोषः सन् क्रमितुमुत्पतितुं क्रमं उत्पतनानुकूलशरीरक्रियां बबन्ध चकारेत्यर्थः। अनेकार्थत्वात् धातूनां बन्धधातोः करणार्थत्वम्। भ्रान्तिमदलङ्कारः। इन्द्रवज्रा जातिः।

Change of V.—गर्ज्जता हरिणा...क्रमः बबन्धे सकोपेन प्रतर्कयता।

Derivation:—गर्ज्जन्—गर्ज्ज शतृ प्रथमा। गर्ज्जति, गर्ज्जयति लट्। बबन्ध—बन्ध-लिट्। बध्नाति लट्। अभान्त्सीत् लुङ्। क्रम—क्राम्यति क्रामति, क्राम्यति लट्। अक्रमीत् लुङ्। इन्द्रः—इन्द-र। इन्दति लट्। ऐन्दीत् लुङ्।

अहृषताम्भांसि नवोत्पलानि
रुतानि चाश्रौषत षट्पदानाम्।
आघ्रायि वान् गन्धवहः सुगन्ध-
स्तेनारविन्दव्यतिषङ्गवांश्च ॥ १० ॥

সজল শৈলকুঞ্জে গর্জনকারী সিংহ আত্মকৃত গর্জনের প্রতিধ্বনি শুনিয়া অপর সিংহের গর্জন বোধে সক্রোধে তাহাকে আক্রমণ করিবার জন্য সজ্জিত হইল।

The lion that roared in the watery bower of the mountain having heard the resound of his own and thinking it to be of another lion's, took the attitude of an attack.

Q. Show that आत्मवि has not been used redundantly. Ans. कुञ्जेषु जलसान्निध्यात् सिंहः तत्प्रतिबिम्बगतम् आत्मानमवलोक्य अपरसिंहधिया नादमकरोत् इति सार्थकमव्ययस्य सार्थकम्।
Q. Give a synonym of इन्द्र having the same derivative meaning. Ans. इन्द्रः—इदि परमैश्वर्ये इति इन्द्धातोः रः, ऐश्वर्यवान् इत्यर्थः। वसूनि सन्ति यस्य असौ वासवः, ऐश्वर्यवान् इत्यर्थः। अतः इन्द्रः वासवश्च समार्थकः। ९।

10. This is a compound sentence, composed of three sentences, as below.

Prose order :—(1) तेन नवोत्पलानि अम्भांसि अहृषत। (2) षट्पदानां रुतानि च अश्रौषत। (3) अरविन्दव्यतिषङ्गवान् सुगन्धः गन्धवहश्च आघ्रायि।

Substance :—वर्षातिरोभावे जातोत्पलानि जलानि रामः अद्राक्षीत्, भ्रमरगुञ्जितमश्रौषीत्, सौरभ्यसौगन्ध्यमान्द्यगुणोपेतेन पवनेन सेवितश्च अभूत्।

Explanation in ṭika form :—तेन रामेण नवानि उत्पलानि कुवलयानि कुमुदानि इति यावत्। ["स्यादुत्पलं कुवलयम्" इत्यमरः।] तेषु तानि

अम्भांसि सलिलानि अदृश्यन्त दृष्टानि, दृशेः कर्म्मणि लुङ् । अथवा निर्म्मलानि अम्भांसि नवोत्पलानि च अदृश्यन्त इति । षट्पदानां भ्रमराणां रुतानि शब्दाः ["तिरश्चां वाशितं रुतम्" इत्यमरः ।] अश्रूयन्त श्रुतानि । वान् प्रवहन्, अरविन्देन पद्मेन व्यतिषक्तः सम्पर्कोऽस्यास्तीति पद्मसंसर्गीत्यर्थः । शोभनो गन्धोऽस्येति सुगन्धिः ["गन्धस्येत् उत् पूति सु सुरभिभ्यः"* इत्यत्र 'गन्धस्य इत्वे तदेकान्तग्रहणम्'† इति वचनात् न समासान्त इकारः ।] वहतीति वहः पचाद्यच् । गन्धस्य वहः गन्धवहः [षष्ठीसमासः ।] वायुः च आघ्रायि आघ्रातः । छेकानुप्रासः, वृत्तमुपजातिः ।

Change of V.—अदर्शत्...... । अश्रौषीत्..... आघ्रासीत् वान्तं गन्धवहं सुगन्धिं सः अरविन्दव्यतिषक्तवन्तम् ।

Derivation.—अदृश्यन्त—दृश-कर्म्मणि लुङ् अन्त । कर्म्मणि लुङ् अदर्शि कर्त्तरि लट् पश्यति । लुङ् अदर्शत्, अद्राक्षीत् । रुतानि—रु-भावे क्त । लट् रौति रवीति । लुङ् अरावीत्, अरौषीत् । अश्रूयन्त—श्रु-कर्म्मणि लुङ् अन्त । शृणोति लट् । अश्रौषीत् लुङ् । आघ्रायि—आ-घ्रा-लुङ् तन्, कर्म्मणि । कर्त्तरि, लट् जिघ्रति, लुङ् अघ्रात्, अघ्रासीत् ।

তিনি নূতন পদ্মযুক্ত সলিল অবলোকন করিলেন। ভ্রমরের গুঞ্জন শ্রবণ করিলেন। পদ্মসংপৃক্ত সুগন্ধ বহমান বায়ু আঘ্রাণ করিলেন।

Waters over grown with new lotuses were seen by him ; the hummings of the black bees were also heard by him ; the breeze (the carrier of smell) 'blowing sweet in contact with the lotus' was also smelt by him.

---

* एभ्यो गन्धस्य इकारोऽन्तादेशः स्यात् । यथा उद्गन्धिः, पूतिगन्धिः, सुगन्धिः, सुरभिगन्धिः ।

† एकान्तः एकदेश इव अविभागेन लक्ष्यमाण इत्यर्थः । When the smell becomes a part of the body itself and not one borrowed from another object. Here the smell has been borrowed from the lotuses, and so it has not the augment

लतानुपातं कुसुमान्यगृह्णात् स
नद्यवस्कन्दमुपास्पृशच्च।
कुतूहलाच्चारुशिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त ॥ ११ ॥

Q. Derive वान् and decline it in the first case. Ans. वाधातोः शतृ। पुंसि—वान् वान्तौ वान्तः। क्लीवे—वात् वाती वान्ति। स्त्रियाम्—वान्ती वाती, वान्त्यौ वात्यौ &c. Q. Comment gram. on सुगन्ध। Ans. सु गन्धः यस्य स सुगन्धः। "गन्धस्येत्" इत्यादिना यत् समासान्त इत् स्यात् तत्तु स्वगन्धपक्षे, अन्यपदार्थगृहीतगन्धत्वे न इत् (इ) स्यात्। अत्र तु पद्मेभ्य एव गन्धः गृहीतः, वायोर्नास्ति गन्धः स्वस्य, अतः न इः। सुगन्धि पद्मम्, सुगन्धि मुखं किन्तु सुगन्धः वायुः इत्यादि स्यात्। Q. Expound the samas in गन्धवहः। Ans. षष्ठीसमासः। See above. Q. Show the fitness of गन्धवह and of the adjectives to it. Ans. गन्धवहपदेन, वायुः अपरगन्धं गृहीत्वा सुगन्धः भवति इत्येवं द्योतयति, अतः गन्धवहपदेनैव सुगन्ध इति पदसिद्धिः भवति इति व्याकरणसूत्रसार्थकम् प्रदर्शितम्। Adjectives—एभिः विशेषणैः वायोः शैत्य सौगन्ध्य मान्द्य गुणाः प्रदर्शिताः। १०।

11. This is a compound sentence composed of three simple sentences (see below.)

Prose order:—(1) स काकुत्स्थः कुतूहलात् लतानुपातं कुसुमानि अगृह्णात्। (2) (स कुतूहलात्) नद्यवस्कन्दं च उपास्पृशत् (3) (स कुतूहलात्) ईषत् स्मयमानः (सन्) चारुशिलोपवेशम् आस्त।

Substance—पथि रामः कुतूहली भूत्वा लताः पातयित्वा ताभ्यः कुसुमानि जग्राह, नद्याः अवगाह्य स्नानादिकं चकार, शिलायाम् उपविश्य तां सौन्दर्येण भूषयामास।

Explanation in tika form :—ककुदि तिष्ठतीति काकुत्स्थः पुरुषो

नाम ऐक्ष्वाकः। [स इन्द्ररूपिणः इन्द्रस्य ककुदमारुह्य महादेवरूपधरः दैत्यं निजघान इति ककुत्स्थ संज्ञा] तस्य गोत्रापत्यमिति काकुत्स्थः। ["प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम्," इत्यमरः।] स काकुत्स्थः रामः कुतूहलात् 'कौतुकात्' लतां लताम् अनुपात्य अनुसृत्य लतानुपातं यथा स्यात् तथा। ["तृतीयाप्रभृतीन्यन्यतरस्या"मिति समासः।] णमुल्। कुसुमानि पुष्पाणि अगृह्णात् गृहीतवान्। ग्रहेः लङ्। सः, कुतूहलात् इति सर्व्वत्र योज्यम्। नदीं नदीम् अवस्कन्द्य सर्व्वाः नदीः ढौकयित्वा गत्वा इत्यर्थः। उपास्पृशत् स्नातवान् आचमितवान् वा ["उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि" इति विश्वः। "विशि पति पदि स्कन्दां व्याप्यमानासेव्यमानयोः"* इति द्वितीयान्त उपपदे णमुल्।] ईषत् स्मयमानः ईषद्धसन् सन् ईषत्पदेन गाम्भीर्य्यं सूचितम्। चारुशिलाः चारुशिलां उपविश्य उपविश्य वा आस्त स्थितः आसेर्लङ्। [एतेन रामस्थित्या रम्यशिलानां सौन्दर्य्यं सूचितम्। स्वभावोक्तिरलङ्कारः। वृत्तमुपजातिः।]

Change of V.—तेन कुसुमानि अगृह्यन्त, अस्पृश्यत, काकुत्स्थेन आसि।

Derivation.— कुसुमानि—कुस-उम। नदी—नद-अच्, ङीप्। कुतूहलम्—कुतू-हल-अच्। शिला—शिल-क, आप्। आस—आस-लङ् त। लुङ् आसिष्ट, लिट् आसाञ्चक्रे।

কাকুৎস্থ প্রত্যেক লতা নমিত করিয়া পুষ্প চয়ন করিলেন, প্রত্যেক নদীতে গমন করিয়া স্নানাদি কার্য্য করিলেন, কুতূহল বশতঃ ঈষৎ হাস্য করিয়া প্রতি মনোরম শিলাখণ্ডে উপবেশন করিলেন।

Ram a descendant of Kakutstha, took flowers bending every creeper, bathed in every river dipping there, and sat smiling on every beautiful slab of stone by way of amusement.

Q. Is there any samas in लतानुपातम् नद्यवस्कन्दम्, &c? What should be the forms without a samas?

---

* द्वितीयान्ते उपपदे विशादिभ्यो णमुल् स्यात् व्याप्यमाने आसेव्यमाने चार्थे। गेहादिद्रव्याणां विशादिक्रियाभिः साकल्येन सम्बन्धो व्याप्तिः। क्रियायाः पौनःपुन्यम् आसेवा।

तिग्मांशुरश्मिच्छुरितान्यदूरात्
प्राञ्चि प्रभाते सलिलान्यपश्यत् ।
गभस्तिधाराभिरिव द्रुतानि
तेजांसि भानोर्भुवि सम्भृतानि ॥ १२ ॥

Ans. "तृतीयाप्रभृतीन्यन्यतरस्याम्" इति समासवैकल्पम् । असमासे, लताम् लताम् अनुपातम् ; लताम् अनुपातम् अनुपातम् वा । एवं, नदीं नदीम् अवस्कन्दम् ; नदीम् अवस्कन्दम् अवस्कन्दम् वा । आर्द्रशिलाम् आर्द्रशिलाम् उपवेशम्, आर्द्रशिलाम् उपवेशम् उपवेशम् वा । N. B. The word मुष्टिपीडम् being also optionally compounded by the above rule (see sloka 26. I.) has the other form मुष्ट्या पीडम् । Q. Is there any difference of affixes in अनुपातम् and लतानुपातम् ? Ans. पूर्वत्र णम् उत्तरत्र णमुल् । Q. Can लतानुपातम् नद्यवस्कन्दम्, and आर्द्रशिलोपवेशम् be formed without णमुल् Ans. लतानुपातम्—लतानां पातस्य पश्चात् इति लतानुपातम्, अव्ययीभावः लतानां पातम् अनुक्रम्य, अनतिक्रम्य वा इति अनुशब्दस्य बहुषु अर्थेषु अव्ययीभावः नद्यवस्कन्दम्—नद्याम् अवस्कन्दः (अवगाहः) यत्र तत् बहुव्रीहिः । आर्द्रशिलोपवेशम्—आर्द्रः शिला, तस्याम् उपवेशो यत्र तत्, बहुव्रीहिः । Q Give the allusion to काकुत्स्थ । Ans. See above. Q Annotate on काकुत्स्थ । Ans. ककुदि तिष्ठति इति काकुत्स्थः । "ककुदोऽस्त्री ककुत् स्त्री स्यात्तु राजलक्ष्मणि" इति अकारदकारयोः प्रयोगः । काकुस्थः इति निःसकारो वा दृश्यते । पृषोदरादित्वात् साधुः । ११ ।

12. Principal sentence.—अदूरात् सलिलानि भानोः तेजांसीव अपश्यत् । Adj. to the object सलिलानि—तिग्मांशुरश्मिच्छुरितानि, प्राञ्चि । Adj. to तेजांसि—गभस्तिधाराभिः द्रुतानि, and भुवि सम्भृतानि ।

Prose order :—(स) अदूरात् तिग्मांशुरश्मिच्छुरितानि प्राञ्चि सलिलानि गभस्तिधाराभिः द्रुतानि भुवि सम्भृतानि भानोः तेजांसि इव अपश्यत् ।

Substance :—प्रभाते भीष्मिमाना सूर्य्यकिरणानां सम्पर्केण रक्तवर्णानि जलानि सूर्य्यकिरणैन तुल्यवर्णतया गलितसम्भूताः सूर्य्यकिरणा इव अलक्ष्यन्त ।

Explanation in tika form :—स रामः (इति पूर्व्वेण अन्वयः) अदूरात् समीपे ["दूरान्तिकार्थेभ्यो द्वितीया च" इति आत् पञ्चमी ।] "तिग्मांशु-रादित्यः तस्य रश्मयः तैः रश्मिभिः प्रभाभिः छुरितानि रञ्जितानि ["रश्मिः पुमान् दीधितौ स्यात् पक्ष्मप्रग्रहयोरपि" इति मेदिनी ।] प्राञ्चि पूर्व्वदिगवस्थितानि सलिलानि ["किरणोऽस्रो मयूखांशु गभस्ति घृणि रश्मयः" इत्यमरः ।] भानोः सूर्य्यस्य तेजांसि, धाराभिः प्रपातैः द्रुतानि द्रवीभूय धारामार्गेण पतितानि, (अथवा), पश्चात् भुवि पृथिव्यां सञ्चितानि पिण्डीकृतानि इव अपश्यत् ददर्श । [सूर्य्यकिरण-सम्पर्कात् रक्तवर्णतया जलानि गलिताः सूर्य्यकिरणा इव अलक्ष्यन्त इति भावः । उत्प्रेक्षालङ्कारः । इन्द्रवज्रा जातिः ।]

Change of V.—......अदृश्यन्त तेन ।

Derivation.—सलिलम्—सल-इलच् । तिग्म—तिज् मक् । गभस्ति—ग-भस्-क्तिच् । रश्मि—अश्-मि । छुरित—छुर कर्म्मणि क्त । प्राच्—प्र-अञ्च क्विप् । धारा—धृ-णिच् अङ् । भानुः—भा-नुः ।

তিনি দেখিলেন প্রভাতে অদূরে পূর্ব্বদিগ্বর্ত্তী সলিল সূর্য্যকিরণে রঞ্জিত হওয়াতে যেন সূর্য্যতেজঃ দ্রবীভূত হইয়া কিরণধারায় পৃথি-বীতে পতিত হইয়া সঞ্চিত হইয়া আছে।

He saw in the morning, waters, in the east, not far off, tinged with the rays of the sun and thus appearing like the melted lustre of the sun falling in stream of rays, and collected on the earth.

Q. can अदूरात् be substituted by other words? Parse it. Ans—अदूरम्, अदूरेण वा स्यात् "दूरान्तिकेत्यादिना पदत्रयम् । यथा अदूरम्, अदूरेण, अदूरात् इति । Parsing — प्रातिपदिकार्थमात्रे दूरादिभ्यः द्वितीयातृतीयापञ्चमीविधानात् अत्र पञ्चमी । Q. Decline the base of प्राञ्चि । Ans. प्राच् शब्दस्य पुंरूपं यथा, प्राङ् प्राञ्चौ प्राञ्चः । प्राचा प्राग्भ्यां प्राक्षु । स्त्रियां, प्राची प्राच्यौ प्राच्यः &c. क्लीवे—प्राक् प्राची प्राञ्चि ।

दिग्व्यापिनीर्लोचनलोभनीयाः
मृजान्वयाः स्नेहमिव स्रवन्तीः ।
ऋज्वायताः शस्यविशेषपङ्क्तीः
तुतोष पश्यन् वितृणान्तरालाः ॥ १३ ॥

Q. Derive तेजन् and conjugate the root in its different meanings in लट्। Ans. तिज् धातोः ल्युट्। "तिजङ् क्षमा निशानयोः" इति क्षम निशानार्थे (whetting) चुरादित्वात् णिच् तेजयति तेजयतः इत्यादि लटि रूपम्। क्षमार्थे तितिक्षते तितिक्षेते तितिक्षन्ते इत्यादि। Q. Show the significance of तिग्मांशुः। Ans. तीग्माः प्रदीप्ताः अंशवः यस्य सः। एतेन तस्य समधिकम् औज्ज्वल्यमस्ति इति द्योत्यते। १२।

13. Principal sentence :—(सः) शस्यविशेषपङ्क्तीः पश्यन् तुतोष। Adj. to शस्यविशेषपङ्क्तीः—दिग्व्यापिनीः, लोचनलोभनीयाः, मृजान्वयाः, स्नेहमिव स्रवन्तीः, ऋज्वायताः and वितृणान्तरालाः।

Prose order :—दिग्व्यापिनीः लोचनलोभनीयाः मृजान्वयाः स्नेहं स्रवन्तीः इव ऋज्वायताः वितृणान्तरालाः शस्यविशेषपङ्क्तीः पश्यन् तुतोष।

Substance :—अथ रामः सुविस्तृताः सरलाः, तथा सुसिक्ताः परिष्कृताः च शस्यपंक्तीः अवलोक्य मुदितोऽभूत्।

Explanation in tika form —स रामः, दिशं व्याप्तुं शीलं यासां ताः दिग्व्यापिन्यः, तथोक्ताः सर्वदिग्व्यापनशीलाः इत्यर्थः। [ताच्छील्ये णिनिः।] लोचनानां चक्षुषां लोभनीयाः आकाङ्क्षणीयाः, [यद्वा लोचनानां लोभनीयं लोभो दर्शनेच्छारूपो यत्र, अथवा "कृत्यल्युटो बहुलम्" इति बहुलग्रहणात् लोचनानि लोभयन्तीति कर्तर्यनीयर्।] मृजा मार्जनं शुद्धिरित्यर्थः तया अन्वयः अनुगमो यासाम्, अथवा मृजायाः अन्वयः सम्बन्धो यत्र सा मृजान्वया, शुद्ध्यनुगता इत्यर्थः। ["साम्यार्द्रीमार्जना मृजा" इत्यमरः।] स्नेहं स्निग्धताम् अनुरागं वा स्रवन्तीरिव अतिस्निग्धत्वादुत्प्रेक्षा। ऋजवः सरलाश्च ताः आयता दीर्घाश्चेति ऋज्वा-

यता:। [परविशेषणस्य विशेष्यवद्भावात् कर्म्मधारय:।*] विहृष्टम् उत्पाटितहृष्टत्वात् हृष्टरहितम् अन्तरालम् अभ्यन्तरं मध्यभाग: यासां ता:। "अभ्यन्तरं त्वन्तरालम्" इत्यमर:। शस्यविशेषाणां धान्यादीनां पङ्क्ती: श्रेणी: पश्यन् तुतोष तुष्टवान्। [स्वभावोक्तिरलङ्कार:। इन्द्रवज्रोपजाति:।]

Change of V.—......पश्यता तुतुषे।

Derivation.—आपिनी—वि-आप-णिनि:। लोभनीय:—लुभ कर्त्तरि अनीयर्। मृजा—मृज-अङ्। लट् मार्ष्टि, मृष्ट:, मृजन्ति मार्ज्जन्ति। लङ् अमार्ट्। लुङ् अमार्क्षीत् अमार्जीत्। लिट् ममार्ज्ज। अन्वय:—अनु-इ पचाद्यच्। अवन्ती:—अव प्लुष्, द्वितीया। आयता—आ-यम क्त। तुतोष—तुष लिट् अ। लट् तुष्यति। लुङ् अतुषत्। शस्य—शस्-यत्।

सुदूर विस्तृত, লোচনতৃপ্তিদায়ক, সুপরিস্কৃত স্নিগ্ধকর দীর্ঘ ও সরল তৃণবিহীন শস্যপংক্তি অবলোকন করিয়া রামচন্দ্র পরিতোষ লাভ করিলেন।

He was pleased seeing the rows of some particular corn, extending to remote distance, 'coveting' to the eyes, attended by cleanliness, oozing moisture as it were, straight and extensive, and without weeds intervening.

Q. Expound the samas in ऋज्वायता:। Ans. See above. Q. Account for the formation of लोभनीया। Ans. See above. Q. Explain the force of इव। Ans. अत्र उत्प्रेक्षाज्ञापकेन इवशब्देन शस्यपङ्क्तीनाम् स्निग्धतामयत्वम् द्योतितम्। Q. Do the epithets of शस्यविशेषपङ्क्ती: show any reason for the satisfaction of राम? Ans. पदार्था: दिगव्याप्तया सरलतया, स्निग्धतया, तथा विमृष्टतया नयनं मानसञ्च हरन्ति। शस्यपङ्क्तीनां तै: सर्व्वैरेव गुणै: मनोहरत्वमजायत इति विशेषणपदै: प्रदर्शितम्। अपिच

* In ऋज्वायता the word आयत though an adjective is looked upon as a noun, and therefore the samas कर्म्मधारय takes place.

वियोगदुःखानुभवानभिज्ञैः
काले नृपांशं विहितं ददद्भिः ।
आहार्य्यशोभारहितैरमायै-
रैक्षिष्ट पुंभिः प्रचितान् स गोष्ठान् ॥ १४ ॥

विलक्षणान्तरालत्वेन प्रजानां समधिकश्रमः अपरैश्च विशेषणैः श्रमसाफल्यं दृष्ट्वा राजपुत्रस्य तस्य आनन्दो युज्यते एव । Q. Comment gram. on लेहमिव स्रवन्तीः । Ans. स्रु धातुः अकर्मक इव सर्व्वदैव प्रयुज्यते । यथा "लाला स्रवति नित्यशः" इत्यादि । तस्य तु सकर्मकत्व प्रयोगम् प्रदर्शयितुमाह कविः "लेहमिव स्रवन्तीः" । एवं पञ्चदशसर्गे "शोणितं चासुस्रुवत्" । अतः प्रवेशिकायन्थे "लालाः स्रवति (वदनम्) नित्यशः" इति नैव अपपाठः । Cf. "अमृतयैव तन्नागाः सततैव प्रसुस्रुवुः ।" रघुः । Q. Annotate on शस्य । Ans. अत्र धान्यादीनां क्षेत्रगततया शस्यशब्दोल्लेखः । तथाहि "शस्यं क्षेत्रगतं प्राहुः ।" सस्यमिति दन्त्यसकारादिपदमपि भवति । शस्यते अथवा सूयते नाश्यते ग्राम्यजन्तुभिः इति (श)सस्धातोः यत् । १३ ।

Principal sentence :—स गोष्ठान् ऐक्षिष्ट । Adj. to गोष्ठान्—पुंभिः प्रचितान् । Adj. to पुंभिः—वियोगदुःखानुभवानभिज्ञैः, काले नृपांशम् ददद्भिः, आहार्य्यशोभारहितैः and अमायैः । Adj. to नृपांशम्—विहितम् ।

Prose order :—स वियोगदुःखानुभवानभिज्ञैः काले विहितं नृपांशं ददद्भिः आहार्य्यशोभारहितैः अमायैः पुंभिः प्रचितान् गोष्ठान् ऐक्षिष्ट ।

Substance :—पुत्रदारैः सह गोष्ठेषु वर्त्तमानान् समये राजकरं प्रयच्छतः मितव्ययिनः, अकपटांश्च गोपालान् अवलोकयामास रामः ।

Explanation in tika form :—स रामः वियोगेन स्त्रीपुत्रादि-विच्छेदेन यो दुःखानुभवः शोकप्रत्ययः तस्य अनभिज्ञैः अज्ञातविरहदुःखैरित्यर्थः । [न अभिजानन्ति ये ते अनभिज्ञाः "इगुपध ज्ञा प्री किरः कः" * इति कः । तेषां

* क is the affix of ज्ञा, प्री, कॄ and such roots as have for their penultimate (उपधा) the letters इ उ ऋ (इक्) ।

पुत्रदारैः सहैव सर्व्वत्र गमनात्।] काले यथासमये एतावता कालेन एतावद्देय-मिति विहितं कृतं भूपांशं करं ददद्भिः, आहार्य्या,कुलङ्कारादिभिः आहरणीया कृत्रिमा या शोभा दीप्तिः तया रहितैः हीनैः, नास्ति माया येषां तैः अमायैः अकपटैः ऋजुभिरित्यर्थः। [एतैः विशेषणैः गोपानां दृष्टत्वाच्च परमसौख्यंप्रकटितम्।] पुंभिः पुरुषैः गोपैः। गावस्तिष्ठन्ति येष्विति गोष्ठाः, ["सुपिस्थः"† इति कः। ततः "अम्बाम्बगोभूमी"‡त्यादिना षत्वम्।] गोष्ठान् गोसंहितान् प्रदेशान् ["गोष्ठं गोस्थानकम्" इत्यमरः। गोष्ठशब्दः पुंलिङ्गोऽप्यस्तीति प्राञ्चः।] ऐक्षिष्ट दृष्टवान्। [ईक्षतेः लुङ्। वृत्त्यनुप्रासोऽलङ्कारः, वृत्तमुपजातिः।]

Change of V.—ऐक्ष्यन्त......प्रचिताः तेन गोष्ठाः।

Derivation.—अनुभव—अनु-भू अप्। अभिज्ञ—अभि-ज्ञा कः। विहितं—वि-धा कर्म्मणि क्तः। लट् दधाति, धत्ते। लुङ् अधात्, अधित। आहार्य्य—आ-हृ ण्यत्। ऐक्षिष्ट—ईक्ष लुङ् त। लट् ईक्षते। लिट् ईक्षाञ्चक्रे। प्रचित—प्र-चि कर्म्मणि क्तः। लट् चिनोति, चिनुते। लुङ् अचैषीत्, अचेष्ट। लिट् चिकाय, चिचाय, चिक्ये, चिच्ये। गोष्ठ—गो-स्था कः।

স্ত্রীপুত্রাদির বিয়োগদুঃখে অনভিজ্ঞ, যথাকালে নিয়মিত রাজকর প্রদাতা, আহার্য্যশোভাহীন অকপট পুরুষগণ দ্বারা পরিপূর্ণ গোষ্ঠ অবলোকন করিলেন।

He saw the pasture grounds filled up by men ignorant of the pain of separation, paying the King's portion in due time, destitute of artificial decoration and without guile.

Q. What does the whole sloka signify? Ans. गोष्ठेषु गवां स्थित्यां रामस्य पथि शुभदं गोदर्शनम् अभूत्। सुखञ्च विहरतां गोपानां दर्शनेन तस्य सीताप्राप्तिरूपं सुखमुपन्यस्तम्। तेषाञ्च अकापट्यवर्णनेन

---

† The roots ending in आ, whether preceded by a सुबन्त or not, have क as an affix.

‡ अम्बा अम्ब गो भूमि सव्य अप द्वि त्रि कु शेकु शङ्कु अङ्गु मञ्जि पुञ्जि परमे बर्हिस् दिवि अग्निभ्यः स्थः। एतेभ्यः स्था इत्यस्य सस्य षः।

स्त्रीभूषणं चेष्टितमप्रगल्भम्
चारूण्यवक्राण्यपि वीक्षितानि ।
ऋजूंश्च विश्वासकृतः स्वभावान्
गोपाङ्गनानां मुमुदे विलोक्य ॥ १५ ॥

सीतायाः अकपटं प्रेम विभावितम्। Q. Show the significance of वियोगदुःखानुभवानभिज्ञैः। Ans. पुत्रदारैः सह गोष्ठेषु अवस्थानं च गमनात् परिवारवर्गेण अवियुक्तैरित्यर्थः। Q. Show the propriety of the epithets to पुंभिः। Ans. एतैः विशेषणैः तेषां सौख्यं (सुखं) प्रकटितम्। "दिवसस्याष्टमे भागे शाकं पचति यो नरः। अनृणी चाप्रवासी च" इत्यादि युधिष्ठिरवचनानुरूपं सुखकारणं अनृणित्वम् अप्रवासित्वं च ... चासीत्। तथाहि "काले नृपांशम्" इत्यादिना तेषाम् आनृण्यं प्रदर्शितम्। ...दार्थ्यशोभाराहित्यात् स्वल्पतुष्टता वर्णिता। कापथ्यहीनत्वं च सुखहेतुः ...त्यपि कथितम्। १४।

15. Principal part :—स विलोक्य मुमुदे। Object to विलोक्य —गोपाङ्गनानां चेष्टितम्, वीक्षितानि and स्वभावान्। Adj. to चेष्टितम्— ...ीभूषणम् and अप्रगल्भम्। Adj. to वीक्षितानि—अवक्राण्यपि चारूणि। ...dj. to स्वभावान्—ऋजून्, विश्वासकृतः।

Prose order :—(स) गोपाङ्गनानां, स्त्रीभूषणम्, अप्रगल्भं चेष्टितं, ...वक्राण्यपि चारूणि वीक्षितानि, ऋजून् विश्वासकृतः स्वभावान् च विलोक्य ...मुदे।

Substance.—स्त्रीणां सलज्जं गमनादिकम् शोभायै भवति, गोपीनां ...ङ्गतया सरलदृष्ट्या च, तथा सरलस्वभावेन, रामस्य आनन्दः अजायत।

Explanation in tika form :—स रामः गोपाङ्गनानां गोपस्त्रीणाम् ...प्रगल्भं सलज्जं स्त्रीणां भूषणम् अलङ्कारम् मेखलाकङ्कणादिकम्, तथा चेष्टितं ...गमनागमनादिकम्, तथा अवक्राणि कटाक्षादिरहितान्यपि चारूणि शोभनानि ...क्षितानि विलोकितानि, तथा ऋजून् अजिह्मान् अकपटानित्यर्थः। ["स्वभाव-

जिह्मप्रगुणौ" इत्यमरः। विश्वासं कुर्व्वन्ति उत्पादयन्तीति विश्वासकृतः ["क्विप् च" इति क्विप्।] विश्वासस्य जनकान् इत्यर्थः, स्वभावान् प्रकृतीः विलोक्य हृष्टः मुमुदे हृष्टवान्। [कार्य्याणां दर्शनात् स्वभावानाम् दर्शनम्। विलासत्वाभावेऽपि स्वभाव-सिद्धचरितान्येव हर्षजनकानि भवन्ति। तथाहि—

"विलासा नागरस्त्रीणां न तथा रमयन्ति नः।
यथा स्वभावसिद्धानि इतानि वनयोषिताम्॥"

इति कौमुदी।

उपरोक्तेषु गुणेषु रामस्य प्रीत्या रामोऽपि तद्गुणवान् आसीत् इति केचित्। उक्तञ्च, "सर्व्वः प्रियः खलु भवेत् अनुरूपचेष्टः" इति।]

[अलङ्कारः—स्वभावोक्तिः। लक्षणं यथा, "स्वभावोक्तिरसौ चारु यथावद्वस्तु-वर्णनम्।" तुल्ययोगिता च अलङ्कारः। इन्द्रमुपजातिः।]

Change of V.– तेन मुमुदे।

Derivation :—भूषण—भूष करणे ल्युट्। चेष्टितम्—चेष्ट भावे क्तः। विश्वासकृतः—विश्वास कृ क्विप्। मुमुदे—मुद-लिट् ए। लट् मोदते। लुङ् अमोदिष्ट। अजिह्मा—प्रशस्तमजिह्मम् अस्ति अस्याः इति नः। अक्ष—अक्ष-घञर्थे कः। गोप—गो-पा-कः।

গোপীগণের, নারী-ভূষণ সলজ্জগতি, মনোরম অবক্র দৃষ্টি, বিশ্বাস-জনক সরল স্বভাব দেখিয়া তিনি আনন্দিত হইয়াছিলেন।

He was glad on seeing of the wives of cowherds modest motion the natural decoration of women, their beautiful looks not held askance and their disposition honest and faithful ('creating confidence).'

Q. Show the gram. connection of स्त्रीभूषणम् चेष्टित-मप्रगल्भम्। Ans. अप्रगल्भं स्त्रीभूषणं, चेष्टितञ्च विलोक्य इत्यन्वयः। अथवा स्त्रीभूषणम् अप्रगल्भं चेष्टितम् विलोक्य इत्यन्वयः। उभयत्र, सलज्जं चेष्टितम् गमनागमनादिकम् तासामेव भूषणस्वरूपनभूत् इत्यर्थः। Q. Show reason why राम was pleased with the milkwomen. Ans. See the last but two lines of the Explanation. Q.

विवृत्तपार्श्वं रुचिराङ्गहारं
समुद्वहच्चारुनितम्बरम्यम् ।
आमन्द्रमन्थध्वनिदत्ततालं
गोपाङ्गनानृत्यमनन्दयत्तम् ॥ १६ ॥

Write gram. notes on विश्वासकृत् । Ans. विश्वासं कृतवन्तः (उत्पादितवन्तः) इति अतीते क्विप् । "सु कर्म पाप मन्त्र पुण्येषु कृञः" इत्यत्र नियमाभावात् अन्यस्मिन् अपि उपपदे क्विप् स्यात् । यथा शास्त्रकृत्, भाष्यकृत् इत्यादि इति भट्टोजीदीक्षितः । Q. Explain the force of अपि in वक्राण्यपि । Ans. सत्यपि वक्रदर्शने मनोहारिणि, तासां सरलदृष्टिरपि अधिकशोभायै अभवत् इति अपिशब्देन सूचितम् । १५ ।

16. Principal part :—गोपाङ्गनानृत्यम् तम् अनन्दयत्, the rest are adjectives to गोपाङ्गनानृत्यम् ।

Prose order :—विवृत्तपार्श्वं रुचिराङ्गहारं, समुद्वहच्चारुनितम्बरम्यम्, आमन्द्रमन्थध्वनिदत्ततालं गोपाङ्गनानृत्यं तम् अनन्दयत् ।

Substance:—दधिमन्थनकाले गोपीनाम् अङ्गविक्षेपः नृत्यमिव प्रतीयमानं सत् तम् अनन्दयत् । तथाहि तासां नृत्येषु इव दधिमन्थनकार्ये नितम्बं चलितमभवत्, पार्श्वे च चलिते अभूताम्, मन्थनध्वनिभिः तालप्रदायित्वम् च अभूत् ।

Explanation in tika form :—विवृत्तेति । अथ गोपाङ्गनानां दधिविलोड़नावसरे गात्रविक्षेपो नृत्यवत् वर्ण्यते । विवृत्ते तिर्य्यक् चलिते पार्श्वे यत्र नृत्ये तथोक्तम् । रुचिरः शोभनः ["सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्" इत्यमरः ।] अङ्गहारः अङ्गविक्षेपो यत्र तत् । ["अङ्गहारोऽङ्गविक्षेपः" इत्यमरः ।] तथा समुद्वहता तिर्य्यगूर्द्ध्वमधश्चलता चारुणा मनोज्ञेन नितम्बेन कटिभागेन रम्यं मनोहरम् । ["पश्चान्नितम्बः स्त्रीकट्याः" इत्यमरः ।] अथवा नितम्बरम्यं कटिरमणीयतां समुद्वहत् धारयत् नृत्यम् इत्यन्वयः । नृत्यकाले नितम्बरमणीयता समधिकं जाता इत्यर्थः । रम्यमत्र भावे यत्प्रत्ययेन सिद्धम् ।] आमन्द्रैः ईषद्गम्भीरैः मन्थकृतेन दधिमन्थनदण्डकृतेन ध्वनिना दत्तः तालो यत्र तत् ["वैशाख-



मन्थ मन्थान् मन्थानी मन्थदण्डकी" इत्यमरः।] तथाभूतं गोपाङ्गनानां नृत्यं (कर्तृ) नृत्यवत् अङ्गविक्षेपः अनन्दयत् सन्तोषितवत्। 'इन्द्रवंशा' जातिः।

Remarks on the sloka 10.—This sloka appears to be based on the three slokas of भारवि। *Viz.* "निर्वर्तितःश्वास-विकम्पिताधराः, लता इव प्रस्फुरितैकपल्लवाः। अपीडपार्श्वैरपवर्त्तितत्रिकाः विकर्षणैः पाणिविहारहारिभिः॥ व्रजाजिरेष्वम्बुदनादशङ्किनीः, शिखण्डिनामुन्म-दयत्सु योषितः। मुहुः प्रणुन्नेषु मथां विवर्त्तनैः, नदत्सु कुम्भेषु मृदङ्गमन्थरम्॥ स मन्थरावल्गितपीवरस्तनीः परिश्रमक्लान्तविलोचनोत्पलाः। निरीक्षितुं नोपर-राम बल्लवीः अभिप्रनृत्ता इव वारयोषितः॥"

Change of V.—विवृत्तपार्श्वेन रुचिराङ्गहारेण समुद्वहच्चारुनितम्बरम्येण आमन्द्रमन्थध्वनिदत्ततालेन......गोपाङ्गनानृत्येन स अनन्दि।

Derivation.—विवृत्त—वि-वृत् कर्त्तरि क्त। पार्श्व—स्पृश्-श्वण्। रुचिर—रुच् (दीप्तौ) किरच्। अङ्ग—अम् (गतौ) गन्। चारु—चरति चक्षु-रादिषु इति 'चारु, चरधातोः उण्। नितम्ब—नि-तम्ब-अच्। नृत्यम्—नृत्-क्यप्। गोप—गो-पा-क। अङ्गना—प्रशस्तम्—अङ्गम् अस्याः अस्ति इति, अङ्ग-न।

দধিমন্থনকালে গোপনারীদিগের পার্শ্বদ্বয় ঈষৎ বক্রভাবে বিচলিত হওয়াতে, রমণীয় অঙ্গ বিক্ষেপ থাকাতে, কটিদেশ সুন্দররূপে তির্য্যগ্-ভাবে উর্দ্ধ ও অধো দিকে বিকম্পিত হওয়াতে, ঈষৎ গম্ভীর মন্থন শব্দ তাল প্রদানের ন্যায় ধ্বনিত হওয়াতে, রামচন্দ্র আনন্দিতভাবে দেখিলেন যেন গোপীগণ নৃত্য করিতেছে।

The dancelike motion of the milkwomen in the act of churning, highly pleased Rama, motion, in which their sides moved obliquely and their whole body shook beautifully with their buttocks agreeably turning in all directions to the gentle sounds of churning.

Q. What does the sloka signify? Ans. स्त्रीणाम् नृत्यम् शुभशंसि। अतोऽनेन रामस्य भविष्यत् शुभं द्योतितम्। अत्र कालिदासः

विचित्रमुच्चैः प्लवमानमारात्
कुतूहलं त्रस्नु ततान तस्य ।
मेघात्ययोपात्तवनोपशोभं
कदम्बकं वातमजं मृगाणाम् ॥ १७ ॥

'मुखश्रवा मङ्गलतूर्य्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषिताम् । न केवलं सद्मनि मागधीपतेः पथि व्यजृम्भन्त दिवौकसामपि ॥'' Q. Give the different meanings of अङ्ग and samas in अङ्गहारः। Ans. "अङ्गं गात्रे उपाये च प्रतीके चाप्रधानके । अङ्गो देशविशेषे स्यात् अङ्ग सम्बोधनेऽव्ययम् ॥'' इति विश्वः । अङ्गहारः इत्यत्र षष्ठीसमासः । Q. Give the different significations of आ। Ans. "आ ईषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ।" Q. Comment gram. on आमन्द्र। Ans. मन्द्रः गम्भीरध्वनिः, मदधातोः रक् । मन्द्रः अस्यास्तीति, मन्द्रः, अर्श आदिभ्य अच् । ततः ईषत् मन्द्रः । Q. There is another reading viz. नृत्तम्। Which do you prefer ? Ans. नृत्यम् अत्र साधु । "नृत्यम् तालखयाश्रयम्" इति दर्पणवचनात्, अत्र च तालपदप्रयोगात् । तथाहि, "गेयादुत्तिष्ठते वाद्यं वाद्यादुत्तिष्ठते लयः । लयतालसमारब्धं ततो नृत्यं प्रवर्त्तते ॥" सं० दा० । Show the distinction among नृत्यम् नृत्तम्, ताण्डवम् and लास्यम् । Ans, भवेत् भावाश्रयं नृत्तम्, नृत्यं तालखयाश्रयम्। पुंनृत्यं ताण्डवं प्रोक्तम् स्त्रीनृत्यं लास्यमुच्यते ।" इति । १६ ।

17. Principal part :—मृगाणां कदम्बकं तस्य कुतूहलं ततान । Adjectives to the subject कदम्बकम्—विचित्रं, प्लवमानं, त्रस्नु, मेघात्ययोपात्तवनोपशोभं and वातमजम् ।

Prose order :—विचित्रम्, उच्चैः प्लवमानम् आरात् त्रस्नु, मेघात्ययोपात्तवनोपशोभं वातमजं मृगाणां कदम्बकं तस्य कुतूहलं ततान ।

Substance :—पथि ददर्श यत् चित्राः मृगाः वर्षापगमे पुनः गिरि-

कन्दरेभ्यः वनमेत्य वाताभिमुखं धावन्तः भयशीलतया लोकसान्निध्ये सुदूरं उत्प्लुत्य गच्छन्तश्च वनं सुशोभितम् अकुर्व्वन्, उत्फुल्लतया च निजशोभां व्यवर्द्धयन् इति।

Explanation in tika form—विचित्रं नानावर्णम् उच्चैः प्लवमानम् ऊर्द्धं जिहानम्, अथवा विचित्रं यथा तथा उच्चैः प्लवमानम्। आरात् समीपे ["आरात् दूरसमीपयोः" इत्यमरः।] त्रसु भयशीलम् ["त्रसि गृधि धृषि क्षिपेः क्नुः" इति क्नु प्रत्ययः। आरात् उच्चैः प्लवमानमित्यपि वा अन्वयः।] मेघात्ययेन शरत्-कालेन मेघापगमेन वा उपात्तं प्राप्तं वनम् उपशोभा च येनेति। [अथवा मेघात्ययेन प्राप्तेन वनेन उपशोभते इति। (अच्, क-प्रत्ययः)। अथवा मेघात्ययेन उपात्ता गृहीता उत्पादिता वा वनोपशोभा येन तादृशम्। वर्षासु जलप्लावितेषु वनेषु मृगावस्थानाभावात् इदानीं मृगाणां पुनराविर्भावेण वनं सौन्दर्य्यपूर्णमभवत्, एवम् वनविहारेण उत्फुल्लतया तेषामपि सौन्दर्य्यं ववृधे इत्यर्थः।] वातमजतीति वातमजं वायोरभिमुखगामि ["वात शुनी तिल शर्द्धेष्वजधेट् तुद जहातिभ्यः खश् उप-संख्यानम्" इति खश्। "अरुर्द्विषदजन्तस्य मुम्" इति मुम्।] मृगाणां कदम्बकं निकुरम्बं समूहः इति यावत् ["निकुरम्बं कदम्बकम्" इत्यमरः।] तस्य रामस्य कुतूहलम् कौतुकं ["कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलम्" इत्यमरः।] ततान उत्पादयामास। स्वभावोक्तिरलङ्कारः। वृत्तमुपजातिः। 'तस्य' इति पाद-शेषे ह्रस्वस्य वैकल्पेन दीर्घत्वम्।

Change of V.—विचित्रेण प्लवमानेन......त्रसुना तेने मेघात्ययोपात्त-वनोपशोभेन कदम्बकेन वातमजेन।

Derivation.—प्लवमान—प्लु-कर्त्तरि शानच्। लट् प्लवते। लुङ् अप्लोष्ट। त्रसु—त्रस क्नुः। लट् त्रस्यति त्रसति। लुङ् अत्रासीत् अत्रसीत्। ततान—तन लिट् ण। लट् तनोति तनुते। लुङ् अतानीत् अतनीत् अतत अतनिष्ट। वातमजम्—वात-अज-खश्। लट् अजति। लुङ् आजीत्, अवैषीत्। लिट् विवाय।

চিত্রিতাঙ্গ, ভীরু, লোক সমীপে দীর্ঘ লম্ফনশীল, বর্ষাপগমে পুনর্ব্বার বনমধ্যে সমুপাগত, লব্ধশ্রীক ও বাতাভিমুখগামী হরিণবৃন্দ তাঁহার কুতূহল বর্দ্ধন করিয়াছিল।

सितारविन्दप्रचयेषु लीनाः
संसक्तफेनेषु च सैकतेषु।
कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः ॥ १८ ॥

Rama felt great interest in the timid herd of antelopes of variagated color, apt to take a high leap when a person is nigh, ones that made speed in the direction of the wind, causing beauty of the forest after they had returned into it at the appearance of autumn.

Q. Explain सेवात्ययोपात्तवनोपशोभम्। Ans. See above.

Q. Write gram. notes on वातमजम्। Ans. See above

Q. Parse विचित्रम्। Ans. 'विचित्रम्' इति कदम्बकमित्यस्य विशेषणम्, अथवा 'प्लवमान'मित्यस्य क्रियाविशेषणम्। Q. Give the other form of उच्चैः which is not an indeclinable. Ans. उच्चम्। १७।

18. Principal part :—कलहंसमालाः श्रोत्रसुखैः निनादैः प्रतीयिरे। Adjunct to the subject कलहंसमालाः—सैकतेषु लीनाः and कुन्दावदाताः। Adj. to सैकतेषु—सितारविन्दप्रचयेषु संसक्तफेनेषु।

Prose order :—सितारविन्दप्रचयेषु संसक्तफेनेषु सैकतेषु च लीनाः कुन्दावदाताः कलहंसमालाः श्रोत्रसुखैः निनादैः प्रतीयिरे।

Substance :—सैकतेषु शुभ्रफेनानां तथा सितपद्मानाम् अवस्थानात् तत्र विचरन्तः हंसाः एकवर्णतया अदृश्याः आसन्, केवलं कर्णाभिरामैः ध्वनिभिः ते विभाविताः अभूवन्।

Explanation in tika form:—सितानां शुभ्राणाम् अरविन्दानां पद्मानां ["वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम्" इत्यमरः।] प्रचयेषु समूहेषु ["सङ्घे चानौत्तराधर्ये"* इति घञ्कौ न भवतः। प्राणिषु संघशब्दस्य रूढत्वात्।]

* उत्तरे च अधरे च उत्तराधरास्तेषां भावः औत्तराधर्यं, तद्भिन्नेऽर्थे गम्ये संज्ञे चार्थे चेघञ्, आदेश कः। यथा भिक्षुनिकायः।

तथा संसक्ताः संश्लिष्टाः फेनाः येषु तथोक्तेषु ["डिण्डीरोऽब्धिकफः फेनः" इत्यमरः।] सिकता विद्यते येषु तेषु सैकतेषु पुलिनेषु ["तोयोत्थितं तत् पुलिनं सैकतं सिकतामयम्" इत्यमरः।] लीनाः सुगुप्ताः कुन्दमिव अवदाताः शुक्लाः ["उपमानानि सामान्यवचनैः" इति उपमानसमासः।] कलहंसमालाः राजहंसश्रेण्यः ["कादम्बे कलहंसः स्यात् राजहंसे च दृश्यते" इति।] श्रोत्रयोः सुखैः श्रवणमधुरैः निनादैः शब्दैः प्रतीयिरे ज्ञाताः [तेन रामेण इति शेषः, विभक्तिविपरिणामः। सैकतानाम् समवर्णतया अलक्षिताः हंसाः कर्णाभिरामैर्ध्वनिभिः विभाविताः अभूवन् इति सर्वमवदातम्। सामान्यालङ्कारः। लक्षणं यथा "प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया। ऐकात्म्यं बध्यते योगात् तत् सामान्यमिति स्मृतम्॥" वृत्तमुपजातिः।]

Change of V.—.........प्रतीयाय (रामः)।

Derivation :—सित—सो कर्त्तरि क्त। लट् स्यति। लुङ् असात्, असासीत्। प्रचय—प्र-चि अच्। लीना—ली कर्त्तरि क्तः। संसक्त—सम्-सन्ज्-कर्त्तरि क्तः। लट् सजति। लुङ् असाङ्क्षीत्। सैकत—सिकता अण्। अवदात—अव-दै-क्तः। प्रतीयिरे—प्रति-इ कर्म्मणि लिट् इरे।

কুন্দকুসুমবৎ শ্বেতবর্ণ, অস্পষ্টমধুরধ্বনি হংসমালা, শ্বেতপদ্মসঙ্কুল, ও ফেনযুক্ত বালুকাময় প্রদেশে অবস্থিত, ও একাকৃতি হইলেও শ্রবণ মধুর স্বরেই চিনিতে পারা গিয়াছিল।

The multitude of melodious swans white like the Kunda flowers disappearing in the sand banks over grown with white lotuses and full of froths, were recognized by their sounds pleasing to the ears.

Q. Expound the samas in कुन्दावदाताः। Distinguish between उपमान and उपमितिसमास। Ans. कुन्दमिव अवदाताः इति उपमानसमासः। "उपमानानि सामान्यवचनैः।" यस्मिन् गुणे उभयोः सादृश्यं तत् सामान्यवचनम्। अत्र अवदातः अर्थात् शुभ्रः इति पदं सामान्यवचनम्। यत्र तु तदभावः तत्र उपमितिसमासः। यथा मनुजव्याघ्रः। अत्र व्याघ्र इव मनुजः शूरः इति शूरपदं न प्रदत्तम्। 'व्याघ्रशूरः' इति प्रयोगे उपमानसमासः। Q. Comment gram. on the formation

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः॥ १९॥

of निचयः। Ans. See above. **Q. Derive** सुखाः। Ans. सुखयन्ति इति सुखाः पचाद्यच्। अथवा सुखमेषाम् अस्ति इति सुखाः, अर्श आदिभ्य अच्। १८।

19. It consists of 4 principal sentences as below.

Prose Order :—तज्जलं न, यत् सुचारुपङ्कजं न। तत् पङ्कजं न, यत् अलीनषट्पदम्। असौ षट्पदो न, यः कलं न जुगुञ्ज। तत् गुञ्जितं न, यत् मनः न जहार।

Substance :—सर्व्वाण्येव जलानि जातसुपद्मानि आसन्, सर्व्वाण्येव पङ्कजानि निविष्टभ्रमराणि अभूवन्, सर्व्वे एव षट्पदाः मधुरं गुञ्जितवन्तः, सर्व्वाण्येव गुञ्जितानि मनो जह्रुः।

Explanation in tika form :—किं बहुना उक्तेन, शरदि तत् जलं नासीत् यत्, सुचारूणि अतिशोभनानि पङ्कजानि पद्मानि यत्र तथोक्तं न बभूव। शरदि सर्व्वाण्येव सलिलानि पङ्कजशोभितानि आसन् इत्यर्थः। तथा, तत् पङ्कजं पद्मं न आसीत्, यत् न लीनाः अनाश्लिष्टाः षट्पदा भ्रमरा यत्र तथोक्तम्। ["द्विरेफ पुष्पलिड् भृङ्ग षट्पद भ्रमरालयः" इत्यमरः।] बभूवेति शेषः। सर्व्वेष्वेव पङ्कजेषु भ्रमरा उपविविशुरित्यर्थः। तथा असौ षट्पदो भ्रमरो न यः कलं मधुरास्फुटं न जुगुञ्ज ["ध्वनौ तु मधुरास्फुटे कलः" इत्यमरः।] तत् गुञ्जितं न यत् मनो न जहार न हृतवत् रामस्य लोकस्य वा इति शेषः।

अलङ्कारः। एकावली। तल्लक्षणं यथा—

"पूर्व्वं पूर्व्वं प्रति विशेषणत्वेन परं परम्।
स्थाप्यतेऽपोह्यते वा चेत् स्यात्तदेकावली द्विधा॥"

तं यायजूकाः सह भिक्षुमुख्यै-
स्तपःक्षमाः श्राम्युदकुम्भहस्ताः

ज त ज र

ने त ज्ञ । लं य म्ब । सु चा रु । प ङ्क जं ।

जतौ तु वंशस्थमुदीरितं जरौ । अतः वंशस्थं वृत्तम् ।]

Change of V.—जलेन तेन, येन सुचारुपङ्कजेन न अभावि । पङ्कजेन तेन येन अलीनषट्पदेन अभावि । षट्पदेन अमुना…जुगुञ्जे येन… । गुञ्जितेन तेन न जह्रे येन मनः ।"

Derivation :—लीन—ली कर्तरि क्तः । जुगुञ्ज—गुञ्ज् लिट् ण । लट् गुञ्जति । गुञ्जितम्—गुञ्ज भावे क्तः । जहार—हृ लिट् ण । हरति हरते लट् । अहार्षीत्, अहृत लुङ् । जलम्—जालयति आच्छादयति, जल-अच् ।

এমন জলই ছিল না যাহাতে মনোরম পঙ্কজ না অবস্থিত ছিল। এমন পঙ্কজ ছিল না যাহাতে ভ্রমর লীন না ছিল। এমন ভ্রমর ছিল না যে সুমধুর ধ্বনি না করিয়াছিল। এমন ভ্রমরগুঞ্জনও হয় নাই যাহা চিত্তহরণ না করিয়াছিল।

There was no water in which there was no beautiful lotus; nor any lotus which had no black bees sticking to it, nor was there that black bee which did not hum sweetly, nor any humming that did not charm the mind.

Q. Is there any defect in the sloka? Ans. अलीनषट्पदमित्यनेन प्रक्रमभङ्गदोषः । (Want of regularities) 'न निलीनषट्पदम्' इति कथिते क्रमः स्यात् । Q. Write notes on पङ्कजम् । Ans. शैवालादीनामपि पङ्कजातत्वेऽपि पङ्कजमित्यस्य पद्मेष्वेव यौगरूढता । Q. Does the metre वंशस्थ used here, render the canto defective? Ans. See the last few lines of the explanation and the remarks on the sloka 6, II. । १६ ।

याथावराः पुष्पफलेन चान्ये
प्रानर्चुरर्च्या जगदर्चनीयम् ॥ २० ॥

20. Principal part of 1st :—यायजूकाः भिक्षुमुख्यैः सह तं प्रानर्चुः। Principal part of the 2nd—अन्ये च पुष्पफलेन तं प्रानर्चुः। Adj. to यायजूकाः—तपःकृशाः, शान्त्युदकुम्भहस्ताः। Adj. to अन्ये—याथावराः and अर्च्याः।

Prose order :—तपःकृशाः शान्त्युदकुम्भहस्ताः यायजूकाः भिक्षुमुख्यैः सह जगदर्चनीयं तं प्रानर्चुः। अर्च्या अन्ये च याथावराः (सन्तः) पुष्पफलेन तं प्रानर्चुः।

Substance :—यजनशीलाः व्रतपालनेन कृशाङ्गाः मुनयः, तथा, परिव्राजकाः, इतस्ततो विचरणशीलाश्च अपरे मुनयः तम् आशीर्भिः फलपुष्पैर्वा संवर्द्धयामासुः। यतोऽसौ जगताम् पूजित इति।

Explanation in tika form :—तपसा कृशा दुर्बलाः तपःकृशाः तपश्चरणेन क्षीणदेहाः, शान्त्यर्थमुदकं शान्त्युदकं शान्तिजलं तेन पूर्णः कुम्भः शान्त्युदकुम्भः। उदकस्य उदभावः। तस्मिन् स्थितः हस्तः येषां ते तथोक्ताः। [सप्तम्युपमानेत्यादिना उत्तरपदलोपी समासः।] भृशमर्थं यजनशीलाः यायजूकाः ["इज्याशीलो यायजूकः" इत्यमरः। "यज जप दशां यङः" इति यङन्तात् यजेः ऊकः।] ते तपोवनस्थिता भिक्षणशीला भिक्षवः परिव्राजकाः ["भिक्षुः परिव्राट् कर्मन्दी" इत्यमरः। "सना शंस भिक्ष उः" इति उप्रत्ययः।] तेषां मुख्यैः प्रधानैः ["क्लीवे प्रधानं प्रमुख प्रवेकानुत्तमोत्तमाः। मुख्य वर्य वरेण्याश्च" इत्यमरः।] सह सार्द्धं, जगतां जगद्भिर्वा अर्चनीयम् वन्द्यं तं रामं प्रानर्चुः अर्चितवन्तः, शिरसि उदकदानेन इति शेषः। तथा, अर्च्या अर्चनार्हाः अन्ये च मुनयः याथावराः नानावनभ्रमणशीलाः सन्तः ["यश्च यङः" इति वरच्। यद्वा, या-धातुरत्र गमनार्थः तेन अत्यर्थगमनशीला इत्यर्थः। अथवा याथावराः एकत्रानियतनिलयाः इति।] पुष्पाणि फलानि चेति पुष्पफलं तेन। ["जातिरप्राणिनाम्"* इति एकवद्भावः।] तं प्रानर्चुः अर्चितवन्तः।

---

* प्राणिवर्जजातिवाचिनां द्वन्द्व एकवत्। Class nouns not ex-

Change of V.—स यायजूकैः......तपःक्षामैः शान्त्युदकुम्भहस्तैः यायावरैः अन्यैः मानवैः अर्च्यैः जगदर्चनीयः ।

Derivation :—यायजूक—यज् (यङन्त) ऊकः । लट् यजति, यजते । लुङ् अयाक्षीत्, अयष्ट । लिट् इयाज, ईजे । भिक्षुः—भिक्ष् उः । यायावरा—या (यङन्त) वरच् । आनर्चुः—प्र-अर्च-लिट् उस् । लट् अर्चति । लुङ् आर्चीत् । लिट् आनर्च । अर्च्या—अर्च-यत् ।

ব্রতাচরণ হেতু কৃশাঙ্গ যাযজূকগণ শান্তিজলপূর্ণ কুম্ভ হস্তে লইয়া প্রধান প্রধান সন্ন্যাসীদিগের সহিত তাঁহার অর্চ্চনা করিলেন অপর মাননীয় গৃহহীন সন্ন্যাসিগণ জগৎপূজনীয় শ্রীরামচন্দ্রকে পুষ্পফল দ্বারা পূজা করিলেন ।

The performers of constant sacrifices with chief mendicants imaciated by asceticism, with pots of propitiatory water in their hands and the other adorable pilgrims with fruits and flowers, adored him the adored of the universe.

Q. Expound the samas in शान्त्युदकुम्भहस्ताः । Ans. शान्त्यर्थमुदकम्, शान्तिः उदकं वा, मध्यपदलोपी कर्मधारयः, षष्ठीसमासो वा । शान्त्युदकस्य कुम्भः शान्त्युदकुम्भः शान्त्युदककुम्भो वा । षष्ठीसमासः । "एकहलादौ पूरयितव्ये अन्यतरस्याम्" (उदक is optionally substituted by उद when it is followed by a word signifying a pot and having for its first letter a single consonant) इति विभाषया उदकस्य उदादेशः । ततः, तस्मिन् स्थितः हस्तः येषां ते, "सप्तम्युपमानपूर्व्वस्य च उत्तरपद लोपः" इति उत्तरपदलोपी समासः । ["प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवतः" इति सूत्रविधाने तु प्रहरणार्थशब्दप्रयोगः युज्यते । अथवा शान्त्युदकुम्भस्तु अहितनिवारणसाधर्म्म्यात् उपचारेण प्रहरणम् ।] अथवा 'वाहिताग्न्यादिषु' इति परनिपातः । Q. Account for the

---

pressive of animals, when compounded become a word of singular number and neuter gender.

विद्यामथैनं विजयां जयाञ्च
रक्षोगणं क्षिप्नुमविक्षतात्मा।
अध्यापिपत् गाधिसुतो यथावत्
निघातयिष्यन् युधि यातुधानान्॥ २१॥

formation of the word यायजूका: and यायावरा:। Ans. See above. Q. Expound the samas in जगदर्च्चनीयम्। Ans. जगद्भि: जगताम् वा अर्च्चनीय:। तृतीयासमास: षष्ठीसमास: वा। Q. Account for the singular number of पुष्पफलेन। Ans. See above. Q. Write notes on जगत् and decline it. Ans. "वर्त्तमाने पृषद्बृहत् महत् जगत् शतृवच्च" इति गम्धातो: क्विपि अति-प्रत्ययेन निपातितम्। अभ्यस्ततया नुमागमप्रतिषेध:, अत: पुंरूपम्—जगत् जगतौ इत्यादि। शतृवत् इति विधानात् स्त्रियां ङीप्। अत: स्त्रियां रूपम्—जगती जगत्यौ इत्यादि। क्लीबे जगत् जगती जगन्ति जगति इत्यादि। २०।

21. Principal part :—अथ गाधिसुत: एनं विजयां जयाञ्च विद्याम् अध्यापिपत्। Adj. to विजयां वा जयाम्—रक्षोगणं क्षिप्नुम्। Adjunct to गाधिसुत:—युधि यातुधानान् निघातयिष्यन् and अविक्षतात्मा।

Prose order—अथ अविक्षतात्मा गाधिसुत: युधि यातुधानान् निघातयिष्यन् एनं रक्षोगणं क्षिप्नुं विजयां जयाञ्च विद्याम् यथावत् अध्यापिपत्।

Substance :—अथ प्रशान्तात्मा विश्वामित्र: संग्रामे रक्षांसि विनाशयितुमिच्छु: तेषाम् उच्छेदिनीम् विजयां जयां च नाम विद्यां, रामम् अध्यापयामास।

Explanation in tika form :—अथानन्तरं ["मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ।" इत्यमर:।] अविक्षत: रागादिभिरनभिभूत: आत्मा स्वभाव: चित्तवृत्तिरिति यावत्, यस्य तथोक्त: ["आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि" इति विश्व:।] गाधिसुत: विश्वामित्र: युधि संग्रामे यातुधानान् राक्षसान् ["यातुधान: पुण्यजनो नैर्ऋतो यातुरक्षसी" इत्यमर:।] निघातयिष्यन्

मारयिष्यन् एनं रामं ["द्वितीयाटौस्स्वेनः"* इति एनादेशः।] रक्षोगणं क्षिप्नु निराकरिष्णु ["अलंकृञ्निराकृञ्" इत्यादिना इष्णुच्।" उकारादित्वात् न षलम्। "न लोकाव्ययनिष्ठाखलर्थतृनाम्" इति उयोगे षष्ठीनिषेधात् द्वितीया।] नाम्ना विश्रुतां जयाञ्च विद्यां यथावत् यथाशास्त्रम् अध्यापिपत् पाठयामास। [णिपूर्व्वकात् इङ्धातोः लुङ्। अध्यजीगपत् इति च पदान्तरम्।]

Change of V.—विद्याम् एषः......अविव्यथात्मा अध्यापि, गाधिसुतेन निघातयिष्यता।

Derivations:—विद्या—विद् क्यप्। विजया—वि-जि अच्। रक्षस्—रक्ष असुन्। विव्यथ—वि-व्यथ-क्त। आत्मन्—अत-मन्। यथावत्—यथा-वतिच्। युध्—युध् क्विप्। यातुधान्—See below. [illegible]

অনন্তর প্রশান্তাত্মা গাধিতনয়, যুদ্ধে রাক্ষসগণের বধ করিবার জন্য তৎক্ষেপণশীল জয়া ও বিজয়া নামে অস্ত্রবিদ্যা ইহাকে শিক্ষা দিলেন।

Then the son of Gadhi, with his mind unagitated, made him duly study the science of arms named Jaya and Vijaya capable of striking down the demons, in order to have them slaughtered in a battle.

Q. Is it a correct sentence Viz. विजयां जयां नाम विद्याम् इत्यादि? Ans. Cf. "कन्यां दशरथो राजा शान्तां नाम व्यजीजनत्।" इति भवभूतिः। Q. Who was गाधि? Ans. विश्वामित्रपिता गाधिनामा कुशिकपुत्रः इन्द्रावतारविशेषः। तथाहि "कुशिकस्तु तपस्तेपे पुत्रमिन्द्रसमं विभुः। लभेयमिति तं शक्रः त्रासादभ्येत्य जज्ञिवान्॥" हरिवंशम्।

* In the second case, in the 3rd case singular and in the dual of the 6th and 7th cases एन is the substitude of इदम् and एतद् in the case of its re-employment in the subsequent member of a sentence in which the pronoun has already been used. In the previous sloka, was used, the pronoun तद् with which it is connected.

आयोधने कृष्णगतिं सहायम्
अवेहि मे शक्रसख त्वमस्मै।

आयोधने स्वायुकमस्त्रजात-
ममोघमभ्यर्णमहाहवाय।
दद्दौ वधाय क्षणदाचराणां
तस्मै मुनिः श्रेयसि जागरूकः॥ २२॥

Q. Give the derivative meaning of यातुधान। Ans. सर्वेषाम् अन्नं यान्ति इति यातूनि, याधातोः तुः। यातूनि रक्षांसि दधाति पुष्णाति (स्वजातिपोषकत्वात्) इति यातुधानः, धा-धातोः युः। अथवा यातु कदाचित् रक्षं प्राप्य धानं सन्निधानमस्य इति निरुक्तम्। अथवा यातु इति धीयते अभिधीयते इति ल्युट्। Q. Account for एन here. Ans. "द्वितीया टौस्स्वेनः" इति सर्वनाम्नः अन्वादेशे इदमः एतदश्च एनादेशः। See above. Q. Distinguish between अध्येति and अधीते। Ans. In the परस्मैपद it means recollection, while in the आत्मनेपद, study. Q. Change the voice. Ans. See above. Q. Decline the base of युधि। Ans. युत् युधौ युधः। आकारान्तोऽपि अस्ति। यथा, युधा युधे युधाः इत्यादि। २१।

22. Principal part :—मुनिः क्षणदाचराणां वधाय तस्मै अस्त्रजातं ददौ। Adj. to अस्त्रजातम्—आयोधने स्वायुकम् and अमोघम्। Adj. to मुनिः—श्रेयसि जागरूकः। Adj. to तस्मै—अभ्यर्णमहाहवाय।

Prose order :—श्रेयसि जागरूकः मुनिः क्षणदाचराणां वधाय अभ्यर्ण-महाहवाय तस्मै आयोधने स्वायुकम् अमोघम् अस्त्रजातं ददौ।

Substance :—राक्षसानां वधाय ऋषिः रामस्य मङ्गलमभिलषन्, संग्रामः समुपस्थित इति च मत्वा तस्मै अप्रतिहतम् अमोघम् अस्त्रम् ददौ।

Explanation in tika form :—श्रेयसि जागरूकः तत्कल्याणे सावधानः "जागुरूकः" इति जागृधातोः ऊकः। स मुनिर्विश्वामित्रः,क्षणदा रात्रिः तत्र चरन्तीति तेषां, "चरेष्टः" इति सप्तम्युपपदे चरधातोः टः। उपपदसमासः।

क्षणदाचराणां राक्षसानां वधाय हिंसायै अभ्यर्णः समीपवर्त्ती महान् आहवो युद्धं यस्य तस्मै रामाय, "संग्रामाभ्यागमाहवाः" इत्यमरः। अत्र रामाय "कर्म्मणा यमभिप्रैति स सम्प्रदानम्" इति सम्प्रदानात् चतुर्थी। आयुध्यन्ते अस्मिन् योद्धार इति आयोधनम् युद्धं "युद्धमायोधनं जन्यम्" इत्यमरः। तस्मिन् अधिकरणे ल्युट्। स्थायुकं स्थितिकरणशीलं अपायकत्वात् "लष पत पद स्था भू वृष हन कम गम शॄभ्यः उकञ्" इति उकञ्। अतएव अमोघम् अवन्ध्यम् अस्त्रजातं अस्त्रसमूहं ददौ दत्तवान्। उकञ्-ऊकयोः प्रभेदः कविना प्रदर्शितः। उपजातिः।

Change of voice :—मुनिना......ददे जागरूकेण।

Derivation—आयोधन—आ-युध्-अधिकरणे ल्युट् सप्तमी। स्थायुक—स्था-उकञ्। अभ्यर्ण=अभि-अर्द्-क्तः। आहव...आ-ह्वे-अधिकरणे अप्। जागरूक..जागृ ऊकः। लट् जागर्त्ति। लुङ् अजागरीत्। लिट् जजागार। जागराम्बभूव, जागरामास, जागराञ्चकार।

শ্রেয়ঃকার্য্যে উদ্যমশীল ঋষি, যাঁহার মহারণ নিকটবর্ত্তী হইয়া আসিয়াছে, সেই রামচন্দ্রকে সংগ্রামে স্থায়িশীল অব্যর্থ অস্ত্র সকল রাক্ষসগণের বধের জন্য প্রদান করিলেন।

The ascetic who was watchful of (Ram's) prosperity, gave, for the slaughter of the demons (who move about by night), a set of weapons unfailing and steady in the battle field, to Ram whose great war was drawing nigh.

Q. Show the propriety of the epithet श्रेयसि जागरूकः। Ans. अनेन ऋषेः विपदागमनात् प्रागेव प्रतीकारक्षमत्वं द्योत्यते। Q. Account for the 4th case in वधाय। Ans. "तुमर्थाच्च भाववचनात्" इति चतुर्थी इति केचित्। करणभूतेन रामेण क्षणदाचरान् हन्तुमित्यर्थः। अनेन तु मुनेः स्वधर्म्मविरोधी स्वयंकर्तृकहननव्यापारः गम्यते। अतः तादर्थ्ये चतुर्थी इत्येव साधु। अनेन हननकार्य्यस्य साहाय्यकमात्रं विवक्षितं नतु स्वयंकर्तृत्वम् इति। Q. What is the samas in क्षणदाचराणाम्। Ans. उभयत्र उपपदसमासः। ११।

तं विप्रदर्शं कृतघातयत्ना
यान्तं वने रात्रिचरी डुढौके।
जिघांसुवेदं धृतभासुरास्त्र-
स्तां ताड़काख्यां निजघान रामः॥ २३॥

23. It consists of two sentences :—(1) रात्रिचरी तं डुढौके। Adjunct to रात्रिचरी—विप्रदर्शं कृतघातयत्ना। Adj. to तम्—यान्तम्। (2) रामः तां निजघान। Adjunct to रामः—जिघांसुवेदं धृतभासुरास्त्रः। Adj. to ताम्—ताड़काख्याम्।

Prose order :—विप्रदर्शं कृतघातयत्ना रात्रिचरी वने यान्तं तं डुढौके। जिघांसुवेदं धृतभासुरास्त्रः रामः तां ताड़काख्यां (रात्रिचरीं) निजघान।

Substance :—ब्राह्मणान् दर्शनमात्रेणैव हन्तुकामा राक्षसी, तेषाम् उपकाराय चलितं वनमध्ये रामम् दृष्ट्वा तम् दधाव। रामश्च तां हननार्थम् उद्यताम् ज्ञात्वा प्रदीप्तमस्त्रमादाय निहतवान् इति।

Explanation in tika form :—विप्रदर्शं विप्रान् ब्राह्मणान् दृष्ट्वा। कृतः घाते हनने यत्नो यया सा कृतघातयत्ना कृतमारणाभियोगा, ब्राह्मणान् अवलोक्य हन्तुमिच्छुरित्यर्थः। रात्रिचरी राक्षसी ताड़का वने यान्तं गच्छन्तं तं रामं डुढौके प्राप्तवती। विप्रदर्शमिति पदं रामस्य विशेषणं वा, विप्राणां दर्शो दर्शनं यस्मात् इति विग्रहः, एतेन रक्षोभिया पलायमानानां विप्राणां पूर्वं दर्शनं नासीत् रामागमने तु विप्राः अदृश्यन्त इति व्यज्यते। जिघांसुं विदित्वा जिघांसुवेदं, धृतं भासुरं दीप्तम् अस्त्रं येन तथोक्तः रामः। ताड़कां तम् हन्तुम् इच्छन्तीं ज्ञात्वा धृतास्त्रः सन् इत्यर्थः। तां, ताड़का इति आख्या अभिधेयो यस्यास्तां ताड़काख्यां रात्रिचरीं* निजघान निहतवान्। विप्रदर्शं जिघांसुवेदमित्यत्र "कर्मणि दृशिविदोः साकल्ये"† इति णमुल्। वृत्तमुपजातिः।

---

* टिड्ढाणञ् इत्यादिना ङीप्।

† कर्मणि उपपदे दृशधातोः, तथा, विदधातोः णमुल् स्यात् साकल्ये गम्य-

Change of V.—सः......कृतघातयत्नया यान् रात्रिचर्या डुढौके। कृतभासुरास्त्रेण सा ताड़काख्या निजघ्ने रामेण।

Derivation. — विप्रदर्शम्—विप्र-दृश-णमुल्। घात—हन्-घञ्। रात्रिचरी—रात्रि-चर-टः, ङीत्वात् ङीप्। डुढौके—ढौकृ-लिट्, ए। षट् ढौकते। लुङ् अडौकिष्ट। जिघांसुवेदम्—जिघांसु (हन्-सनन्त-उः)-विद-णमुल्। भासुर—भास्-घुरच्। निजघान—नि-हन् लिट् अ।

যে তাড়কানাম্নী নিশাচরী ব্রাহ্মণ দেখিলেই তাঁহাকে হনন করিতে উদ্যত, সে বনে রামচন্দ্রকে যাইতে দেখিয়া নিকটে উপস্থিত হইল। রামচন্দ্র জিঘাংসু দেখিলেই প্রদীপ্ত অস্ত্র ধারণ করেন বলিয়া তাহাকে নিহত করিলেন।

The female demon the night ranger who made attempts to kill every Brahman she found, reached Rama, walking in the forest, who, ever ready with shining weapons to meet all who are of murderous intention, killed her, 'Taraka by name.'

Q. Parse विप्रदर्शम् and जिघांसुवेदम् and show their syntactical connection. Ans. विप्रदर्शम् जिघांसुवेदम् इति पदद्वयं क्रियाविशेषणम्। कृतः, कृतम् इति क्रियाद्वयेन अन्वयः। Syntactical connection—विप्रदर्शं कृतघातयत्ना, तथा, जिघांसुवेदं कृतभासुरास्त्रः इति अन्वयः। Q. Explain the force of णमुल् in विप्रदर्शम् and जिघांसुवेदम्। Ans. यमेव विप्रम् पश्यति तमेव हन्तुकामा राक्षसी; तथा, यमेव जिघांसुं जानाति तं प्रति रामो धृतास्त्रः इति णमुल्प्रत्ययेन साकल्यं बोध्यते। Q. Give the meaning and explain the formation of जिघांसुवेदम् and विप्रदर्शम् when

---

मानि। यथा विप्रदर्शम् कृतघातयत्ना। यान् यान् विप्रान् पश्यति तेषां घाते हनने राक्षसी कृतयत्ना इत्यर्थः। जिघांसुवेदं कृतभासुरास्त्रः। यं यं जिघांसुं वेत्ति तं प्रति रामः धृतास्त्रः।

अथानुलोके हुतधूमकेतु-
शिखाञ्जनस्निग्धसमृद्धशाखम् ।
तपोवनं प्राध्ययनाभिभूत-
समुच्चरत्स्वादुपतत्त्रिशिञ्जम् ॥ २४ ॥

used as adjectives to रामम् । Ans. निषाद्यं वेत्ति इति निषाद्यवेदः । अणप्रत्ययः । यथा "वेदोऽसि, मह्यं वेदः भूयाः" वेत्तासि विदितो भूयाः इत्यर्थः । (For the rest see above.) Q. Expound the samas in रात्रिचरी । Ans. रात्रौ चरति या सा रात्रिचरी । "चरेष्टः" इति अधिकरणेऽनुपपदे चरधातोः 'ट'विधानात् अत्र उपपदसमासः । २३ ।

24. Principal part :—अथ तपोवनं आलुलोके । Adj. to तपोवनम्—हुतधूमकेतुशिखाञ्जनस्निग्धसमृद्धशाखम् and प्राध्ययनाभिभूतसमुच्चरत्स्वादुपतत्त्रिशिञ्जम् ।

Prose order :—अथ (रामः) हुतधूमकेतुशिखाञ्जनस्निग्धसमृद्धशाखं प्राध्ययनाभिभूतसमुच्चरत्स्वादुपतत्त्रिशिञ्जं तपोवनम् आलुलोके ।

Substance :—अथ राक्षसीवधानन्तरम् रामः सपरितोषं ददर्श यत् तपोवने वृक्षशाखाः पुनः हुताग्निशिखानाम् अञ्जनेन स्निग्धीभूताः आसन्, पक्षिणश्च ऋषीणाम् वेदाध्ययनेन विमोहिताः मधुरं चुकुवुः इति ।

Explanation in tika form :—अथानन्तरं "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इत्यमरः । असौ रामः हुतः सम्यक् अर्पितः धूमकेतुः अग्निः "धूमकेतुः स्मृतो वह्नावुत्पातग्रहभेदयोः" इति विश्वः । तस्य शिखायाः ज्वालायाः "वह्निज्वाले अपि शिखे" इत्यमरः । यत् अञ्जनं धूमः धूमजं कज्जलमित्यर्थः । तेन स्निग्धाः समृद्धाश्च फलपुष्पाढ्याः शाखाः यत्र तथोक्तम् । अत्र शाखापदेन पल्लविताः शाखा इति लक्ष्यते । प्राध्ययनेन वेदपाठेन अभिभूता तिरस्कृता समुच्चरन्ती उद्गच्छन्ती स्वादुः शोभना पतत्त्रिणां पक्षिणां शिञ्जा अस्फुटशब्दो यत्र तथाभूतम् तपोवनं विश्वामित्राश्रमम् आलुलोके ददर्श । कर्मणि कर्मणि वा लोकधातोः लिटि रूपम् । अतः रामः रामेण वा कर्त्रपदमूह्यम् । इन्द्रवज्रा ।

Change of V.—......The above is used equally in the active and in the passive voice, आलुलोके being in the आत्मनेपद and तपोवनं in neuter gender.

Derivation.—आलुलोके—आ-लोक-लिट् ए। लट् लोकते लोकयति लुङ् अलोकिष्ट अलुलोकत्। हुत—हु-क्तः। जुहोति लट्, अहौषीत् लुङ्। धूमः—धू-मक्। केतुः—चाय-तु। "केतुर्ध्वजपताकयोः"। पतत्र—पतत्-त्रै कः।

অনন্তর রামচন্দ্র যে তপোবনে হুতাগ্নির শিখাধূমে বৃক্ষের ফলপূর্ণ শাখা স্নিগ্ধ হইতেছিল, যাহাতে পক্ষিগণের মনোরম উচ্চ কলরব বেদাধ্যয়নের নিকট পরাজিত হইতেছিল সেই তপোবন অবলোকন করিলেন।

He then saw the hermitage, (the grove of asceticism), where the branches of the trees were rich with fruits and were rendered glossy by the collyrium of the flame of sacrificial fire and where the sweet loud chirpings of the birds were drowned in the recitation of Vedas.

Q. Give the derivative meaning of पतत्रिन्। Ans. पतन्तं त्रायन्ते इति पतत्राणि पक्षाः, "आतोऽनुपसर्गे कः" इति कः। तानि सन्ति येषां ते पतत्रिणः पक्षिणः। Q. Show the significance of प्राध्ययनाभिभूत &c. Ans. अनेन वेदाध्ययनं अतीव उत्साहः निमदितः। तत्पाठश्रवणेन च असूयया इव पक्षिणः अधिकं मनोरमम् उच्चैः कूजितवन्तः इति च ध्वनितम्। Q. Comment on स्निग्धा। Ans. "भूषणानान्तु शिञ्जितम्" इति अमरकोषे। भूषणशब्दार्थकत्वेऽपि अत्र शिञ्जाशब्दः अव्यक्तशब्दमात्रे एव उपलक्षितः। Q. Give the etymology of धूमकेतु and its different meanings. Ans. See above. Q. In what voice is आलुलोके। Show your reason. Ans. See above and add आत्मनेपदिनः धातोः कर्त्तरि कर्म्मणि च लिट्-आदिषु समरूपतया अत्र उभयमेव सिद्धम्। Q. Scan the first and the

क्षुद्रान्न जक्षुर्हरिणान् मृगेन्द्रा
विशश्वसे पक्षिगणै: समन्तात् ।
नंनम्यमाना: फलदित्सयेव
चकाशिरे तत्र लता विलोला: ॥ २५ ॥

third line and point out if there be any mistake.

ज त ज ग ग

Ans.
नं न्य मा । ना: फ ल । दि त्स। ये । व

"उपेन्द्रवज्रा जतजा: ततो गौ।" अत: उपेन्द्रवज्रा वृत्तम्। पादशेषे ह्रस्वस्यापि वैकल्पिक दीर्घनियमात् नात्र दोष:। तथाहि, "तथा पादान्तगोऽपि वा।" एवं तृतीय: पाद:। २४।

• 25. It consists of 3 sentences :—*Viz.* (1) मृगेन्द्रा: हरिणान् न जक्षु:। (2) पक्षिगणै: समन्तात् विशश्वसे। (3) तत्र लता: चकाशिरे। Adj. to हरिणान्—क्षुद्रान्। Adj. to लता:—नंनम्यमाना: and विलोला:। (फलदित्सया हेतौ तृतीया)।

Prose order :—तत्र मृगेन्द्रा: क्षुद्रान् हरिणान् न जक्षु:। पक्षिगणै: समन्तात् विशश्वसे। फलदित्सया इव नंनम्यमाना विलोला लता: चकाशिरे।

Substance :—तपोवनप्रभावात् सिंहा: हीनबलान् हरिणान् भक्षणार्थं न व्यापादितवन्त:, काकपेचकादिभि: परस्परं विशश्वसे, लताश्च फलप्रदानार्थं सर्व्वत्र विनयेन प्रवर्त्तन्त इव।

Explanation in tika form :—अथ तपोवनमाहात्म्यं वर्णयन्नाह क्षुद्रानिति। तत्र तस्मिन् तपोवने मृगेन्द्रा: सिंहा: व्याघ्रादय: बलाधिका: जन्तव: इति उपलक्षितम्। "सिंहो मृगेन्द्र: पञ्चास्य:" इत्यमर:। क्षुद्रान् इतरान् हरिणान् मृगान्, गवादीन् इति उपलक्षितम्। न जक्षु: भक्षितवन्त:। अदेर्लिटि रूपम्। पक्षिगणै: विरुद्धैरपि काकोलूकादिभि: समन्तात् सर्व्वत्र विशश्वसे परस्परं विश्वस्तं। भावे लिट्। दातुमिच्छा दित्सा फलानां दित्सा तया फलदानेच्छयेव, हेतौ

तृतीया। नंनम्यमानाः भृशम् (अतिशयेन) नताः विलोलाश्चपलाः लताः चकाशिरे शोभन्ते स्म। अत्र विलोलेति पदेन तासाम् उत्फुल्लतया दानविषये महान् सन्तोषः प्रकटितः। नंनम्यमानेति पदेन च फललाभेऽपि विनीतता द्योतिता। अत्र कालिदासः, "अमाम हृष्यापि विना दर्वाभिः धात्रीविशेषा फलपुष्पवृद्धिः। जनं न सत्त्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने॥" अलङ्कारः—उत्प्रेक्षा। वृत्तमुपजातिः।

Change of V.—क्षुद्रा न जक्षिरे हरिणा मृगेन्द्रैः। विशश्वसुः पक्षिगणाः। नंनम्यमानाभिः......लताभिः विलोलाभिः चकाशे।

Derivation :—क्षुद्र—क्षुद्-रक्। जक्षुः—अद लिट् उस्, आदुः इति च। लट् अत्ति। लुङ् अघसत्। विशश्वसे—वि-श्वस् लिट् ए। लट् विश्वसिति। लुङ् व्यश्वसीत्। नंनम्यमाना—यङन्त नम्-शानच्। दित्सा—दा-सन्-अ टाप्। चकाशिरे—काश लिट् इरे। लट् काशते, लुङ् अकाशिष्ट। लिट् काशाम्बभूव, काशाञ्चक्रे, काशामास, चकाशे।

তথায় সিংহাদিশ্বাপদগণ, দুর্ব্বল হরিণাদিকে ভক্ষণ করে নাই। সর্ব্বত্র বিরোধী পক্ষিগণ পরস্পর বিশ্বাস করিয়াছিল। ফলদানার্থই যেন বিনত হইয়া উৎফুল্ল লতাবৃন্দ সুশোভা ধারণ করিয়াছিল।

There the lions and others did not eat up the weak deer (animals); the birds on all sides put their trust in each other. The waving creepers looked beautiful, inclining as if from the desire of presenting fruits.

Q. Write gram. notes on, and propriety of, नंनम्यमानाः। Ans. "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्।" इति नम्धातोः एकाचः हलादेः समभिहारे अर्थात् पौनःपुन्ये भृशार्थे च (अत्र भृशार्थे) यङ्। ङित्-विधानात् आत्मनेपदम्। लताः फललाभेनापि भृशं विनता आसन् इति आतिशय्यद्योतनाय यङ् प्रयुक्तम्। Q. Show that क्षुद्रान् and मृगेन्द्राः are aptly used. Ans. क्षुद्रान् इति विशेषणपदेन हरिणानाम् दुर्बलत्वम्, बलिभिश्च आयासं विनैव भक्षणीयत्वम्

अपूपुजन्विष्टरपाद्यमार्घ्य-
रातिथ्यनिष्णा वनवासिमुख्याः।
प्रत्यग्रहीष्टां मधुपर्कमिश्रं
तावासनादि क्षितिपालपुत्रौ ॥ २६ ॥

द्योतितम्। खगेन्द्रा इत्यत्र 'बलिनः' इति विशेषणपदं न प्रदत्तम्। इन्द्र-शब्देनैव बलवत्त्वद्योतनात् न अपरं विशेषणपदं प्रयुज्यते। Q. Parse समन्तात्। Ans. अव्ययम्, अधिकरणे सप्तमी। Q. Show the significance of इव and विलोलाः। Ans. इवेति अव्ययपदम् उत्प्रेक्षाद्योतकम्। लतानाम् फलदानेच्छा तथा बलवती आसीत् यथा फलानि पथिकानां करप्रचेयानि कर्तुं नमिताः अवर्त्तन्त, इति उत्प्रेक्षासार्थकम्। विलोलाः see above. । २५ ।

26. It is composed of two sentences. viz.:—(1) वनवासिमुख्याः विष्टरपाद्यमार्घ्यैः अपूपुजन्। Adj. to वनवासिमुख्याः—आतिथ्यनिष्णाः। (2) तौ क्षितिपालपुत्रौ आसनादि प्रत्यग्रहीष्टाम्। Adj. to आसनादि—मधुपर्कमिश्रम्।

Prose order :—आतिथ्यनिष्णाः वनवासिमुख्याः विष्टरपाद्यमार्घ्यैः अपूपुजन्। तौ क्षितिपालपुत्रौ मधुपर्कमिश्रम् आसनादि प्रत्यग्रहीष्टाम्।

Substance.—वनवासिनां श्रेष्ठतमाः अतिथिपरायणाः अर्घ्यैः आसनेन च पाद्येन च तथा कुसुमैश्च तौ संवर्धयामासुः। तौ अपि राजपुत्रौ मधुपर्कसंयुतं आसनादि गृहीतवन्तौ।

Explanation in tika form :—अधुना वनं कथ्यते। अतिथ्यर्थम् आतिथ्यम्। "अतिथेर्ञ्यः" इति ञ्यः। "क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि" इत्यमरः। वस्तुतस्तु आतिथ्यशब्देन अतिथिसेवनमुच्यते। तत्र निष्णाः कुशलाः "सुषिस्थः" इति षः। ततः "निनदीभ्यां स्नातेः कौशले" इति कुशलार्थे नि इत्यस्मात् स्नाधातोः सस्य षत्वम्। वनवासिनां मुनीनां, मुखे आद्ये भवाः मुख्याः (यत्) श्रेष्ठाः मुनिवर्या इत्यर्थः। विष्टरः आसनम् "आसने कुशमुष्टौ च विष्टरः"

इति विश्वः। "कृत्यगत्योः विष्टरः" इति विपूर्व्वस्य स्तृणातेः आसनार्थे षत्वं निपातितम्, अन्यत्र विस्तरः। पाद्यं पादार्थमुदकं "पाद्यं पादाय वारिणि" इत्यमरः। "पादार्घाभ्याञ्चे"ति यत्। मालायां साधूनि माल्यानि कुसुमानि "तत्र साधु"रिति यत्। माला एव माल्यानि, इति वा स्वार्थे ष्यञ्। विष्टरैः पाद्यैः माल्यानि च तैः अपूपुजन् पूजितवन्तः। तौ क्षितिपालपुत्रौ इति द्वितीयान्तेन योज्यम्। तौ च क्षितिपालपुत्रौ रामलक्ष्मणौ (कर्त्तारौ) मधुपर्कमिश्रं मधुनः पर्कः योगो यत्र तेन मिश्रम् मधुपर्केण सहितम् आसनादि प्रत्यग्रहीष्टां प्रतिगृहीतवन्तौ। प्रतिपूर्व्वात् ग्रहेर्लुङ्। इत्यसुपजातिः।

Change of V.—अपूजिषाताम् (अपूजयिषाताम् वा) आतिथ्यनिष्ठैः वनवासिमुख्यैः। प्रत्यग्राहि—ताभ्यां क्षितिपालपुत्राभ्याम्।

Derivation.—अपूपुजन्—पूज-लुङ् अन्। विष्टर—वि-स्तृ-अप। पाद्य—पाद-यत्। माल्य—माला-यत्। आतिथ्य—अतिथि-ष्यञ्। निष्ठा—नि-स्था कः। प्रत्यग्रहीष्टां—प्रति-ग्रह-लुङ् ताम्। एकवचने अग्रहीत्। मधु—मन्-उ; पर्क—पृच-घञ्, पृचन्ति लट, अपार्चीत् लुङ्। मिश्र—मिश्र-अच्। मिश्रयति लट; अमिमिश्रत् लुङ्।

तपोवनवासिगणের মধ্যে যাঁহারা প্রধান, সেই সকল আতিথ্য-পরায়ণ ব্যক্তি ক্ষিতিপালের পুত্রদ্বয়কে, কুশাসন, পাদ্য ও কুসুমাদি দ্বারা অর্চ্চনা করিলেন। তাঁহারাও মধুপর্ক সংপৃক্ত আসনাদি গ্রহণ করিলেন।

The chief hermits (eremites) who were devoted to hospitality honored the two sons of the ruler of the earth, with seats, waters and flowers, and the latter two accepted the seats and other things with madhuparka, an offering consisting of curds honey &c.

Q. Parse तौ। Ans. अपूपुजन् इत्यस्य कर्म्मपदम्। "प्रत्यग्रहीष्टाम्" इत्यस्य च कर्त्तृपदम्। Q. Comment gram. on the formation of विष्टरः, पाद्यम्, माल्यम्, निष्ठा। Ans. See above. Q. Show the fitness of क्षितिपालपुत्रौ। Ans

दैत्याभिभूतस्य युवामवोढं
मग्नस्य दोर्भिर्भुवनस्य भारम्।
हवींषि संप्रत्यपि रक्षतं तौ
तपोधनैरित्थमभाषिषाताम्॥ २७॥

"आत्मा वै जायते पुत्रः" इति पितुः पुत्रस्य च एकात्मतया, षष्ठांशवृत्तेः दशरथस्य पुत्रयोः रामलक्ष्मणयोः करग्रहणोचितयोः का कथा आसनादिप्रदाने इति क्षिति-पालपुत्रशब्दस्य सार्थक्यम्। Q. Show the significance of वनवासिमुख्याः। Ans. अत्र वनवासिपदेन कुसुमादिना अरण्यभवद्रव्यजाते-नैव तयोः पूजनम् आसीत् इति गम्यते। Q. What is मधुपर्क? Ans. "दधिसर्पिर्जलं क्षौद्रं (मधु) सिता चैतैश्च पञ्चभिः। प्रोच्यते मधुपर्कस्तु इति दध्यादिद्रव्यपञ्चकम्। Q. Give the different meanings of मधु in respect of gender, and derive. Ans. "मधुर्वसन्ते च दैत्ये च, मद्ये पुष्परसे मधु" इति हेमचन्द्रः। Deriv. मन्‌धातोः उः, नकारस्य धकारादेशः। Q. Decline पाद। Ans. पादः पादौ पादाः, पादम् पादौ पादान् पदः, पादेन पदा, पदाभ्यां पद्भ्याम् इत्यादि। Q. Derive क्षिति and conjugate its root in लट्। Ans. निवासार्थं क्षि-धातोः क्तिः। क्षियति क्षियतः इत्यादि लटि रूपम्। तथाहि, "क्षये वा गच्छतीत्यर्थे क्षयतीत्यादिकं भवेत्। पृथिव्यां क्षियतीत्यादौ निवासार्थः प्रकीर्त्तितः। पापं क्षिणोति लोकोऽसौ विनाशार्थः क्षिणुर्मतः॥" २६।

27. It consists of 3 sentences, viz. :—(1) युवाम् भुवनस्य भारं दोर्भिः अवोढम्। Adj. to भुवनस्य—दैत्याभिभूतस्य and मग्नस्य। (2) संप्रति अपि हवींषि रक्षतम्। (3) तपोधनैः तौ इत्थम् अभाषिषाताम्।

Prose order :—युवां दैत्याभिभूतस्य मग्नस्य भुवनस्य भारं दोर्भिः अवोढम्। संप्रति अपि हवींषि रक्षतं। इत्थं तपोधनैः तौ अभाषिषाताम्।

Substance :—पुरा युवां नरनारायणरूपमाश्रित्य ब्रह्मादीनां रक्षणेन

दैत्यानाञ्च निधनेन भुवनस्य उद्धरणं कृतवन्तौ। इदानीमपि पूर्ववत् यज्ञरक्षणं लोकरक्षणञ्च कुरुतम् इति प्रार्थना चक्रुः।

Explanation in tika form :—युवां नरनारायणौ। युवामित्युक्तौ त्वञ्च त्वञ्चेति एकशेषः। दितेरपत्यानि दैत्याः "दित्यदित्यादित्यपत्युत्तरपदात् ण्यः" इति ण्यः *। तैरभिभूतस्य आक्रान्तस्य अतएव मग्नस्य नष्टप्रायस्य अतएव क्लेशस्य भुवनस्य भारं भारभूतं परिरक्षणम् दीर्घैः भुजैः "दोर्दोषा च भुजो बाहुः पाणिर्हस्तः करस्तथा" इति अमरः। अवोढं उढवन्तौ कृतवन्तौ इति यावत्। वहेः लुङ् मध्यमपुरुष द्विवचने। संप्रत्यपि हवींषि हुतानि राक्षसैः उपहन्यमानानि इति शेषः, रक्षतं। प्रार्थनायां लोट् मध्यमपुरुषद्विवचने। इत्थं अनेन प्रकारेण तप एव धनं येषामिति तपोधनाः तपस्विनः तैः, तौ रामलक्ष्मणौ अभाषिषाताम उक्तौ। भाषतेः कर्मणि लुङ् प्रथमपुरुषद्विवचने। यौ नाम विष्णोरंशौ नरनारायणौ तावेव रामलक्ष्मणौ। यज्ञरक्षणं दैत्यनाशनञ्च कार्य्यम् उभयोर्नां तुल्यम् इति भावः। वृत्तमुपजातिः।

Change of V.—युवाभ्याम् अवाहि......भारः। ......रक्ष्यन्तां। तपोधनाः......अभाषिषत।

Derivation.—दैत्य—दिति ण्यः। अवोढं—वह लुङ् तस्। लट् वहति, वहते। लुङ् अवाक्षीत्, अवोढ। लिट् उवाह, ऊहे। रक्षतं—रक्ष लोट् तम्। अभाषिषाताम्—भाष कर्मणि लुङ् आताम्। लट् भाषते। इत्थम्—"इदमः थमुः" इति इदम् शब्दात् थमुः। मग्न—मस्ज् क्त। मज्जति लट्, अमाङ्क्षीत् लुङ्।

তপোধনগণ কহিলেন, দৈত্যগণ দ্বারা পরাজিত ও বিপন্ন জগতের ভার তোমরা দুই জনে বাহু দ্বারা বহন করিয়াছ। এক্ষণেও তোমরা সেই দুই জনেই হবিঃ রক্ষা কর।

---

* दिति अदिति आदित्य इत्येतेभ्यः पत्युत्तरपदात् च प्रातिपदिकात् अपत्यादिषु अर्थेषु ण्यप्रत्ययो भवति। यथा, दैत्यः, आदित्यः, आदित्यम्, प्राजापत्यम्।

तान् प्रत्यवादीदथ राघवोऽपि
यथेप्सितं प्रस्तुत कर्म्म धर्म्यम्।
तपोमयाग्निर्भवतां शराग्निः
संधुक्ष्यतां नोऽरिसमिन्धनेषु ॥ २८ ॥

You two, by your arms bore the burden of the sunken world oppressed by the demons, and now too protect our oblations. Thus those two were addressed by the devotees.

Q. Explain the allusion in दैत्याभिभूतस्य युवामवोढम्। Ans. पुरा किल वेदादीनाम् समुद्धरणाय दैत्यानाञ्च वधाय विष्णोरवतारविशेषौ नरनारायणौ बदरिकाश्रमे तपसि स्थितौ इति पौराणिकी वार्त्ता। तथोक्तं भारते, "नरनारायणौ यौ तौ पुराणावृषिसत्तमौ। * * भूमेर्भारावतरणम् महावीर्य्यौ करिष्यतः॥' Q. How do you connect in sense the word भारम् with हविः? Ans. यथा दैत्याभिभूतस्य मग्नप्रायस्य भूमण्डलस्य भारः बाहुभिः परिरक्षितः तथा, इदानीमपि यज्वभिः प्रक्षिप्तम् इन्द्रादिदेवपूजार्थिभिः रक्षोभिः चाक्षिप्य गृहीतम् भारभूतम् अन्यैर्वोढुं दुःसाध्यम् हविः देवेभ्यो दातुं युवामेव बाहुबलेन रक्षतम् इत्यर्थः। Cf. "जातवेदोमुखान् मायी मिषताम् आच्छिनत्ति नः।" कुमारः। Q. Decline the base of दोर्भिः। Ans. पुंसि, दोः दोषौ दोषः, क्लीबे, दोः दोषणी दोषी दोंषि, (असि, दोंषि दोषाणि), दोष्णा दोषा दोषभ्याम् दोर्भ्याम् इत्यादि। "दधिवं दोर्भिमापरः", रघुः। २७।

28. It consists of 3 sentences of which the principal one is the first below.

Prose order :—(1) अथ राघवोऽपि ताम् प्रत्यवादीत्। यत्—(2) यथेप्सितं धर्म्यं कर्म प्रस्तुत। (3) भवतां तपोमयाग्निः नः शराग्निः अरिसमिन्धनेषु संधुक्ष्यताम्।

Substance :—अथ तान् राघवः प्रत्युवाच। यूयम् यथेष्टं धर्मकार्यम्

अनुतिष्ठत । अस्माकम् शराग्निः युष्माकम् तपोरूपेण वायुना सन्धुक्षितो भूत्वा शत्रून् काष्ठवत् भस्मीकरोतु इति ।

Explanation in tika form .—अथ एतस्मिन् प्रस्तावे, रघोः गोत्रापत्यं पुमान् राघवः रामोऽपि तान् मुनीन् प्रत्यवादीत् प्रत्युक्तवान् । [वदेर्लुङ् ।] यथा ईप्सितम् अभिलषितं धर्म्मादनपेतं धर्म्म्यं यागादिकर्म्म प्रस्तुत प्रारभ्यध्वम् । [नियोगकरणे प्रपूर्व्वात् सुधातोः लोटि मध्यमपुरुषबहुवचने ।] भवतां, तपांसि एव मरुतः [रूपककर्म्मधारयः] तैः कर्तृभिः नोऽस्माकं शरः एव अग्निः शराग्निः [उक्तं कर्म्मपदं, रूपककर्म्मधारयः ।] समिध्यते एभिरिति समिन्धनानि, [करणे ल्युट् ।] अरयः एव समिन्धनानि तेषु शत्रुरूपकाष्ठेषु इत्यर्थः । संधुक्ष्यताम् दीप्यताम् । [धुक्षेः कर्म्मणि, आग्निणि लोट् । परम्परितरूपकालङ्कारः । तल्लक्षणं यथा, "यत्र कस्यचित् आरोपः परारोपणकारणम् तत् परम्परितं श्लिष्टाश्लिष्टशब्द-निबन्धनम् ।" इत्यस्मुपजातिः ।]

Change of V.—राघवेण ते अवदिषत......प्रस्तूयताम्......तपो-मरुतः शराग्निं धुक्षन्ताम् ।

Derivation.—प्रत्यवादीत्—प्रति-वद-लुङ् द । लट् वदति । लिट् उवाद । राघव—रघु-अण् । ईप्सितम्—आप-(सनन्त)-कर्म्मणि क्तः । प्रस्तुत—प्र-स्तु-लोट् त । लट् स्तौति, स्तवीति, स्तुते स्तुवीते । लुङ् अस्तावीत्, अस्तोष्ट । लिट् तुष्टाव, तुष्टुवे । धर्म्म्य—धर्म्म-यत् । संधुक्ष्यताम्—सम् धुक्ष-कर्म्मणि लोट् ताम् । धुक्षते लट् । समिन्धन—सम्-इन्ध-करणे ल्युट् । लट् इन्धे । लुङ् ऐन्धिष्ट । लिट् इन्धाञ्चक्रे ।

রাঘবও তাঁহাদিগকে কহিলেন, আপনারা ইচ্ছানুরূপ ধর্ম্ম্য কার্য্য আচরণ করুন । শত্রুরূপ কাষ্ঠে মধ্যে আমাদের শরাগ্নি আপনাদের তপোরূপ বায়ু দ্বারা উদ্দীপিত হউক ।

To them Raghava too spoke in reply ; commence the religious ceremony as desired. Let the fire of our arrows in the fuel like enemies be blazed by the wind of asceticism.

Q. Can there be उपमितिसमासः in तपोमरुद्भिः &c. ?

प्रतुष्टुवुः कर्म्म ततः प्रक्रमै-
स्ते यज्ञियैर्द्रव्यगणैर्यथावत् ।
दक्षिण्यदिष्टं क्षतमार्त्विजीनैः
तद्यातुधानैश्चिचिते प्रसर्पत् ॥ २९ ॥

Ans. अभिसम्मुखत्वे वायोरिव प्रभुता मनु तपसः। अतः अत्र रूपककर्म्मधारयैः प्रशस्यते। Q. Show the sense of अपि। Ans. अपिरत्र समुच्चये। "गर्हा समुच्चय प्रश्न शङ्का सम्भावनास्वपि" इत्यमरः। Q. Expound the samas in यथेप्सितम्, and parse it. Ans. ईप्सितम् अनति-क्रम्य यथेप्सितम्, अनतिक्रमार्थे अव्ययीभावः। Parsing—क्रियाविशेषणम्। प्रस्तुत इत्यनेन अन्वयः। अपिच, यथा ईप्सितम् यथेप्सितम्, कर्म्मधारयः, Parsing—कर्म्म इत्यस्य विशेषणपदम्। Q. Account for the plural form of नः। Ans. "अस्मदो द्वयोश्च" इति एकत्वे द्वित्वे च विवक्षिते अस्मद्शब्दस्य बहुवचनं वा प्रयुज्यते इति बहुवचनम्। Q. If there be an adjective to नः, viz. युष्मद्भक्तानाम् &c, should the plural form of नः in the sense of dual, be a correct one? Ans. "सविशेषणस्य प्रतिषेधः" इति कात्यायनवचनात् नैतत् साधु। अतः "युष्मद्भक्तयोः" आवयोः इत्येवं स्यात्, नतु बहुवचनप्रयोगः भवेत्। २८।

29. Principal part of (1) :—ते द्रव्यगणैः यथावत् कर्म्म प्रतुष्टुवुः। Adj. to द्रव्यगणैः—प्रक्रमैः and यज्ञियैः। Adj. to कर्म्म—दक्षिण्यदिष्टं and आर्त्विजीनैः क्षतम्। (2) तत् यातुधानैः (अनुक्त कर्तृ) चिचिते। Adj. to तत्—प्रसर्पत्।

Prose order :—ततः ते प्रक्रमैः यज्ञियैः द्रव्यगणैः दक्षिण्यदिष्टं आर्त्विजीनैः क्षतं कर्म्म यथावत् प्रतुष्टुवुः। प्रसर्पत् तत् यातुधानैः चिचिते।

Substance :—अथ रामेण अनुरुद्धाः मुनयः विरचितैः यज्ञियैः द्रव्यैः यथाविधि यज्ञकर्म्म निरवर्त्तयन्। राक्षसाश्च तेषां प्रवृत्तं कर्म्म अजानन् इति।

Explanation in tika form :—ततो रामवचनानन्तरं ते तपोधनाः प्रक्लृप्तैः मिलितैः विरचितैः ["क्लृपो रो लः" इति क्लृपधातोः क्लृपादेशः।] यज्ञियैः यज्ञकर्मार्हैः ["तत् कर्मार्हन्तु यज्ञियम्" इत्यमरः।] द्रव्यमन्त्रैः स्रुवादिभिः (करणैः)। दक्षिणामर्हन्तीति दक्षिण्याः, (यत्प्रत्ययः) मन्त्रैः तैः दिष्टमुक्त मन्त्रविधिः विहितमित्यर्थः। ऋतौ ऋतुं वा यजन्तीति ऋत्विजः, तस्य कर्म आर्त्विजम्, तत् अर्हन्तीति तैः आर्त्विजीनैः ऋत्विक्कर्मार्हैः व्रतम् अनुष्ठितम् ["याज्ञी-प्राया धर्नैर्याज्या ऋत्विजो याजकाश्च ते" इत्यमरः।] कालस्तु "इताः कुर्वन्ति ये यज्ञमृत्विजो याजकाश्च ते" इति [यज्ञियैः आर्त्विजीनैरिति "यज्ञर्त्विग्भ्यां घ खञौ"* इत्यत्र "यज्ञर्त्विग्भ्यां तत्कर्म अर्हति इत्युपसंख्यानम्" इति वार्त्तिकवचनात् क्रमात् घ खञ् च।] कर्म यागक्रियां यथावत् यथाविधि प्रतष्टुवुः प्रारब्धवन्तः। प्रपूर्व्वात् स्तौतेः प्रारम्भार्थत्वम्। प्रकर्षेण वृद्धिं गच्छत् तत् कर्म यातुधानैः राक्षसैः ["यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी" इत्यमरः।] चिचिते व्याप्तम्। [चितीः संज्ञाने इत्यस्मात् कर्मणि लिट्। रूपमुपजातिः।]

Change of V.—प्रतुष्टुवे तैः।......यातुधानाः......चिचितुः।

Derivation.—प्रतष्टुवुः—प्र-स्तु-लिट् उस्। प्रक्लृप्तैः—प्र-क्लृप-कर्म्मणि क्त। लट् कल्पते। लुङ् अक्लृपत्, अकल्पिष्ट, अक्लृप्त। लिट् चक्लृपे। लृट् कल्प्स्यति; कल्पिष्यते कल्प्स्यते। यज्ञियः—यज्ञ-घः। दक्षिण्यः—दक्षिणा-यत्। दिष्टम्—दिश-कर्म्मणि क्तः। आर्त्विजीनैः—ऋत्विज्-खञ्। चिचिते—चित-लिट् ए। लट् चेतति। लुङ् अचेतीत्। लिट् चिचेत।

অনন্তর তাঁহারা সমাহৃত যজ্ঞিয় দ্রব্যজাত দ্বারা যথাবিধি যজ্ঞ কার্য্য আরম্ভ করিলেন। রাক্ষসগণও দক্ষিণার্হ ব্রাহ্মণগণ কর্তৃক

---

* "आयन् एय् ईन् ईय् इयः फढखछघां प्रत्ययादीनाम्।" फ—आयन्; ढ—एय्; ख—ईन्; छ—ईय्; घ—इय। अतः यज्ञ इत्यस्मात् घ-प्रत्यये यज्ञियः; ऋत्विज् इत्यस्मात् अञ् इति कृते आर्त्विजम्, तस्मात् खञि कृते आर्त्विजीनः इति सिद्धम्।

आपिङ्गरूक्षोर्द्ध्वशिरस्यवालैः
शिरालजङ्घै र्गिरिकूटदघ्नैः।
ततः कपाटैः पृथुपिङ्गलाक्षैः
खं प्रावृषेण्यै रिव चानशेऽब्दैः ॥ ३० ॥

উপদিষ্ট, যাগনিপুণ দ্বিজ কর্ত্তৃক অনুষ্ঠিত, ক্রমশঃ বৃদ্ধিপ্রাপ্ত, উক্ত কার্য্য অবগত হইল।

Then they commenced the ceremony with sacrificial things arranged according to rule. And the ceremony, directed by those entitled to religious presents and performed by the 'competent celebrants,' being on progress was known to the goblins.

Q. Comment gram. on दक्षिण्य यज्ञिय and आर्त्विजीन।
'Ans. "कडङ्करदक्षिणात् छ च"। (छ=ईय ; see foot note) इति दक्षिणीयः, चकारात् यत्, अतः दक्षिण्यः इत्यपि स्यात्। For the rest see above. **Q. Explain in English.** Ans. (See the translation above and mark how to proceed) ततः ते कर्म्म प्रतुष्टुवुः Then they commenced the ceremony यज्ञियैः द्रव्यैः with sacrificial things यथावत् प्रक्लृप्तैः arranged according to rule. तत् the ceremony दक्षिण्यदिष्टं directed by those entitled to religious presents, आर्त्विजीनैः कृतम्, performed by competent celebrants प्रसर्पत् being on progress, यातुधानैः चिचिते was known to the goblins, (the supporters of their own race.) The epithets दक्षिण्यदिष्टम् &c show that the deed was done in perfection.। २९।

30. Principal sentence :—ततः कपाटैः खं आनशे। अब्दैः := (उपमाने कर्त्तरि तृतीया) same case with कपाटैः। Adj. to अब्दैः :— प्रावृषेण्यैः। The rest of the words are adj. to कपाटैः।

Prose order :—ततश्च आपिङ्गदीर्घशिरस्यवालैः शिरालजङ्घैः गिरिकूटदघ्नैः पृथुपिङ्गलाक्षैः चपाटैः प्रावृषेण्यैः अब्दैरिव खम् आनशे।

Substance :—वर्षासु यथा मेघाः सहसा आकाशं छादयन्ति, तथा राक्षसाः बहवः समेत्य आकाशतलम् व्याप्नुवन्ति स्म। ते च कचकेशेषु मेघाकृतिसाम्यं, गिरिकूटवत् विस्तारे तद्विस्तारसाम्यम्, पिङ्गलनेत्रेषु तडित्साम्यं दधिरे।

Explanation in tika form :—ततः तदनन्तरं शिरसि जाता शिरस्याः ["शरीरावयवात् यत्" इति यत्।] आपिङ्गाः ईषत्कपिला दर्घाः अतैलाः अचिक्कणा इत्यर्थः जटाश्च शिरस्याः वालाः केशा येषां तथोक्तैः। शिराः सन्ति यासामिति शिरालाः। ["प्राणिस्थात् आतो लच् अन्यतरस्या"मिति लच्।] शिराला नाडीव्याप्ता जङ्घा प्रसृता, गुल्फजान्वोर्मध्यदेशः येषां तैः "जङ्घा तु प्रसृता" इत्यमरः। गिरिकूटदघ्नैः गिरिशृङ्गप्रमाणैः "प्रमाणे द्वयसच् दघ्नच् मात्रचः" इति दघ्नच्। पृथूनि विस्तीर्णानि पिङ्गलानि च अक्षीणि येषान्तैः। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति षच्। चटतीति चटाः पचाद्यच्। चपायां चटाः (सप्तमीसमासः) तैः निशाचरैरित्यर्थः कर्तृभिः, प्रावृषेण्यैः वर्षाकालीनैः ["प्रावृष एण्यः" इति एण्यप्रत्ययः।] अब्दैः मेघैरिव खं नभः "नभोऽन्तरीक्षं गगनमनन्तं सुरवर्त्म खम्" इत्यमरः। आनशे व्याप्तम्। अश्नुतेः कर्मणि लिट्। उपमालङ्कारः, वृत्तमुपजातिः। अत्र कालिदासः—

"उन्मुखः सपदि लक्ष्मणाग्रजो बाणमाश्रयमुखात् समुद्धरन्।
रक्षसां बलमपश्यदम्बरे गृध्रपक्षपवनेरितध्वजम्॥"

Change of V.—...... * * वालाः शिरालजङ्घाः गिरिकूटदघ्नाः... चपाटाः पृथुपिङ्गलाक्षाः......प्रावृषेण्याः अब्दाः इव आनशिरे।

Derivation.—शिरस्य—शिरस्-यत्। शिराल—शिरा-लच्। चपाट—चपा-चट-अच्। प्रावृषेण्य—प्रावृष-एण्यः। आनशे—अश-कर्मणि लिट् ए। वल—वल-क्त। जङ्घा—हन-यङ् च। गिरिः—गृ-कि। कूट—कूट-अच्। चपा—चै-णिच्-अच्, पुगागमः। अक्षि—अश्-कसि। पिङ्गल—पिज्-अच्, पिङ्गः, पिङ्ग-ला-क।

अधिज्यचापः स्थिरबाहुमुष्टि

रुदञ्चिताक्षोऽञ्चितदक्षिणोरुः।

যাহাদের মস্তকস্থিত কেশজাল ঈষৎ পিঙ্গলবর্ণ, রুক্ষ ও উর্দ্ধগত, যাহাদের জঙ্ঘা শিরাময় এবং যাহাদের চক্ষুঃ বিস্তৃত ও পিঙ্গলবর্ণ, সেই সকল গিরিশৃঙ্গবৎ রাক্ষসগণ বর্ষাকালীন মেঘজালের ন্যায় সমস্ত আকাশ ব্যাপ্ত করিল।

Then was the heaven pervaded by the night-rangers, huge as mountain peaks, having brown and bristling hairs over head, with sinewy legs, and with broad tawny eyes, as if by so many clouds of the rainy season.

Q. Show the fitness of the simile. Ans. अब्दैः (मेघैः) इति उपमानपदेन राक्षसानां बृहदाकृतिरवगम्यते। प्रावृषेण्यैरिति विशेषणेन च, वर्षाभवमेघवत् तेषां कृष्णवर्णत्वम्, तडित्प्रकाशैः इव पिङ्गलचक्षुषां दीप्तिमत्त्वं च द्योतितम्। Q. In what sense is च used here? Ans. पादपूरणार्थे 'च'कारः। अथवा यातुधानैः चिचिते, तैः अपाटैः आनशे च। इति 'च'कारस्य समुच्चयार्थः। Q. Is the word बाल used redundantly? Ans. शिरस्यपदेनैव बालः गम्यते, तथापि बाल-शब्दप्रयोगात् शिरस्येति पदस्य शिरःस्थितद्रव्यान्तरबोधः निरस्तः। Q. Expound the samas in अब्द। Decline the base of अप्। Name some other words of the feminine gender that are used only in the plural. Correct or justify the following sentence. 'आपो गृहाण'। Ans. अपः ददति ये ते अब्दाः, 'अप्' इत्यस्मात् दा-धातोः कः। उपपदसमासः। Declension—आपः अपः अद्भिः अद्भ्यः &c. Other words of plural number only—"अप् सुमनस् समा सिकता वर्षाणाम् बहुत्वञ्च।" Justification—आपः गृहाण इत्यत्र आपस् इति असन्नामान्तपयस् शब्दवत्। "सर्व्वमापोमयं जगत्" इति चण्डी। "आपोभिर्मार्जनं कृत्वा।" स्मृतिः। २०।

तान् लक्ष्मणः सन्नतवामजङ्घो

जघान शुद्धेषुरमन्दकर्षी ॥ ३१ ॥

31. Principal part :—लक्ष्मणः तान् जघान। All the rest are adjectives to लक्ष्मणः।

Prose order :—अधिज्यचापः स्थिरबाहुमुष्टिः उदञ्चिताक्षः अञ्चितदक्षिणोरुः सन्नतवामजङ्घः शुद्धेषुः अमन्दकर्षी लक्ष्मणः तान् जघान।

Substance.—अथ दृढमुष्टिर्लक्ष्मणः धनुषि ज्याम् समारोप्य ऊर्द्ध्वमुखः सन्, वामजङ्घां सन्नमय्य दक्षिणोरुम् आकुञ्च्य, प्रत्यालीढाख्ये अवस्थानभेदे अवस्थितः धनुरत्यर्थमाकृष्य शाणितास्त्रैः राक्षसान् जघान इति।

Explanation in tika form :—अध्यारूढा उत्कलिता ज्या गुणो यत्र स अधिज्यः, [प्रादि बहुव्रीहिः, "मौर्वी ज्या शिञ्जिनी गुणः" इत्यमरः।] तथाभूतः चापो धनुर्यस्य तथोक्तः। पुनः, स्थिरः निश्चलः दृढो वा बाहुमुष्टिर्यस्य सः, एतेन तस्य दृढहस्तस्य शरः लक्ष्यभ्रष्टो नाभूत् इति गम्यते। तथा उदञ्चिते ऊर्द्ध्वमुत्क्षिप्ते अक्षिणी येन स उदञ्चिताक्षः आकाशस्थापितदृष्टिः। ["बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति समासान्तषच्।] तथा अञ्चितः आकुञ्चितः दक्षिणोरुः येन तथोक्तः। सन्नता सम्यक् नता वामजङ्घा यस्येति तथाभूतः। शुद्धाः दीप्ताः इषवो बाणा यस्य स शुद्धेषुः दीप्तसायकः। अमन्दम् अत्यन्तं यथा स्यात् तथा कर्ष्टुं शीलमस्यासौ अमन्दकर्षी कर्णान्ताकृष्टचाप इत्यर्थः। [ताच्छील्ये णिनिः। उपपदसमासः।] लक्ष्मणः तान् राक्षसान् जघान निहतवान्। [वृत्त-मुपजातिः।]

Change of V.—अधिज्यचापेन स्थिरबाहुमुष्टिना उदञ्चिताक्षेण अञ्चितदक्षिणोरुणा ते लक्ष्मणेन सन्नतवामजङ्घेन जघ्निरे शुद्धेषुणा अमन्दकर्षिणा।

Derivations :—अञ्चित—अञ्च-कर्मणि क्तः। लट् अञ्चति। लुङ् आञ्चीत्। ज्या—ज्या-अच्। जिनाति लट्, अज्यासीत् लुङ्। जङ्घा—See 30. स्थिर—स्था-किरच्। बाहु—बाध्-कु।

যাহার বাহুমুষ্টি দৃঢ়, বাণ শাণিত ও ধনুক ক্ষিপ্রাকৃষ্ট, সেই

লক্ষ্মণ ধনুকে জ্যা আরোপণ করিয়া দক্ষিণ উরু সঙ্কুচিত ও বাম জঙ্ঘা অগ্রে নমিত করিয়া ঊর্দ্ধদৃষ্টি হইয়া রাক্ষসদিগকে নিহত করিলেন।

Lakshmana, who was not a "dull drawer of his bow," with his sharp weapons and the fist of his arm fixed, 'drawing in' his right thigh, and bending his left leg forward, having his bow-string stretched and his eyes directed upward killed the demons.

Q. Expound the samas in অধিজ্যচাপ:। Ans. অধিরূঢ়া জ্যা যত্র স: অধিজ্য:, প্রাদি বহুব্রীহি:। অথবা অধিগত: জ্যাম্ অধিজ্য: "অত্যাদয়: ক্রান্তাদ্যর্থে দ্বিতীয়য়া" ইতি দ্বিতীয়া সমাস:। তত: অধিজ্য: চাপ: যস্য স:, বহুব্রীহি:। Q. What kind of posture of an archer do the epithets indicate? Ans. অত্র প্রত্যালীঢ়াখ্যং ধন্বিন: স্থানমুক্তম্। তদত্র যাদব:, "স্থানানি ধন্বিনাং পঞ্চ তত্র বৈশাখমস্ত্রিয়াম্। ত্রিবিতস্ত্যন্তরৌ পাদৌ মণ্ডলং তোরণাকৃতি। অন্বর্থং স্যাৎ সমপদম্ আলীঢ়ন্তু ততোঽগ্রত:। দক্ষিণে বামমাকুঞ্চ্য প্রত্যালীঢ়ং বিপর্য্যয়:।" Q. Show the significance of স্থিরবাহুমুষ্টি:। Ans. [redacted]. Q. Comment on the fitness of শুদ্ধেষু: and অমন্দকর্ষী। Ans. শোধিতবাণত্বাৎ, ধনুষ: ক্ষিপ্রাকর্ষণাচ্চ কার্য্যসিদ্ধির্গম্যতে। শুদ্ধেষু: অমন্দকর্ষী চ ইতি পদদ্বয়স্য হননং প্রতি হেতুত্বেন উপন্যাসাৎ পদার্থহেতুকং কাব্যলিঙ্গমলঙ্কার:। Q. Give the etymology and the feminine form with its meaning, of লক্ষ্মণ। Ans. লক্ষ্মী: বিদ্যতে অস্য অসৌ লক্ষ্মণ:। পামাদিপাঠাৎ ন:। Feminine—লক্ষ্মণা। লক্ষ্মণা সারসপ্রিয়া। Q. Write notes on বাহু। Ans. বাধ্ ধাতো: কু:। "বাহু: স্ত্রীপুংসয়ো: ভুজ" ইত্যমর:। বাহ: ইতি ভুজবাচক: অকারান্তোঽপি অস্তি, "বাহোঽশ্বভুজয়ো: পুমান্" ইতি দামোদর:। আকারান্তোঽপি অস্তি, তথাহি, "বাহুর্বাহা ভুজাভুজ:"। 'সুবাহা' ইতি বাসবদত্তায়াম্। ২২।



गाधेयदिष्टं विरसं रसन्तं
रामोऽपि मायाचणमस्त्रचुञ्चुः ।
ख्यातं रणे स्मेरमुखो जगाद
मारीचमुच्चैर्वचनं महार्थम् ॥ ३२ ॥

32. Principal part :—रामोऽपि मारीचं वचनं जगाद । Adj. to मारीचम्—गाधेयदिष्टम्, रसन्तम्, मायाचणम्, ख्यातम् । Adj. to रामः—अस्त्रचुञ्चुः, स्मेरमुखः । Adj. to वचनम्—महार्थम् । विरसम्—Adverb to रसन्तम् । रणे—आधारे सप्तमी । 'ख्यातम्' इत्यनेन अन्वयः ।

Prose order—अस्त्रचुञ्चुः स्मेरमुखः रामोऽपि गाधेयदिष्टं विरसं रसन्तं मायाचणं रणे ख्यातं मारीचं उच्चैः महार्थं वचनं जगाद ।

Substance :—अस्त्रनिपुणो रामः गाधितनयकथितं, कठोरं नदन्तं मायाविनम्, संग्रामे ख्यातिशीलम् मारीचम् उवाच ।

Explanation in tika form :—इदानीं चुञ्चुप् चणपौ: प्रयोगं प्रदर्शयन्नाह, गाधेयेति । अस्त्रैः प्रतीतः (ख्यातः) अस्त्रचुञ्चुः ["तेन वित्तश्चुञ्चुप् चणपौ"* इति चुञ्चुप् ।] स्मेरं ईषद्धसनशीलं मुखं यस्य तथोक्तः, चित्तस्याविक्षेपात् ईषद्धसनशील इत्यर्थः । रामः गाधेरपत्यं गाधेयः विश्वामित्रः ["इतश्चानिञः"† इति ढक् ।] तेन दिष्टं कथितं, मायया गूढदेहत्वात् अविद्यया प्रदर्शितमित्यर्थः । विरसं कठोरं यथा स्यात् तथा रसन्तं शब्दायमानं [रस्‌धातोः शतृप्रत्ययः] मायया ख्यातं मायाचणं मायया दृष्टिं परिहाय स्थितमित्यर्थः ["तेन वित्तश्चुञ्चुप् चणपौ" इति चणप् ।] रणे युद्धे ख्यातं ख्यातिशीलं, तस्य सेनापतित्वात्, मारीचं नाम राक्षसम् उच्चैः महार्थं सारगर्भं वचनं जगाद उक्तवान् ।

---

* तेन इति तृतीयासमर्थात् वित्त इत्येतस्मिन् अर्थे चुञ्चुप् चणप् इत्येतौ प्रत्ययौ भवतः । वित्तः प्रतीतः (ख्यातः) ज्ञातः ।

† इकारान्तात् प्रातिपदिकात् अनिञन्तात् अपत्ये ढक्प्रत्ययो भवति । ढकारात् एयः । तथाहि, "आयन् एय् ईन् ईय् इयः फढखछघां प्रत्ययादीनाम् ।"

'प्रविख्यातीतयशाः' प्रवीत्यर्थग्रहणात् विकर्मकत्वम्। विलासाख्यो गुणश्च कथितः। "विलासो हर्षितं वचः", इति दर्पणकारः। छेकानुप्रासालङ्कारः। वृत्तम् इन्द्रवज्रा।* लक्षणं यथा—"स्यादिन्द्रवज्रा यदि तौ जगौ गः।"

Change of V.—गाधेयदिष्टः, विरसं रसन् रामेण मायाचणः अस्त्रबुभुना स्थाणुः खेरमुखेन जगादे मारीचः वचनम्।

Derivation :—गाधेय—गाधि-ढक्। दिष्ट—दिश-क्तः। लट् दिशति। अदिशत् अदिशत लुङ्। रसन्—रस-शतृ द्वितीया। मायाचणं—माया-चणप्। अस्त्रबुभु—अस्त्र-बुभुप्। स्थाणु—स्था-णुः। खेर—स्मि-र। जगाद—गद-लिट् अ। लट् गदति। लुङ् अगादीत् अगदीत्।

অস্ত্র-বিদ্যায় সুপণ্ডিত রামচন্দ্রও বিশ্বামিত্র-প্রদর্শিত, কঠোরভাবে নিনাদকারী, যুদ্ধে স্থিতিশীল, মায়াবী মারীচকে সহাস বদনে উচ্চৈঃ-স্বরে সারযুক্তবাক্য বলিলেন।

'Rama who acquired fame in using weapons, with smiling face addressed loudly the significant speech to Maricha immovable in the field, and cleverly deceitful and who roared piercingly, and was spoken of by Viswamitra the son of Gadhi.

[In English explanation add the following to the last :—"The two epithets अस्त्रबुभु and खेरमुख show, that Rama was not at all frightened for all the tricks on the part of the demon, who was मायाचणः।]

Q. Show the significance of खेरमुखः। Ans. अनेन तस्य विपक्ष अचोभत्व' द्योतितम्। Q. Derive खेरः। Ans. "नमि कम्पि स्मि अजस कम हिंस दीपो रः" इति स्मिधातोः रः। Q. Parse उच्चैः। Ans. उच्चैः इति पदं 'जगाद' इति क्रियायाः विशेषणम्। Q. If the voice be a passive one, which of the two objects should take the first case ending? Show your reason. Ans. "गौणे कर्मणि दुह्यादेः" इति दुह्यादीनां कर्मणि वाच्ये

आत्मम्भरिस्त्वं पिशितैर्नराणाम्
फलेग्रहीन् हंसि वनस्पतीनाम्।
शौवस्तिकत्वं विभवा न येषां
व्रजन्ति, तेषां दयसे न कस्मात्॥ ३३॥

गौणे कर्मणि प्रथमाविधानात्, ब्रुवार्थगदधातोश्च दुह्यादिमध्ये परिगणनात्, मारीचः इत्यत्र गौणे कर्मणि प्रथमा ; वचनमित्यत्र च मुख्ये कर्मणि द्वितीया। Q. Is there any fault in metre, in वाचं रणे घोरमुखो जगाद? Ans. अत्र इन्द्रवज्रा वृत्तम्। 'जगाद' इति पादशेषे 'द' इत्यत्र ह्रस्वत्वेऽपि "तथा पदान्तगोऽपि वा" इति ह्रस्वस्य वैकल्पिकेन दीर्घनियमात्, दीर्घत्वम्। अतः अत्र वृत्तसम्बन्धी न कश्चित् दोषः। Q. Explain the application of अपि। Ans. "गर्हा समुच्चय प्रश्न शङ्का सम्भावनास्वपि" इति अमरवचनात् अत्र अपिशब्दः समुच्चयार्थे प्रयुक्तः। तथाहि 'यदा लक्ष्मणः हन्तुं प्रवृत्तः तदा रामस्य राक्षसान् व्यापादयितुम् उद्यतः।' इति। ३२।

33. It consists of a principal sentence and then a compound sentence as below. (1) The principal sentence—त्वं वनस्पतीनां फलेग्रहीन् हंसि। Adjunct to त्वम्—नराणां पिशितैः आत्मम्भरिः। (2) The compound sentence that consists of two simple sentences, viz. (*a*) येषां विभवाः शौवस्तिकत्वं न व्रजन्ति ; (*b*) तेषां कस्मात् न दयसे।

Prose order :—नराणां पिशितैः आत्मम्भरिः त्वं वनस्पतीनां फलेग्रहीन् हंसि। येषां विभवाः शौवस्तिकत्वं न व्रजन्ति तेषां कस्मात् न दयसे।

Substance :—नरमांसैन स्वदेहं परिपोषयन् त्वं कथं वृक्षाणां फलभोजिनः ऋषीन् निपातयसि? ये च परदिवसार्थमपि न सञ्चयिनः कथं तान् प्रति न तव दया इति।

Explanation in tika form :—नराणां मनुष्याणां पिशितैः मांसैः ["पिशितं तरसं मांसम्" इत्यमरः।] आत्मानं बिभर्ति पुष्णाति इति आत्मम्भरिः

स्वोदरपूरक: ["उभौ त्वात्मम्भरि: कुक्षिम्भरि: स्वोदरपूरके" इत्यमर:।] "फले-ग्रहिरात्मम्भरिश्च" * इति निपातनात् सिद्धम्। एवम्भूत: त्वं वनस्पतीनां वृक्षाणां "वनस्पतिर्व्वृक्षमात्रे विना पुष्पं फलिद्रुमे" इति मेदिनी। फलानि गृह्णन्ति, तन्मात्रभोजित्वेन स्वीकुर्व्वन्तीति फलेग्रहय: फलमात्राहारिणो मुनय: तान् हंसि मारयसि। येषां मुनीनां विभवा: सम्पद: श्वो भवितार: श्वौवस्तिका: "श्वस-स्तुट् च" इति ठञ् तुडागमश्च। तेषां भाव: श्वौवस्तिकत्वं भाविदिनस्थायित्वं न व्रजन्ति तेषां अत्यल्पसञ्चयवतां अ-परदिनसञ्चितधनानामिति यावत्। "अधी-गर्थदयेशां कर्म्मणि" † इति कर्म्मणि षष्ठी। तस्मात् न दयसे अनुकम्पसे। इत्युपजाति:।

Change of V.—आत्मम्भरिणा त्वया फलेग्रहय: हन्यन्ते ...... ।...... विभवै:......व्रज्यते......दय्यते।

Derivation :—आत्मम्भरि—आत्मन्-भृ-इन् निपातनात्। पिशित—पिश-क्त (पिशति, अपेशीत्)। फलेग्रहीन्—फल-ग्रह-इन् (निपात:). द्वितीया-बहुवचनम्। हंसि—हन-लट् सि। लट् घ्नन्ति। लुङ् अवधीत्। लिट् जघान। श्वौवस्तिकत्वम्—श्व:-ठञ्-त्व। व्रजन्ति—व्रज-लट् अन्ति। लुङ् अव्राजीत्। दयसे—दय-लट् से। लुङ् अदयिष्ट। लिट् दयाञ्चक्रे &c.

নরমাংসে তোর উদরপূর্ত্তি (হইবে তাই তুই) বনফলভোজী-দিগকে হনন করিস্; কালিকার সম্বল যাহাদের ঘরে নাই তেমন নিঃস্বের উপরেও তোর দয়া হয় না?

---

* फलेग्रहि: आत्मम्भरि: इत्येतौ शब्दौ निपात्येते। फले इति उपपदस्य एकारान्तत्वम्, इन्प्रत्ययश्च ग्रहे:, निपात्यते। तथा, आत्मशब्दस्य उपपदस्य मुमागम:, भृञश्च इन्प्रत्यय: निपात्यते। अत: फलेग्रहि:, आत्मम्भरि:। चकारात् कुक्षिम्भरि:, उदरम्भरि:। "आत्मोदरकुक्षिषु" इति चान्द्रा:। "ज्योत्स्नाकरम्भ-मुदरम्भरयश्चकोरा:।" इति मुरारि:।

† अधीगर्था: स्मरणार्था:, दय दानगतिरक्षणेषु, ईश ऐश्वर्य्ये, एतेषां कर्म्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्ति: भवति। यथा मातु: अध्येति, मातु: स्मरति. सर्पिष: दयते. ईष्टे। शेष: इति किम्? मातरं स्मरति।

अत्सो द्विजान् देवयजीन् निहन्तः
कुर्वन् पुरं प्रेतनराधिवासम्।
धर्मो ह्ययं दाशरथे निजो नो
नैवाध्यकारिष्महि वेदवृत्ते ॥ ३४ ॥

A glutton greedy of human flesh, thou killest those who live upon fruits of wild trees. Hast thou no pity for those (helpless creatures) whose to-day's earnings do not last tomorrow?

Q. Quote from memory the sloka which can be cited as an example of the सूत्र "फलेग्रहिरात्मम्भरिश्च", and explain the aphorism. Ans. For expl. see the foot note. Q. Account for the 6th case in तेषां। Ans. सम्बन्ध-विवक्षायां "अधीगर्थदयेशां कर्मणि" इति कर्मणि षष्ठी। सम्बन्धविवक्षाभावे, 'तान् दयसे' इत्येवं स्यात्। Q. Show the significance of वनस्पती-नाम्। Ans. "तैरपुष्पात् वनस्पतिः" इति वचनबलेन प्रायशः अश्वत्थोडुम्बरादि-वृक्षाः गम्यन्ते। तेषां फलं न स्वादु, अतः तत्फलमात्रभोजिषु अन्येषां न कापि विद्वेषबुद्धिर्भवितुम् अर्हति, तत् कथं तव इति भावः। अथवा "वनस्पतिर्ना द्रुमात्रे" इति मेदिनीवचनात् द्रुममात्रावगमनात्, द्रुमफलेन नतु प्राणिहिंसया ये जीवन्ति तान् कथं हिनस्सि इति-भावः। Q. Explain clearly श्वोवस्तिकत्वम् विभवा न येषां भवन्ति। Ans. हिंसायां हिंसाचरणात् तेषु क्रोधः जायते, क्रोधाच्च ते विनश्यन्ति। धनिनश्च धनैर्धनाशया हन्यन्ते। ऋषयस्तु न हिंसापरा न च धनिनः, यतः तेषां विभवाः न तादृशाः यथा परदिनेऽपि व्ययार्हाः इति। ३३।

34. It consists of 5 simple sentences as below.

Prose order :—(1) द्विजान् अत्सः (2) देवयजीन् निहन्तः (3) पुरं प्रेतनराधिवासं कुर्वन्। (4) दाशरथे अयं हि नः निजो धर्मः। (5) वेदवृत्ते नैव अध्यकारिष्महि।

Substance :—वयं नाम ब्राह्मणादीन् भक्षयामः। देवान् ये ये पूजयन्ति तान् वयं घातयामः। नगरादिकं मृतजनैः अध्युषितं कुर्मः। भो दशरथ-तनय! अयमेवास्माकम् निजो धर्मः, न वयं विधात्रा वेदविहिते कर्मणि अधि-कृताः।

Explanation in tika form :—पूर्व्वापरपरामर्शात् मारीच-प्रभृत्युक्त-मिदम्। द्विजान् ब्राह्मणक्षत्रियवैश्यान् अद्मः भक्षयामः वयमिति शेषः। तथा देवान् यजन्ति आराधयन्तीति देवयजयः देवपूजकाः, "अचः इः" इति यजधातोः इः। तान् निहन्मः [कर्म्मणि द्वितीया], तथा, पुरं नगरं प्रेतनराणां मृतमनुष्याणां अधिवासम् अवस्थानं कुर्मः नित्यहननेन श्मशानतुल्यमित्यर्थः। कस्मादेवमित्याह धर्म्म इति। दशरथस्यापत्यं दाशरथिः "अत इञ्" इति इञ्। हे दाशरथे, हि यस्मात् अयमेव नोऽस्माकं निजः नित्यः "स्वके नित्ये निजं त्रिषु" इत्यमरः। धर्म्मः स्वभावः आचारो वा "धर्म्माः पुण्य यम न्याय स्वभावाचार सोमपाः" इत्यमरः। अयं वेदविरुद्ध इति चेत् तत्राह नैवेति। वेदविहितं वृत्तम् वेदवृत्तम् वेदविहितकर्म्म, [मध्यपदलोपी समासः।] तत्र नैव अध्यकारिष्महि वयं नैवाधिकृताः विधात्रा इत्यर्थः। अधिकृञः कर्म्मणि लुङ्। यद्ब्राह्मणानां उक्तमनुष्ठानं तत्र वयं नैवाधि-कृता इत्यर्थः। इन्द्रवज्रा वृत्तम्। "स्यादिन्द्रवज्रा यदि तौ जगौ गः।" इति लक्षणम्।

Change of V.—अद्यन्ते द्विजाः (अस्माभिः) देवयजयः निहन्यन्ते क्रियते पुरम्...। धर्म्मेण अनेन निजेन (भूयते)। अध्यकार्षीत् (अस्मान् विधाता।

Derivation :—अद्मः—अद्-लट् मः। अघसत् लुङ्। जघास आ-लिट्। द्विज—द्वि-जन ड। अजनि अजनिष्ट लुङ्। देवयजि—देव-यज-इ। यजति यजते लट्। अयाक्षीत् अयष्ट लुङ्। हन् लुङि, अवधीत्। निज—नि-जन-ड। वेदः—विद्-घञ्, अच् वा। धर्म्मः—धृ-मन्। अध्यकारिष्महि—अधि-कृ, passive aorist, first person plural number, अध्यकार्षीत् लुङि कर्त्तरि।

আমরা দ্বিজগণকে ভক্ষণ করি, দেবযজ্ঞকারীদিগকে নিহত করি,

নগর মৃত মানবের আবাস স্থান করি। হে দাশরথে! এই আমাদের নিত্য ধর্ম্ম। বিধাতা আমাদিগকে বেদবৃত্তে অধিকার দেন নাই।

We eat up the twice-born, kill the worshippers of gods, render the town as an abode of the dead. This is, O son of Dasaratha! our perpetual practice. We are not intended to be entitled to the Vedic practices.

Q. Comment on द्विजान्। Ans. "जासि निप्रहण नाट क्राथ पिषां हिंसायाम्"* इति निहन्तेः कर्म्मणि शेषविवक्षायां षष्ठीविधानात्, अत्र च शेषस्य अविवक्षितत्वात् कर्म्मणि द्वितीया। द्विजान् इति पदेन ब्राह्मण-क्षत्रियवैश्याः उपलक्षिताः। "जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते।" Q. Give the meaning of द्विज here. Ans. See above. Q. In the previous sloka Rama asked only Maricha, why 'he' singly had killed the Brahmans, to which he replied वयं निहन्मः &c. Is the plural form 'वयम्' faulty? Ans. वयमिति बहुमर्थे प्रयुक्तम्। "अस्मदो द्वयोश्च" इति एकत्वे द्वित्वे वा अस्मद् शब्दः बहुवचनेषु प्रयुज्यते। अथवा पूर्व-श्लोके 'त्वम्' इति बहुवचनेषु उपलक्षितम्। तदपेक्षया यूयमिति गम्यते। Q. Parse वयम् and धर्म्मः। Ans. वयम्, 'भवति' इति कर्तृक्रियापदस्य कर्तृपदम्। धर्म्मः "वयम्" इत्यस्य विधेयविशेषणम्। ३४।

---

* जासि निप्रहण नाट क्राथ पिष इत्येतेषां हिंसार्थानां धातूनां शेषे (सम्बन्धविवक्षायाम्) कर्म्मणि षष्ठी स्यात्। चौरस्य उज्जासयति, चौरस्य निहन्ति। See the next sloka 35. "ब्रह्मद्विषस्ते प्रणिहन्मि।" निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा। (The prefixes नि and प्र before हन् might be taken singly, or conjointly or reversedly as निहन्ति, प्रहन्ति, प्रणिहन्ति and निप्रहन्ति।

धर्मोऽस्ति सत्यं तव राक्षसाय-
मन्यो व्यतिस्ते तु ममापि धर्मः।
ब्रह्मद्विषस्ते प्रणिहन्मि येन
राजन्यवृत्तिर्धृतकार्मुकेषुः॥ ३५॥

35. It consists of 4 simple sentences as below.

Prose order :—(1) राक्षस तव अयं धर्मः अस्ति सत्यं। (2) ममापि तु अन्यः धर्मः व्यतिस्ते। (3) येन ब्रह्मद्विषः ते प्रणिहन्मि (4) धृतकार्मुकेषुः राजन्यवृत्तिः (भवति)।

Substance :—भो राक्षस यदि ते अयं धर्मः ममापि तावत् अन्यः धर्मः। अनेनैव धर्मेण वेदद्वेषिणं त्वां व्यापादयामि। क्षत्रियाणाम् आचारोऽयं यत् तैः धनुर्बाणाः हिंसकहननार्थं धारयितव्या इति।

Explanation in tika form :—रामः प्राह भोः राक्षस! [रक्ष एव राक्षसः प्रज्ञादित्वादण्] तव अयं पूर्व्वोक्तः पराभिद्रोहलक्षणः धर्मः आचारः अस्तीति सत्यम्। तु किन्तु ममापि रामस्य अन्यो धर्मः अनिष्टनिग्रहलक्षणः व्यतिस्ते व्यतिभवति। "कर्त्तरि कर्म्मव्यतिहारे"* इति अस्धातोः आत्मनेपदम्। यथा तव हिंसारूपो धर्मोऽस्ति, तथा ममापि हिंसकहिंसाकारित्वरूपो धर्मोऽस्ति इत्यर्थः। तं धर्मं प्रकाशयति। येन धर्म्मेण हेतुना ब्रह्म वेदान् द्वेष्टीति तस्य ब्रह्मद्विषः वेदविघ्नकारस्य "वेदस्तत्त्वं तपो ब्रह्म" इत्यमरः। ते तव "जासि-निप्रहण-नाट क्राथ-पिषां हिंसायाम्" इति शेषविवक्षायां कर्मणि षष्ठी, निहन्मि मारयामि। कुतस्तेऽयं धर्मः इत्याह, यतः धृतं गृहीतं कार्म्मुकम् इषुश्च यत्र यथाभूता राजन्यानां क्षत्रियाणां वृत्तिः आचारः भवतीति शेषः। क्षत्रियाणां धनुर्बाणधारित्वं हिंस-नाशार्थमेव इत्यर्थः। अथवा राजन्यवृत्तिरहं धृतं कार्म्मुकम् इषवश्च येन तथोक्तः।

---

* कर्म्मव्यतिहारे क्रियाविनिमये द्योत्ये, कर्त्तरि वाच्ये आत्मनेपदं स्यात्। अत्र क्रियाविनिमयः परस्परम् एकरूपेण स्थितिः। अर्थात् यथा तव अस्ति तथा ममापि अस्ति इत्यर्थः। व्यतिस्ते इत्यत्र वि-अति इति उपसर्गद्वयम् व्यतिहारार्थे अर्थात् विनिमयार्थे प्रयुक्तम्।

यतोऽहं क्षत्रियवृत्तिः ततोऽहं धृतकार्म्मुक इत्यर्थः। राज्ञोऽपत्यमिति "राजश्वशुराद्यत्" इति यत्। "राज्ञो जाताविव" इति वचनात् अत्र राज्ञोऽपत्यमिति जातिग्रहणं कर्त्तव्यम्। "धृतकार्म्मुकेषु इति च पाठान्तरम्। क्व राजन्यवृत्तिः, सायुधेषु, हिंसारतेषु इत्यर्थः। वृत्तमिन्द्रवज्रा। तथा "पादान्तगोऽपि वा" इति पादशेषे ह्रस्वस्य दीर्घत्वम्।

Change of V.—धर्म्मेण भूयते अनेन। अन्येन व्यतिभूयते धर्म्मेण। प्रणिहन्यते। राजन्यवृत्त्या धृतकार्म्मुकेण्वा भूयते।

Derivation :—धर्म्मः—धृ-मनिन्। राक्षसः—रक्षः-अण्। व्यतिस्मे—वि-अति-अस्-लट् ते। लट् असि, स्थः, सन्ति। लुङ् अभूत्। ब्रह्मद्विषः—ब्रह्म-द्विष् क्विप्, षष्ठी। राजन्य—राजन्-यत्।

রে রাক্ষস, তোর (শিষ্ট নিগ্রহ) এই ধর্ম্ম বটে, তবে আমারও (অশিষ্ট নিগ্রহরূপ) অন্য ধর্ম্ম আছে। তুই বেদদ্বেষ্টা, তোকে সেই ধর্ম্মানুসারে আমি নিপাত করিতেছি। আমি ক্ষত্রিয়ের আচার অনুযায়ী হইয়া ধনুর্ব্বাণ ধারণ করিয়াছি।

Thou demon, such is truly thy duty. There exists another duty too which is mine and by virtue of which I kill thee the enemy to the Vedas. I am in the position of one of the military class and thus I hold bows and arrows.

Q. Account for the base of यद् without तद् being previously used. Ans. यद्-शब्दस्तु उत्तरवाक्यानुगतत्वेन उपात्तः, सामर्थ्यात् पूर्व्ववाक्यानुगतस्य तच्छब्दस्य उपादानं नापेक्षते। (The base यद् used in the following sentence does not, owing to its own expressive power, demand the use of तद् in the previous one.) Q. Account for the masculine gender in राक्षसः। Ans. रक्षः एव राक्षसः। स्वार्थे अण्। रक्षः इत्यस्य क्लीवत्वम्, स्वार्थे अणि कृते कथं पुंस्त्वम् इत्यतः आह "स्वार्थिका प्रकृतितो लिङ्गवचनानि अतिवर्त्तन्ते" इति। Q. Account for आत्मनेपद in व्यतिस्मे and

इत्थं प्रवादं युधि संप्रहारं
प्रचक्रतू रामनिशाविहारौ।
तृणाय मत्वा रघुनन्दनोऽथ
बाणेन रक्षः प्रधनान्निरास्थत् ॥ ३६ ॥

conjugate it fully in लट्। Ans. See above. Conjugate—व्यतिसे व्यतिषाते व्यतिषते, व्यतिषे व्यतिषाथे व्यतिध्वे व्यतिहे व्यतिष्वहे व्यतिष्महे। Q. Parse धृतकार्म्मुकेषुः। Ans. राजन्यवृत्तिरित्यस्य विशेषणम्। अतः स्त्रियां प्रथमैकवचनरूपम्। अथवा अहम् इत्यस्य विशेषणं तथात्वे पुंसि प्रथमैकवचने। Q. Explain the other reading धृतकार्म्मुकेषु। Ans. धृतकार्म्मुकेषु धृतशास्त्रेषु, हननार्थम् उद्यतेषु इत्यर्थः, राजन्यानाम् वृत्तिः क्षत्रियाणाम् आचारः, मारणक्रियारूपः भवति इत्यर्थः। ३५।

36. It consists of two sentences, viz. :—(1) रामनिशाचरौ (कर्त्तृ) युधि इत्थं प्रवादं (कर्म्म) संप्रहारं च (कर्म्म) प्रचक्रतुः। (2) अथ रघुनन्दनः (कर्त्तृ) रक्षः (कर्म्म) तृणाय मत्वा, बाणेन (करण) प्रधनात् (अपादान) निरास्थत्।

Prose order :—रामनिशाविहारौ इत्थं प्रवादं (ततः) युधि संप्रहारं प्रचक्रतुः। अथ रघुनन्दनः रक्षः तृणाय मत्वा बाणेन प्रधनात् निरास्थत्।

Substance :—राममारीचौ इत्थं परस्परं कथयित्वा अन्योन्ययोः प्रहारं कर्तुं प्रक्रान्तौ। रामश्च राक्षसम् अवज्ञाय शरक्षेपेण संग्रामात् तम् निरस्तमकरोत्।

Explanation in tika form :—निशायां विहारो यस्येति निशाविहारः निशाचरः मारीच इत्यर्थः। रामश्च निशाविहारश्च तौ (कर्त्तारौ) इत्थं उक्तप्रकारं प्रवादं कथोपकथनं ततः युधि रणभूमौ संप्रहारं परस्पराभिभवलक्षणं युद्धं प्रचक्रतुः कृतवन्तौ। सम्यक् प्रहारो यस्मात् इति संप्रहारं प्रवादविशेषणमित्येके। यद्वा इत्थं प्रवादो यत्र संप्रहारे इति इत्थंप्रवादः इति समस्तपदं संप्रहारविशेषणञ्च। अथानन्तरं रघूणां नन्दयिता रघुनन्दनः रामः रक्षः राक्षसं

मारीचं रुषाय मत्वा तृणमपि मानस्य "मन्यकर्म्मण्यनादरे विभाषाऽप्राणिषु" इति चतुर्थी। बाणेन प्रधनात् संग्रामात् निरास्थत् अपनीतवान्। अस्यतेः लुङ्। इन्द्रवज्रोपजातिः।

Change of V.—इत्थं प्रवादः संप्रहारः प्रचक्रे रामनिशाविहाराभ्याम्। रघुनन्दनेन रक्षः......निरासि।

Derivation.—प्रवाद—प्र-वद भावे घञ्। प्रचक्रतुः—प्र-कृ-लिट् अतुस्। युध्—युध्-क्विप्। तृण—तृह्-क्नः। नन्दनः—नन्द-ल्यु। रक्षस्—रक्ष-असुन्। बाणः—बण-घञ्। प्रधनम्—प्र धा-क्यु।

রাম ও রাক্ষস এইরূপ বাদানুবাদ ও যুদ্ধে (পরস্পর) প্রহার করিলেন। অবশেষে রঘুনন্দন রাক্ষসকে তৃণজ্ঞান করিয়া বাণ দ্বারা তাহাকে সংগ্রাম হইতে নিরস্ত করিলেন।

Rama and the demon, the night ranger, made thus mutual defiance and struck each other. And then Rama the descendant of the Raghus attaching the value of a straw, drove him out of the field by means of an arrow.

Q. Explain the euphonic combination ('सन्धि') in [redacted]रामनिशाविहारी। Ans. [redacted]: रामनिशाविहारी। रकारे परे विसर्गजात-रकारलोपः पूर्व्वस्वरदीर्घश्च। Q. Show the significance of रघुनन्दनः। Ans. अनेन रघुवंशीयानाम् लोकातिशयेन रामचरितेन परमो हर्षः व्यज्यते। Q. Show the distinction in meaning between इत्थम् and इत्थं कारम्, and parse इत्थम्। Ans. एतयोर्मध्ये नास्ति कश्चिद् विशेषः। इत्थंकारम् इत्यत्र 'सिद्धाप्रयोगे' णमुल्, अतः इत्थम् इत्थङ्कारञ्च तुल्यार्थकम्। Parsing—अव्ययपदं, प्रवादमित्यस्य च विशेषणपदम्। Q. Account for the fourth case in तृणाय, and the second case in रक्षः। Ans. "मन्यकर्म्मणि अनादरे विभाषा अप्राणिषु" इति तिरस्कारे गम्यमाने मन्धातोः कर्म्मणि प्राणिवर्ज्जिते तृणे वैकल्पेन चतुर्थी विभक्तिः। पक्षे, 'तृणं

जग्मुः प्रसादं द्विजमानसानि
द्यौर्ववर्षुका पुष्पचयं बभूव।
निर्व्याजमिज्या ववृते वचश्च
भूयो बभाषे मुनिना कुमारः॥ ३७॥

मत्वा। 'रक्षः' इति पदं 'निराकृत्' इत्यस्य कर्मपदम्। रक्षः हन्तुं मत्वा इति अन्वये कृते, कथं 'रक्षः' इत्यत्र न चतुर्थी इत्यत आह, "अनभिहितविभाषा विधानादिह न भवति।" इति महावृत्तिः। केचित्तु, येन कर्मणा अवश्या प्रदर्श्यते तत्रैव चतुर्थी इति कथयन्ति। एतत् सुगमम्। Q. Parse हन्तुं। Ans. 'मत्वा' इत्यस्य कर्मपदम्। ३६।

37. It consists of 4 simple sentences as below.

Prose order :—(1) द्विजमानसानि (कर्तृ) प्रसादं जग्मुः। (2) द्यौः पुष्पचयं ववर्षुका बभूव। (3) निर्व्याजम् इज्या ववृते। (4) भूयः मुनिना कुमारः वचः बभाषे।

Substance :—ब्राह्मणानां चित्तानि सुप्रसन्नानि अभूवन्। स्वर्गात् पुष्पाणि निपेतुः। निर्विघ्नं यागः प्रावर्त्तत। ऋषिः पुनरपि राममुवाच।

Explanation in tika form :—यागविघ्नकारिषु निरस्तेषु द्विजानां याज्ञिकानां ब्राह्मणानां मानसानि प्रसादम् अव्याकुलत्वं जग्मुः गतानि। द्यौः स्वर्गः "द्यौः स्त्री स्वर्गे च गगने दिवं क्लीवं तयोः मतम्" इति मेदिनीकारः। पुष्पचयं ववर्षुका वर्षणशीला बभूव। एतेन देवानाम् आनन्दातिशयः व्यज्यते। न लोकेत्यादिना उकप्रयोगात् न कर्मणि षष्ठी। "लष पत पद स्था भू वृष हन कम गम शृभ्यः उकञ्" इति उकञ्प्रत्ययः। निर्व्याजं निर्विघ्नं यथा स्यात् तथा इज्या मुनीनां यज्ञः "व्रजयजोर्भावे क्यप्" इति क्यप्। ववृते निष्पन्ना। भूयः पुनरपि मुनिना विश्वामित्रेण कुमारः रामः अज्ञातदारकर्मत्वात्, "कुमारो बालके स्कन्दे युवराजेऽश्ववारके" इति विश्वः। वचः वक्ष्यमाणं बभाषे। कर्मणि लिट्। ब्रुवीत्यर्थकत्वात् भाषधातोः द्विकर्मकता। वचः कुमारश्च इति कर्मद्वयम्। इन्द्रवज्रा। पूर्ववत् पादशेषे ह्रस्वस्य दीर्घत्वम्।

Change of V.—जग्मे प्रसादः द्विजमानसैः। दिवा वर्षुकया...बभूवे। ...इज्यया ववृते......मुनिः कुमारम्।

Derivation.—जग्मुः—गम्-लिट् उस्। लुङ् अगमत्। मानस—मनस्-अण्। इज्या—यज-क्यप्। ववृते—वृत्-लिट् ए। लट् वर्त्तते। लुङ् अवर्त्तत्, अवर्तिष्ट। लृट् वर्त्स्यति ; वर्त्तिष्यते। बभाषे—भाष-लिट् ए। लुङ् अभाषिष्ट। कुमारः—कुमारयति क्रीडति इति कुमारः, कुमारधातोः अच्। दिव्—दीव्यन्ति अस्याम् इति दिव्धातोः क्विप्।

দ্বিজগণের চিত্ত প্রসন্নতা লাভ করিল। স্বর্গ পুষ্পনিচয় বর্ষণ করিতে লাগিল। যজ্ঞ নির্ব্বিঘ্নে চলিতে লাগিল। ইহাতে বিশ্বামিত্র ঋষি কুমারকে পুনর্ব্বার বলিতে লাগিলেন।

The minds of the twice born felt composure. The heaven showered down a large quantity of flowers. The sacrifice went on in regular course without interruption. The prince was again addressed a speech by the sage.

[In English explanation add—Peace prevailing both in the entertainer and the persons entertained the deed went on in its course smoothly.]

Q. Justify or impugn पुष्पचयस्य वर्षुका। Ans. "न लोकाव्ययनिष्ठाखलर्थतृनाम्" इति उकप्रत्ययान्तस्य कर्म्मणि षष्ठीप्रतिषेधात् न षष्ठी। Q. Account for the case ending in कुमारः and वचः। Ans. कुमारः इत्यत्र गौणे उक्ते कर्म्मणि प्रथमा। वचः इत्यत्र मुख्ये कर्म्मणि अनुक्ते द्वितीया। "गौणे कर्म्मणि दुह्यादेः, प्रधाने नी ह कृष् वहाम्।"* इति ब्रुवधातोः दुह्यादिपाठात् उक्ते गौणे कर्म्मणि (Indirect object) प्रथमा। मुख्ये च द्वितीया, तस्य अनुक्तत्वात्। Q. What do you understand by an उक्त कर्म्म and अनुक्त कर्म्म ; उक्त कर्त्ता and

---

* दुह्याच् पच् दण्ड् रुधि प्रच्छि चि ब्रू शासु जि मथ् मुषाम्।
कर्म्मयुक् स्यादकथितं तथा स्यान्नी हृ कृष् वहाम्॥

महीयमाना भवतातिमात्रं
सुराध्वरे घस्मरजित्वरेण ।
दिवोऽपि वज्रायुधभूषणाया
हृणीयते वीरवती न भूमिः ॥ ३८ ॥

अनुक्त कर्त्ता ? Ans. When a sentence is intended to describe something of an agent or an object, the agent or the object is said to be उक्त। रामः प्रासादं ददर्श । Here the sentence describes something of Rama, i.e. about his seeing the palace. But रामेण प्रासादः दृष्टः shows that the palace is described as being seen by Rama. Here then the object is उक्त। So the object प्रासादम् in the previous sentence अनुक्त, as the nominative in the latter is, viz. अनुक्त। Q. Show the significance of मुनिः here. Ans. "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥" इत्येवं ... सुखेषु विगतस्पृहत्वेऽपि आनन्दातिशयो व्यज्यते। Q. Give the meaning of निर्व्याजम्। Ans. निर्गतः व्याजः छलं यत्र तादृशम् यथा स्यात् तथा, निरपदेशम्, छलरहितमित्यर्थः। "व्याजोऽपदेशो लक्ष्यञ्च" इत्यमरः। ... समुपस्थिते रक्षांसि छलमाश्रित्य ... यज्ञान् सततं वञ्चयित्वा यागं निरर्थकं कुर्वन्ति। तत्तु इदानीं रामप्रभावेण न ... ततः निर्विघ्नमित्यर्थः। Cf. "यज्वभिः संभृतं हव्यं विततेष्वध्वरेषु ... । जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ।" कुमार। Q. Give the different meanings of कुमार। Ans. "कुमारी बालके स्कन्दे युवराजेऽश्ववारके ।" इति विश्वः । ३७ ।

38. Principal part :—भूमिः दिवोऽपि न हृणीयते। Adj. to the subject भूमि—महीयमाना and वीरवती। भवता—अनुक्तकर्तृ to महीयमाना। Adj. to दिवः—वज्रायुधभूषणायाः। Adj. to भवता—

घस्मरजित्वरेण। सुराध्वरे—अधिकरण। अतिमात्रम्—Adverb to महीय्यमाना।

Prose order :—सुराध्वरे घस्मरजित्वरेण भवता वीरवती (अतएव) महीय्यमाना भूमिः वज्रायुधभूषणायाः दिवोऽपि न हृणीयते।

Substance.—यागे समुपस्थिते तद्विघातकान् विनाश्य भवान् महीम् अत्यर्थमहनीयां कृतवान्। किमधिकं, इन्द्रेणाधिष्ठितं स्वर्गमिव त्वया पृथ्वीतलं शोभते।

Explanation in tika form :—अथ 'कण्ड्वादिभ्यो यक्,' तथा क्मरच् क्वरपोर्विशेषं प्रदर्शयितुमाह महीय्यं ति। सुराणां देवानां अध्वरे यज्ञे सुरानुद्दिश्य योऽध्वरः क्रियते तत्र घस्मराः बहुभक्षकाः राक्षसा इत्यर्थः। "भक्षको घस्मरोऽद्मरः" इत्यमरः "सृघस्यदः क्मरच्"* इति क्मरच्। तेषां जित्वरेण जयशीलेन "इण् नश् जि सर्त्तिभ्यः क्वरप्"† इति क्वरप्। भवता अतिमात्रम् अतिशयेन वीरवती प्रशस्तवीरान्विता अतएव महीय्यमाना पूज्यमाना कण्ड्वादित्वात् यक्। लोकैरिति शेषः। भवन्ति भूतानि अत्र इति भूमिः पृथिवी, आयुध्यतेऽनेनेति आयुधं, वज्रम् आयुधं यस्येति वज्रायुधः इन्द्रः, "वज्रोऽस्त्री ह्रादिनी पवी" इत्यमरः। स एव भूषणम् अलङ्कारो यस्याः तथाभूताया दिवः स्वर्गस्यापि, 'शेषे षष्ठी' इति षष्ठी। अथवा दिवः स्वर्गात् स्वर्गं वीक्ष्य इत्यर्थः "ल्यब्लोपे कर्मण्यधिकरणे च" इति पञ्चमी। न हृणीयते लज्जते किन्तु प्रतिस्पर्द्धते इत्यर्थः। इन्द्रो यथा दिवः परिपालकः तथा त्वं भूमेरिति भावः। हृणीङ् लज्जायाम् इति कण्ड्वादिपाठात् यक्। उपेन्द्रवज्रा वृत्तम्। पादशेषे ह्रस्वस्य च दीर्घत्वम्।

Change of V.—महीय्यमानया.....हृणीय्यते वीरवत्या भूम्या।

Derivation.—महीयमाना —(कण्ड्वादि-यक्) कर्मणि शानच्। घस्मर—घस-क्मरच्। जित्वर—जि-क्वरप्। हृणीयते—हृणी-लट् ते। लुङ् अहृणीयिष्ट। दिव्—दिव्-डिवि। वज्र—वज-रन्। आयुध—आ-युध् करणे घञर्थे क। भूमि—भू-मिक्।

* स्मरः, घस्मरः, अद्मरः।

† इत्वरः, नश्वरः, जित्वरः, सृत्वरः।

बलिर्बबन्धे जलधिर्ममन्थे
जह्रेऽमृतं दैत्यकुलं विजिग्ये।
कल्पान्तदुःस्था वसुधा तथोहे
येनैष भारोऽतिगुरुर्न तस्य॥ ३८॥

সুরযজ্ঞে তুমি সর্ব্বভক্ষক রাক্ষস নিধন করাতে তোমাদ্বারা পৃথিবীর অশেষ গৌরব হইল। বজ্রাস্ত্রধারী ইন্দ্র যে স্বর্গকে ভূষিত করিয়াছেন তাহারও নিকটে বীরধরিত্রী পৃথিবী নীচ বলিয়া লজ্জিত নহে।

Being an overthrower of the voracious demons thou hast amply honored the earth which as an abode of the brave is not ashamed before heaven that has been adorned by Indra with thunder for his weapon.

Q. Write gram. notes on महीयमाना and हृणीयते।

Ans. "कण्ड्वादिभ्यो यक्" इति सूत्रस्य एतदुदाहरणद्वयम्। हृणीङ् रोषणे लज्जायञ्च, महीङ् पूजायाम् इत्युभाभ्याम् कण्ड्वादित्वात् यक्। हृणीयते, महीयते।

Q. Show the significance of घस्मर and वज्रायुध। Ans. (1) घस्मर इति पदेन, यज्ञे देवेभ्यः प्रदत्तं सर्व्वमेव हविरादिकम् राक्षसाः आच्छिद्य गच्छन्ति नतु बहुशो गच्छन्तोऽपि तोषं व्रजन्ति इति ध्वनितम्। (2) वज्रायुधेति पदेन इन्द्रस्य महावीर्य्यम् प्रकटितम्, तेन च उपमानेन रामस्यापि प्रभूतं वीर्य्यम् गमितम्। Q. Parse भवता। Ans. (1) भवता महीयमाना पूजिता स्वर्गात् अवतरणेन अनुगृहीता इत्यादयर्थे, 'भवता' इत्यत्र अनुक्ते कर्त्तरि तृतीया। (2) भवता पृथ्वीस्थितेन अवतारविशेषेण महीयमाना लोकानां पूजार्हा इत्यादयर्थे "धान्येन धनवान्" इति वत् 'भवता' इत्यत्र तृतीया। ३८।

39. It is a compound sentence :—(1) येन (अनुक्त कर्त्तृ) बलिः (उक्त कर्म्म) बबन्धे ; (2) येन च जलधिः ममन्थे, (3) येन च

अमृतं जह्रे ; (4) येन च दैत्यकुलं विजिग्ये ; (5) येन च वसुधा ऊहे। Adj. to वसुधा—कल्पान्तदुःस्था। The other sentence—तस्य एष भारः न अतिगुरुः।

Prose order :—येन बलिः बबन्धे ; जलधिः ममन्थे, अमृतं जह्रे, दैत्यकुलं विजिग्ये, तथा कल्पान्तदुःस्था वसुधा ऊहे, तस्य एष भारः अतिगुरुः न।

Substance :—यः त्वं वामनावतारः सन् दैत्यपतिम् बलिम् सत्यपाशेन प्रबद्धमकरोः, यश्च त्वं समुद्रं देवासुरैः मथ्यमानं कृतवान्, यः पुनस्त्वम् मोहिनी-रूपमास्थाय असुरेभ्यः अमृतम् हृतवान् दैत्यकुलञ्च जितवान्, कल्पान्ते च जलमग्नां पृथ्वीं उद्धृतवान्, नैतत् कर्म्म तस्य दुःसाध्यमिति।

Explanation in tika form :—येन भवता अनुक्तेन कर्त्रा, बलिः तन्नामा असुरः, (उक्तं कर्म्म) बबन्धे बद्धः। बन्धधातोः कर्म्मणि लिट्। तथा, जलधिः समुद्रः ममन्थे मथितः। मन्थधातोः कर्म्मणि लिट्। अत्र किरातः—"देवासुरैरमृतमम्बुनिधिर्ममन्थे।" अपिच माघः—"शौरेव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना।" तथा अमृतम् असुरगृहीतमिति शेषः; जह्रे मोहिनीरूपमास्थाय असुरान् विमोह्य हृतम्। हृधातोः कर्म्मणि लिट्। तथा दैत्यकुलं दैत्यवंशः विजिग्ये विजितम्। अनेकधा इति शेषः। अथवा अमृतहरणरोषितान् असुरान् इत्यर्थः। जिधातोः कर्म्मणि लिट्। तथा कल्पान्ते प्रलयकाले दुःस्था जलप्लाविता वसुधा पृथिवी ऊहे उद्धृता। वह्धातोः कर्म्मणि लिट्। वराहरूपेणेति शेषः। तस्य एष भारः भुविजनरक्षणरूपः अतिगुरुः महान् दुष्कर इत्यर्थः, न भवतीति शेषः। समासेन वा अभिहितत्वात् भार इत्यत्र अभिधेये प्रथमा इति केचित्। काव्यलिङ्गमलङ्कारः। लक्षणं यथा, "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्।" दीपकालङ्कारश्च। लक्षणं यथा, "अथ कारकमेकं स्यात् अनेकासु क्रियासु च।" वृत्तमुपजातिः। 'तस्य' इति पादशेषे दीर्घत्वम्। "तथा पादान्तगोऽपि वा।"

Allusions :—"बलिर्बबन्धे"—देवैर्याचितो विष्णुः वामनरूपेण अवतीर्य सुरविजेतारं दैत्येन्द्रं बलिमासाद्य त्रिपादभूमिमयाचत। भूमिदानात् परं स विश्वव्यापिनीं मूर्त्तिमास्थाय पादद्वयेन पृथ्वीं दिवञ्च आक्रम्यामकरोत् तृतीयपादञ्च

बलिशिरसि निधाय तं पातालं निनाय इति पौराणिकी वार्त्ता । "जलधिः ममन्थे" —राज्ञो वेणात् सम्भूतेन पृथुनाम्ना केनचित् विष्णोरवतारेण उपदिष्टाः देवाः इन्द्रं वत्सं परिकल्प्य गोरूपधरायाः पृथिव्याः यत् अमृतम् दुदुहुः तत् दुर्व्वाससः शापात् समुद्रमगात् । पुनस्तदाहरणाय "देवासुरैरमृतमम्बुनिधिर्ममन्थे ।" इति पौराणिकी वार्त्ता । "अमृतं जह्रे"—विष्णुः मोहिणीरूपमास्थाय असुरान् विमोह्य समुद्रमन्थनादुत्पन्नम् अमृतम् हृतवान् इति पौराणिकी वार्त्ता । "कल्पान्तदुःस्था वसुधा ऊहे"—कल्पान्ते भगवान् विष्णुः महावराहरूपमास्थाय जलमग्नां पृथ्वीं दन्ताभ्याम् उत्तोलयामास इति पौराणिकी वार्त्ता ।

Change of V.—बलिं बबन्ध, (भवान्) अथवा त्वं बबन्धिथ । जलधि ममन्थ, जहारामृतम्,...कल्पान्तदुःस्थां वसुधां उवाह यः । एतेन भारेण अति-गुरुणा न भूयते ।

Derivation.—बबन्धे—बन्ध कर्म्मणि लिट् ए । लट् बध्नाति । लुङ् अभान्त्सीत् । ममन्थे—मन्थ-लिट् ए कर्म्मणि । लट् मथ्नाति । लुङ् अमन्थीत् । जह्रे—हृ-कर्म्मणि लिट् ए । लट् हरति, हरते । लुङ् अहार्षीत्, अहृत । दुःस्थ—दुः-स्था-कः । वसुधा—वसु-धा क्विप् । ऊहे—वह-कर्म्मणि लिट् ए । लट् वहति, वहते । लुङ् अवाक्षीत्, अवोढ़ ।

যিনি বলিকে বন্ধন করিয়াছিলেন, সমুদ্র মন্থন করিয়াছিলেন, অমৃত হরণ ও দৈত্যকুল জয় করিয়াছেন এবং কল্পান্তে দুর্দ্দশাপন্ন ধরণীকে বহন করিয়াছেন, তাঁহার নিকট ইহা গুরুভার নহে।

This is not a heavy burden for him, by whom Bali was bound, the Ocean was churned, the ambrosia was taken away, and the demons were conquered, and the earth was upheld, ill-fated as it was at the universal destruction (end of the mundane age.)

Q. Give the विग्रहवाक्य of अमृतम् । Ans. न मृतं मरणं यस्मात् तत् अमृतम् । Q. Give all the allusions in the sloka. Ans. See above. Q. Name the several Avataras. Ans. "मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः । रामो

इति ब्रुवाणो मधुरं हितञ्च
तमाञ्जिहन्मैथिलयज्ञभूमिम्।
रामं मुनिः प्रीतमना मखान्ते
यशांसि राज्ञां निजिहृषयिष्यन्॥ ४०॥

रामश्च रामश्च बुद्धः कल्की च ते दश॥" Q. Justify दैत्यकुलं विजिग्ये। Ans. प्रथमं नरसिंहः भूत्वा हिरण्याक्षादीन्, वामनः सन् वैरोचनादीन्, दाशरथिः सन् रावणादीन्, परशुरामः सन् कार्त्तवीर्य्यादीन्, बलदेवः सन् मानवरूपधरान् दानवान् जिगाय। अत उक्तम् "दैत्यकुलं विजिग्ये" इति। Q. Does 'अङ्केऽमृतम्' add to the glory of Visnu? Ans. 'अङ्केऽमृतम् दैत्यकुलं विजिग्ये' इत्येवं वाच्यम्। अमृतहरणात् संधुक्षितान् असुरान् जितवान्, इति विजयं प्रति अमृतहरणस्य हेतुत्वेन उपन्यासात् 'अङ्केऽमृतम्' इति हेतुभूतं वाक्यं प्रदत्तम्। अथवा, अहो तस्य माया, यत् असुरा अपि विमोहिताः आसन् इति। Q. Was बलि actually bound? Ans. बलिः सत्यपाशेन आबद्धः स्वविक्रमम् प्रकाशयितुम् असमर्थोऽभूत्। अतः स आबद्ध इव आसीत्। Q. Give the active form of विजिग्ये। Ans. विजिग्ये इत्यपि कर्त्तरि वाच्ये प्रयुज्यते। "विपराभ्याम् जेः" इति आत्मनेपदम्। ३९।

40. Principal part:—मुनिः (कर्त्ता) रामं (मुख्यं कर्म्म) मैथिलयज्ञभूमिम् (गौणं कर्म्म) आञ्जिहत्। Adjunct to मुनिः—इति मधुरं हितञ्च ब्रुवाणः, प्रीतमनाः, and राज्ञां यशांसि निजिहृषयिष्यन्। मखान्ते—[अधिकरण]।

Prose order:—इति मधुरं हितञ्च ब्रुवाणः प्रीतमनाः मुनिः राज्ञां यशांसि निजिहृषयिष्यन् मखान्ते तं रामं मैथिलयज्ञभूमिम् आञ्जिहत्।

Substance:—इति मधुरम् आलपन् मुनिर्विश्वामित्रः वीराणां यश प्रणश्य रामस्य यशः ख्यापयितुम् यज्ञान्ते रामं राज्ञो जनकस्य यज्ञभूमिं निनाय।

Explanation in tika form.—इति उक्तप्रकारेण मधुरं श्रोत्रसुखं हितञ्च ब्रुवाण: अभिदधान: "लक्षणहेत्वो: क्रियाया:" इति शानच् । प्रीतं मनो यस्येति प्रीतमना: रक्षोवधात् हृष्टान्त:करणो मुनि: राज्ञां क्षत्रियाणाम्, वीराणामित्युपलक्षितम् । यशांसि निजिघृक्षयिष्यन् निग्रहीतुम् अभिभवितुम् इच्छां कारयिष्यन् [राम एव प्रयोज्यकर्त्ता निपूर्व्वकात् सनन्तग्रहधातो: णिचि स्यत्‌-प्रत्यय: ।] मखान्ते स्वस्य यज्ञावसाने तं रामं मिथिलानां राजेति मैथिल: [जनपद-शब्दात् क्षत्रियादञ्" इति अञ् ।] तस्य यज्ञभूमिं आजिहत् प्रापयामास । गत्यर्थात् अन्ह: णिजन्तात् लुङ् । राममिति "गति बुद्धि प्रत्यवसानार्थ शब्दकर्म्माकर्म्मकाणाम् अणिकर्त्ता स णौ"* इति गत्यर्थस्य अन्हधातो: णिजन्तावस्थायाम् कर्म्मत्वम् । 'म'वर्णस्य असकृत्प्रयोगात् वृत्त्यनुप्रासालङ्कार: । काव्यलिङ्गमलङ्कारश्च । वृत्तम् उपजाति: । 'हितञ्च' इति पादशेषे दीर्घत्वं । "तथा पादान्तगोऽपि वा" इति वैकल्पेन दीर्घनियमात् ।

Change of V.—ब्रुवाणेन......स आंहि......राम: मुनिना प्रीतमनसा......निजिघृक्षयिष्यता ।

Derivation.—ब्रुवाण:—ब्रू-शानच् । लट् ब्रवीति, ब्रूते । लुङ् अवोचत, अवोचत । आजिहत्—अन्ह-णिच्-लुङ्-द् । लट् अंहते । लुङ् आंहिष्ट । लिट् आनंहे । यशस—अश्-असुन् । निजिघृक्षयिष्यन्—नि-जिघृक्ष (ग्रह+सन्)-णिच्-स्यत्-प्रथमा ।

ঋষি সানন্দে এইরূপ মধুর ও হিত কথা বলিয়া নিজ যজ্ঞাবসানে রাজগণের কীর্ত্তি লঘু করিবার জন্য রামচন্দ্রকে মৈথিল যজ্ঞ ভূমিতে উপনীত করিলেন।

---

* गत्यर्थ बुद्ध्यर्थ भक्षणार्थानां शब्दकर्म्मकाणाम् अकर्म्मकाणाञ्च अण्यन्तानां य: कर्त्ता स ण्यन्तानां कर्म्मसंज्ञ: स्यात् । गच्छति बालक: ग्रामम् ; गमयति बालकं ग्रामम् । बुध्यते बालक: धर्म्मम् ; बोधयति बालकं धर्म्मम् । भुङ्क्ते बालक: अन्नम् ; भोजयति बालकम् अन्नम् । शब्दकर्म्मणाम् यथा—अधीते बालक: वेदम्, अध्यापयति बालकं वेदम् । अकर्म्मणाम् यथा—शेते बालक: ; शाययति बालकम् । गतिबुद्धीत्यादिना किम् ? पचति अन्नं बालक: ; पाचयति अन्नं बालकेन ।

इतः स्म मित्रावरुणौ किमेतौ
किमश्विनौ सोमरसं पिपासू।
जनं समस्तं जनकाश्रमस्थं
रूपेण तावौजिहतां नृसिंहौ ॥ ४१ ॥

Thus holding a speech sweet and wholesome, the ascetic, heartily pleased, conveyed him at the end of his sacrifice to the sacrificial ground of Maithila, with a view to have Rama overtake the glory of the kings.

Q. In what sense is शानच् used here in ब्रुवाणः? In what other sense can it be used? Ans. लक्षणे अर्थात् क्रियायाः परिचायके शानच् भवति इति अत्र शानच्। अन्यत्र हेतौ अपि भवति "लक्षणहेत्वोः क्रियायाः।" हेतौ यथा, "प्रभुं सेवमानः भृत्यः तम् अनुसरति। The servant follows his lord because he intends serving. Q. Account for the second case in "रामम् and यज्ञभूमिम्। Ans." रामः यज्ञभूमिम् आंहिष्ट, (जगाम) ऋषिः रामम् यज्ञभूमिम् आञ्जिहत् (गमयामास)। अतः "गतिबुद्धी"त्यादिना णिजन्त अंहधातोः अणिजन्तावस्थायां यो रामः कर्त्ता आसीत्, तस्य कर्म्मत्वम्। 'यज्ञभूमिम्' इत्यत्र गत्यर्थ-धातोः सकर्म्मकतया कर्म्मत्वम्।' Q. Show the significance of मुनि। Ans. "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते॥" इति मुनेः सुखेषु विगतस्पृहत्वेऽपि, 'प्रीतमनाः' इति विशेषणेन तस्य आनन्दातिशयः व्यज्यते। Q. Show the propriety of "मधुरं हितञ्च"। Ans. "हितं मनोहारि च दुर्लभं वचः" किरातः। ४०।

41. Principal part :—नृसिंहौ [कर्त्तृ] जनं [कर्म्म] औजिहताम्। Adj. to जनम्—समस्तम् and जनकाश्रमस्थम्। Adj. to नृसिंहौ—तौ। Then the two objective sentences—(1) एतौ (कर्त्तृ) किम् मित्रा-

वरुणौ (same case with एतौ) इत: (क्रिया) च। (2) एतौ किम् अश्विनौ। सोमरसं पिपासू:—Adj. to अश्विनौ and मित्रावरुणौ।

Prose order :—किमेतौ सोमरसं पिपासू मित्रावरुणौ इत: च, किम् अश्विनौ। (इति) तौ नृसिंहौ रूपेण समस्तं जनकाश्रमस्थं जनं औजिहताम्।

Substance :—रामलक्ष्मणौ इत्थं जनकपुरस्थं प्रजावर्गं वितर्कमकारयताम् यथा यौ एतौ आगच्छत: किमेतौ मित्रावरुणौ सोमरसम् आस्वादयितुम् अमरौकं पातालञ्च विहाय पृथिव्यां चरत:, अथवा यज्ञेऽस्मिन् सोमरसपानार्थं धृतदेहौ अश्विनीकुमारौ इति।

Explanation in tika form :—किमेतौ पुरत: दृश्यमानौ पुरुषौ सोमरसं पिपासू पातुमिच्छू "न लोके"*त्यादिना षष्ठीप्रतिषेध:। मित्रश्च वरुणश्च मित्रावरुणौ आदित्यवरुणौ "देवता द्वन्द्वे च" इति आनङ्। "मित्रौरवावपि" इत्यमर:। इत: च इमम् देशं प्राप्तवन्तौ। इण्धातो: लट् तस्, अयोगे अतीतार्थ:। किम् एतौ सोमरसं पिपासू अश्विनौ अश्विनीकुमारौ यमजौ। इति तौ, नरौ सिंहाविव इति नृसिंहौ मनुष्यश्रेष्ठौ। "उपमितं व्याघ्रादिभि: सामान्याप्रयोगे" इति उपमिति समास:। रामलक्ष्मणौ रूपेण सौन्दर्य्येण करणेन, समस्तं जनकाश्रमस्थं जनं औजिहतां वितर्कं कारितवन्तौ। ऊहं वितर्के इत्यस्मात् णिजन्तात् लुङ् ताम्। [केचित्, चशब्द: पादपूरणे, इतोऽस्मिन् देशे, एतौ आगतौ, इत्यादिकमाहु:। तत्र, आङ्पूर्व्वात् इण: क्त: इति 'एतौ' इति क्रियापदं निष्पन्नम्।] सन्देहालङ्कार:। इन्द्रोपेन्द्रजाति:।

Change of voice :—ईयते च मित्रावरुणाभ्याम् एताभ्याम् अश्विभ्याम् पिपासुभ्याम्। जन: समस्त: जनकाश्रमस्थ: ताभ्याम् औहि नृसिंहाभ्याम्।

Derivation.—इत:—इण लट् तस्। अथवा इदम् इत्यस्मात् सप्तम्याम्

* "न लोकाव्यय निष्ठा खलर्थ तृनाम्" ल उ उक अव्यय निष्ठा खलर्थ तृन् इत्येषां प्रयोगे कर्म्मणि सम्बन्ध विवक्षायामपि षष्ठी न स्यात्। ल=शतृशानजादय:, यथा सृष्टिं कुर्व्वन्। उक—दैत्यान् घातुक:। अव्ययम्—तुम्, क्त्वा इत्यादि, यथा जगत् सृष्ट्वा। निष्ठा=क्त, क्तवतु, यथा दैत्यान् हतवान्। खलर्था: —ईषत्कर: प्रपञ्च: हरिणा। तृन्—लोकान् कर्त्ता।

नम्। मित्रः—मेद्यति सर्व्वभूतेषु स्निह्यति इति मित्रः, मिद्-क्त्र्। सिंहः—हिन्स्-अच् निपातनम्। जनक—जन-णिच् ण्वुल्।

সোমরস পানার্থী হইয়া সূর্য্য ও বরুণ অথবা অশ্বিনী কুমারদ্বয় কি এ দিকে আসিতেছে? নরশ্রেষ্ঠদ্বয় নিজ রূপ সৌন্দর্য্য দ্বারা জনকাশ্রমস্থ সমস্ত ব্যক্তিকে এইরূপ বিতর্ক করাইয়াছিলেন।

These two best of men made all the people in the hermitage of Janaka reflect thus :—'Do the sun and Varuna or the Aswins the twins, come hither desirous to drink the juice of Soma?

Q. Give the derivative meaning of जनकः। Ans. "अराजकभयं नृणां मन्यमानाः महर्षयः। देहं ममन्थुः स्म निमेः सन्तानः समजायत। जन्मना जनकः सोऽभूत् वैदेहस्तु विदेहजः। पुरीजननसामर्थ्यात् जनकः स च कथ्यते।" Q. Account for the formation of मित्रावरुणौ। Ans. See above. Q. Give the meaning of मित्र according to gender. Ans. "मित्रं सुहृदि न द्वयोः। सूर्य्ये पुंसि।" इति मेदिनी। Q. Show the significance of सोमरसं पिपासू। Ans. अमृतभोजिनो देवाः। अमृतञ्च तत् यत् यज्ञे हुतम् सोमरसादिकम्। अतः तत्पानार्थं अश्विनीकुमारादीनाम् तत्रागमनं युज्यते। हुतस्य अमृतत्वे यथा माघः; "अमृतं नाम यत् सन्तो मन्त्रजिह्वेषु जुह्वति। शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना।" Q. In the previous sloka mention was made of Rama and Viswamitra only. How do you know that by the word एतौ Ram and Lakshmana are intended. Ans. उपमानद्वयसामर्थ्यात् रामलक्ष्मणौ एव उपलक्षितौ। अतः पूर्व्वश्लोके 'रामम् आह्वयत्' इत्यत्र 'लक्ष्मणसहितम् रामम्' इति व्याख्यातम्। Q. Show from gram. point that the objects of comparison viz. मित्रावरुणौ are fitly used. Ans. "देवताद्वन्द्वे च" देवतावाचिनां यो द्वन्द्वः तत्र उभय-

अजिग्रहत्तं जनको धनुस्तत्
येनार्द्दितत् दैत्यपुरं पिनाकी।
जिज्ञासमानो बलमस्य बाह्वो-
र्हंसत्रभाङ्क्षीत् रघुनन्दनस्तत् ॥ ४२ ॥

पदे पूर्व्वपदस्य आनङ् आदेशो भवति। अत्र द्वन्द्वग्रहणं प्रसिद्धसाहचर्य्यार्थम्। ये नाम लोके प्रसिद्धसाहचर्य्या वेदे च सहभावेन निर्द्दिष्टाः तेषाम् इह ग्रहणं भवति। अतः मित्रावरुणौ इति आनङादिष्टेन उपमानपदेन रामलक्ष्मणयोः सततं साहचर्य्यं निर्द्दिष्टम्। Q. Show the propriety of मित्रावरुणौ and अश्विनौ। Ans. सूर्य्यस्य रामवत् श्यामवर्णतया, तस्य वरुणस्य च प्रतापवत्तया च, तथा, लोके वेदे च तयोः सततं साहचर्य्यात्, ताभ्यां रामलक्ष्मणयोः समाधिः युज्यते। सूर्य्यरूपं यथा, "श्यामान्वितः पिङ्गजदेहकान्तिः। प्रतापयुक् सत्त्वगुणोऽल्परोमा" इत्यादि सर्व्वार्थचि०। अश्विनौ—सौन्दर्य्यख्यातौ प्रतापान्वितौ सूर्य्यतनयौ अश्विनौ इव रामलक्ष्मणौ अदृश्येताम्। यथा मित्रावरुणौ यज्ञांशभुजौ तथा अश्विनावपि। जनकराजस्य पुरे यज्ञानुष्ठानात् इतं प्रार्थयमानौ बद्धदेहौ मित्रावरुणौ अथवा अश्विनौ इव तौ अलक्ष्येताम्। Q. Decline the base of अश्विनौ। Give also their derivation. Ans. अश्विन् इति द्विवचनान्तः। रूपं यथा, अश्विनौ २ अश्विभ्याम् ३, अश्विनोः २। अश्वा उत्पत्तिः ख्याततेन अस्ति अनयोः इति इनिः। "त्वाष्ट्री तु सवितुर्भार्य्या वडवारूपधारिणी। असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ।" भारतम्। Q. Comment gram. on इतः स्म। Ans. स्म इति पादपूरणे इतः अस्मिन् स्थाने, इदम् शब्दात् सप्तम्यां तस्। अथवा इतः स्म अलतः स्म। इण् धातोः क्ति तस् अतीति प्रयोगः। ४१।

42. It consists of two principal sentences.—(1) जनकः (कर्त्तृ) तम् (मुख्यं कर्म्म) धनुः (गौणं कर्म्म) अजिग्रहत् (द्विकर्म्मक)। Adjunct to जनकः—अस्य बाह्वोः बलं जिज्ञासमानः। Adjective sentence to धनुः—येन पिनाकी दैत्यपुरम् आर्द्दितत्। Adj. to धनुः—

सन्। (2) रघुनन्दनः (कर्त्तृ), तत् (कर्म) अभाङ्क्षीत्। Adj. to रघु-नन्दनः—हसन्।

Prose order :—जनकः अस्य बाह्वोः बलं जिज्ञासमानः, येन पिनाकी दैत्यपुरम् आर्द्दिदत् तत् धनुः तम् अजिग्रहत्। रघुनन्दनः हसन् तत् अभाङ्क्षीत्।

Substance :—जनकः रामस्य बाह्वोर्बलं ज्ञातुमिच्छुः शैवं धनुः प्रदर्श्य प्राह, शिवः अनेनैव धनुषा त्रिपुरं जघानेति तत् श्रुत्वा रामः हसन् लीलयैव तत् बभञ्ज।

Explanation in tika form :—जनकः अस्य रामस्य बाह्वोः भुजयोः बलं सामर्थ्यं "बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः" इति मेदिनी। जिज्ञासमानः ज्ञातुमिच्छन् "ज्ञा श्रु स्मृ दृशां सनः" इति आत्मनेपदम्। येन धनुषा, पिनाकोऽजगवं धनुः अस्यास्तीति पिनाकी शिवः "पिनाकी प्रमथाधिपः" इत्यमरः। दैत्यपुरं दैत्यस्य पुः दैत्यपुरम्, समासान्तः अच्। त्रिपुरम् आर्द्दिदत् हिंसितवान्, अर्द्दः स्वार्थिकण्यन्तात् लुङ्। केचित्तु, धनुषा प्रयोज्यकर्त्रा घातयामास इत्यर्थमाहुः। तत् धनुः तं रामं अजिग्रहत् बोधितवान्। अनेन धनुषा त्रिपुरं दग्धमिति ज्ञापितवान् इत्यर्थः। धातूनामनेकार्थत्वात् ग्रहिरत्र ज्ञानार्थः। तेन च "गति बुद्धि प्रत्यवसानार्थ शब्दकर्माकर्मकाणाम् अणिकर्त्ता स णौ"* इति रामस्य कर्मसंज्ञा। केचित्तु अजिग्रहत् ग्राहयामास इत्याहुः। ग्रहणार्थात् ग्रहेरेव तत्सूत्रे ग्रहणात्, ण्यन्तात् ग्रहेर्लुङ्। रघूणां नन्दयिता रामः हसन्, लीलया इत्यर्थः। तत् धनुः अभाङ्क्षीत् द्विधा अकरोत्। भञ्जेः लुङ्। उपजातिः।

Allusion.—"येनार्द्दिदत् दैत्यपुरं पिनाकी।" त्रिपुरम्—"त्रीणि काञ्चनमेकं वै रौप्यं कार्ष्णायसं तथा। काञ्चनं दिवि तत्रासीत्, अन्तरीक्षे च राजतम्। आयसं (लौहमयम्) चाभवत् भौमम् चक्रस्थे पृथिवीपते॥" एतत् पुरत्रय महादेवः शैवेन धनुषा दग्धमकरोत् इति पौराणिकी वार्त्ता।

Change of V.—अयाहि जनकेन......जिज्ञासमानेन......येन आर्द्दि ...पिनाकिना। हसता अभञ्जि (अभाजि) रघुनन्दनेन......।

---

* See page 149.

Derivation.—अजिग्रहत्—ग्रह-णिच्-लुङ् द । लिट् ग्राहयामास । धनुः—धन उस् । आर्द्दिदत्—अर्द्द-णिच्-लुङ् द । जिज्ञासमानः—सनन्तज्ञा-शानच् । लट् जिज्ञासते । अभाङ्क्षीत्—भनज्-लुङ् द । लट् भनक्ति । लिट् बभञ्ज ।

महादेव যে ধনুক দ্বারা দৈত্যপুর ধ্বংশ করিয়াছেন, জনক রামের বাহু বল জানিবার জন্ম সেই ধনুকের বিষয় জানাইলেন। রঘুনন্দন হাসিতে হাসিতে তাহা ভগ্ন করিলেন।

Desirous to ascertain the strength of his arms, Janaka told him about the bow whereby Mahadeva the bearer of Pinaka destroyed the town of Tripura. Rama, the descendant of Raghu, broke i smiling,

Q. Show the fitness of the epithet हसन् । Ans. जनकः भक्त्या अवोचत् यत् नैतत् धनुः कथमपि भर्ज्यते इति । अतः एव रामस्य हासः अजनि । अपिच हसन् इत्यनेन लीलयैव अभाङ्क्षीत् इत्यति गम्यते। Q. Comment on अजिग्रहत् । Ans. रामः धनुः अग्रहीत्, जनकः म् रामम् धनुः अजिग्रहत् इति "गतिबुद्धि" इत्यादिना णिजन्तस्य ग्रहेः अणिजन्त र्त्तरि कर्म्मसंज्ञा । [The nominative of ग्रह् when it was not causative, takes the second case, when but ग्रह् becomes a causative one. But then ग्रह् does not according to Panini signify acceptance but knowledge. So according to him t means "Janaka informed him about the bow." But according to other grammarians here ग्रह् means to accept, and has thus a rule provided.] Q. Give the derivative meaning of जनक। Ans. See the previous sloka. Q. Give the allusion to येन दैत्यपुरम् आर्द्दिदत् । Ans. See above. Q. Why is Rama called रघुनन्दन and not दिलीपनन्दन ? Ans, "वंशस्य कर्त्तारमनन्तकीर्त्तिम् सुदक्षिणायां तनयं ययाचे ।"

ततो नदीष्णान् पथिकान् गिरिज्ञा-
नाह्वायकान् भूमिपतेरयोध्याम् ।
दित्सुः सुतां योधवरैस्तुरङ्गै-
र्व्यसर्जयन्मैथिलमर्त्यमुख्यः ॥ ४२ ॥

...ष्णुः । इति रघोर्नामा एव वंशाख्या । Q. Give the different meanings of बल । Ans. "बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः । पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च । बलयुक्तेऽन्यलिङ्गः स्यात् ।" इति मेदिनी । Q, Show the fitness of पिनाकी । Ans. रामः तमेव पिनाकम् बभञ्ज, येन शिवोऽपि पिनाकिनाम्ना ख्यातोऽभूत् इति पिनाकी इत्यस्य सार्थक्यम् । See "निर्मोकेण च वासुकेर्निचुलितम् यत् सादरम् नन्दिना ।" &c. वीरचं । ४२ ।

43. Principal part :—ततः मैथिलमर्त्यमुख्यः भूमिपतेः आह्वायकान् तुरङ्गैः अयोध्यां व्यसर्जयत् । Adj. to आह्वायकान्—नदीष्णान्, पथिकान्, गिरिज्ञान् । Adjunct to मैथिलः—सुतां दित्सुः ।

Prose order :—ततः मैथिलमर्त्यमुख्यः सुतां दित्सुः नदीष्णान् पथिकान् गिरिज्ञान् भूमिपतेः आह्वायकान् योधवरैः तुरङ्गैः अयोध्यां व्यसर्जयत् ।

Substance.—धनुर्भङ्गात् परं जनकः नृपतेः दशरथस्य आनयनार्थं, ये नाम नदीवर्त्म स्थलवर्त्म गिरिवर्त्म च जानन्ति तान् अश्वारोहान् अयोध्याम् प्रेषयामास ।

Explanation in tika form :—ततः धनुर्भङ्गानन्तरं मिथिलानां राजा मैथिलः "जनपदशब्दात् क्षत्रियादञ्"* इत्यत्र "क्षत्रियसमानशब्दाज्जनपदात् तस्य राजन्यपत्यवत्"† इति वचनात् अञ् । म्रियन्ते प्राणिनोऽस्मिन्निति मर्त्यः

---

* Let there be अञ् to denote progeny, after a word which, while it expresses a country, expresses also a Kshetriya.

† Let the affix अञ् come after the name of a country of the same name as a Kshatriya, when the sense is that

भूलोकः तत्र भवा मर्त्या मनुष्याः "दिगादिभ्यो यत्"‡ इति यत्। मुखमेव मुख्यः प्रधानम्, शाखादिभ्यः यः । मर्त्येषु मुख्यः मर्त्यमुख्यः मनुष्यश्रेष्ठः इत्यर्थः । मैथिलश्चासौ मर्त्यमुख्यश्चेति विशेषणसमासः। जनक इत्यर्थः। सुतां दुहितरं दित्सुः दातुमिच्छुः सन् रामाय इति शेषः। नदीष्णान् नद्यां स्नातुं जानन्ति ये तान् नदीसन्तरणकुशलान् "सुपिस्थः" इति स्नाधातोः कः। [नदीष्णाः नदीज्ञाः इति च पुरुषोत्तमः] पन्थानं गच्छन्ति विदन्ति वा पथिकाः तान् पथि कुशलान् इति केचित् "तत्र कुशलपथः" इति ठक्। तथा गिरिज्ञान् यथाप्रदेशं पर्व्वतज्ञान् भूमिपतेः दशरथस्य "कर्त्तृकर्म्मणोः कृति" इति कर्म्मणि षष्ठी। आह्वयन्ति आकारयन्तीति आह्वायकाः दूताः तान् कर्त्तरि ण्वुल्। युध्यन्ते इति योधाः, पचाद्यच्। तान् प्रौढत्वं योग्यं वयः प्राप्तैः, धर्मैरित्यर्थः, इति योधहरैः, "वयसि च" इति हृधातोः अच। § तुरङ्गैः अश्वैः करणभूतैः अयोध्यां व्यसर्ज्जयत् प्रेरयामास। विपूर्व्वस्य ण्यन्तस्य सृजेः लङ्। गत्यर्थत्वात् द्विकर्म्मकता। इन्द्र-सुपञ्जातिः।

Change of V.—नदीष्णाः पथिकाः गिरिज्ञाः आह्वयकाः......दित्सुना ......व्यसर्ज्यन्त मैथिलमुख्येन।

Derivations :—नदीष्णा – नदी-स्ना-कः। पथिक—पथिन् ठक्। गिरिज्ञः—गिरि-ज्ञा-कः। आह्वायक—आ-ह्वे-ण्वुल्। लट् ह्वयति, ह्वयते। लुङ् अह्वत्, अह्वत, अह्वास्त। लिट् जुहाव, जुहुवे। दित्सु—दा-सन्-उ। हर—हृ-अच्। तुरङ्ग—तुर-गम्-ख। 'तुरेण गच्छतीत्यर्थे तुरङ्गश्च तुरङ्गमः।" व्यसर्ज्जयत्—वि सृज-णिच्-लङ् द। लुङ् व्यसीसृजत् व्यससर्ज्जत्। मर्त्य—मर्त्त-यत्।

---

of the Kings thereof, as when the sense is that of progeny. Thus मैथिल, the king of the Kshatriyas or of the country of मिथिला। [Bal.]

‡ दिश्यम्, वर्ग्यम् इत्यादि :

§ वयसि गम्यमाने हरतेः कर्म्मणि उपपदे अच्प्रत्ययो भवति। यथा योध-हरः, योधवहनक्षमं वयः प्राप्तः इत्यर्थः।

क्षिप्रं ततोऽध्वन्यतुरङ्गयायी
यविष्ठवत् वृद्धतमोऽपि राजा।
आख्यायकेभ्यः श्रुतसूनुवृत्ति-
रम्लानयानो मिथिलामगच्छत्॥ ৪৪॥

অনন্তর মিথিলায় জনগণের অগ্রগণ্য জনক কন্যা দান করিতে অভিলাষী হইয়া রাজা দশরথকে আনয়ন করিবার জন্য, যাহারা নদীপথ, স্থলপথ ও গিরিপথ সুন্দররূপে অবগত ছিল তাহাদিগকে যোধপুরুষবহনক্ষম অশ্ব দ্বারা অযোধ্যায় প্রেরণ করিলেন।

Then the chief of the Mithila men, desirous to give his daughter (in marriage) sent in Ayodhya to the King the inviters well acquainted with rivers, roads, mountains, by means of horses fit to carry the warriors.

Q. Explain the formation and gram. meaning of नदीष्ण। Ans. नद्यां स्नातुं जानन्ति ये ते नदीष्णाः। "सुपिस्थः" इति नदी उपपदात् स्नाधातोः कः। ततः "निनदीभ्यां स्नातेः कौशले" इति कौशले गम्ये, नदी इत्यस्मात् स्नाधातोः षत्वम्। अतः "नदीष्णस्तरणकुशलाः" इति षत्वविधानेन व्याकरणसूत्रादेव कुशलार्थत्वम् गमितम्। Cf. "आनायिनस्तद्विचये नदीष्णान्" रघुः। Q. Show the change of meaning of the root सृज with the change of prefixes. Ans. अति-सृज्धातुः अतिसर्ज्जने, दाने। अव-सृज् निक्षेपे। उत्-सृज उत्सर्गे। नि-सृज परित्यागे। वि-सृज विसर्ज्जने, दाने, मोचने। "विसर्ज्जयेत् यम् सुतजन्म हर्षितः।" रघुः। सम्-सृज संसर्गे इत्यादि। Q. Derive मैथिल। Ans. See above. । ৪३।

44. Principal part :—ततः राजा मिथिलां क्षिप्रम् अगच्छत्। Adj. to राजा—अध्वन्यतुरङ्गयायी, यविष्ठवत्, वृद्धतमः, श्रुतसूनुवृत्तिः and अम्लानयानः। आख्यायकेभ्यः (अपादान)।

Prose order :—ततः आख्यायकेभ्यः श्रुतसूनुवृत्तिः अध्वन्यतुरङ्गयायी वृद्धतमोऽपि यविष्ठवत् अम्लानयानो राजा मिथिलां चिप्रम् अगच्छत्।

Substance :—अथ वार्त्ताहेभ्यः रामगतम् सर्व्वमुपलभ्य अनुद्घातसुखम् रथमेकं अर्व्विभिः घोटकैः वाहयन् वृद्धोऽपि युवा इव उत्साहशीलः मिथिलां प्रति प्रतस्थे। [अथवा, अनुद्घातगमनं अचिरं तुरङ्गमारुह्य युवा इव ययौ।]

Explanation in tika form :—अथ श्लोकद्वयेन इष्ट-इयसुनुप्रयोगमाह चिप्रमिति। ततः तदनन्तरं आख्यान्ति कथयन्ति ये ते आख्यायकाः सन्देशहराः कर्त्तरि ण्वुल्। तेभ्यः "गुत्यर्थानां आवयिता" इति अपादानात् पञ्चमी। श्रुता सूनोः पुत्रस्य वृत्तिः व्यवहारः धनुर्भङ्गरूपः येन तथोक्तः। अध्वानम् अलं गामिनो ये तुरङ्गाः अश्वाः ते अध्वन्यतुरङ्गाः। अलङ्गामीत्यस्मिन्नर्थे "अध्वनो यत् खौ" इति यत्। अन्यत्र अध्वनीनाः। तैः साधु यातीति अध्वन्यतुरङ्गयायी द्रुताश्वयुक्तं रथं द्रुताश्वंवारुह्य, गच्छन्। तथा अयमेषामतिशयेन वृद्धः वृद्धतमोऽपि यविष्ठवत् युवतम इव 'तेन तुल्यम्' इति वतिः। न विद्यते म्लानं म्लानिः यस्मिन् तत् अम्लानं क्लान्तिरहितं, तत् यानं गमनं रथगतिर्वा यस्य तथोक्तः अनुद्घातसुखयान इत्यर्थः। अथवा, राज्ञः मनसि तथा आनन्दः समजनि, यथा द्रुताश्वेन गच्छतापि तेन न म्लानिरनुभूयते स्म इत्यर्थः। राजा दशरथः मिथिलां चिप्रं शीघ्रम् अगच्छत् भरतशत्रुघ्नाभ्यां सह इति अर्थादनुसन्धेयम्। वृत्तमुपजातिः।

Change of V.—……यायिना……वृद्धतमेनापि राज्ञा……श्रुतसूनुवृत्तिना अम्लानयानेन मिथिला अगम्यत।

Derivation.—अध्वन्य—अध्वन्-यत्। यायी—या-णिनिः, अयासीत् लुङ्। यविष्ठ—युवा-इष्ठन्। आख्यायक—आ-ख्या-ण्वुल्। अख्यत् लुङ्। सूनुः—सू-नुक्। सूते लट्, असुविष्ट, असोष्ट लुङ्। म्लान—म्लै-क्तः। म्लायति लट्। अम्लासीत् लुङ्।

নৃপতি বৃদ্ধ হইয়াও সংবাদবাহকদিগের নিকটে পুত্রের বৃত্তান্ত অবগত হইয়া যুবার ন্যায় উৎসাহ সহকারে, দ্রুতগামী অশ্বযুক্ত রথে আরোহণ করিয়া গমনক্লেশ অগ্রাহ্য করিয়া মিথিলায় প্রস্থান করিলেন।

द्रढिष्ठमार्च्चीत् वसुधाधिपानां
तं प्रेष्ठमेतं गुरुवद्गरिष्ठम्।
सहङ्महान्तं सुकृताधिवासं
बंहिष्ठकीर्त्तिर्यशसा वरिष्ठम्॥ ४५॥

Hearing his son's exploit, from the messengers, the king though old quickly went over like a young man to Mithila on a chariot drawn by horses suited to roads without feeling the sense of fatigue.

Q. Give the meaning of अम्लानयानः। Ans. See above. Q. Give the sense of अपि here. Ans. अपिरत्र सम्भावनार्थे प्रयुक्तः, "गर्हा समुच्चय प्रश्न शङ्का सम्भावनास्वपि।" Q. Give the different interpretations of अम्लानयानः। Ans. (1) अम्लानं म्लानिरहितं यानं गमनं यस्य तादृशः। युवा इव अक्लिष्टगतिरित्यर्थः। अथवा (2) अम्लानम् अनुद्घातसुखं यानं यस्य तादृशः। वेगवद्भिः अश्वैः उह्यमानोऽपि तथा अस्खलितरथगतिः युवा इव उत्साहशीलः सन् ययौ इत्यर्थः। केचित् 'अम्लानयानः' इति 'म्लानि' इति नामधातोः शानच् इति कथयन्ति। तन्नु न साधु। Q. Write allusion in मिथिला। Ans. वशिष्ठशापेन निमिनाम्नि नृपती विगतदेहे सति, "अराजकभयं नृणां मन्यमाना महर्षयः। देहं ममन्थुः स निमिः सन्तानः समजायत। मथनात् मिथिर्जातः मिथिला येन निर्म्मिता॥" हरिवं, इति मिथिलाख्या। ४४।

45. Principal part :—जनकः (कर्त्ता) एतम् (कर्म्म) आर्च्चीत्। Adj. to जनकः—सहक्, बंहिष्ठकीर्त्तिः। Adj. to एतम्—द्रढिष्ठम्, तम्, प्रेष्ठम् महान्तम्, सुकृताधिवासम् and वरिष्ठम्। वसुधाधिपानाम्—निर्द्धारे षष्ठी, gram. connected with द्रढिष्ठम्। गुरुवत्, adv. to वर्त्तमानम् (understood) or आर्च्चीत्। यशसा (हेतौ तृतीया)।

Prose order—सहक् बंहिष्ठकीर्त्तिः (जनकः) वसुधाधिपानां द्रढिष्ठं गुरुवद्गरिष्ठं महान्तं सुकृताधिवासं यशसा वरिष्ठं प्रेष्ठं तम् एतम् आर्च्चीत्।

Substance :—कुलशीलादिषु दशरथसदृशः जनकः तम् गुरुवत् पूजयाञ्चकार। दशरथश्च नृपाणाम् श्रेष्ठः आसीत्। स च लोकप्रियः महान् पुण्यनिलयः यशस्वी कीर्त्तिमांश्च अभूत्।

Explanation in tika form :—इष्ठप्रत्ययस्य उदाहरणानि प्रदर्शयन्नाह, वृन्दिष्ठेति। समान इव दृश्यते इति सदृक्, कुलशीलादिषु दशरथेन तुल्यः। समान इत्यस्मात् दृश्‌धातोः क्विन्। बंहिष्ठा बहुला कीर्त्तिर्यस्य तथोक्तः विपुलयशाः इत्यर्थः। 'बहुल' इत्यस्मात् इष्ठन्‌प्रत्ययः। 'प्रियस्थिरे'त्यादिना * बहुलशब्दस्य बंहादेशः। जनकः वसुधाधिपानां पृथ्वीश्वराणां वृन्दिष्ठं वृन्दारकतमं प्रशस्ततमम् मुख्यतमम् इति यावत्। "प्रियस्थिरे"त्यादिना वृन्दारकस्य वृन्दादेशः। गुरुवत् उपदेष्टृवत् पितृवत्‌वा वर्त्तमानम्। अथवा गुरुवत् आर्चीत् इत्यन्वयः। "गुरुर्मन्त्रोपदेष्टा च गुरुर्जनकजीवयोः' इति रत्नकोषः। गरिष्ठं गुरुतमं, "प्रियस्थिरे"त्यादिना गुरुशब्दस्य गर् आदेशः। महान्तं उदारचरितम्, सुकृतानि पुण्यानि अधिवसन्त्यस्मिन् इति सुकृताधिवासः तं सुकृतनिलयम् इत्यर्थः। अन्यथा कुतो रामपितृत्वाधिकारः इति। अधिकरणे घञ्। यशसा कीर्त्या वरिष्ठं उरुतमं "प्रियस्थिरे"त्यादिना उरुशब्दस्य वरादेशः। प्रेष्ठं प्रसिद्धम् एतम् एनम् दशरथम् आर्चीत् पूजितवान्। अथवा एतम् आगतम् तम् आर्चीत् इत्यन्वयः। अत्र तु आ इत्यस्मात् इण्‌धातोः क्तः। वृत्तमुपजातिः।

Change of V.—वृन्दिष्ठः आर्चि......सः प्रेष्ठः एतः...गरिष्ठः सदृशा महान् सुकृताधिवासः बंहिष्ठकीर्त्तिना.......वरिष्ठः।

Derivation.—वृन्दिष्ठ—वृन्दारक-इष्ठन्। प्रेष्ठ—प्रिय-इष्ठन्। एतम्—आ-इ-कर्त्तरि क्तः। गरिष्ठ—गुरु-इष्ठन्। सदृक्—समान-दृश-क्विन्। अधिवास—अधि-वस-अधिकरणे घञ्। बंहिष्ठ—बहुल-इष्ठन्। वरिष्ठ—उरु-इष्ठन्। आर्चीत्—अर्च-लुङ् द। लिट् आनर्च।

---

* "प्रिय स्थिर स्फिर उरु बहुल गुरु वृद्ध तृप्र दीर्घ वृन्दारकाणाम् प्र स्थ स्फ वर बंहि गर् वर्षि त्रप् द्राघि वृन्दाः।" प्रिय स्थिर &c are substituted by प्र स्थ &c when followed by इष्ठन् ईयसुन् &c।

রাজগণের অগ্রগণ্য রাজা দশরথ সকলের প্রিয়পাত্র মহান্ ও পুণ্যালয় ছিলেন। তাঁহার সমকক্ষ যশস্বী জনক, শ্রেষ্ঠতম দশরথকে গুরুর ন্যায় অভ্যর্থনা করিলেন।

Janak, of widespread reputation, equal to Dasaratha, received with honor the latter, the most praiseworthy of the rulers of the earth, dear and honorable like the preceptor, great and exalted with glory and the very repository of virtues.

Q. Distinguish between दण्डान्वय and खण्डान्वय। Explain the above sloka by way of दण्डान्वय। Ans. (1) The explanation of a sloka in दण्डान्वय is when the sloka is explained by way of prose order as is done by Mallinath. (2) The explanation in खण्डान्वय is when the principal part of the sentence is first explained and then the subordinate ones, beginning with such words as किंभूत: &c. (See the notes by जयमङ्गल)। Q. Give the different interpretations of तम् एतम्। Ans. 'तम् एतम् आर्चीत्' इति अन्वये कृते तम् प्रसिद्धमित्यर्थ:। यद्-शब्दस्य च प्रयोगाभाव:। तथाहि मम्मटभट्ट:—"प्रक्रान्त: प्रसिद्धार्थ: अनुभूतार्थविषय: तच्छब्दो यच्छब्दोपादानं नापेक्षते।" इति। एतम् तम् इति अन्वये कृते 'एतम्' आगतम्, आ-इणधातो: कर्त्तरि क्त:। तम् आर्चीत् इत्यर्थ:। Q. Parse सुकृताधिवासम्। Ans. 'तम्' इत्यनेन एकविभक्ति। उद्देश्यविधेयान्वय:। Q. Give the other forms of सदृश् and explain the formation of each. Ans. सदृश and सदृक्ष। समान इव दृश्यते इति सदृश्। "त्यदादिषु दृशोऽनालोचने कञ्च" "समानान्ययोश्च इति वाच्यम्" इति समान इत्यस्मात् दृश्धातो: अनालोचने अर्थात् अनवलोकने अर्थे (अत्र दर्शनकार्य्यम् नास्ति) कञ्, 'च'कारात् क्विन् इति क्विन्प्रत्ययात् सदृश् इति सिद्धम्। कञ्प्रत्ययात् 'सदृश:' इति सिद्धम्। "दृशे: क्स च वक्तव्य:" इति

त्रिवर्गपारीणमसौ भवन्त
मध्यासयन्नासनमेकमिन्द्रः।
विवेकदृश्वत्वमगात् सुराणां
तं मैथिलो वाक्यमिदं बभाषे ॥ ४६ ॥

क्वप्रत्ययात् 'दृश्वः' इति सिद्धम्। Q. Derive and give the different meanings of, वृन्दारक and गुरु। Ans. (1) "वृन्दारकः सुरश्रेष्ठे मनोज्ञे यूथपातरि" इति व्याडिः। वृन्दम् रूपम् अस्यास्ति इति वृन्दारकः। "शृङ्गवृन्दयोरारकन्।" (2) गृणाति उपदिशति, गिरति अर्थं नाशयति वा, इति गुरुः गृधातोः कुः। Diff. m.—"गुरुः पिता गुरुर्विप्रो गुरुर्देवपुरोहितः। धुर्व्वोऽपि गुरुः प्रोक्तो गुरुः मिथ्यादिकारकः। इति अनेकार्थध्वनिमञ्जरी। ४५।

• 46. It consists of two sentences.—(1) असौ इन्द्रः (कर्त्तृ) विवेकदृश्वत्वं (कर्म्म) अगात्। (2) मैथिलः (कर्त्तृ) तम् (गौणं कर्म्म) वाक्यम् (मुख्यं कर्म्म) बभाषे। (1) अध्यासयन्=Adj. to असौ। आसनम् =object to अध्यासयन्। एकम्=adj. to आसनम्। त्रिवर्गपारीणम्= Adj. to भवन्तम्। सुराणाम्=निर्द्धारे षष्ठी, connected with विवेकदृश्वत्वम्। (2) इदम्=adj. to वाक्यम्।

Prose order :—असौ इन्द्रः त्रिवर्गपारीणं भवन्तम् एकम् आसनम् अध्यासयन् सुराणां विवेकदृश्वत्वम् अगात्, मैथिलः तम् इदं वाक्यं बभाषे।

Substance :—अथ मैथिलः दशरथमब्रवीत्। धर्म्मार्थकामान् समं सेवमानम् भवन्तम् इन्द्रो यत् स्वासनम् अध्यासयति अत तेन गुणिषु युक्तसम्मानप्रदर्शनात् देवेषु सः अतीव विवेकदर्शी इत्येवं प्रकटितम्।

Explanation in tika form :—असौ इन्द्रः त्रिवर्गस्य त्रयाणां धर्म्मार्थकामानां वर्गः तस्य पारं गामी त्रिवर्गपारीणः, "त्रिवर्गो धर्म्मकामार्थैः" इत्यमरः। "अवारपारात्यन्तानुकामङ्गामी"* इत्यत्र विगृहीतविपर्य्यस्तग्रहणात् पारशब्दात्

* ख (ईन) takes place after अवारपार, अत्यन्त अनुकाम in the

खः (ईन)। तथाभूतं भवन्तं। "गतिबुद्धी"त्यादिना आस्धातोः अण्यन्ताव-स्थायाम् अकर्म्मकत्वात् ख्यन्तावस्थायाम् कर्म्मसंज्ञा। एकम् इन्द्रासनमित्यर्थः, आसनम् "अधिशीङ् स्थासाङ्कर्म्म" इति अभिकरणस्य कर्म्मत्वम्। अध्यासयन् आरोपयन् सुराणां देवानां मध्ये विवेकं दृष्टवान् इति विवेकदृश्वा सदसद्विदः। दृशि अतीते क्वनिप्। विवेकदृश्वनः भावः विवेकदृश्वत्वम् तत् अगच्छत् प्राप्तवान्। "सर्व्वे गत्यर्थाः प्राप्त्यर्थाः ज्ञानार्थाश्च" इति गम्धातोः प्राप्त्यर्थत्वम्। मैथिली जनकः तं दशरथम् इदं वाक्यं बभाषे उक्तवान्। ब्रुवीत्यर्थग्रहणात् भाषधातोः द्विकर्म्मकता। Allusion :—वरलाभदृप्तं सम्बरनामानम् असुरं जेतुमसमर्थः इन्द्रः असुर-विनाशाय दशरथमाहूतवान्। स च कृतकर्म्मा इन्द्रेण परं तोषं लभमानेन यत् स्वासनम् अध्यासितः तेन इन्द्रस्य गुणपक्षपातिनः विवेकिता एव प्रकटिता। काव्यलिङ्गमलङ्कारः। वृत्तमुपजातिः।

Change of V.—स मैथिलेन......इदं वाक्यं बभाषे।

Derivation :—मैथिलः—मिथिलस्य निमिपुत्रस्य गोत्रापत्यम् पुमान् इति मैथिलः। अथवा मिथिलायाः राजा इति मैथिलः। मिथिल वा मिथिला अण्। "मथनात् मिथिली जातः, मिथिला येन निर्म्मिता।" हरिवं। पारीण —पार-खः। अध्यासयन्—अधि-आस-णि-शतृ प्रथमा। विवेक—वि-विच-भावे घञ्। इन्द्रः—इदि परमैश्वर्य्ये इत्यस्मात् रः। दृश्वत्व—दृश्-क्वनिप् त्व। दृश्वा दृश्वानौ दृश्वानः दृश्वना दृश्वभ्याम् इत्यादि रूपम्। अगात् इ-लुङ् द। लट् एति, इतः यन्ति। लङ् ऐत्। बभाषे—भाष-लिट् ए। लुङ् अभाषिष्ट।

জনক কহিলেন, আপনি ধর্ম্ম অর্থ কাম ত্রিবিধ বিষয় লাভ করি-য়াছেন। সম্বরাসুর বধানন্তর ইন্দ্র আপনাকে একাসনে উপবেশন করাইয়া দেবগণের মধ্যে আপনাকে অধিক ন্যায়দর্শীর পরিচয় দিয়াছেন।

To him did the king of Mithila address the following speech,

---

sense of going, whether taken singly or conjointly or reversedly. Thus अवारपारीणः, पारावारीणः, पारीणः अवारीणः, अत्यन्तीनः, अनुकामीनः इत्यादि।

हिरण्मयी शालतेव जङ्गमा
च्युता दिवः स्थाणुरिवाचिरप्रभा।
शशाङ्ककान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली ॥ ४७ ॥

'Indra among gods has shown his insight of judgment by placing thee in his very seat, thee, who hast attained the three ends of life.

In English Explanation, add :—The epithet त्रिवर्गपारीण means that he had gone to the end of त्रिवर्ग, *i. e.* fully attained the three ends of life, viz. virtue, wealth and enjoyment.

Q. Explain विवेकदृश्वत्वमगात् सुराणाम्। Ans. See what is written under the head 'Allusion.' Q. Give the meaning of असौ। Ans. असौ प्रसिद्ध इत्यर्थः। तद्-शब्दवत् अदस-शब्दस्यापि प्रसिद्धार्थत्वमस्ति। Q. Comment on तम्। Ans. तम् दशरथम्, इति तद्-शब्दस्य 'दशरथ'मित्यनेन अन्वयित्वात्, यदशब्दं विनापि तद्-प्रयोगः। Q. As भाष means to speak, is not the word वाक्यम् used redundantly? Ans. ब्रुवादिधातूनाम् द्विकर्मकेषु पठनात्, भाषधातोः वचनादिकर्मत्वम् अस्ति। केवलं वच्धातुः अकर्मकवत् प्रयुज्यते, यथा "वक्ति श्रीरघुनन्दनः।" "तिष्ठतु तूष्णीं यदाहं वच्मि।" इत्यादि। ४६।

47. Principal part :—(जनकेन) तस्य सुताय मैथिली सुता (उक्तं कर्म) ददे। Adjunct to सुता – हिरण्मयी जङ्गमा शालता इव, दिवः च्युता स्थाणुः अचिरप्रभा इव, शशाङ्ककान्तेः अधिदेवताकृतिः।

Prose order :—(जनकेन) जङ्गमा हिरण्मयी शालतेव, दिवः च्युता स्थाणुः अचिरप्रभा इव, शशाङ्ककान्तेः अधिदेवताकृतिः मैथिली सुता तस्य सुताय ददे।

Substance.—या सीता गतिशीला शालश्चाश्रिता स्वर्णलता इव अदृश्यत, या च आकाशात् स्खलिता क्षितिशीला विद्युत् इव अशोभत या च ज्योत्स्नायाः अधिष्ठात्री देवता इव अलक्ष्यत, जनकस्तां दशरथस्य तनयाय ददौ ।

Explanation in tika form :—जङ्गमा सञ्चारिणी नतु स्थावरा। यङन्तात् गमेः पचाद्यच् । हिरण्मयी सुवर्णनिर्म्मिता स्वर्णच्छवित्वात् । "मयड् वैतयोर्भाषायामभक्ष्याच्छादनयोः"* इति विकारे मयट् । "दाण्डिनायने"†-त्यादिना यलोपः निपातनात् । शाललता इव शालम् आश्रिता लता । मध्यपद-लोपी कर्म्मधारयः । एतेन रामस्य शालप्रांशुत्वं सूचितम् । तथा दिवः आकाशात् च्युता पतिता स्थास्नुः अचञ्चला, सा तु चञ्चला इति विशेषः । अचिरप्रभा विद्यु-दिव । तेजस्वित्वात् तन्वीत्वाच्च तया समाधिः । शशाङ्कस्य चन्द्रस्य कान्तिः प्रभा तस्याः अधिदेवता अधिष्ठात्री देवता, प्रादिसमासः । तस्याः आकृतिरिव आकृतिः यस्याः तथोक्ता । उत्तरपदलोपी समासः । सौम्यत्वात् तथाभूता। मैथिलस्य अपत्यं स्त्रीति मैथिली, यद्वा मिथिलायां नगर्य्यां मिथिलाख्यभूभागे इत्यर्थः जाता, अयोनिसम्भवत्वात् पार्थिवी इत्यर्थः । अयोनिसम्भवत्वेन दिव्यत्वात् च लक्ष्मीत्वं सूचितं । सुता कन्या सीता, तस्य दशरथस्य सुताय पुत्राय ददे । दाधातोः कर्म्मणि लिट् । जनकेन इति अनुक्तं कर्तृपदम् उह्यम् । रामस्य ज्येष्ठत्वात् तस्यैव परिणयः कविना उक्तः न शेषाणाम् । उत्प्रेक्षा निदर्शना च अलङ्कारः। द्वादशाक्षरं वंशस्थम् वृत्तम् । "जतौ तु वंशस्थमुदीरितम् जरौ ।"

Change of V.—जनकः हिरण्मयीं जङ्गमां शाललताम् इव दिवः च्युतां स्थास्नुम्, अचिरप्रभामिव...अधिदेवताकृतिम् सुताम् मैथिलीम् ददौ ।

Derivation.—सुता—सु-क्त । सवति लट्, असौषीत् लुङ् । नतु सूते।

---

* "मयट् वा एतयोः भाषायाम् अभक्ष्याच्छादनयोः ।" एतयोः अर्थात् विकारे अवयवे च अर्थे मयट् वा स्यात् भाषायाम् । पक्षे अण् । भक्ष्यार्थे आच्छादनार्थे तु केवलम् अण् । यथा अश्ममयम् आश्मनम् । भक्ष्यादौ तु, मौद्गम् (अण्), कार्पासम् (अण्) ।

† दाण्डिनायन हास्तिनायन आथर्वणिक...हिरण्मयानि॥

आकृतिः—आक्रियते अनया इति आकृतिः। आ-कृ-करणे क्तिः। स्थास्नुः—स्था-स्नुः। मैथिली—मिथिला-अण्, ङीप्। हिरण्मयी—हिरण्य-मयट्, नि०। च्युता—च्यु-क्त। अयते लट्, अध्योष्ट लुङ्।

47. মৈথিলীকে দেখিলে বোধ হয় যেন শালবৃক্ষাশ্রয়িণী হিরণ্ময়ী লতা, যেন আকাশ বিচ্যুত স্থির বিদ্যুৎলতা, যেন চন্দ্রমার আভার অধিষ্ঠাত্রী দেবতা। জনক এইরূপ কন্যা দশরথের পুত্রের হস্তে সমর্পণ করিলেন।

(By Janaka) was given his daughter the princess of Mithila in marriage to his (Dasaratha's) son, daughter, that looked like a moving gold creeper resting of shala tree or one like the immoveable lightning dropped from the sky, or the guardian angel of the moon light.

Q. Show the significance of शाललता। Ans. शालवृक्षाश्रिता लता शाललता। शाललता यथा शालवृक्षमाश्रित्य वर्त्तते, सीता तथा रामम् आश्रितवती। उपमानभूतेन शालेन रामस्य शालप्रांशुत्वम् द्योतितम्। शालप्रांशुलक्षणम् यथा "यः पद्मलोचनः छत्रध्वजवज्राङ्कितांघ्रिकः। चतुर्हस्तः स्वहस्तेन शालप्रांशुः स उच्यते॥" Q. Expound the samas in अचिरप्रभा। Ans. अचिरं प्रभा यस्याः सा अचिरप्रभा। सुप्सुपेति समासः। अथवा अचिरा इति विशेषणपदम्। अचिरा प्रभा यस्याः सा, बहुव्रीहिसमासः। Q. Explain the allusion in शशाङ्क। Ans. दक्षस्य अपराः दुहितॄः अवमत्य केवलायां रोहिण्याम् बद्धप्रेमा इति उपयुक्त दक्षेण शप्तः चन्द्रमाः क्षयरोगम् प्राप्तः, पुनः स्वर्वैद्येन उपदिष्टः शशम् अङ्के धारयामास इति पौराणिकी वार्त्ता। Q. Expound the samas in अधिदेवताकृतिः। Ans. अधिष्ठात्री देवता अधिदेवता। प्रादिसमासः। तस्याः आकृतिरिव आकृतिः यस्याः सा अधिदेवताकृतिः। "सप्तम्युपमानपूर्व्वस्य च उत्तरपदलोपः।" इति उत्तरपदलोपी समासः। ४७।

लब्धां ततो विश्वजनीनवृत्ति-
स्तामात्मनीनामुदवोढ़ रामः ।
सद्रत्नमुक्ताफलभर्म्मभूषां
संबृंहयन्तीं रघुवंश्यलक्ष्मीम् ॥ ४८ ॥

48. Principal part :—ततः तां रामः उदवोढ़ । Adj. to ताम् —लब्धाम्, आत्मनीनाम्, सद्रत्नमुक्ताफलभर्म्मभूषाम् and संबृंहयन्तीम् । रघुवंश्यलक्ष्मीम् object to संबृंहयन्तीम् । Adj. to रामः—विश्वजनीनवृत्तिः ।

Prose order :—ततः विश्वजनीनवृत्तिः रामः लब्धाम् आत्मनीनां, सद्रत्नमुक्ताफलभर्म्मभूषां, रघुवंश्यलक्ष्मीं संबृंहयन्तीं ताम् उदवोढ़ ।

Substance :—अथ रक्षोवधादिना भुवनहितकारी रामः एवम् आत्मप्रदत्ताम् उत्कर्षवतीम् नानारत्नादिभूषिताम् रघूणाम् सम्पदम् वर्द्धयन्तीम् सीताम् उदूढ़वान् ।

Explanation in tika form :—ततो दानानन्तरं विश्वजनेभ्यः हिता विश्वजनीना विश्वेषां मङ्गलकरीत्यर्थः । "आत्मन् विश्वजने"*त्यादिना खः (ईन) तथाभूता वृत्तिः व्यवहारो यस्य तथोक्तः रामः लब्धां धनुर्भङ्गेन अधिगताम्,आत्मने हिताम् आत्मनीनाम् । पूर्ब्ववत् "आत्मन् विश्वजने"त्यादिना खः । सद्रत्नानि उत्कृष्टरत्नानि मुक्ताफलानि भर्म्माणि स्वर्णानि च तेषां भूषा अलङ्कारः यस्याः तथोक्ताम् "हेम स्वर्णं जातरूपं सुवर्णं भर्म्म हाटकम्" इति हलायुधः, [भर्म्मशोभामिति पाठे तैः शोभते इति पचाद्यच् । अथवा सती उत्कृष्टा रत्नादिशोभा यस्याः, तैरलङ्कृतत्वात्, ताम्] तथा रघुवंशे भवा रघुवंश्या सा चासौ लक्ष्मीश्चेति तां रघुवंश्यलक्ष्मीमिति पाठे, रघुवंशस्य लक्ष्मीः इति विग्रहः । रघुवर्ग्यलक्ष्मीम् इति च पाठे रघुवर्गे भवा तादृशी लक्ष्मीः इति विग्रहः । संबृंहयन्तीं सम्यक् बहुलीकुर्व्वन्तीं चारित्रमहिम्ना

---

* "आत्मन् विश्वजन भोगोत्तरपदात् खः" । after the words आत्मन् विश्वजन and after भोग as the final term in a compound, let there be the affix ख (ईन) । (Bal).

वर्द्धयन्तीम् इत्यर्थः। बहुलशब्दात् तत्करोतीति णिचि इष्टवद्भावात् "प्रियस्थिर"-त्यादिना † बंहादेशः। अतः शतृप्रत्ययः। तां सीतां उदवोढ़ परिणीतवान्। वहेः "स्वरितेत्यादिना"‡ कर्त्तुः क्रियाफलविवक्षया आत्मनेपदम्। इन्द्रुपजातिः।

Change of V.—लब्धा विश्वजनीनकर्मणा सा आत्मनीना उदवाहि रामेण सद्रत्नमुक्ताफलभर्म्मभूषा संबंहयन्ती.....।

Derivation :—लब्धा—लभ-कर्म्मणि क्तः। लट् लभते। लुङ् अलब्ध। विश्वजनीन—विश्वजन-खः। आत्मनीन-आत्मन्-खः। उदवोढ़—उत्-वह लुङ् त। लट् वहति, वहते। लुङ् अवाक्षीत्, अवोढ़। लिट् उवाह, ऊहे। संबंहयन्तीम्—सं-बंहि (बहुल-णिच्) शतृ द्वितीया।

48. যে রামচন্দ্রের প্রত্যেক কার্য্য জগতের হিতসাধন করে, তিনি আত্মোৎকর্ষবতী মণিমুক্তাস্বর্ণ ভূষিতা পণলব্ধ সীতাকে বিবাহ করিলেন। সীতার (চরিত্রমহিমায়) রঘুবংশীয়দিগের শ্রী আরও উজ্জ্বল হইয়াছিল।

Her, thus obtained and decorated with gold, jewels and pearls of excellent quality, did marry Rama, all whose deeds were meant for the good of the universe. She was beneficial to herself (doting on a deserving husband) and aggrandized the fortune of Raghu's dynasty.

Q. Show the propriety of the adjective सद्रत्न-

---

† "प्रिय स्थिर स्फिर उरु बहुल गुरु वृद्ध तृप्र दीर्घ वृन्दारकाणाम् प्र स्थ स्फ वर् बंहि गर् वर्षि त्रप् द्राघि वृन्दाः।

‡ स्वरित ञितः कर्त्रभिप्राये क्रियाफले।" स्वरितेतो ञितश्च धातोः आत्मनेपदं स्यात् कर्तृगामिनि क्रियाफले। After a verbal root distinguished by an indicatory vowel circumflexly accented or by an indicatory ञ्, when the direct fruit of the action accrues to the agent, let there be आत्मनेपद। [Bal.] Thus वहञ् प्रापणे has the indicatory ञ् and the direct fruit of marriage accrues to Rama the agent.

सुप्रातमासादितसम्मदं तद्-
वन्दारुभिः संस्तुतमभ्ययोध्यम्।
अश्वीयराजन्यकहास्तिकाढ्य-
मगात् सराजं बलमध्वनीनम् ॥ ४८ ॥

त्वताफलभर्म्मभूषाम्। Ans. "कन्याप्येवं पालनीया शिक्षणीयातियत्नतः। देया वराय गुणिने धनरत्नसमन्विता ॥" इति शास्त्रकारवचनप्रामाण्यात् रत्नादिभूषणत्वम्। Q. Explain the epithet आत्मनीनाम्। Ans. आत्मने हिता आत्मनीना। स्वोत्कर्षविधात्री। सन्नर्त्तरि मनः निवेशयन्ती 'सन्नर्त्तृप्रतिपादिता कन्या उभयकुलं तारयति' इति कथनात् अत्यर्थम् उत्कर्षम् लेभे इति भावः। Q. Comment on the different meanings of रघुवंशलक्ष्मीम्। Ans. See above. Q. Give the etymological interpretation of रामः। Ans. "राशब्दो विश्ववचनो मश्चापीश्वरवाचकः। विश्वानामीश्वरो योहि तेन रामः प्रकीर्त्तितः।" Q. Comment on संवेशयन्तीम्। Ans. See above। ४८।

49. Principal part :—तत् बलं अभ्ययोध्यम् अगात्। The rest are adj. to बलम्। वन्दारुभिः=nominative to संस्तुतम्।

Prose order :—सुप्रातम् आसादितसम्मदं वन्दारुभिः संस्तुतम् अश्वीयराजन्यकहास्तिकाढ्यं सराजम् अध्वनीनं तत् बलं अभ्ययोध्यम् अगात्।

Substance :—प्रातर्यस्य शुभम् असूचयत्, पथि सुखं गच्छत् तत् सैन्यं अश्वादिभिरुपचितं सत् सानन्दं तथा वैतालीयैः संस्तुतम् अयोध्यां प्रति चलितम्।

Explanation in tika form .—शोभनं निरुपद्रवत्वात् प्रातः दिनमुखं यस्य तत् सुप्रातं "सुप्रात सुश्व सुदिव शारिकुक्ष चतुरश्र एणीपद अजपद प्रोष्ठपदाः" इति अच्प्रत्ययो निपातः। आसादितः प्राप्तः सम्मदः हर्षो येन तथोक्तम् "मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः" इत्यमरः। "प्रमदसम्मदौ हर्षे" इति अप्प्रत्ययः। [अन्यत्र प्रमादः सम्मादः] वन्दारुभिः स्तुतिपाठकैः "वन्दारुरभिवादके" इत्यमरः। संस्तुतं कृतस्तवम् "शृवन्द्योरारुः" इति आरुप्रत्ययः। अश्वानां समूहः

अश्वीयं "द्वन्द्वे लश्वीयमाश्ववत्" इत्यमर: । "केशाश्वाभ्यां यञ्छौ" अन्यतरस्याम् इति छ: । राजन्यानां समूह: राजन्यकम् "गोत्रोक्षोष्ट्र"त्यादिना वुञ् । हस्तिनां समूह: हास्तिकं "अचित्त हस्ति धेनोष्ठक्" इति ठक् । अश्वीयञ्च राजन्यकञ्च हास्तिकञ्च तत् अश्वीयराजन्यकहास्तिकम् "द्वन्द्वश्च प्राणि तूर्य्य सेनाङ्गानाम्" इति सेनाङ्गत्वात् एकवद्भाव: । तेन आढ्यम् उपचितम् । तथा राज्ञा सह विद्यमानं सराजं राजसहितं अनवच्छिन्नं युगपद् वा इत्यर्थ: । साकल्ये यौगपद्ये वा अव्ययीभाव: । "अनश्च" इति टच् समासान्त: । अध्वनीनं अध्वानम् अलंगामीति अध्वनीनं "अध्वनो यत्खौ" इति ख: । तत् बलं दशरथसैन्यं "बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययो:" इति मेदिनी । अभ्ययोध्यम् अयोध्याभिमुखं "अभिप्रती आभिमुख्ये" इति अव्ययीभाव: । अगात् प्रतस्थे । इणो लुङ् । इन्द्रवज्रोपजाति: ।

Change of V.—......सुप्रातेन आसादितसम्मदेन तेन......संस्तुतेन...हास्तिकाढ्येन अगायि सराजेन बलेन अध्वनीनेन ।

Derivation.—आसादित—आ-सद-णिच्-कर्म्मणि क्त: । लट् आसादयति । लुङ् असीषदत् । सम्मद—सम्-मद-अप् । वन्दारु—वन्द-आरु: । संस्तुतम्—सं-स्तु-कर्म्मणि क्त: । अश्वीयम्—अश्व-छ: । राजन्यकम्—राजन्य-वुञ् । हास्तिकम्—हस्ति-ठक् । अगात्—इ-लुङ् द । लट् एति । लङ् ऐत् । अध्वनीनम्—अध्वन् ख: ।

পথে স্বচ্ছন্দগামী রাজসনাথ হস্ত্যশ্বযোধবৃন্দাধিষ্ঠিত সৈন্যমণ্ডল শুভপ্রাতঃ [illegible] বৈতালীয়দিগের স্তুতিগীতির সহিত, সানন্দে অযোধ্যাভিমুখে যাত্রা করিল ।

The army abounding in a large number of horse, the military men and elephants, honored by the presence of the king, having the dawn ominous, and praised by the bards, proceeded with great delight as a body of expert travellers towards Ayodhya.

Q. Comment on सुप्रातम् । Ans. See above. Q. Expound the samas in अभ्ययोध्यम् । If अभि be disjointed, what should be their forms ? Ans. अयोध्याम्

विशङ्कटो वक्षसि बाणपाणिः
सम्पन्नतालद्वयसः पुरस्तात् ।
भीष्मो धनुष्मानुपजान्वरत्नि-
रैति स्म रामं पथि जामदग्न्यः ॥ ५० ॥

अभि इति अभ्ययोध्यम् । "अभि प्रतो आभिमुख्ये" इति अव्ययीभावः । असमासे तु अभि अयोध्याम् इत्येव स्यात् । अत्र कर्मप्रवचनीय योगे द्वितीया । ४९ ।

50. Principal part :—पथि जामदग्न्यः पुरस्तात् रामम् ऐति स्म । The rest are adjectives to जामदग्न्यः । वक्षसि=अवच्छेदे सप्तमी ।

Prose order :—पथि, वक्षसि विशङ्कटः, बाणपाणिः, सम्पन्नतालद्वयसः भीष्मः धनुष्मान्, उपजान्वरत्निः जामदग्न्यः पुरस्तात् रामम् ऐति स्म ।

Substance :—तालद्वयवत् प्रांशुः विशालवक्षाः, आजानुलम्बितबाहुः भीषणः परशुरामः धनुरादाय, गृहीत्वा च बाणं हस्तेन, रामम् समुपागतः ।

Explanation in tika form :—एवमस्य गच्छतः पथि मार्गे, वक्षसि [अवच्छेदे सप्तमी] उरसि विशङ्कटः विशालः "विशङ्कटं पृथु बृहद्विशालं पृथुलं महत्" इत्यमरः । "वेः शालच्छङ्कटचौ" इति शङ्कटच् । बाणः पाणौ अस्येति बाणपाणिः धृतायुधः । "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" इति सप्तम्यन्तस्य परनिपातः । सम्पन्नः परिणतः विशालः इति यावत्, यः तालः तालद्रुमः स प्रमाणं यस्य तथोक्तः । "प्रमाणे द्वयसज्दघ्नञ्मात्रचः" इति द्वयसच्प्रत्ययः । उन्नततालद्रुमसम इत्यर्थः । भीयते अस्मात् इति भीष्मः भयानकः । अपादाने मक् । धनुष्मान् प्रशस्तधनुर्युक्तः । जानुनोः समीपे उपजानु, सामीप्ये अव्ययीभावः । तत्र अरत्निः विततांगुलिहस्तः यस्य स तथोक्तः । सुप्सुपेति समासः । प्रलम्बबाहुरित्यर्थः । "अरत्निस्तु निष्कनिष्ठेन मुष्टिना" इत्यमरः [निष्कनिष्ठेन विस्तृतकनिष्ठेन] "रत्न्यरत्नी स्त्रियौ हस्तौ बद्धमुष्टिततांगुलौ" इति अमररत्नमाला । "ना रत्निः कफोणौ हस्ते प्रकोष्ठे विततांगुलौ" इति रुद्रविश्वप्रकाशौ । तथाभूतः जमदग्नेरपत्यं जामदग्न्यः परशुरामः । गर्गादित्वात् यञ् । पुरस्तात् पूर्वस्यां

उद्ग्रीवमसौ राघवमाह्वतेदं
धनुः सबाणं कुरु मातियासीः।
पराक्रमज्ञः प्रियसत्कृतिस्तं
नम्रः क्षितीन्द्रोऽनुनिनीषुरूचे ॥ ५१ ॥

दिशि भवतो वा। पूर्व्वस्मात् अस्ताति:। रामम् दाशरथिम् ऐति स्म आगतवान्। आङ्पूर्व्वात् इणो लट। अयोगे भवतीतार्थः। वृत्तम् उपजातिः।

Change of V.—विशङ्कटेन बाणपाणिना सम्पन्नतालद्वयसेन भीष्मेण धनुष्मता उपजान्वरत्निना जामदग्न्येन रामः एयते स्म।

Derivation. – विशङ्कट—वि-शङ्कटच्। पुरस्तात्—पूर्व्व-अस्ताति:। भीष्मः—भी-अपादाने मक्। धनुष्मान्—धनुष्-मतुप्। जामदग्न्यः—जमदग्नि यञ्। ऐति—आ-इण-लट् ति। लुङ् अगात्।

• পথিমধ্যে বিশালবক্ষা উন্নত তালবৃক্ষ সমান, আজানুলম্বিত বাহু, ভীষণমূর্ত্তি, ধনুর্ধারী জমদগ্নিতনয় পরশুরাম বাণহস্তে রামচন্দ্রের সম্মুখে উপস্থিত হইলেন।

On the way Parasurama the son of Jamadagni with his chest extensive, and large arms touching the knee, presented himself as an archer before Rama, with arrows in his hand, and thus looking fierce.

Q. In what sense is मतुप् used in धनुष्मान्। Ans. प्रशस्तं धनुः विद्यते यस्य असौ धनुष्मान्। इति प्रशंसायां मतुप्। अथवा धनुषा संसृष्टः इति धनुष्मान्, संसर्गे मतुप्। तथाहि, "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायाम् भवन्ति मतुबादयः।" Q. Compare the विग्रहवाक्य in बाणपाणिः and वीणापाणिः। Ans. "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" इति बाणशब्दस्य प्रहरणार्थत्वात् सप्तम्यन्तस्य पाणिशब्दस्य परनिपातः। किन्तु वीणाशब्दस्य अप्रहरणार्थत्वात्, वीणायुक्तः पाणिः यस्य स वीणापाणिः इत्येवं समासवाक्यं भवेत्। Q. Give the meaning of सम्पन्नतालद्वयसः। Ans. See above. ।५०।

51. It consists of 4 sentences as below.

Prose order :—(1) असौ राघवम् उच्चैः आह्वत, (2) इदं धनुः सबाणं कुरु, (3) मा अतियासीः । (4) अथ पराक्रमज्ञः प्रियसन्ततिः नम्रः क्षितीन्द्रः अनुनिनीषुः (सन्) तम् ऊचे ।

Substance.—अथ स संग्रामाय तम् आकारयन् एवम् प्राह, मम धनुरिदं बाणयुक्तम् कुरु, माम् अतिक्रम्य न गन्तव्यम् । दशरथः तत्पराक्रमं जानन् सन्तानवात्सल्यात् तम् अनुनेतुम् उवाच ।

Explanation in tika form :—असौ परशुरामः राघवं रामम् उच्चैः महता ध्वनिना आह्वत स्पर्द्धया तस्य आह्वानं कृतवान् इत्यर्थः । "स्पर्द्धायामाङः" इति आत्मनेपदम् । इदं मदीयं धनुः सबाणं सशरं कुरु, एतावतैव पराजितोऽहमिति भावः । [अन्ये तु इदं त्वदीयं धनुः सबाणं कुरु धनुषि बाणमारोप्य युद्धाय सज्जो भव इत्यर्थम् आहुः । तन्न साधु, इदमिति स्वहस्तनिर्दिष्टत्वात्, रामायण-विरोधाच्च ।] मा अतियासीः मा अतिक्रम्य गच्छः । "माङि लुङ्" इति विधेर्लिङि लुङ् । अथ पराक्रमं परशुरामस्य विक्रमं जानातीति पराक्रमज्ञः विदितजामदग्न्यबल इत्यर्थः । प्रिया सन्ततिः सन्तानो यस्य सः प्रियसन्ततिः । यतः परशुरामस्य क्षत्रियान्तकारि वीर्य्यं जानाति यतश्च रामः अस्य अतीव प्रियः अतएव नम्रः प्रणतः क्षितीन्द्रः राजा अनुनिनीषुः अनुनेतुमिच्छुः सन्, तम् ऊचे, प्रसादयितुं परशुरामम् उक्तवान् । ब्रुवो लिट् । अत्र काव्यलिङ्गम् अलङ्कारः । तल्लक्षणं यथा, "काव्यलिङ्गम् हेतोर्वाक्यपदार्थता ।" वृत्तम् उपजातिः ।

Change of V.—अमुना राघवः आह्वायि ।... क्रियताम्, मा अतियायि । पराक्रमज्ञेन प्रियसन्ततिना स नम्रेण क्षितीन्द्रेण अनुनिनीषुणा...... ।

Derivation.—आह्वत—आ-ह्वे-लुङ् त । लट् आह्वयते । लिटि आजुहुवे । धनुः—धन-उस् । अतियासीः—अति-या-लुङ् स । माङ्योगे अमागम निषेधः । सन्तति—सम्-तन-क्तिः । नम्र—नम-रक् । लुङ् अनंसीत् । अनु-निनीषुः—अनु-नी-सनन्त-उः । ऊचे—ब्रू-लिट् ए ।

তিনি রামচন্দ্রকে স্পর্দ্ধার সহিত কহিলেন, আমার এই ধনুকে বাণ যোজনা কর। আমাকে অতিক্রম করিয়া যাইতে পারিবে না।

अनेकशो निर्ज्जितराजकस्त्वं
पितॄनतार्प्सीर्नृपरक्ततोयैः ।
संक्षिप्य संरम्भमसद्विपक्षं
कास्थार्भकेऽस्मिंस्तव राम रामे ॥ ५२ ॥

সন্তান বৎসল ক্ষিতিপতি তাঁহার পরাক্রম জানিতেন, সুতরাং বিনম্র-ভাবে সানুনয়ে বলিতে লাগিলেন।

Have this bow ready with an arrow, you can't avoid me, said he aloud to Raghab; challenging the latter to a fight. The lord of the earth dotingly attached to his son, being conscious of his prowess said humbly with a view to court his favour.

Q. Account for आत्मनेपद in ऊचे। Ans. "स्वरितञितः कर्त्रभिप्राये क्रियाफले।" इति कर्त्तरि क्रियाफलात् आत्मनेपदम्। Q. Give the gram. meaning of आहूत। Or show the force of आत्मनेपद in it. Ans. आहूत इत्यत्र आत्मनेपदविधानात् "स्पर्द्धायाम् आङः" इति स्पर्द्धार्थत्वम् गमितम्। Q. Comment gram. on मा अतियासीः। Ans. "माङि लुङ्" माङ्योगे लुङ् सर्व्वकाले भवति इति विधेर्लिङि लुङ्प्रयोगः। "न माङ्योगे" इति अडागमप्रतिषेधः। ५१।

52. It consists of three sentences :—(1) त्वम् (कर्त्तृ) नृपरक्ततोयैः (करणैः) पितॄन् (कर्म्म) अतार्प्सीः।' Adj. to त्वम्—निर्ज्जितराजकः। अनेकशः—adv. to निर्ज्जित। (2) त्वम् (ऊह्यम् कर्त्तृपदम्) संरम्भम् (कर्म्म) संक्षिप्य (क्रिया)। Adj. to संरम्भम्—असद्विपक्षम्। (3) हे राम, रामे (अधि) तव का आस्था। Adj. to रामे—अस्मिन्, अर्भके।

Prose order :—अनेकशः निर्ज्जितराजकः त्वं नृपरक्ततोयैः पितॄन् अतार्प्सीः। असद्विपक्षं संरम्भं संक्षिप्य। हे राम अस्मिन् अर्भके रामे तव का आस्था ?

Substance :—त्वम् बहुशः क्षत्रियान् निर्ज्जित्य तेषां शोणितैः पितृतर्पणं कृतवान्। क्रोधं प्रभो संहर, नास्ति ते कश्चित् प्रबलः शत्रुः। का ते आस्था बालके रामे इति दशरथः अवोचत्।

Explanation in tika form :—अनेकशः अनेकेषु समयेषु, अव्ययपदम्, अधिकरणे सप्तमी। अथवा अनेकवारमिति क्रियाविशेषणम्। निर्ज्जितं पराजितं राजकं राज्ञां समूहो येन स निर्ज्जितराजकः। वुञ्प्रत्ययः। त्वं नृपाणां राज्ञां रक्तान्येव तोयानि सलिलानि तैः पितॄन् पूर्व्वान् अतार्प्सीः प्रीणितवानसि। पितृवधामर्षोद्दीप्तः एकविंशतिवारान् निःक्षत्रीकृत्य तद्रक्तैः पितॄन् अतर्पयः। अधुना, असन् अविद्यमानः विपक्षः प्रतिपक्षः यस्मिन् तथोक्तं, निर्ज्जितराजकत्वात्, संरम्भं कोपं संक्षिप्य संहर। रामो विपक्ष इति चेदाह, हे राम परशुराम अस्मिन् मत्पुत्रे अर्भके बालके रामे तव का आस्था, क आदरः अस्ति, नैवेत्यभिप्रायः। "किं महोरगविसर्पिविक्रमो राजिलेषु गरुड़ः प्रवर्त्तते।" रक्ततोयैः इत्यत्र परिणामालङ्कारः। वृत्तम् उपजातिः।

Change of V.—निर्ज्जितराजकेन त्वया पितरः [अवर्षत वा] अतर्पिषत। असद्विपक्षः संरम्भः संक्षिप्यताम्।......कया आस्थया भूयते।

Derivation.—निर्ज्जित—निर्-जि-कर्म्मणि क्तः। लट् जयति। लुङ् अजैषीत्। लिट् जिगाय। राजक—राजन्-समूहे वुञ्। अतार्प्सीः—तृप-लुङ् स। लट् तृप्यति तर्पति वा। लुङ् अतर्पीत्, अत्राप्सीत्, अतार्प्सीत्, अतृपत्। रक्त—रन्ज क्तः। संक्षिप्य—सम्-क्षिप-ल्यप् हि। (दिवादि) क्षिप्यति, (तुदादि) क्षिपति। लुङ् अक्षैप्सीत्। संरम्भ—सम्-रभ भावे घञ्।

ক্রোধের বিষয় যে শত্রু তাহা যখন নাই, তখন ক্রোধ সংবরণ কর। বহুবার রাজবৃন্দ বিজিত করিয়া তাহাদের শোণিত বারি দ্বারা পিতৃলোকের তর্পণ করিয়াছ। হে রাম! বালক রামচন্দ্রে তোমার কিসের আস্থা।

O thou Rama, restrain thy anger for want of its object, viz. the enemies. Thou hast many times conquered the kings, and have contented the manes by the blood as by water. What importance dost thou attach to a boy like Rama?

अजीगणद्दाशरथं न वाक्यं
यदा स दर्पेण तदा कुमारः ।
धनुर्व्यकार्षीद्‌गुरुबाणगर्भं
लोकानलावीद्विजितांश्च तस्य ॥ ५३ ॥

Q. In what sense is शस् (अशस्) used in अनेकशः and parse it. Ans. अनेकशः अनेकेषु समयेषु, इति बह्वर्थात् अधिकरणवाचिनः 'अनेक'शब्दात् शस्। Parsing—अधिकरणे सप्तमी। अथवा अनेकशः अनेकवारम्, वारार्थे अशस्। तथाहि वामनः "बह्वल्पार्थात् शस् कारकात् अन्यतरस्याम्" इत्यादौ अर्थग्रहणात् पर्यायेभ्योऽपि (वारेभ्योऽपि) भवति। यथा भूरिशः भूरिवारान् इत्यादि। Cf. "अनेकशः किन्नरराजकन्यकाः वनान्तसङ्गीतसखीररोदयत्" कु०। अनेकशः बहुवारम् (मल्लिनाथः) Parsing—अत्र क्रियाविशेषणम्। ५२।

53. 3 Principal sentences :—(1) यदा स दाशरथं वाक्यं न अजीगणत्। (2) तदा कुमारः गुरुबाणगर्भं धनुः व्यकार्षीत्। (3) तस्य विजितान् लोकान् च अलावीत्।

Prose order :—यदा स दर्पेण दाशरथं वाक्यं न अजीगणत् तदा कुमारः गुरुबाणगर्भं धनुः व्यकार्षीत्, तस्य विजितान् लोकान् च अलावीत्।

Substance :—यावत् परशुरामः दशरथस्य वचसि कृतादरोऽभूत्, तावत् रामः सबाणं धनुः आचकर्ष, तपसा अधिगतान् लोकांश्च विनष्टान् अकरोत्।

Explanation in tika form :—यदा स जामदग्न्यः दर्पेण मदेन हेतुना "दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः" इत्यमरः। दशरथस्य इदं दाशरथं। तस्येदमिति अण्। वाक्यं न अजीगणत् गणितवान्। गणेः लुङ्। तदा कुमारः रामः, गर्भयति मध्यवर्तिनं करोतीति गर्भः। पचाद्यच्। गुरुर्महान् बाणः भार्गवदत्तः सायकः गर्भो यस्य तथोक्तं धनुः गुर्व्विति धनुर्विशेषणं वा। व्यकार्षीत् आकृष्टवान्। तस्य परशुरामस्य विजितान् स्वप्रभाववशीकृतान्, लोकान् स्वर्गलोकान् अलावीत् उच्छेदयामास, समुच्छिद्यन्तामस्य लोका इति

जिते नृपारौ सुमनीभवन्ति
शब्दायमानान्यशनैरशङ्कम् ।
वृद्धस्य राज्ञोऽनुमते बलानि
जगाहिरेऽनेकमुखानि मार्गान् ॥ ५४ ॥

अमोघमस्त्रं मुक्तवानित्यर्थः। ततः प्रभृति तस्य सर्व्वं तेजोऽपहृतम् इति प्रसिद्धिः।
वृत्तमुपजातिः।

Change of V.—अगणि......तेन कुमारेण ......अकर्षि, लोका विजि-
ताश्च अलाविषत (अलोषत)।

Derivation.—अजीगणत्—(चुरादिः) लुङ् द, पक्षे अजगणत्। लट्
गणयति। दाशरथं—दशरथ-अण्। दर्पं—दृप-भावे अप्। लट् दृप्यति। लुङ्
अदर्पीत्, अद्राप्सीत्, अदार्प्सीत् अदृपत्। व्यकार्षीत्—वि-कृष-लुङ् द। पक्षे
अक्राक्षीत् अकृक्षत्। अलावीत्—लू-लुङ् द। लट् लुनाति, लुनीते। लुङ्
अलावीत्, अलविष्ट।

যৎকালে পরশুরাম দর্পহেতু দশরথ কথিত বাক্য অগ্রাহ্য করেন,
তখন রামচন্দ্র প্রকাণ্ড বাণ যোজনা করিয়া ধনুঃ আকর্ষণ করিলেন,
এবং পরশুরাম স্বর্লোক আদি যে সকল লোক জয় করিয়াছিলেন
তাহার উচ্ছেদ করিলেন।

When he did not, in arrogance, count the speech of Dasaratha, the prince bent the bow with a heavy arrow in it, and destroyed the worlds brought under his control.

Q. **Explain the fourth line.** Ans. भार्गवप्रदत्तं बाणं
धनुषि संयोज्य, रामः, न मेऽस्त्रं विफलं भवेत्, तत् कथ्यतां कं ते तपसा विजितं
लोकम् उच्छेदयामीति। अथ भार्गवेण आदिष्टः स तस्य स्वर्लोकं रुद्धमकरोत्।
"प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज्ज सायकम्। भार्गवस्य सुकृतोऽपि
सोऽभवत् स्वर्गमार्गपरिघो दुरत्ययः।" ५३।

54. Principal part :—बलानि अशङ्कं मार्गान् जगाहिरे। Adj.

to बलानि—सुमनीभवन्ति, शब्दायमानानि and अनेकमुखानि । नृपारौ जिते सति (भावे सप्तमी) । वृद्धस्य राज्ञः अनुमते सति (भावे सप्तमी) । अश्नैः adv. to शब्दायमानानि ।

Prose order :—नृपारौ जिते सति, वृद्धस्य राज्ञः अनुमते च सति, सुमनीभवन्ति अश्नैः शब्दायमानानि बलानि अनेकमुखानि (सन्ति) मार्गान् अशङ्कं जगाहिरे ।

Substance :—परशुरामं विजितं दृष्ट्वा वृद्धेन राज्ञा चलितुमादिष्टानि, पूर्व्वं भयात् एकत्रसंहतं स्थितानि बलानि सानन्दम् उच्चैः कोलाहलं कुर्व्वन्ति निर्भयं चतुर्हिक्षु प्रचलितानि च पन्थानं प्राप्तानि ।

Explanation in tika form :—नृपाणां राज्ञाम् अरौ शत्रौ क्षत्रिय-कुलान्तके जामदग्न्ये जिते पराजिते सति । भावे सप्तमी । वृद्धस्य राज्ञो दशरथस्य अनुमते, भावे क्तः, सति इति शेषः, भावे सप्तमी, अनुमतौ सत्याम् इत्यर्थः । असुम-नांसि सुमनांसि भवन्ति सुमनीभवन्ति, च्विप्रत्ययः, "अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च" इति सलोपः । तथा अश्नैः उच्चैः शब्दायमानानि जयशब्दं कुर्व्वाणानि । "शब्द वेर कलहाभ्र कण्व मेघेभ्यः करणे" इति क्यङ् । बलानि सैन्यानि "स्थौल्य-सामर्थ्यसैन्येषु बलम्" इत्यमरः । अनेकमुखानि पृथग्भूतानि सन्ति, पूर्व्वं भयेन बहुलीभूतत्वात्, मार्गान् पथः अशङ्कं यथा तथा जगाहिरे आक्रान्तवन्ति । अनी-कानां बहुलात् बहुवचनमिति । वृत्त्यनुप्रासालंङ्कारः । वृत्तम् उपजातिः ।

Change of voice :—सुमनीभवद्भिः शब्दायमानैः...बलैः...अनेकमुखैः मार्गाः जगाहिरे ।

Derivation.—जिते—जि-कर्म्मणि क्तः । सुमनीभवन्ति—(सुमनस्-च्वि) सुमनी-भू-शतृ प्रथमा बहुवचनम् । शब्दायमानानि—(शब्द-क्यङ्) शब्दाय शानच् । अनुमते—अनु-मन-भावे क्तः । जगाहिरे—गाह-लिट् इरे । लट् गाहते । लुङ् अगाहिष्ट ।

ক্ষত্রিয়গণের শত্রু পরশুরাম পরাজিত হওয়াতে নৃপতির সৈন্যগণ অতিশয় আনন্দিত হইল। বৃদ্ধ নৃপতির আজ্ঞা হইবামাত্র তাহারা

अथ पुरुजवयोगान्नेदयद्दूरसंस्थं
दवयदतिरयेण प्राप्तमुर्व्वीविभागम् ।
क्रमरहितमचेतन्नीरजीकारितक्ष्मां
बलमुपहितशोभां तूर्णमायादयोध्याम् ॥ ५५ ॥

निर्ভয়ে উচ্চৈঃস্বরে আনন্দধ্বনি করিয়া নানামুখ হইয়া পথে চলিতে আরম্ভ করিল।

The enemy of the kings being vanquished, the forces grew very glad, and after the orders received from the old king, they, in shouts, took to the roads fearlessly, with their faces turned in all directions.

In English Explaination add :—The epithet अनेकमुखानि shows that the troops at first all looked up anxiously at the face of Parasurama and Rama, but now relieved at heart, they turned their vacant looks on all directions as they pleased. Or, as they all stood compact in fear, now moved in all directions to make sufficient space among them.

Q. Parse अनुमते। Ans. भावे सप्तमी। Q. Explain अनेकमुखानि। Ans. See above in English Explanation. Q. Explain the propriety of the gram. affix in सुमनीभवन्ति। Ans. अत्र च्विप्रत्ययेन, सैन्यानां पूर्व्वं व्याकुलत्वम् इदानीं प्रसन्नचित्तत्वं च गमितम्। ५४।

55. Principal part :—अथ बलम् अयोध्यां तूर्णम् आयात्। Enlargement of the subject—(1) पुरुजवयोगात् दूरसंस्थं नेदयत्, (2) अतिरयेण प्राप्तं उर्व्वीविभागं दवयत् (3) क्रमरहितम् and (4) अचेतत्। Adj. to अयोध्याम्—नीरजीकारितक्ष्माम् and उपहितशोभाम्।

Prose order :—अथ पुरुजवयोगात् दूरसंस्थं नेदयत्, अतिरयेण प्राप्तम् उर्व्वीविभागं दवयत्, श्रमरहितम्, अचेतत्, बलं नीरजीकारितक्ष्माम् उपहितशोभाम् अयोध्यां तूर्णम् आयात् ।

Substance :—अथ तत् बलं तथा वेगात् अयोध्याम् अगात् यथा तद्गमनकाले अधिकवेगात् दूरस्थितं द्रव्यं सहसा अन्तिकस्थम् अदृश्यत, तथा निकटस्थितं द्रव्यं सहसा अतिक्रमणात् शीघ्रं दूरगतम् अभवत् । आनन्दात् च तद्बलं अध्वखेदं न अजीगणत् ।

Explanation in tika form :—अथानन्तरम् पुरुर्महान् जवः वेगः तेन योगात् अतीव वेगवत्त्वात्, दूरे सन्तिष्ठते दूरसंस्थं, स्थाधातोः कः, दूरवर्त्तिनम् उर्व्वीविभागम् नेदयत् अन्तिकं कुर्व्वत्, अन्तिकशब्दात् समीपवाचिनः,'तत्करोतीति' णिच्, "अन्तिकबाढ़योर्नेदसाधौ" इति नेदादेशः । तथा अतिरयेण अतिवेगेन प्राप्तम् अधिगतम् उर्व्वीविभागं भूमिभागं दवयत् दूरीकुर्व्वत् । "स्थूलदूरे"*त्यादिना दूरशब्दस्य दवादेशः । श्रमरहितं अतिहर्षात् अपगतश्रमम् अतएव अचेतत् कियद्दूरमागतमित्यजानत् । चितीसंज्ञाने शतृ । बलं दशरथसैन्यं, निर्गताः रजांधूलिर्यस्येति नीरजाः, अनीरजाः नीरजाः कारिता निर्धूलीकारिता क्ष्मा भूमिर्यस्याम् ताम्. शिक्तसंमृष्टभूतलामित्यर्थः । "रजोऽयं रजसा सार्द्धं स्त्रीपुष्पगुणधूलिषु" इति अजयः । "क्ष्मावनिर्मेदिनी मही" इत्यमरः । उपहिता सम्पादिता शोभा यस्याः तथोक्तां ध्वजपताकादिभिः प्रापितदीप्तिम् अयोध्यां तूर्णं शीघ्रम् आयात् आगतम् । आ-यातेः लङ् । अत्र 'अथ'शब्दः माङ्गल्यसूचकः । तथोक्तम् "ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ ।" अत्र वृत्तं मालिनी । तल्लक्षणं यथा—"ननमयययुतेयं मालिनी भोगिलोकैः ।" भोगिन्=८, लोकाः=७, अतः पञ्चदशाक्षराङ्घ्रिः ।

---

* "स्थूल दूर युव ह्रस्व क्षिप्र क्षुद्राणां यणादिपरं, पूर्व्वस्य च गुणः ।" यण्=यवरल । There is the disappearance of यण्, as well as गुण (*i. e.* the substitution of ए ओ &c for इ उ &c) of the previous स्वर ।

न न म य य

ऽ ऽ ऽ । ऽ ऽ ऽ । ऽ ऽ ऽ । ऽ ऽ ऽ । ऽ ऽ ऽ ।

Change of V.—..नेदयता......दवयता श्रमरहितेन अचेतता बलेन नीरजीकारितया उपहितशोभा अयोध्या आयायत।

Derivation.—पृक्त—पृ-क्तः। नेदयत्—(अन्तिक-णिच्) नेदि-शतृ। संस्थ—सम्-स्था-कः। दवयत्—(दूर-णिच्) दवि-शतृ। उर्व्वी—(ऊर्णु-कु=उरु) उरु-ङीप्। रहित—रह-कर्म्मणि क्तः। अचेतत्—न-चित-शतृ। उपहित—उप-धा-कर्म्मणि क्तः। लुङ् अधात् अधित। तूर्णम्—त्वर-कर्त्तरि क्तः। आयात्—आ-या-लङ् द। लुङ् अयासीत्।

অনন্তর রাজসৈন্য সমধিক বেগ হেতু দূরকে নিকট ও নিকটকে দূর করিতে লাগিল। এবং পথক্লেশ অনুভব না হওয়াতে পথের দূরত্ব না জানিয়াই জলসেক দ্বারা ধূলিহীন ও শোভান্বিত অযোধ্যায় দ্রুত উপনীত হইল।

The king's army, nearing, for great speed, the distant objects and distancing, in swiftness, the ground already reached, came quickly to Ayodhya decorated and made dustless, not knowing the distance of the road passed over, as it felt no fatigue.

Q. Explain नेदयत् दूरसंस्थम् &c. Ans. वेगेन गच्छतः तस्य यत् प्रथमं सुदूरं दृष्टमासीत् तत् तेन शीघ्रं प्राप्तं सत् पुनः अतिक्रम्य गच्छतः तस्य सुदूरमभवत्। तथाहि शाकुन्तले, "न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात्।" Q. In what sense is अथ used here? Show its fitness. Ans. "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इति अमरवचनात् 'अथ' इत्यस्य अनन्तरार्थत्ववत् माङ्गल्यसूचकत्वमु गमितम्। सर्गशेषे माङ्गल्यशब्दप्रयोगात् काव्यं प्रथितं भवति। यथाह भगवान् भाष्यकारः। "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते &c." Q. Show the propriety of अयोध्या। Ans. सर्गशेषे 'अयोध्या'

इति मोक्षदः शब्दः प्रयुक्तः। तथाहि, "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारवती चैव सप्तैते मोक्षदायिकाः॥" अतः अनेन शब्देन काव्यस्य दोषहर्त्री पुनः शुभं द्योतितम्। उक्तञ्च, "देवतावाचकाः शब्दाः ये च भद्रादिवाचकाः। ते सर्वे नैव निन्द्याः स्युः लिपितो गणतोऽपि वा। अपिच, यः भार्गवादिभिरयोध्यः तस्य च पुरो अयोध्या इति ध्वनितम्। ५५।

The purport of the canto I.—आसीत् अयोध्यायाम् सत्यसन्धो गुणवान् दशरथनामा नृपतिः। तस्य तिस्रो भार्याः आसन्। अनपत्यतादुःखदग्धः स कदाचित् पुत्रीयं यज्ञम् अनुष्ठातुम् ऋष्यशृङ्गम् स्वां पुरमानिनाय। तेनानुष्ठितेन यज्ञेन राजा चतुरः सुपुत्रान् रामादीन् लेभे। कालेन वशिष्ठेन कृतोपनयनैः तैः वेदोऽङ्गवान् अध्यगायि, शिक्षितानि च शस्त्राणि। अथैकदा रक्षोभिरुपद्रुतो विश्वामित्रः राजानमुपेत्य रामं ययाचे। अनिच्छन्नपि राजा सुतस्य गमनमनुजज्ञे। अथ लक्ष्मणेनानुसृतो रामः मुनिना सह प्रतस्थे।

The purport of the canto II.—अथ विश्वामित्रेण सार्द्धम् स्वपुरी निर्याय रामः शरच्छोभाम् दिक्षु अवलोकयामास। स च "बहुधाताम्रांसि नवोत्पलानि वनानि चाशोभत षट्पदानाम्।" कुत्रचित् प्रदेशे भ्रमराकुलितानि पद्मानि सधूमाग्निशोभाम् धारयामासुः। वनानि तोयानि च नेत्रकान्तैः कुसुमैः परस्परशोभाम् अपश्यन्। भ्रमरगीतिः हंसनादश्च अतिमधुरः अश्रावि। शरदि तस्याम् "न तज्जलं यन्न सुचारुपङ्कजं, न पङ्कजं तत् यदलीनषट्पदम्। न षट्पदोऽसौ कलगुञ्जितो न यः न गुञ्जितं तन्न जहार यन्मनः॥"

अथ विश्वामित्रः विद्यां जयाञ्च विजयाम् एनम् अध्यापिपत् ददौ चास्मै अस्त्रजातम्। या खलु सुकेतोर्यक्षस्य कन्या सुन्दपत्नी ताड़का अगस्त्येन पतिं निहतमुपश्रुत्य रोषात् तं धर्षयितुम् उद्यता, तेन च शप्ता राक्षसी समभवत्, निहत्य तां तत्सुतञ्च मारीचम् रामः अरण्यं निरुपद्रवमकरोत्। अथ विश्वामित्रेण सादरं जनकपुरीं नीतः रामः शैवं धनुर्भङ्क्त्वा सीताम् उपयेमे। स्वपित्रा दशरथेन च सह अयोध्यां प्रत्यागच्छन् पथि परशुरामेण युद्धार्थमाहूतः रामः तम् जिगाय, अयोध्याञ्च निर्विघ्नम् समुपागतः।

तृतीयः सर्गः ।

वधेन संख्ये पिशिताशनानां
क्षत्रान्तकस्याभिभवेन चैव ।
आढ्यम्भविष्णुर्यशसा कुमारः
प्रियम्भविष्णुर्न स यस्य नासीत् ॥ १ ॥

तृतीयः—"द्वितीयः" इत्यस्मात् 'तीयः' इत्यस्य अनुवृत्तिः । ततः "त्रेः संप्रसारणञ्च" इति पूरणे तीयप्रत्ययेन तृतीय इति सिद्धम् । सर्गः—"सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु ।"

1. Principal part :—कुमारः यस्य न प्रियम्भविष्णुः स नासीत् । Adj. to कुमारः—आढ्यम्भविष्णुः । संख्ये (अधि) । पिशिताशनानां and क्षत्रान्तकस्य (सम्ब) । वधेन, यशसा and अभिभवेन [हेतौ तृतीया] ।

Prose order—संख्ये पिशिताशनानां वधेन क्षत्रान्तकस्य अभिभवेन च यशसा आढ्यम्भविष्णुः कुमारः यस्य न प्रियम्भविष्णुः स नासीत् एव ।

Substance :—राक्षसानां वधात् परशुरामस्य च पराभवात् रामः अतीव यशस्वी आसीत् । ईदृशः न कश्चित् अवर्त्तत यस्य न स सर्वदा प्रियोऽभूत् ।

Explanation in tika form :—संख्ये युद्धे पिशितं मांसं अशनं येषां ते पिशिताशनाः क्रव्यादाः राक्षसा इत्यर्थः, तेषां वधेन हननेन "हनश्च वधः" इति अनुपसर्गात् हन्धातोः अप्प्रत्यये वधादेशः । अन्तं करोति अन्तयति नाशयतीति अन्तः । पचाद्यच् स एव अन्तकः, स्वार्थे कः । क्षत्राणां क्षत्रियाणामन्तकः तस्य परशुरामस्य अभिभवेन पराजयेन च हेतुना "ऋदोरप्" इति अप्प्रत्ययः 'पिशिताशनानां' 'क्षत्रान्तकस्य' च उभयत्र कृद्योगे कर्मणि षष्ठी । चैव-शब्दौ निपातसमुदायः समुच्चये । अथवा एवशब्दो नासीदित्यनेन अन्वितः । यशसा कीर्त्त्या, अनाढ्यः आढ्यो भूतः आढ्यम्भविष्णुः "कर्त्तरि भुवः खिष्णुच्खुकञौ"* इति च्व्यर्थे

* In the sense of च्वि let there be खिष्णुच् and खुकञ्

खिणुच्। "अरुर्द्विषदजन्तस्य मुम्" इति मुमागमः। कुमारः रामः यस्य न प्रियम्भविष्णुः यस्मापि प्राक्‌प्रियो न जातः पश्चादपि तथैव न प्रियीभूतः स पुरुषः नासोदेव।, सर्व्वदा सर्व्वस्यैव प्रियोऽभूत् इत्यर्थः। पूर्व्ववत् खिणुच्, मुमागमश्च। वृत्तम् उपजातिः। लक्षणं यथा, "अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।"

Change of V.—आढ्यम्भविष्णुना कुमारेण प्रियम्भविष्णुना (अभूयत)।

Derivation.—वधः—हन-अप्। संख्यम्—संख्यायते परस्परनामोच्चारणं क्रियते अत्र इति संख्यम्। सम्-ख्या-घञर्थे कः। चत्र—(क्षण-क्विप=क्षत्) क्षत्-त्रै-कः। अभिभव--अभि-भू-अप्। आढ्यम्भविष्णुः—आढ्य (आ-ध्यै कः, निं)-भू-खिणुच्। प्रियम्भविष्णुः—प्रिय-भू-खिणुच् कर्त्तरि।

সংগ্রামে মাংসভোজী রাক্ষসগণেকে বধ করিয়া ও ক্ষত্রিয়ান্তক পরশুরামকে পরাজয় করিয়া কুমার অতিশয় যশস্বী হইলেন। এরূপ কেহই ছিল না তিনি যাহার প্রিয় হন নাই।

There was none of whom he was not a favourite, glorified as he was by fame for killing in a battle the demons, the flesh eaters, and for subjugating Parasurama the destroyer of the Kshatriyas.

Q. Show the force of and construcion in प्रियम्भविष्णुः न यस्य। Ans. रामः यस्य पूर्व्वमप्रियः पश्चात् च तथा अभवत् तादृशः कोऽपि नासीत्। रामः पूर्व्वम् उत्तरत्र च सर्व्वदैव सर्व्वेषां प्रिय आसीत् इत्यर्थः। For construction Cf. नतज्जलम् यत्र &c. Q. Show the force of double negative in the above sloka. Ans. नद्वयं निषेधनिवर्त्तनार्थम्। निषेधनिवर्त्तनेन च अभावस्यैव अभावो गम्यते। अतः एतादृशः कश्चिदपि नासीत् यः तस्य सर्व्वथा प्रियो नासीत् इति गम्यते। Q. Give the allusion in चत्रान्त-

---

instead of खि, after भू preceded by आढ्य, सुभग, स्थूल, पलित, नग्न, अन्ध and प्रिय। Thus—आढ्यम्भविष्णुः आढ्यम्भावुकः।

ततः सुचेतीकृतपौरभृत्यो
राज्येऽभिषेक्ष्ये सुतमित्यनीचैः ।
आघोषयन् भूमिपतिः समस्तं
भूयोऽपि लोकं सुमनीचकार ॥ २ ॥

कस्य । Ans. क्षत्रियेण निहतं पितरं श्रुत्वा परशुरामः वैरसाधनेच्छया एकविंशतिवारान् पृथ्वीं निःक्षत्रियामकरोत् इति पौराणिकी वार्त्ता । Q Decline तृतीय । Ans. तृतीयः तृतीयौ तृतीयाः तृतीयस्मै तृतीयाय तृतीयस्मात् तृतीयात्, तृतीयस्मिन् तृतीये । "तीयो ङिति" इति सर्व्वनाम वैकल्पम् । Q. What form should वध assume with a prefix? Ans. "हनश्च वधः" इति अनुपसर्गात् हन्धातोः अप् । उपसर्गयोगे तु घञादेशः, यथा, आघातः । १ ।

2. Principal part :—ततः भूमिपतिः (कर्त्तृ) भूयोऽपि लोकं (कर्म्म) सुमनीचकार । Enlargement of the agent भूमिपतिः—राज्ये सुतम् अभिषेक्ष्ये इति अनीचैः आघोषयन् । सुचेतीकृतपौरभृत्यः=Adj. to भूमिपतिः । समस्तम्=Adj. to लोकम् ।

Prose order :—ततः सुचेतीकृतपौरभृत्यः भूमिपतिः 'राज्ये सुतम् अभिषेक्ष्ये' इति अनीचैः आघोषयन् समस्तं लोकं भूयोऽपि सुमनीचकार ।

Substance :—राज्ञा सम्यक् पालनेन प्रसादीकृताः प्रजाः रामाभिषेकघोषणया पुनः सुखीकृताः ।

Explanation in tika form :—ततः प्रजानां प्रीतिलाभानन्तरं असुचेतसः सुचेतसः कृताः पौराः भृत्याः पुरवासिनः अमात्यादयश्च येन सः । दशरथाभिषेककाले, किमयं सम्यक् परिपालयिष्यति न वा इत्याशङ्कया पूर्व्वम् असुचेतसः पश्चात् सम्यक् परिपालनात् सुचेतसः कृताः येन तादृशः भूमिपतिः दशरथः, राज्ये राजकर्म्मणि पालने रक्षणे च, "पत्यन्तपुरोहितादिभ्यो यक्" इति पुरोहितादित्वात् यक् । सुतं रामम् अभिषेक्ष्ये अभिषिक्तं करिष्ये अहमिति शेषः । "स्वरितञितः"इत्यादिना आत्मनेपदम्, अभिषेकदोषाद्दोषयोः

स्वस्मिन् प्रयोगात्। इति अमीचैः महता ध्वनिना सुस्पष्टम् इत्यर्थः, आघोषयन् घोषणां कारयन् समस्तं लोकं प्रकृतिवर्गं भूयः पुनरपि सुमनीचकार आह्लादयामास। तदभिषेकमदृष्ट्वा विमनीकृतं जनं रामाभिषेकघोषणया सुमनसं चकार इति भावः। सुचेतस् सुमनस् शब्दयोः च्विप्रत्ययान्तयोः "अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च" इति सकारलोपः। रामदशरथयोरयं विशेषः यथा, प्रकृतयो दशरथराज्याभिषेककाले कीदृशोऽयं राजा भवेत् इति स्थिरीकर्त्तुम् असमर्थः विमना आसीत्, रामराज्याभिषेकात् पूर्व्वन्तु प्रजावर्गः, कथं न रामो राजा भवति इति उत्सुकोऽभूत् इति सर्व्वमवदातम्। काव्यलिङ्गमलङ्कारः। वृत्तमुपजातिः।

Change of V.—'सुतः अभिषेक्ष्यते'........भर्त्त्रा......आघोषयता भूमिपतिना समस्तः लोकः सुमनीचक्रे।

Derivation.—सुचेतीकृत—(सुचेतस्-च्वि:) सुचेती-कृ-कर्म्मणि क्तः। भृत्य—भृ-क्यप्। राज्य—राजन्-यक्। "लक्षाधिपत्यम् राज्यं स्यात् साम्राज्यं दशलक्षके शतलक्षे महेशानि महासाम्राज्यमुच्यते।" वरदातन्त्रम्। अभिषेक्ष्ये—अभि-सिच-लृट् से। लट् सिञ्चति, सिञ्चते। लुङ् असिचत्, असिचत, असिक्त। आघोषयन्—आ-घुष-णिच् शतृ। लट् आघोषयति (चुरादिः)।

অনন্তর যিনি পৌরগণ ও ভৃত্যবর্গকে (প্রজারঞ্জন গুণে) সন্তুষ্ট করিয়াছিলেন, (রামের রাজ্যাভিষেকের বিলম্ব দেখিয়া) প্রজাবর্গ অসন্তুষ্ট হওয়াতে, আমি জেষ্ঠ পুত্রকে রাজ্যে অভিষেক করিব এই আজ্ঞা ঘোষণা করিয়া তিনি প্রজাবর্গকে আবার প্রফুল্লিত করিলেন।

The lord of the earth who had once rendered cheerful the citizens and officers (for his good management) again pleased them by declaring aloud that He would place his son on the throne.

In English Explanation add ;—The word भूयोऽपि shows that the subjects were rather depressed in not finding Rama on the throne as an assistant, as they were once when Dasaratha was but a new king, not knowing his

आदिक्षदादीप्तकृशानुकल्पं
सिंहासनं तस्य सपादपीठम् ।
सन्तप्तचामीकरवल्गुवज्रं
विभागविन्यस्तमहार्घरत्नम् ॥ ३ ॥

true nature. By the king's good management their depression left them, and now by the loud declaration that he would make Rama the crown prince.

Q. Explain the force of भूयोऽपि । Ans. दशरथ-राज्याभिषेककाले प्रजावर्गः राजानं सर्व्वथा अजानन् विमनाः आसीत्, दशरथस्तु सम्यक् पालनेन तस्य चिन्ता अपनीता । इदानीं पुनः प्रजालोकः कथं न राजा रामं राज्ये अभिषेक्ष्यतीति विचिन्त्य आकुलितः अभूत्, दशरथस्तु रामराज्याभि-षेकघोषणया पुनः स्वस्थचित्तमकरोत् इति भूयोऽपि इत्यस्य सार्थकत्वम् । Q. Give the gram. meaning of सुमनीचकार । Ans. See above. Q. Is the word राज्य used here in its original sense ? Ans. राज्ञः कर्म्म इति राज्यम् । इति वैयाकरण-सम्मतार्थे एव राज्यपदं प्रयुक्तम् । Cf. Raghu I. 58. Where राज्य is used in the sense of सप्ताङ्गपरत्व । २ ।

3. Principal part of the sentence.—तस्य सिंहासनम् आदिक्षत् । The rest are adj. to सिंहासनम् ।

Prose order :—तस्य आदीप्तकृशानुकल्पं सपादपीठं सन्तप्तचामीकरवल्गु-वज्रं विभागविन्यस्तमहार्घरत्नं सिंहासनम् आदिक्षत् ।

Substance :—अथ राजा रामाय सपादपीठं सिंहासनमादिदेश । अथवा रामार्थं सिंहासनम् निर्म्मातुम् अधिकृतान् आदिदेश । अग्निशोधितेन उज्ज्वलेन स्वर्णेन सुशोभितं हीरकम्, तथा यथास्थानं विन्यस्तं महामूल्यं रत्नजातं तथा शोभयामास तत् सिंहासनं, यथा तत् प्रदीप्तहुताशन इव अज्ज्वाल ।

Explanation in tika form :—भूपतिः तस्य रामस्य । "क्रिया-

ग्रहणमपि कर्त्तव्यम्" इति इष्टेः चतुर्थीनियमात् अत्र सम्बन्धविवक्षायां षष्ठी। आदीप्तः ज्वलितः यः कृशानुः अग्निः आदीप्तकृशानुः "कृशानुः पावकोऽनल" इत्यमरः। तस्मादीषदूनं आदीप्तकृशानुकल्पं "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" इति कल्पप्। अग्निवत् उज्ज्वलम् पादपीठेन सहितं सपादपीठं, सन्तप्तैः उद्दीप्तैः प्रतप्तवदुज्ज्वलैरित्यर्थः। अग्निशोधितैः इति वाचस्पतिः। चामीकरैः सुवर्णैः वल्गूनि शोभितानि वज्राणि हीरकाणि यत्र तथाभूतम्। "चामीकरं जातरूपम् महारजतकाञ्चने" इत्यमरः। "वज्रं त्वस्त्री कुलिशशस्त्रयोः मणिवेधे रत्नभेदे" इति केशवः। तथाच विभागेषु विशिष्टदेशेषु विन्यस्तानि अर्पितानि महार्घाणि महामूल्यानि रत्नानि पद्मरागादीनि यत्र तथाभूतं सिंहासनम् सुवर्णनिर्म्मितं सिंहचिह्नितमासनम् "सिंहासनन्तु तत् हैमम्" इत्यमरः। आदिक्षत् आदिष्टवान्। दिशः लुङि। सन्तप्तचामीकरवल्गुवज्रं विभागविन्यस्तमहार्घरत्नम् अतएव आदीप्तकृशानुकल्पम् इत्यन्वये काव्यलिङ्गमलङ्कारः। रामस्य सिंहासनम् निर्म्मातुम् अधिकृतान् आदिक्षत् इत्ययम् अर्थश्च सुगमः।

Change of V.—आदिष्ट (भूमिपतिना)।

Derivation :—आदिक्षत्—आ-दिश-लुङ् द। लट् दिशति। आदीप्त—आ-दीप-कर्त्तरि क्तः। लट् दीप्यते। लुङ् अदीपि, अदीपिष्ट। कृशानुः—कृश-आनुक्। सन्तप्त—सम्-तप्-कर्म्मणि क्तः। विन्यस्त—वि-नि-अस-कर्म्मणि क्तः। लट् अस्यति। लुङ् आस्थत्। रत्नम्—रमयति इति रम्धातोः नः।

তিনি রামচন্দ্রের জন্য পাদপীঠ সমেত, সিংহাসনের আদেশ দিলেন। উহা তপ্তকাঞ্চনবৎ উজ্জ্বল সুবর্ণে সুশোভিত হীরক খণ্ডে খচিত ও বিভিন্ন প্রদেশে মহামূল্য রত্নে সুশোভিত হওয়াতে যেন প্রদীপ্ত অগ্নিবৎ প্রতীয়মান হইয়াছিল।

He ordered for a throne with a foot-stool, decorated by pieces of diamonds beset with gold as glowing as it appears in fire, and with valuable stones set in proper places and thus rendered as bright as the glowing fire.

In English Explanation Cf. "ज्योतींषि वर्त्तयति च प्रविभक्तरश्मि" शकु०।

प्रास्थापयत् पूगकृतान् स्वपोषं
पुष्टान् प्रयत्नाद्दृढगात्रबन्धान्।
सभर्म्मकुम्भान् पुरुषान् समन्तात्
पत्त्काषिणस्तीर्थजलार्थमाशु ॥ ४ ॥

Q. Can it be आदिशत? Ans. कर्त्तृगामिनि क्रियाफले आत्मनेपदं स्यात्, अत्र तु राजा कर्त्ता, क्रियाफलं तु रामे प्रयुक्तम्, अतः नात्र आत्मनेपदम्। Q. Give some equivalent words of स्वर्ण and वज्र। Ans. See above. Q. Account for षष्ठी in तस्य। Ans. तस्य रामस्य सिंहासनम् आदिशत्, रामाय परदिवसे सिंहासनारोहणार्थम् आदेशं प्रददौ इत्यर्थे कृते, "क्रियाग्रहणमपि कर्त्तव्यम्" इति चतुर्थीनियमात् विवक्षावशात् षष्ठी। रामस्य सिंहासनं निर्म्मातुम् अधिकृतान् आदिशत् इत्यर्थे अर्थे, रामस्य इत्यत्र शेषे षष्ठी। Q. Explain the reading सत्प्रचामीकरवर्णवज्रम्। Ans. सत्प्रं चामीकरं तस्य वर्णः, स इव वर्णो येषाम् तादृशानि वज्राणि रत्नानि यस्मिन् तत्। अत्र तु वज्रपदं रत्नार्थे प्रयुक्तम्, न तु केवलं हीरकार्थे। विभिन्नस्थानेषु रत्नदीप्त्या अग्निशिखाभ्रान्तिः गम्यते इति। ३।

4. Principal part of the sentence :—(सः) तीर्थजलार्थं पुरुषान् प्रयत्नात् (ल्यब्लोपे) समन्तात् (व्यं) आशु प्रास्थापयत्। The rest are adjectives to पुरुषान्।

Prose order :—(भूमिपतिः) पूगकृतान्, स्वपोषं पुष्टान्, दृढगात्रबन्धान् सभर्म्मकुम्भान् पत्त्काषिणः पुरुषान् तीर्थजलार्थं प्रयत्नात् समन्तात् आशु प्रास्थापयत्।

Substance.—राजा तीर्थेभ्यः स्वर्णकुम्भैः जलमानेतुं तादृशानेव जनान् प्रास्थापयत्, ये नाम सुदृढाः भारवहनक्षमाः,पादसञ्चरणपटवः विश्वस्ताः च इति।

Explanation in tika form :—भूमिपतिः दशरथः अपूगाः पूगाः कृताः तान् पूगकृतान् सङ्घीकृतान् गणशः प्रेषितानित्यर्थः। "पूगः क्रमुकवृन्दयोः" इत्यमरः। "श्रेण्यादयः कृतादिभिः"* इति समासः। स्वानां ज्ञातीनां पोषो

* श्रेणी एक पूग इत्यादयः कृत मित भूत इत्यादिभिः समस्यन्ते। "श्रेण्या-

यत्र तत् यथा तथा पुष्टान् पालितान्, यद्वा स्वपोषं पुष्टान् स्वेन धनेन पुष्टानित्यर्थः "स्वे पुषः" इति णमुल्। "अमैवाव्ययेन"† इति समासः, यथाविध्यनुप्रयोगश्च। तथा दृढ़ःगात्रबन्धो येषां तान् सुदृढ़ावयवान्, भारोद्वहनसमर्थानित्यर्थः। भर्म्म-कुम्भैः सुवर्णकलसैः, षष्ठीसमासः, सह विद्यमानान्, तथा पादौ कषितुं हिंसितुं शीलं येषामिति पत्काषिणः पदातीनित्यर्थः। सुप्यजातौ णिनिः। पादस्य च पदादेशः। "पदङ्घ्रिश्चरणोऽस्त्रियाम्" इत्यमरः। तथाभूतान् पुरुषान् दूतीन् तीर्थजलार्थं तीर्थजलान्याहर्त्तुं प्रयत्नात् प्रयत्नमाश्रित्य, ल्यब्लोपे पञ्चमी, आदरेण, समन्तात् सर्व्वासु दिक्षु आशु शीघ्रं प्रास्थापयत् प्राहिणोत्। प्रपूर्व्वात् स्थान्तात् तिष्ठतेः लङ्। वृत्तम् उपजातिः, पादशेषे ह्रस्वश्च गुरुवत्।

Change of V.—प्रास्थाप्यन्त पूगलताः......पुष्टाः......दृढ़गात्रबन्धाः... सभर्म्मकुम्भाः पुरुषाः···।

Derivation.—प्रास्थापयत्—प्र-स्था-णिच्-लङ् द्। लुङ् अतिष्ठिपत्। स्वपोषं—स्व-पुष-णमुल्। पुष्टान्—पुष-कर्म्मणि क्तः द्वितीया। लट् पुष्यति, पुष्णाति। लुङ् अपुषत्। कुम्भ—कु-उम्भ-अच्। पत्काषिणः—पाद-कष-णिनिः। भर्म्म—भृ-मनिन्।

তিনি তীর্থজল আহরণার্থ সযত্ন হইয়া, যাহারা পদব্রজে গমন করিতে পটু, ধনদানে প্রতিপালিত, ও দৃঢ়কায় তাহাদিগকে সুবর্ণ কুম্ভসহ সত্বর চতুর্দ্দিক দলে দলে প্রেরণ করিলেন।

He then took much care in sending men in groups in all directions, with gold vessels to fetch water from holy places, men who

---

दिषु च्वार्थवचनं कर्त्तव्यम्।" In a samas between श्रेण्यादि and क्तादि the विग्रहवाक्य should be like that of च्वि viz. अभूततद्भाव। So the विग्रहवाक्य runs thus—अपूगाः पूगाः कृताः, पूगकृताः। इत्यादि।

† When a samas takes place between an उपपद and an अव्यय, the अव्यय (the indeclinable) must be ending in अम्, as is the case here, viz. स्वपोषम्। पोषम् being terminated by अम from णमुल् which makes it indeclinable.



उच्चां प्रचक्रुर्नगरस्य मार्गान्
ध्वजान् बबन्धुर्मुमुचुः स्वधूपान् ।
दिशश्च पुष्पैश्चकरुर्विचित्रै-
रर्थेषु राज्ञा निपुणा नियुक्ताः ॥ ५ ॥

were rendered faithful with profuse gifts of money, who could travel on legs and had their frames strongly built.

Q. Show the propriety of पृथक्कृतान् । Ans. सङ्घशः प्रेरितान् । अन्यथा एकाकिनः कस्यचित् कस्मैचित् कार्य्याय प्रेरणात् कार्य्यसिद्धि-सम्भावना । Q. Show the formation and significance of स्वपोषं पुष्टान् । Ans. स्वेन धनेन पुष्टाः स्वपोषं पुष्टाः तान् । "स्वे पुषः" इति स्वोपपदात् पुष्धातोः णमुल् । धनदानेन सन्तुष्टचित्तान्, अन्यथा अर्थाभावात् दूरस्थिततीर्थगमनाक्षमत्वात् ते वञ्चयेयुः इति । Q. Decline स्व here. Ans. "स्वो ज्ञातावात्मनि, स्वं त्रिषु आत्मीये, स्वोऽस्त्रियां धने ।" इति धनार्थकस्य स्वशब्दस्य उभयलिङ्गविधानात्, "स्वमज्ञातिधनाख्यायाम्" इति धनार्थकस्य स्वशब्दस्य असर्व्वनामत्वात् च रूपम् यथा, पुंसि, स्वः स्वौ स्वाः ; क्लीबे स्वम् स्वे स्वानि, स्वाय स्वाभ्याम् इत्यादि । Q. What is the samas in स्वपोषं । Ans. "अन्वेव अव्ययेन" अव्ययेन उपपदस्य यः समासः स अमा एव भवति, न अन्येन । इति णमुलप्रत्ययान्तस्य अव्ययत्वात्, तस्य च अमन्तत्वात् समासः तत्पुरुषः । Q. Explain the formation of पत्काषिणः । Ans. पादौ कषितुं हिंसितुं शीलं येषाम् इति पत्काषिणः । "सुप्यजातौ णिनिस्ताच्छील्ये" इति तच्छीलतायां गम्यायाम् सुबन्तोपपदात् पादशब्दात् कष्धातोः णिनिः । अत्र च "हिम काषि हतिषु च" अर्थात् एषु परेषु पादस्य पद आदेशः स्यात् इति पदादेशः । ततः द इत्यस्य 'त्'कारः । ४ ।

5. It consists of several simple sentences as below.

Prose order :—(1) अर्थेषु राज्ञा नियुक्ताः निपुणाः (जनाः) नगरस्य

मार्गान् उक्षां प्रचक्रुः, (2) ध्वजान् बबन्धुः, (3) खधूपान् मुमुचुः, (4) दिशश्च विचित्रैः पुष्पैः चकरुः।

Substance.:—unnecessary.

Explanation in tika form:—अर्थेषु प्रयोजनेषु "अर्थो हेतौ प्रयोजने। निवृत्तौ विषये वाच्ये प्रकारद्रव्यवस्तुषु" इति हैमः। राज्ञा दशरथेन नियुक्ताः अधिकृताः निपुणाः कुशलाः पुरुषा नगरस्य मार्गान् उक्षांप्रचक्रुः सिक्तवन्तः। मार्गान् धूलिशून्यान् अकुर्व्वन् इत्यर्थः। ध्वजान् पताकाः बबन्धुः उत्थापितवन्तः। खे आकाशे धूपयन्ति दीप्यन्ते इति (खधूपाः, हाउइ इति भाषा) तान् मुमुचुः प्रक्षिप्तवन्तः। तथा दिशः विचित्रैः विविधवर्णैः पुष्पैः चकरुः छादितवन्तः। [केचित् नगरस्य उक्षां सेकं प्रचक्रुः, अग्राम् मार्गान् ध्वजांश्च बबन्धुरित्याहुः।] दीपकालङ्कारः। वृत्तम् उपजातिः।

Change of V.—...उक्षा प्रचक्रिरे....मार्गाः, ध्वजा बबन्धिरे, मुमुचिरे खधूपाः,......चकरिरे......निपुणैः नियुक्तैः।

Derivations:—उक्षां प्रचक्रुः—प्र-उक्ष-लिट् उस्। लट् उक्षति। लुङ् औक्षीत्। बबन्धुः—बन्ध-लिट् उस्। लट् बध्नाति। लुङ् अभान्त्सीत्, अबान्धाम्, अभान्त्सुः। मुमुचुः—लट् मुञ्चति। लुङ् अमुचत्, अमुक्त। धूप—धूप-(चुरादि)-कर्त्तरि अच्। लट् धूपयति। लुङ् अदूधुपत्, सन्तापने धूपायति। चकरुः—कॄ-लिट् उस्। लट् किरति। लुङ् अकारीत्।

নানাবিষয়ে সুনিপুণ জনগণ রাজনিদেশে নগরের পথ জলসিক্ত করিল, পতাকা উড্ডীন করিল, খধূপ (হাউই বাজি) উৎক্ষেপ করিতে লাগিল ও পুষ্পে নানা দিক্ আচ্ছন্ন করিয়া ফেলিল।

Clever men employed in various offices by the king, watered the streets of the city, put up the banners, sent up the rockets, and strewed in all directions flowers of various color.

Q. Impugne or justify उक्षांप्रचक्रुः। Ans. जयमङ्गलः उक्षान् इति पठित्वा, उक्षा उक्षणं सा विद्यते येषामिति उक्षाः,अर्श आदिभ्योऽच्। तान् उक्षान् सेकवतः प्रचक्रुः इति व्याख्यातवान्। यतः पाणिनिमते "इजादेश

मातामहावासमुपेयिवांसं
मोहादपृष्ट्वा भरतं तदानीं ।
तत् कैकयी सोढुमशक्नुवाना
ववार रामस्य वनप्रयाणम् ॥ ६ ॥

गुरुमतोऽनृच्छ:" इति आम्प्रत्यये प्रचक्रुरिति अनुप्रयोगो न घटते। "कृञ्चानुप्रयुज्यते लिटि" इत्यत्र प्रयुज्यते इत्यनेनैव प्रयोगे लब्धे कथं पुन: 'अनु' इति पुन: प्रयुक्तम्? अत: आह, अनेन अनुपदोपादानस्य विपर्य्यासव्यवहितनिवृत्ति: इति। मुग्धबोधमते "भुस्कृञामः" अर्थात् भू-अस्-कृ एते आमन्तादनुप्रयुज्यन्ते, इति सूत्रेण 'आम:' इत्यत्र पञ्चमीविधानादेव 'तत: परम्' इति गम्यते, तत् कथं पुन: 'अनु' इति अधिकं प्रयुक्तम्? अत: आह, 'अनुग्रहणं' उपसर्गक्रियाविशेषणव्यवधानेऽपि तदनुप्रयोगज्ञापनार्थम्। अत: 'प्र' इत्युपसर्गव्यवधानेऽपि न क्षति:। क्रमदीश्वरेण च "सम्प्रादिकाभ्यतिभिश्च" इति सूत्रं कृत्वा अयमेव श्लोक: निदर्शित:। अतश्च कालिदास: "तं पातयाम् प्रथममास पपात पश्चात्" "प्रभ्रंशयाम् यो नहुषं चकार।" इत्यादि। ५।

6. Principal sentence :—तदानीं कैकयी रामस्य वनप्रयाणं ववार। Adjunct to कैकयी—तत् सोढुम् अशक्नुवाना। Subordinate sentence—मोहात् भरतम् अपृष्ट्वा। Adj. to भरतम्—उपेयिवांसम्। मातामहावासम्—object to उपेयिवांसम्। मोहात्—हेतौ अर्थे।

Prose order :—तदानीं तत् सोढुम् अशक्नुवाना कैकयी मोहात् मातामहावासम् उपेयिवांसं भरतम् अपृष्ट्वा रामस्य वनप्रयाणं ववार।

Substance :—मोहात् रामस्य राज्याभिषेकम् असहमाना कैकेयी तस्य वनगमनं राज्ञ: प्रार्थितवती। मातामहकुले वसन्तं भरतं तु न तत् ज्ञापयामास।

Explanation in tika form.—तदानीं तस्मिन् समये "तदोदानीं वा" इति पाणिना: दानीं प्रत्यय:, पक्षे 'तदा'। तत् पूर्व्वोक्तम् अभिषेकसंविधानं सोढुम् अशक्नुवाना असहमाना "शक धृष ज्ञा ग्ला घट रभ लभ क्रम सह

अर्थे भव्यर्थेषु तुमुन्" इति भवधातो उपपदे सोढ़ मित्यत्र तुमुन् । प्रक्रीते; परस्मैपदित्वात् शानच् नास्ति, अतः "ताच्छील्यवयोवचनशक्तिषु चानश्" इति चानश् । कैकयी, [केकयानामपत्यं इति ष्णिच्, तदन्तात् "अच इः" इति इकार-प्रत्ययः औणादिकः, स्त्रियां "कृदिकारादक्तिनः" इति ङीष् । See below.] मोहात् अज्ञानात् । मातुः पिता मातामहः 'पितृव्य मातुल'त्यादिना निपातनात् डामहच् । आवसन्ति अस्मिन् इति आवासः अधिकरणे घञ् । मातामहस्य आवासं निलयम् उपेयिवांसम् उपगतम् "उपेयिवान् अनाश्वानन्चानश्च" इति निपातितः । भरतम् अपृष्ट्वा, ईर्ष्यापरवशिततत्वात् किमिदं क्रियते न वेति भरतं न पृष्टवती, एतेन भरतदोषः परिहृतः । रामस्य वनाय प्रयाणं गमनं वनप्रयाणं, चतुर्थीसमासः । "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" इति चतुर्थीनियमात् । रामस्य इत्यत्र कर्त्तरि षष्ठी । ववार याचितवती । इन्द्रवज्रोपजातिः ।

Change of V.—कैकय्या अप्रक्रवानया वव्रे...... ।

Derivation.—आवास—आ-वस-अधिकरणे घञ् । लट् वसति । लुङ् अवात्सीत् । लिट् उवास । उपेयिवांसं—उप-इ-क्वसु: द्वितीया । अप्रक्रवाना —न-प्रक-चानश् । लट् प्रक्रीति । लुङ् अप्रकत् । ववार—वृ-लिट् । लुङ् अवारीत्, अवरिष्ट, अवरीष्ट, अवृत । लट् यथा कविरहस्ये—"तेजोभिर्जगदा-वृणोति वरति ख्यातीन् यथार्थैर्धनैः । सत्कीर्त्तिश्च वृणाति यो वरयति क्षेमं यशो व्रीयते । युद्धे वारयति द्विषो निवरते नित्यं प्रियोपद्रवम् ।"

সেই সময়ে কেকয়ী মোহ হেতু সেই সমস্ত সহিতে না পারিয়া মাতামহ-গৃহে অবস্থিত ভরতকে জিজ্ঞাসা না করিয়াই, রামের বন-গমন প্রার্থনা করিল।

At that time Kekayi, unable, for want of sense, to bear all these, prayed for the banishment of Rama to the forest, without consulting Bharat who was then residing at his maternal grand father's.

Q. Comment gram. on उपेयिवांसम् । Ans. उपपूर्व्व-कात् इणधातोः क्वसुप्रत्ययात्, निपातेन सिद्धम् । यदि वा क्वसुः लिटि प्रयुज्यते, "परोक्षे लिट्" इति परोक्षे (In the past, but unperceived by the

कर्णेजपैराहितराज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना।
रामप्रवासे व्यमृशन्न दोषं
जनापवादं सनरेन्द्रमृत्युम्॥ ७॥

narrator) लिट् विधानञ्च भवति, तथापि सामान्ये भतीतेऽपि 'क्वसुप्रत्ययम्' "कवयः बहुलं प्रयुञ्जते" इति भतीते क्वसुः। Q. Why is not ल्यप् used in भजाला। Ans. "समासे भनञ्पूर्व्वे क्त्वो ल्यप्।" अव्ययपूर्व्वपदे अनञ्समासे क्त्वो ल्यवादेशः स्यात्। अतः नञ्समासात् न ल्यप्। Q. Conjugate ह in लट्। Ans. See above. Q. Derive कैकयी। Ans. केययानां राजा, केकयः। "तस्य राजन्यपत्यवत्" इति अण्। उपचारात् अणो लोपः। "सत्कृत्य कैकयीपुत्रं केकयी धनमादिशत्" इति रामायणम्। केकयात् अपत्यजनकभावरूपपुंयोगे ङीप् इति कैकयी। ६।

7. Principal part :—(सा) रामप्रवासे जनापवादं दोषं न व्यमृशत्।

Prose order :—(सा कैकेयी) कर्णेजपैः आहितराज्यलोभा, स्त्रैणेन लघिम्ना विकृतिं नीता (सती) रामप्रवासे सनरेन्द्रमृत्युं जनापवादं दोषं न व्यमृशत्।

Substance :—स्त्रीसुलभया लघुतया प्रेरिता कैकयी, असदुपदेष्टृभिश्च जातलोभा सती आत्मनः लोकापवादं राज्ञः मृत्युमपि न अगणयत्।

Explanation in tika form :—कैकयी इति कर्तृपदम् ऊह्यम्। कर्णे जपन्ति परापवादं कथयन्ति इति कर्णेजपाः सूचकाः मन्थरादयः। "कर्णेजपः सूचकः स्यात्" इत्यमरः। "स्तम्बकर्णयोरमिजपोः" इति अच्। "तत्पुरुषे कृति बहुलम्" इति सप्तम्या अलुक्। तैः आहितः आनायितः आरोपितः राज्यस्य लोभो यस्याः तथाभूता। स्त्रिया अयं स्त्रैणः तेन स्त्रीसम्बन्धिना। "स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्"* इति नञ्। लघिम्ना लघुत्वेन विकृतिं अन्यथात्वं

* स्त्रैणः, पौंस्नः। नञ् and स्नञ् are applied respectively after स्त्री and पुमस्।

वसूनि देशांश्च निवर्त्तयिष्यन्
रामं नृपः संगिरमाण एव।

नीता • सती, रामप्रवासे रामवनवासे सति, विषये भावे वा सप्तमी। नरेन्द्रस्य दशरथस्य मृत्युना सहितं जनापवादं लोकवैमुख्यं, राज्यार्हो ज्येष्ठः पुत्रोऽनया प्रव्राजित इत्यादिकं दोषं न व्यमृशत् नालोचितवती। अत्र उत्तरवाक्यस्य हेतोः पूर्व्ववाक्यगतत्वात् काव्यलिङ्गं नाम अलङ्कारः। वृत्तमुपजातिः।

Change of V.—......लोभया......व्यमृश्यत दोषः जनापवादः सनरेन्द्रमृत्युः।

Derivation :—कर्णेजपः—कर्णे-जप-पचाद्यच्। आहित—आ-धा-कर्म्मणि क्तः। स्त्रैण—स्त्री-नञ्। नीता—नी-कर्म्मणि क्तः। लघिमा—लघु-इमनिच्। प्रवास—प्र-वस-भावे घञ्। अवात्सीत् लुङ्। व्यमृशत्—वि मृश-लङ् द। लट् मृशति। लुङ् अमार्क्षीत्, अम्राक्षीत्, अमृक्षत्। मृत्यु—मृ-त्युक्।

পরামর্শদাতৃগণের কথায় রাজ্যলোভ উপস্থিত হওয়াতে, স্ত্রীসহজ লঘুতায় পরিচালিত হইয়া কেকয়ী, রামের প্রবাস হইলে যে লোকাপবাদ হইবে, এমন কি নৃপতির মৃত্যু ঘটিবে, তাহা ভাবিল না।

Filled up with greed for the dominion by the whisperers, and worked up to perverseness by the frailty natural to a woman, she did not count the calumny on Rama's banishment together with the king's death.

Q. Show the gram. connection of नीता। Ans. "प्रधाने नी ह कृष् वहाम्" इति प्रधाने कर्म्मणि क्तविधानात् 'नीता' इति प्रधान कर्म्मणः कैकयी इत्यस्य विशेषणम्। Q. Mention the samas in कर्णेजपाः। Ans. अलुक्समासः। See above. Q. Give the different meanings of इन्द्र। Ans. "इन्द्रः शचीपतावन्तरात्म-न्यादित्ययोगयोः।" ७।

तयावजज्ञे भरताभिषेको

विषादशंकुश्च मतौ निचख्ने ॥ ८ ॥

8. Principal parts :—(1) तया (कर्तृ) नृपः (उक्त कर्म) अवजज्ञे। (2) भरताभिषेकः विषादशंकुश्च (उक्त कर्म) मतौ निचख्ने। Adj. to नृपः—निवर्त्तयिष्यन् and संगिरमाणः। रामम्=object to निवर्त्तयिष्यन्। वसूनि and देशान्=objects to संगिरमाणः।

Prose order :—रामं निवर्त्तयिष्यन् वसूनि देशांश्च संगिरमाण एव नृपः तया अवजज्ञे। भरताभिषेकः विषादशङ्कुश्च मतौ निचख्ने।

Substance :—रामस्य वनगमनं याचमानां कैकयीं परिसान्त्वयितुं राजा राज्यादिकं तस्यै दातुं स्वीचकार। कैकयी तु तत् सर्व्वम् अवज्ञातवती। तया पुनः अपरवरेण भरताभिषेकं प्रार्थयमानया राजा समधिकं शोकातुरश्चक्रे।

Explanation in tika form :—रामं निवर्त्तयिष्यन् रामस्य वनगमनं निवारयितुम्, इति तुमर्थे स्यट। वसूनि धनानि देशांश्च सङ्गिरमाण एव "वसु तोये धने मणौ" इति विश्वः। रामः अयोध्यायां तिष्ठतु राज्यादिकं सर्व्वं ते दास्यामीति कैकय्यै प्रतिजानान एव। "संमः प्रतिज्ञाने" इति गिरेः आत्मनेपदम्। अत्र 'एव' इत्यनेन राज्ञः वचनस्य अनवसानं सूचितम्। नृपो राजा तया कैकय्या, अनुक्तकर्त्र्यां, अवजज्ञे अवज्ञातः, पूर्व्वप्रतिज्ञातस्य तदभिमतप्रदानस्य अनिर्व्वाहात्। इदेकमपरमनुष्ठितं तया, भरतस्य अभिषेकः, मतौ नृपस्य मनसि, निचख्ने निखातः। अत्र निखातपदेन भरताभिषेकस्य अनिवार्य्यत्वं ध्वनितम्। तथा 'विषादः एव शङ्कुः शल्यम्, रूपकसमासः। निचख्ने, तदा प्रभृति विषादावतारात्। यद्वा भरताभिषेकः तत्संश्रयित्वेन विषादरूपशङ्कुश्च मतौ निचख्ने स्वमनसि निहितः। रूपकालङ्कारः।' इन्द्रवंशोपजातिः।

Allusion :—पुरा सम्बरनाम्ना असुरेण युद्धे क्षताङ्गं दशरथं कैकयी अत्यर्थं परिचचार। तेन परितुष्टेन उक्तम् वरद्वयं ते दातुमिच्छामीति। सा अवोचत्, यदा अर्थयिष्यते तदा यूयं दास्यथेति। सा इदानीम् अवसरं बुद्धा वरद्वयं प्रार्थितवती। एको रामस्य वनगमनं, द्वितीयो राज्ये भरतोऽभिषिच्यतामिति।

ततः प्रविव्राजयिषुः कुमार-
मादिष्टदस्याभिगमं वनाय।
सौमित्रिसीतानुचरस्य राजा
सुमन्त्रनेत्रेण रथेन शोचन् ॥ ९ ॥

Change of V.—निवर्त्तयिष्यन्तं नृपं उज्झिरमाणम् सा अवजज्ञौ भरताभिषेकं विषादशङ्कुञ्च निचखान।

Derivation.—निवर्त्तयिष्यन्—नि-वृत्-णिच्-स्यत-प्रथमा। उज्झिरमाणः—सं गृ-शानच्। लट् गृणाति। लुङ् अगारीत्। अवजज्ञौ—अव-ज्ञा-कर्म्मणि लिट्। अभिषेकः—अभि-सिच् घञ्। निचख्नुे—नि-खन-कर्म्मणि लिट्। लट् खनति। लुङ् अखनीत्, अखानीत्। लिट् चखान।

রাম যাহাতে বনে প্রেরিত না হয় সেই জন্য রাজা ঐশ্বর্য্য ও রাজ্য প্রতিশ্রুত হইলেও কৈকেয়ী তাহাতে অবজ্ঞা প্রদর্শন করিল। অধিকন্তু ভরতের রাজ্যাভিষেক ও বিষাদশেল তাঁহার মনে নিখাত করিল।

He was insulted by the refusal of riches and countries that the king offered her to keep back Rama. She on the other hand pierced his heart with a shaft of grief, and the coronation of Bharat.

Q. Can it be रामस्य निवर्त्तयिष्यन्? Ans. "न लोके"ति षष्ठीप्रतिषेधः। Q. How many samasas are possible in विषादशङ्कुः। Ans. विषाद एव शङ्कुः इति रूपकसमासः। विषादः शङ्कुरिव इति उपमितसमासश्च। निचख्ने इति खातशब्दप्रयोगात् उपमितसमासेन च शङ्कुशब्दस्य गुणीभूतत्वात्, रूपकसमासः एव प्रशस्तः। Q. Show the force of एव and निखात। Ans. See above. ।৮।

9. Principal part :—ततः राजा (कर्त्तृ) अस्य वनाय अभिगमम् (कर्म्म) आदिशत्। Adj. to राजा—प्रविव्राजयिषुः and शोचन्। कुमारम् =object to प्रविव्राजयिषुः। Adj. to अस्य—सौमित्रिसीतानुचरस्य। रथेन=करणेन। Adj. to रथेन—सुमन्त्रनेत्रेण।

Prose order :—ततः शोचन् राजा कुमारं प्रविव्राजयिषुः सौमित्रि-सीतानुचरस्य अस्य सुमन्त्रनेत्रेण रथेन वनाय अभिगमम् आदिशत्।

Substance :—अथ राजा बहु विलप्य रामं विवासयितुं सीतया लक्ष्मणेन च समेतं तं सुमन्त्रचालितेन रथेन वनं प्रेरयितुम् आदेशं प्रायच्छत्।

Explanation in tika form :—ततः कैकयीप्रार्थनानन्तरं शोचन् परिदेवयमानः विलपन् इति यावत्। "लक्षणहेत्वोः क्रियायाः" इति लक्षणे, क्रियायाः परिचायके शतृप्रत्ययः। राजा कुमारं रामं प्रविव्राजयितुमिच्छुः। व्रजेः हेतुमण्यन्तात् सन्। सुमित्राया अपत्यम् पुमान् सौमित्रिः लक्ष्मणः "बाह्वादिभ्यश्च" इति इञ् (णि)। अनुचरतीति अनुचरः। चरधातोः टः अच् वा। अनुचरश्च अनुचरी च अनुचरौ "पुमान् स्त्रिया" इति एकशेषः। सौमित्रिश्च सीता च सौमित्रिसीते, सहचरत्वेन अभ्यर्हितत्वात् पूर्व्वनिपातः। ते अनुचरौ यस्य लक्ष्मण-सीतासहायस्य इत्यर्थः। अस्य रामस्य, कर्त्तरि षष्ठी। नीयते अनेन इति नेत्रं लोचनं। ष्ट्रन्प्रत्ययः। सुमन्त्री नेत्रं चक्षुरिव यस्य तथोक्तेन, तद्वशात् तस्य प्रवृत्तेः। यद्वा सुमन्त्री नेत्री नायकी यस्येति तेन "नेत्रं रथे च नाथाच्च नेत्री नेतरि भेदवत्" इति विश्वः। रथेन करणेन, वनाय "गत्यर्थकर्म्मणि द्वितीया-चतुर्थ्यौ चेष्टायामनध्वनि,"* इति चतुर्थी। अभिगमम् अभिगमनम् आदिशत् आदिष्टवान्। वृत्तमुपजातिः।

Change of V.—प्रविव्राजयिषुणा आदेशि अभिगमः......राज्ञा...... शोचता।

Derivation.— प्रविव्राजयिषुः — प्र-(व्रज+णिच्) व्राजि-सन्-उः। आदिशत्—आ-दिश-लुङ् द। अभिगमम्—अभि-गम-अप्, द्वितीया। सौमित्रि—सुमित्रा-इञ्। अनुचर—अनु-चर-टः। शोचन्—शुच-शतृ। लट् शोचति।

অনন্তর রাজা বহু বিলাপ করিয়া কুমারকে প্রবাসিত করিবার জন্য সীতা ও লক্ষ্মণের সহিত সুমন্ত্র চালিত রথে বনে যাইতে আদেশ দিলেন।

* गत्यर्थानां अध्वभिन्ने कर्म्मणि द्वितीयाचतुर्थ्यौ स्तः चेष्टायाम् गम्यायाम्। 'मनसा काशीं गच्छति' इत्यत्र चेष्टाभावात् न चतुर्थी।

केचिन्निनिन्दुर्नृपमप्रशान्तं
विचुक्रुशुः केचन सास्रमुच्चैः।
ऊचुस्तथान्ये भरतस्य मायां
धिक् कैकयीमित्यपरो जगाद ॥ १० ॥

Then the sorrowful king, desiring the banishment of the prince ordered him to start for the forest in a chariot driven by Sumantra, accompanied by Sita and the son of Sumitra.

Q. Derive अनुचरः। Ans. अनु इत्युपपदात् चरधातोः टः, अच् वा। "भिक्षा सेना आदायेषु च" इति चकारस्य अनुक्तसमुच्चयार्थत्वात् टः। इति जयमङ्गलः। चरट् इति चरधातोः पचादिषु च पाठात् अच्। अच्प्रत्यये, स्त्रियां न ईप्प्रतिषेधः, चरट् इति टकारस्य इत्विधानात् इति भट्टोजिदीक्षितः। Q. Account for चतुर्थी in वनाय। Can 'वनम्' be used in the same sense? Ans. वनम् and वनाय are applied in the same sense. See above. Q. Derive कुमारः। Ans. कुमारयति क्रीड़ति इति कुमारः, कुमारि-धातोः अच्। Q. Account for the insertion of सीता after सौमित्रि। Ans. See above. । ९ ।

10. It consists of 4 sentences as below.

Prose order :—(1) केचित् अप्रशान्तं नृपं निनिन्दुः। (2) केचन सास्रम् उच्चैः विचुक्रुशुः। (3) तथा अन्ये भरतस्य मायाम् ऊचुः। (4) अपरः कैकयीं धिक् इति जगाद।

Substance.—केचित् लोकाः राजानम् अधीरप्रकृतिरिति निनिन्दुः। अपरे केचित् अश्रूणि मुञ्चन्तः चक्रन्दुः। अन्ये च केचित् कथयामासुः यत् शठो भरतः एवं मायां कारयामास इति। कोऽपि वा कैकयीं धिक् इत्यब्रवीत्।

Explanation in tika form :—राज्ञा रामस्य वनगमने समादिष्टे सति केचित् जनाः अप्रशान्तं शुभचिन्तम्, वार्द्धक्ये ऽपि स्त्रीवशीभूतत्वात् अजिते-

न्द्रियं नृपं निनिन्दुः कुत्सितवन्तः। अत्र रामायणम्, "वाली भ्रमं वत कामात्मा राजा दशरथो भ्रमम्।" इति। अथवा अप्रशान्तं विसृज्य यथा तथा निनिन्दुः इति केचित्। केचन साश्रं सवाष्पम् उच्चैः महाध्वनिना विचुक्रुशुः क्रन्दितवन्तः। राजानं वा विचुक्रुशुः इति क्रुशधातोः सकर्मकता। यथा च "उमावरोदिव नदत्पतङ्गः कुमुद्वतीम्"। २।४। केचित् विसृज्य केचित् वा साश्रं राजानं निनिन्दुरित्यर्थः। तथा अन्ये भरतस्य मायां छद्म माध्यम् जगुः। "भवन्ति मायाविषु ये न मायिनः" इति किरातः। मातरमेव राज्यलाभाय नियुज्य स्वदोषहरणार्थं मातामहगृहं गतवान् भरतः इत्याहुः। अपरः कश्चित् कैकयीं धिक् इति जगाद उक्तवान् "धिगुपर्य्यादिषु त्रिषु" इति धिग्योगे द्वितीया। अपरः इत्यत्र एकवचनात् अल्प एव लोकः कैकयीं निन्दति बहवस्तु राजानम् इति गम्यते। कैकय्याः स्त्रीत्वेन स्वभावतो मन्दबुद्धित्वं, नृपस्य तु तथाविधस्य स्त्रीवचनात् मतिभ्रंश इति महान् दोष इति व्यज्यते। तेनात्र बहुवचनप्रक्रमभङ्गोऽत्र न दोषावहः। वंशस्थवृत्तम्।

Change of V.—केचित् निनिन्दे नृपः अप्रशान्तः, विचुक्रुशे केचन। जगे तथान्यैः...माया, अपरेण जगदे।

Derivation.—निनिन्दुः—निन्द-लिट् उस्। लट् निन्दति। विचुक्रुशुः—वि-क्रुश-लिट् उस्। लट् क्रोशति। लुङ् अक्रुक्षत्। जगाद—गद-लिट्। लट् गदति। लुङ् अगदीत्, अगादीत्।

কেহ কেহ রাজাকে অজিতেন্দ্রিয় বলিয়া নিন্দা করিতে লাগিল। কেহ কেহ অশ্রু-নয়নে উচ্চৈঃস্বরে ক্রন্দন করিতে লাগিল। অপর কেহ কেহ ভরতের শঠতা বলিতে লাগিল। অতি অল্প সংখ্যক ব্যক্তিই কেকয়ীকে ধিক্কার দিতে লাগিল।

Some blamed the king as one having his passions uncontrolled. Some cried aloud with tears in their eyes. Others asserted it to be the policy of Bharata. A few uttered fie to Keśayi.

Q. Annotate on the singular form of अपरः। Ans. See above. Q. If इति be inserted after अप्रशान्तम्,

गतो वनं श्वोभवितेति रामः
शोकेन देहे जनतातिमात्रम्।
धीरास्तु तत्र च्युतमन्यवोऽन्ये
दधुः कुमारानुगमे मनांसि ॥ ११ ॥

should there be any change in it? Ans. "अग्रयानः [illegible]ति" इत्येवं स्यात्। "याम्याहुः सर्व्वबीजप्रकृतिः इति" शकु०। १०।

11. Principal sentences :—(1) शोकेन जनता अतिमात्रं देहे। (2) अन्ये कुमारानुगमे मनांसि दधुः। Subordinate sentence to (1) रामः श्वः वनं गतो भविता इति। Adj. to अन्ये—धीराः and च्युतमन्यवः।

Prose order :—रामः श्वः वनं गतो भविता इति शोकेन जनता अतिमात्रं देहे। तत्र धीरा अन्ये च्युतमन्यवः (सन्तः) कुमारानुगमे मनांसि दधुः।

Substance :—परदिवसे एव रामः प्रातः वनं गमिष्यति इति चिन्तयन्तो बहवः जनाः शोकदग्धाः आसन्। केचित् च धीरस्वभावाः शोकं विगर्ह्य रामम् अनुगन्तुम् मनो दधुः।

Explanation in tika form :—रामः (कर्त्ता) श्वः आगामिनि दिवसे "अनागतेऽह्नि श्वः" इत्यमरः। वनम् अरण्यं गतो भविता इति शोकेन, अनुतापेन करणेन, जनता जनसमूहः "ग्रामजनबन्धुभ्यस्तल्" इति समूहार्थे तल्। अतिमात्रम् अत्यर्थं देहे दग्धा। दहेः कर्म्मणि लिट्। भवितेति भविष्यति लुट्। श्वः प्रभृति भविष्यत्कालस्याभिधानात् न व्यर्थम्। तत्सम्बन्धात् गत इति "धातुसम्बन्धे प्रत्ययाः" इति वचनात् भविष्यत्कालेऽपि साधुः। तत्र जनतामध्ये धीरा स्थिराः अन्ये, च्युतः मुक्तः मन्युः शोकः यैः येषाम् वा, ते विगतशोकाः सन्तः "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः। कुमारस्य रामस्य अनुगमे अनुसरणार्थं "निमित्तात् कर्म्मयोगे"* इति वचनात् सप्तमी। मनांसि अभिलाषान् दधुः धृत-

* "निमित्तात् कर्म्मयोगे सप्तमी वक्तव्या।" निमित्तम् फलम्। यथा "चर्म्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥" अत्र अनुगमरूपं फलम्; मनांसि इति कर्म्मणा संयोगश्च।

प्रस्थास्यमानावुपसेदुषस्तौ
शोक्ष्यमाणानिदमूचतुस्तान्।
किं शोचतेहाभ्युदये यतास्मान्
नियोगलाभेन पितुः कृतार्थान्॥ १२॥

वन्तः। 'किं शोकेन, यत्रैव रामः तत्रैव वयम्' इति स्थिरीकृतवन्तः। समासोक्तिरलङ्कारः। इन्द्रोपजातिः।

Change of V.—...गतेन रामेण भविता इति शोकः ददाह जनताम्। धीरैः च्युतमन्युभिः अन्यैः दधिरे मनांसि।

Derivation.—गतः—गम्धातोः भविष्यत्काले क्तः। भविता—भू-लुट् ता। जनता—जन-तल्। देहे—दह-कर्म्मणि लिट् ए। कर्त्तरि, लट् दहति। लुङ् अधाक्षीत्। मन्यु—मन्-युच् औणादिकः।

कल্য রাম বনে গমন করিবেন, এই শোকে জনগণ অতিশয় দগ্ধ হইতে লাগিল। তথায় অপর ধীর ব্যক্তিগণ শোক পরিত্যাগ করিয়া রামের পশ্চাৎ গমন করিতে মনন করিল।

Men in large number were burnt with grief to reflect that Rama would be gone to the forest in the next morning. But others who were of tranquil nature, left off their grief and made up their mind to follow the prince.

Q. Account for सप्तमी in कुमारानुगमे। Ans. विषये सप्तमी, वा, 'निमित्तात् कर्म्मयोगे' इति सप्तमी। See above. Q. Show the significance of धीराः। Ans. "धीरो मनीषी ज्ञः प्राज्ञः" इत्यमरवचनात्, धीराः मनीषिणः। ते मनसाऽऽलस्यराहित्यात् शोकं विमुच्य, रामम् अनुगम्य वनेऽपि सुखिनं करिष्यामः इति मनो दधुः। ११।

12. It consists of two sentences:—(1) तौ तान् इदम् ऊचतुः। (2) इह अभ्युदये अस्मान् किं शोचत। Adj. to तौ—प्रस्थास-

मानौ। Adj. to तान्—उपसेदुषः and शोच्यमानान्। Adj. to अस्मान्—कृतार्थान्। पितुः—सम्ब। नियोगलाभेन हेतुना, करणेन वा।

Prose order :—प्रस्थास्यमानौ तौ उपसेदुषः शोच्यमानान् तान् इदम् ऊचतुः। इह अभ्युदये पितुः नियोगलाभेन कृतार्थान् अस्मान् किं शोचत।

Substance :—प्रस्थानोद्यतौ तौ समुपेत्य व्यर्थं शोचतः लोकान् रामलक्ष्मणौ ऊचतुः। ननु पितुः आज्ञापालनेन वयं महोत्सवम् अनुभवामः, तत् कथं अस्मिन् अभ्युदये अस्मान् शोचथ इति।

Explanation in tika form :—प्रस्थास्यमानौ वनं गमिष्यन्तौ "समवप्रविभ्यः स्थः" इति आत्मनेपदविधानात् स्यमानः। तौ रामलक्ष्मणौ उपसेदुषः प्राप्तान् "भाषायां सदवसश्रुवः" इति क्वसुः। शोच्यमानान् अत्यर्थं शोकं कुर्वतः, भृशार्थे यङ्। तान् जनान् (गौणं कर्म) इदम् (मुख्यं कर्म) ऊचतुः उक्तवन्तौ। ब्रुवीत्यर्थग्रहणात् वचेर्द्विकर्मकता। इह अस्मिन् अभ्युदये विषये काले वा। बत इति आश्चर्ये, "खेदानुकम्पा सन्तोष विस्मयामन्त्रणे बत" इत्यमरः। पितुः नियोगलाभेन वनगमनाज्ञालाभेन कृतार्थान् चरितार्थान् अस्मान्। अस्मान् इति बहुवचनप्रयोगात् सवन्धून् इति गम्यते। किं शोचत परिदेवयध्वम् यूयमिति शेषः। विधौ लोट्। कृतार्थत्वात् अशोच्या वयमित्यर्थः। काव्यलिङ्गमलङ्कारः। वृत्तमुपजातिः।

Change of voice :—प्रस्थास्यमानाभ्यां उपसेदिवांसः ताभ्यां शोच्यमानाः इदं ते ऊचिरे। किं शोच्यामहे (युष्माभिः) वयं कृतार्थाः।

Derivation.—प्रस्थास्यमानौ—प्र-स्था-स्यमान। उपसेदुषः—उप-सद-क्वसुः, द्वितीया बहु। लट् सीदति। लुङ् असदत्। शोच्यमानान्—(शुच-यङ्-न) शोच्य-शानच्। लट् शोच्यते। अभ्युदय—अभि उत्-इ-अप्।

রাম ও লক্ষণকে প্রস্থানোদ্যত দেখিয়া যাহারা নিকটে উপস্থিত হইয়া শোক প্রকাশ করিতেছিল তাহাদিগকে উভয়ে বলিলেন আমরা পিতার আজ্ঞা লাভে কৃতার্থ হইয়াছি, আমাদের জন্য শোক করিতেছ কেন?

Our aims have been attained by receiving commands from

असूष्ट यो यश्च भयेष्वरक्षीद्
य: सर्व्वदास्मानपुषत् स्वपोषम् ।
महोपकारस्य किमस्ति तस्य
तुच्छेन यानेन वनस्य मोक्ष: ॥ १२ ॥

our father and why do you then bewail us in our fortune, were the words addressed by them to those who sorrowing intensely, came to them as they were about to depart.

Q. Decline the base of उपसेदुष: । Ans. उपसेदिवस् शब्द: । पुंसि—उपसेदिवान् उपसेदिवांसौ उपसेदिवांस: । उपसेदुष:, उपसेदुषा &c । स्त्रियाम्—उपसेदुषी, उपसेदुष्यौ &c । नपुंसके—उपसेदिव: उपसेदुषी, उपसेदिवांसि &c । Q. Give the gram. meaning of शोचमानान् । Ans. बत्प्रयोगात् भ्रशार्थत्वं गमितम्, भ्रशं शोचतान् इत्यर्थ: । Q. Show the different applications of बत । Ans. "खेदानुकम्पा सन्तोष विस्मयामन्त्रणे बत ।" इत्यमर: । खेदे यथा, अहो बत महत् कष्टम् । अनुकम्पायाम्—बत नि:स्वोऽसि । सन्तोषे—बत लब्धं धनं मया । विस्मये—अहोबतासि स्पृहणीयवीर्य्य: । आमन्त्रणे—एहि बत महाबाहो । Q. Account for the plural form in अस्मान् । Ans. अत्र द्वित्वे विवक्षितेऽपि बहुवचनप्रयोग: 'सबन्धून् (समातृकान्) अस्मान्' इति गमयति । ननु "अस्मदो द्वयोश्च", इति द्वित्वे विवक्षिते बहुवचनम् । "सविशेषणस्य प्रतिषेध:" इति 'उन्नताङ्गान् अस्मान्' इत्यत्र विशेषणक्रिया बहुवचनप्रतिषेधात् । १२ ।

13. It is a compound sentence :—(1) वनस्य यानेन (करणेन) तस्य महोपकारस्य मोक्ष: (कर्त्तृ) अस्ति किम् । तुच्छेन—Adj. to यानेन । (2) य: (कर्त्तृ) अस्मान् असृष्ट । (3) य: (कर्त्तृ) भयेषु (भावे सप्तमी) अस्मान् (कर्म्म) अरक्षीत् । (4) य: अस्मान् स्वपोषम् (णमुल्) अपुषत् ।

Prose order :—य: अस्मान् असृष्ट, यश्च भयेषु अरक्षीत्, य: सर्व्वदा स्वपोषम् अपुषत्, तस्य महोपकारस्य तुच्छेन वनस्य यानेन मोक्ष: अस्ति किम् ?

Substance:—यः पिता अस्माकं जन्महेतुः विपत्सु च अस्मान् त्रायते स्म, स्वयत्नेन धनेन वा अस्मद्दिहान् पुपोष, किं वनगमनमात्रेण तदुपकारऋणात् मुच्यते ?

Explanation in tika form:—यः पिता अस्मान् असृष्ट जनितवान्, सृजेः दैवादिकस्य आत्मनेपदित्वात् लुङि रूपम्। यस्य पिता अर्थेषु सत्सु; भावे सप्तमी, विपत्सु इत्यर्थः, अरक्षीत् त्रायते स्म, अस्मानिति शेषः। यः सर्व्वदा सर्व्वकालम् अस्मान् स्वपोषम् अपुषत् स्वेन आत्मना पुष्टवान्। स्वयं यत्नमाश्रित्य पुपोष इत्यर्थः। अथवा स्वेन धनेन पुष्टवान्। "स्वे पुषः"* इति पुषेः णमुल्। "अनेनाव्ययेन"† इति समासः, यथाविध्यनुप्रयोगश्च। तस्य पितुः सम्बन्धिनो महोपकारस्य, तुच्छेन लघीयसा वनस्य यानेन गमनेन मोक्षः ऋणमोचनम् अस्ति किम्, नास्त्येव इत्यर्थः। वनस्येति सम्बन्धविवक्षायां षष्ठी। इन्द्रमुपजातिः।

. Change of V.—असृज्महि येन, येन अरक्षिष्महि, येन वयं अपुष्महि (अपोषिष्महि) स्वपोषम्। मोक्षेण भूयते।

Derivation.—असृष्ट—सृज-लुङ् त। लट् सृज्यते। (तुदादि—लट् सृजति, लुङ्-असाक्षीत्,) अरक्षीत्—रक्ष-लुङ् द। स्वपोषम्—स्व-पुष-णमुल्। लट्—यथा कविरहस्ये "हृष्टां न पुष्णाति यशांसि पुष्यति। प्रवारणैः विप्रमनांसि पोषति। भत्यांश्च यः पोषयतीप्सितैः धनैः॥" मोक्ष—मोक्ष भावे घञ्।

যিনি আমাদিগকে উৎপাদন করিয়াছেন, যিনি বিপদে রক্ষা করিয়াছেন। যিনি আমাদিগকে স্বযত্নে (বা বহু ধন ব্যয়ে) পোষণ করিয়াছেন, সামান্য বন গমন দ্বারা কি সেই মহোপকার ঋণ হইতে মুক্তি হইতে পারে?

Is the insignificant exile to the forest an adequate requital of

* करणे स्वे उपपदे पुषेर्णमुल्। स्वे इति अर्थग्रहणं, तेन स्वरूपे पर्य्याय-विशेषे च। अतः स्वपोषम्, आत्मपोषम्, धनपोषम् इत्यादि।

† See sloka 4, III.

विद्युत्प्रणाशं स वरं प्रनष्टो,
यद्वोर्ध्वशोषं तृणवद्विशुष्कः ।
अर्थे दुरापे किमु सुप्रवासे
न शासनेऽवास्थित यो गुरूणाम् ॥ १४ ॥

the great benefits received from him who gave us birth, has saved us from dangers and often nursed us with his personal cares, or riches.

Q. Conjugate पुष् in लट् । Ans. See above. Q. Account for षष्ठी in वनस्य । Ans. वनाय वनं वा यानेन इत्यत्र 'वनस्य यानेन' इति शेषसामान्ये षष्ठी । Q. show the difference between महोपकारः and महदुपकारः । Ans. महान् उपकारः इति महोपकारः । महतां लोकानाम् उपकारः इति महदुपकारः । "आन् महतः समानाधिकरण जातीययोः" । १३ ।

14. It is a compound sentence :—(1) यः (कर्तृ) गुरूणां शासने (अधि) न अवास्थित । (2) सः (कर्तृ) विद्युत्प्रणाशं (व्यम्) प्रनष्टः, यद्वा ऊर्ध्वशोषं (व्यम्) विशुष्कः । अर्थे and सुप्रवासे-अधिकरणे । Adj. to अर्थे—दुरापे । किमु, तृणवत्, and यद्वा=Indeclinables. वरम्—Adj. to स or तत् or same case with सः, or indeclinable.

Prose order :—यः दुरापे अर्थे गुरूणां शासने न अवास्थित स विद्युत्प्रणाशं प्रनष्टः, यद्वा तृणवत् ऊर्ध्वशोषं विशुष्कः तत् वरम् । सुप्रवासे किमु ?

Substance.—यो नाम गुरूणां दुष्करमपि आदेशं न पालयति स विद्युदिव उत्पत्त्यनन्तरमेव विनश्येत् तदेव वरम् ; तृणवत् ऊर्ध्वमुखो विशुष्येत् तदपि वरं । यस्तु प्रवासगमनरूपं सुकरम् आदेशं न पालयति, स कीदृशं नाशं गमितुमर्हति तत् वद ।

Explanation in tika form :—यो जनः दुरापे कष्टप्राप्ये दुःसाध्ये इति यावत् । "ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्" इति दुर् इत्यस्मात् आप्धातोः खल् । अर्थे कार्यविशेषे, विषयाधिकरणे सप्तमी । पित्रादीनां शासने आदेशे

"आसनं राजदन्तीर्व्वीवित्रह्मशास्त्राणिषु" इति विश्वः। न अवस्थित न तस्थौ न गुरुवचनं पालयेत् इत्यर्थः। "समवप्रविभ्यः स्थः" इति आत्मनेपदम्। "आशंसायां भूतवच्च" इति भविष्यति अतीतप्रयोगः आशंसायाम् अर्थे। स नरः विद्युत्-प्रणाशं प्रनष्टः विद्युदिव उत्पत्त्यनन्तरमेव नष्टः। "उपमाने कर्म्मणि च"* इति चकारात् कर्तृग्रहणे, कर्तृवाचिनि विद्युत्शब्दे उपपदे णमुल्। यद्वा अथवा तृण-वत् तृणेन तुल्यं "तेन तुल्यं क्रिया चेत् वतिः" इति वतिः। ऊर्द्ध्वशोषं विशुष्कः, ऊर्द्ध्व एव तिष्ठन् शुष्यतु। "ऊर्द्ध्वे शुषिपूरोः"† इति ऊर्द्ध्वे कर्त्तरि शुषेः णमुल्। उभयत्र "अमैवाव्ययेन" इति समासः, यथाविध्यनुप्रयोगश्च। एतत् वरम् इति मनाक्प्रियम्। "देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक्प्रिये" इत्यमरः। सुप्रवासे किमु, सुखसाध्ये प्रवासविषये यत् शासनम् अत्र तावदनवस्थितस्य सुतरामेव पूर्व्वोक्तं प्रयुज्यते। "किमुत प्रवासे" इति पाठे प्रवासविषये किमुत, किं पुनः, सुतरामेव पूर्व्वोक्तं युक्तम् इत्यर्थः। गुरुणा दुष्करे निर्देशे अनवस्थितः जनः यदि इत्थं विनाशम् आप्नुमर्हति, तदा वयं सुकरनिर्देशम् अपालयन्तः यत् कष्टतरं विनाशम् अवाप्नुम् अर्हाः न तत्र संशयोऽस्ति इति भावः। अर्थापत्तिरलङ्कारः। लक्षणं यथा "दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते।" वृत्तमुपजातिः।

Change of V.—तेन प्रनष्टम्। विशुष्कम् वरेण वरं वा। अव्ययपक्षे 'वरम्' इत्येव स्यात्। "मनाक् इष्टे वरं क्लीवं केचिदाहुस्तदव्ययम्।" इति मेदिनीवचनात्। येन अवास्थायि।

Derivation.—विद्युत्प्रणाशं—विद्युत् (वि-द्युत्-क्विप्) प्र-नश-णमुल्। प्रनष्ट—प्र-नश-कर्त्तरि क्तः। लट् नश्यति। लुङ् अनशत् अनेशत्। ऊर्द्ध्वशोषं

---

* उपमाने (The object of comparison) कर्म्मणि उपपदे, 'च'कारात् कर्त्तरि च उपपदे, धातोः णमुल्प्रत्ययो भवति। यथा विद्युत्प्रणाशं प्रनष्टः, विद्युदिव प्रनष्टः इत्यर्थः। (विद्युत् being of the same case with the nominative here.)

† ऊर्द्ध्वशब्दे कर्तृवाचिनि उपपदे शुषिपूरोः धात्वोः णमुल्प्रत्ययो भवति। यथा ऊर्द्ध्वशोषं शुष्कः, ऊर्द्ध्व एव तिष्ठन् शुष्क इत्यर्थः। ऊर्द्ध्वपूरं पूर्णः, ऊर्द्ध्वमुखः तिष्ठन् पूर्णः इत्यर्थः।

घोरा निवर्त्त्यध्वमिति न्यगादीत्
तातस्य शोकापनुदा भवेत।
मा दर्शताग्र्य भरतस्य मत्तो
निवर्त्त्येत्याह रथं स्म सूतम्॥ १५॥

—जर्व-शव-णमुल्। घट् ग्रथति। लुङ् अग्रथत्। ह्रणवत्—ह्रण-वतिः। विशुष्क—वि-शुष-क्त। दुरापे—दुर्-आप-कर्म्मणि खल्। अवास्थित—अव-स्था-लुङ् क्त।

যে ব্যক্তি দুষ্কর কার্য্যেও গুরুজনের আজ্ঞা প্রতিপালন না করে, বিদ্যুতের ন্যায়, জন্মিবামাত্রই তাহার মৃত্যু হওয়াই ভাল, অথবা তৃণের ন্যায় উর্দ্ধদেশ হইতে ক্রমে নিম্নদেশ পর্য্যন্ত শুষ্ক হইয়া যাওয়া ভাল। সুখসাধ্য প্রবাস বিষয়ে কি বলিব?

He, who does not abide by the orders of his superiors, even in hard task, had better die an instant death, like the flash of lightening, or wither away from the top to the bottom like the grass, not to say of exile so easy a task.

Q. Account for the different न in प्रणाश and प्रनष्टः। Ans. "नशेः षान्तस्य" इति नश्धातोः षकारान्तस्य 'ण'कारादेशो न भवति। अतः प्रनष्टः इत्यत्र न णत्वम्। प्रणाशम् इत्यत्र तालव्य'श'कारान्त-त्वाभावात् णत्वम्। Q. Change the voice in the above sloka. Ans. See above. Q. Parse वरम्। Ans. Same case with सः (प्रनष्टः सन् मनाक्प्रियो भवति) or see above. Q. Explain fully the significance of the past participle क्त in विशुष्कः। Ans. अत्र क्तप्रत्ययः प्राधान्येन क्रियां लक्षयति नतु गुणम्। "तेन तुल्यं क्रिया चेत् वतिः" इति वतिप्रत्ययस्यास्ते क्रियापदस्य अवश्यप्रयोगात्। Another form of the Q. Parse शुष्क। It is a verb (for the above reason) having for its nominative सः। १४।

15. It consists of several simple sentences as below.

Prose order :—(1) हे पौराः (यूयं) निवर्त्तध्वं (2) तातस्य शोकापनुदाः भवेत (3) भरतश्च मत्तः अन्यं मा दर्शत, (4) रामः इति न्यगादीत्। (5 (त्वम्) रथं निवर्त्तय इति सूतम् आह स्म।

Substance :—भोः पुरवासिनः, ममानुसरणात् विरताः भवत। तत्प्रि-विधानेन मम जनकस्य शोकं विनोदयत। पश्यत च मामिव भरतम्। भोः सारथे त्वमपि रथम् अयोध्यां प्रति निवर्त्तय।

Explanation in tika form :—हे पौराः पुरवासिनः! निवर्त्तध्वम् अस्मदनुसरणात् निवृत्ता भवत। विधौ लोट्। यूयमिति शेषः। तातस्य शोका-तुरस्य अस्मत्पितुः शोकापनुदाः सुखविधानेन शोकापहर्त्तारः। "तुन्दशोकयोः परिमृजापनुदोः" इति कः। भवेत, यूयमिति शेषः। विधिर्लिङ्। भरतश्च मत्तः अन्यं मत्तः पृथक् इत्यर्थः। अस्मद्-शब्दात् पञ्चम्यां तस्। "अन्यारादितरर्त्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते" इति पञ्चमी। मा दर्शत मा यूयं द्रष्टारः स्थ। दृश्‌धातोः लुङि मध्यमपुरुषबहुवचनेषु। 'माङि लुङ्' इति माङ्योगे शीटि लुङ्विधानम्। 'न माङ्योगे' इति अडागमनिषेधः। अपि तु योऽहं स एव भरतः, अहमिव सोऽपि पालयिष्यतीति ध्वनिः। इति रामः न्यगादीत् उक्तवान् गद्धातोः लुङ्। रथं निवर्त्तय इति सूतं सारथिं सुमन्त्रं "सूतःक्षत्ता सारथौ" इत्यमरः। आह स्म। ब्रूधातोः लट्, स्मयोगे अतीतार्थः। दीपकालङ्कारः। छन्दः उपजातिः।

Change of V.—युष्माभिः निवृत्यताम्। शोकापनुद्भिः भूयेत, मत्तः अन्यः भरतः मा दर्शि, रथः निवर्त्यताम्। सूतः उच्यते स्म।

Derivation.—पौर—पुर-अण् (अ)। निवर्त्तध्वम्—नि वृत्-लोट् ध्वम्। वृत् वर्त्तते। लुङ् अवृतत, अवर्त्तिष्ट। न्यगादीत्—नि-गद-लुङ् द। शोकापनुदा—शोक-अप-नुद-कः (सुखाहरणार्थे)। लट् नुदति, नुदते। लुङ् अनौत्सीत्, अनुत्त। दर्शत—दृश्-लुङ् त। माङ्योगे अडागमाभावः। अदर्शत् अद्राक्षीत्-प्रथमपुरुषैकवचने।

হে পুরবাসিগণ তোমরা প্রতিনিবৃত্ত হও। পিতার শোক অপ-

ज्ञात्वेङ्गितैर्गत्वरतां जनाना-
मेकां शयित्वा रजनीं सपौरः ।
रक्षन् वने वासकृताद्भयात् तान्
प्रातश्छलेनापजगाम रामः ॥ १६ ॥

মোচন করিও। ভরতকে আমা হইতে পৃথক দেখিও না। সারথিকে বলিলেন, রথ ফিরাইয়া লইয়া যাও।

Desist, said he, O, citizens, be assuagers of my father's grief. Do not look upon Bharata, as other than myself. Turn thy car, added he, addressing the coachman.

Q. Give the gram. meaning of शोकापनुदाः। Ans. "तुन्दशोकयोः परिमृजापनुदोः" इति शोकशब्दात् अपनुदतेः कः। "आलस्य-सुखाहरणयोः इति वक्तव्यम्" [But तुन्दपरिमृज (an idle one) and शोकापनुद should be used respectively in the sense of 'idleness' and 'bringing in happiness.'] इति अत्र 'सुखविधानेन पितुः शोकं मोचयत इत्येवमर्थो गम्यते। प्रबोधदानेन संसारस्य असारत्वकथनेन वा शोकापोदने कृते, "शोकापनोदाः इत्येवं स्यात्। [This question might assume another form, viz. Distinguish between शोकापनुदाः and शोकापनोदाः' ।] १५।

16. Principal part :—(1) रामः (कर्त्ता) प्रातः छलेन (प्रकृत्यादि) अपजगाम। Subordinate ones—जनानाम् इङ्गितैः (करणैः) गत्वरतां ज्ञात्वा and एकां रजनीं (अत्यन्तसंयोगे) शयित्वा। Adj. to रामः—सपौरः and रक्षन्। भयात्—अपादानम्। Adj. to भयात्—वासकृतात्। तान्—object to रक्षन्। वने—अधि।

Prose order :—रामः जनानाम् इङ्गितैः गत्वरतां ज्ञात्वा, सपौरः एकां रजनीं शयित्वा तान् वने वासकृतात् भयात् रक्षन् प्रातः छलेन अपजगाम।

Substance :—रामः पौराणाम् चेष्टितैः बुबुधे यत् ते स्वनगरं न प्रति-

निवर्त्तिष्यन्ते। अतः तैः सह एकां निशां यापयित्वा, तारयित्वा च तान् वन-सहजाभ्यः विपद्भ्यः प्रातः छलमाश्रित्य तान् विजहौ।

Explanation in tika form :—रामः जनानां, निवर्त्त्यमित्युक्तेऽपि अनिवर्त्तनां पौराणाम्, (कर्त्तरि षष्ठी) इङ्गितैः अभिप्रायबोधकैः चेष्टितैः करणैः, इगिगत्यां इत्यस्मात् भावे क्तः। "आकारस्त्विङ्ग इङ्गितः" इत्यमरः। गत्वरतां गमनशीलतां वने इति शेषः। "गत्वरश्च" इति गमेः क्वरप् निपातितः। ज्ञात्वा विदित्वा पौरैः पुरवासिभिः सह वर्त्तमानः सपौरः सन् एकां रजनीं रात्रिं "रजनीनीलिका द्राक्षा हरिद्रा यामिनीषु च" इति विश्वः। "कालाध्वनोरत्यन्त-संयोगे" इति द्वितीया। शयित्वा तैः सह एकां रजनीं यापयित्वा तान् पौरान्, वने वासः वनेवासः, सप्तमीति योगविभागात् समासः, "शयवासवासिष्वकालात्"* इति अलुक्समासः। तेन कृतं तस्मात् भयात् सिंहादिभयात् "भीत्रार्थानां भय-हेतुः" इति अपादानात् पञ्चमी। रक्षन् पालयन् प्रातःकाले छलेन, प्रकृत्यादिभ्य-स्तृतीया। अथवा करणे तृतीया। सन्ध्यावन्दनादिव्याजेन अपजगाम पलायितः। इन्द्रवज्रा।

Change of V.—सपौरेण रक्षता अपजग्मे रामेण।

Derivation.—इङ्गितैः—इगिधातोः भावे क्तः। गत्वरताम्—गम्-क्वरप् तल्। शयित्वा—शी-क्त्वा। लट् शेते, शयाते, शेरते। लुङ् अशयिष्ट। जन—जन्-अच्। रजनी—रज्यते अत्र इति रजनी, रञ्ज्धातोः अनिः।

লোকদিগের ভাব যখন জানিতে পারিলেন তাহারা তাঁহার অনু-সরণে কৃতসংকল্প হইয়াছে তখন তাহাদের সহিত বনে এক রাত্রি শয়ন করিয়া ও অরণ্য সহজ বিপদ্ হইতে তাহাদিগকে রক্ষা করিয়া প্রাতঃকালে ছল করিয়া পলায়ন করিলেন।

Knowing by their gestures that they were bent upon following, he slept with them one night and kept them safe from dangers of

---

* शय वास वासिन् इत्येतेषु परेषु अकालवाचिनः उत्तरस्याः सप्तम्याः वैकल्पिकं अलुक् भवति। यथा वने वासः इति विग्रहे वनवासः वनेवासः।

अस्राम्बुरस्रं करुणं रुवन्तो
मुहुर्मुहुर्न्यश्वसिषुः कवोष्णम्।
हा राम हा कष्टमिति ब्रुवन्तः
पराङ्मुखैस्ते न्यहतन्मनोभिः॥ १७॥

the sojourn in the forest and then in the morning went away under some pretext.

Q. Parse रजनीम्, भयात्, and छलेन। Ans. See above. Q. Give the feminine form of वन। Ans. वनी। "सुवनी सम्भवदत्पिकापिका" नैष। Q. Parse प्रातः and जनानाम्। Ans. अव्ययम्, अधिकरणे सप्तमी। जनानाम्—शेषविवक्षायां कर्तरि षष्ठी। १६।

17. It consists of three sentences :—(1) ते (कर्तृ) अस्रम् अस्राक्षुः। Adj. to ते—रुवन्तः। करुणं—adv. to रुवन्तः। (2) ते, मुहुः मुहुः (व्यम्, अत्यन्तसंयोगे २या) न्यश्वसिषुः। कवोष्णम्—adv. to न्यश्वसिषुः। (3) ते, मनोभिः (उपलक्षणे ३या) न्यहतन्। Adj. to मनोभिः—पराङ्मुखैः। Adj. to ते—ब्रुवन्तः। हा राम (सम्बो) हा कष्टम् (इति योगे प्रथमा) इति--object to ब्रुवन्तः।

Prose order :—ते करुणं रुवन्तः अस्रम् अस्राक्षुः, मुहुः मुहुः कवोष्णं न्यश्वसिषुः। हा राम हा कष्टम् इति ब्रुवन्तः पराङ्मुखैः मनोभिः न्यहतन्।

Substance :—अथ ते करुणं विलपन्तः रुरुदुः, उष्णं च निश्वसितवन्तः हा राम कुत्रासि, अहो कष्टं समापतितम् इति वदन्तः स्वनगरं प्रति प्रत्यावृत्ताः। मनांसि तु तेषां रामम् अनुजग्मुः।

Explanation in tika form :—ते रामम् अपश्यन्तः पौराः करुणं दीनं यथा तथा रुवन्तः विलपन्तः, 'रु-शब्दे' इत्यस्य शतरि। अस्रम् अश्रु "अश्रु नेत्राम्बु रोदनं चास्रमश्रु च" इत्यमरः। अस्राक्षुः त्यक्तवन्तः। रुदन्त इति वा पाठः। मुहुः मुहुः भूयोभूयः अविरतमित्यर्थः। निश्वसिषुः निश्वसितवन्तः। कवोष्णम् ईषदुष्णम् अन्तःसन्तापात् इति भावः। "कवं चोष्णे" इति उष्णशब्दे परे 'कु'शब्दस्य

रुवाद्दिशः। न्यश्वसिषुः विश्वसितवन्तः। अशेर्लुङ्। हा राम अहो राम! क्वासि, हा कष्टम् अहो कीदृक् दुःखमस्मासु समापतितम्। 'हा' इति शोकसूचकाव्ययम्। इति ब्रुवन्तः एवम् उच्चार्य्य विलपन्तः ते पौराः पराङ्मुखैः रामदिगनुसारिभिः न तु अयोध्याम् प्रति गन्तुम् अभिलाषिभिः इत्यर्थः अपूर्णकामत्वात्, परिभूतैर्वा मनोभिः उपलक्षिताः सन्तः "इत्थम्भूतलक्षणे" इति तृतीया। न्यवृतन् निवृत्ताः। दीपकालङ्कारः। "अथ कारकमेकं स्यात् अनेकासु क्रियासु च" इति लक्षणात्। वृत्तमुपजातिः।

Change of V.—असृज्यं रुदद्भिः, न्यश्वासि, ब्रुवद्भिः तैः न्यवर्ति।

Derivation :—असाक्षुः—सृज्-लुङ् अन्। लट् सृजति। रुवन्तः—रु-शतृ। लट् रौति, रवीति। लुङ् अरावीत्। लुट् रविता, रोता। न्यश्वसिषुः—नि-श्वस-लुङ् अन्। लट् श्वसिति। ब्रुवन्तः—ब्रू-शतृ। पराक्—परा-अञ्च-क्विप्। रूपं यथा पुंसि, पराङ् पराञ्चौ &c.। स्त्रियां पराची नदीवत्। न्यवृतन्—नि-वृत-लुङ् अन्।

তাহারা করুণ স্বরে চীৎকার করিতে করিতে অশ্রু পরিত্যাগ করিতে লাগিল। বার বার উষ্ণ নিঃশ্বাস পরিত্যাগ করিতে লাগিল। হা রাম, হায় কি দুঃখ, ইত্যাদি বলিতে বলিতে তাহারা বিমুখ মনে নিবৃত্ত হইল।

Then crying piteously they shed tears, and breathed sighs tepid again and again. With their minds turned in the direction of Rama they returned, saying, O Ram! 'O the trouble'.

Q. Account for the double usage of मुहुः। Ans. "नित्यवीप्सयोः" नित्यत्वे वीप्सायाञ्च द्योत्ये पदस्य द्विर्वचनं स्यात् इति नित्यार्थत्वे द्वित्वम्। Q. Account for परस्मैपद in न्यवृतन्। Ans. "द्युद्भ्यो लुङि" इति वैकल्पिकं परस्मैपदम्। Q. Parse राम in हा राम, and कष्टम्। Ans. राम इत्यत्र सम्बुद्धौ प्रथमा। कष्टम् आपतितम् इत्यस्य कर्तृपदम्। अथवा इति योगे प्रथमा। Q. Give the different applications of हा। Ans. "हा विषादे च शोके च कुत्साद्दुःखार्थयोरपि".

सूतोऽपि गङ्गासलिलैः पवित्रा
सहाश्वमात्मागमनल्पमन्युः।
ससीतयो राघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश ॥ १८ ॥

इति मेदिनी। विषादे यथा 'हा हथा गमितः कालः।' शोके यथा अत्र दुःखार्थे यथा 'हा हतोऽस्मि मन्दभाग्यः'। कुत्सायान्तु 'हा' योगे द्वितीया स्यात् यथा 'हा लोकम् क्लेशवद्विषम्'। Q. Give the other forms of कवोष्णम्। Ans. "कत्‌कवौ चाम्युष्णे" चकारात् 'का' आदेशः। अतः कदुष्णम्, कवोष्णम् कोष्णम्। १७।

18. Principal part :—सूतः (कर्त्तृ) पुरम् (कर्म्म) आविवेश। अनल्पमन्युः अधीयन् and श्वसन्—adj. to सूतः। राघवयोः—कर्म्मणि षष्ठी, gram. connected with अधीयन्। ससीतयोः—adj. to राघवयोः। गङ्गासलिलैः—करणे:, gram. connected with पवित्रा। कदुष्णम्—adv. gram. connected with श्वसन्। पवित्रा—ल्यप्।

Prose order :—अनल्पमन्युः सूतोऽपि सहाश्वम् आत्मानं गङ्गासलिलैः पवित्रा ससीतयोः राघवयोः अधीयन् कदुष्णं श्वसन् पुरम् आविवेश।

Substance :—सारथिश्च अत्यर्थं शोकातुरः सन् अरण्ये रामादीनाम् आनयनात् आत्मानं घोटकांश्च पापान् मन्यमानः गङ्गाजलैः पवित्रा, रामादीन् पुनः पुनः स्मरन् उष्णं निश्वस्य अयोध्याम् आविवेश।

Explanation in tika form :—अनल्पः प्रवृद्धः मन्युः शोकः यस्य तथाभूतः सूतः सारथिः, "सूतः क्षत्ता च सारथिः" 'आविवेश' इत्यस्य उक्ते कर्त्तरि प्रथमा। सुमन्त्रः, अपि शब्दः समुच्चये। अश्वैः सहितं सहाश्वम्। "सहः सो वा" इति सहशब्दस्य विभाषया सादेशात् अत्र पाक्षिकः सहप्रयोगः, पक्षे साश्वम्। आत्मानं स्वम्, गङ्गासलिलैः सुरधुनीतोयैः पवित्रा,आत्मानम् अश्वांश्च वाह्यमाभ्यन्तरञ्च पवित्रीकृत्य। अनेन गङ्गापर्य्यन्तं तद्गमनं ध्वन्यते। ससीतयोः सीतासहितयोः राघवयोः। रघोः गोत्रापत्यम् पुमान् इति राघवः, राघवश्च राघवश्च इति राघवौ

तयोः। "सरूपाणा"मित्येकशेषः।* रामलक्ष्मणयोः "अधीगर्थदयेशां कर्म्मणि"† इति कर्म्मणि शेषे षष्ठी। अधीयन् स्मरन् "अधि-इक स्मरणे" इत्यस्य शतरि रूपम्। 'कदुष्णं' 'ईषदुष्णं' 'कवञ्चोष्णे' इति कदादेशः। पूर्व्वश्लोके कवादेशः प्रदर्शितः। पुरम् अयोध्याम् आविवेश प्रविष्टवान्। इत्युपजातिः।

Change of V.—सूतेनापि......अनल्पमन्युना......अधीयता......पुः आविविशे।

Derivation.—पवित्वा—पू-क्त्वा। पक्षे पूत्वा। लट् पुनाति, पुनीते। लुङ् अपावीत्। मन्युः—मन्-युच्। अधीयन्—अधि-इक-शतृ प्रथमा। लट् अध्येति। लुङ् अध्यगात्। लिट् अधीयाय। श्वसन्—श्वस-शतरि रूपम्। आविवेश—आ-विश-लिट् अ। लुङ् अविशत्।

সারথিও অতিশয় শোকাতুর হইয়া, গঙ্গার জলে আপনাকে ও অশ্বগণকে পূত করিয়া সীতা সমেত রামলক্ষ্মণের বিষয় ভাবিতে ভাবিতে উষ্ণ নিশ্বাস পরিত্যাগ পূর্ব্বক পুরে প্রবেশ করিল।

The Driver too, with no small amount of grief, thinking of the two descendants of Raghu together with Sita, having purified his person and the horses with the waters of the Ganges, entered the city, sighing feverishly.

Q. Comment gram. on राघवयोः। Ans. "अधीगर्थदयेशां कर्म्मणि" इति अधीगर्थस्य अर्थात् स्मरणार्थस्य 'अधि-इ'धातोः कर्म्मणि षष्ठी। 'न लोकेति' ल-विधानात् अर्थात् अधीयन् इत्यत्र शतृ-विधानात् षष्ठी-प्रतिषेधेऽपि विशेषविधिप्रभावात् न प्रतिषेधः। "सामान्यस्य विशेषस्य स्यात् विशेषविधिर्बली।" Q. Is there any samas in राघवयोः।

* "सरूपाणाम् एकशेष एकविभक्तौ।" एकविभक्तौ यानि एकविधरूपाणि एव दृष्टानि, तेषाम् एक एव शिष्यते अन्ये लुप्यन्ते। यः शिष्यते स लुप्यमानार्थाभिधायाः प्रकाशकः। अतोऽत्र द्विवचनम्।

† The object of the verb indicating recollection, or दय and ईश, has the 6th case ending.

प्रतीय सा पूर्ददृशे जनेन
द्यौर्भानुशीतांशुनिराकृतेव ।
राजन्यनक्षत्रसमन्विताऽपि
शोकान्धकारक्षतसर्व्वचेष्टा ॥ १९ ॥

Ans. एकशेषः द्वन्द्वः। See above. Q. Account for the dual number in राघवयोः। Ans. See the above foot note.। Q. Why did the coachman take a bath with the horses in the Ganges? Ans. सलक्ष्मणसीतं रामं वनं नयन् सारथिः आत्मानं वाहांश्च पापिनः अकरोत्, अतः तत्पापात् मोचयितुं गङ्गासलिलावगाहमकरोत् इति। १८।

19. Principal part :—जनेन (अनुक्त कर्त्तृ) पूः (उक्त कर्म) ददृशे। द्यौः—उपमानकर्म। सा—adj. to पूः। भानुशीतांशुनिराकृता—adj. to द्यौः। प्रतीय—प्रत्यागम्य, ल्यप्। The rest are adj. to पूः or द्यौः। The reading प्रतीयुषा—adj. to जनेन।

Prose order :—जनेन प्रतीय सा पूः राजन्यनक्षत्रसमन्विता अपि भानुशीतांशुनिराकृता द्यौः इव शोकान्धकारक्षतसर्व्वचेष्टा ददृशे।

Substance :—अथ प्रजावर्गः अयोध्यां प्रत्यागम्य ददर्श यत् सा पुरी, सत्सु बहुष्वपि क्षत्रियेषु रामलक्ष्मणाभ्यां विहीना सती, नक्षत्रशोभितमपि चन्द्रसूर्यविहीनम् आकाशमिव शोकान्धकारेण पूरिता अतएव विरतसमस्तकार्य्या वर्त्तते इति।

Explanation in tika form :—जनेन रामानुयायिना पौरवर्गेण प्रतीय प्रतिनिवृत्य सा पूः अयोध्या। राज्ञोऽपत्यानि राजन्याः क्षत्रियाः, "राजश्वशुराद्यत्" इति यत्-प्रत्ययः। ते नक्षत्राणीव, उपमित समासः। तैः समन्विता युक्तापि भानुशीतांशुभ्यां सूर्य्यचन्द्राभ्यां च ("भानू रश्मिदिवाकरौ"।) निराकृता रहिता द्यौः आकाशमिव। शोकः अन्धकार इव इति उपमितसमासः। तेन क्षता नाशिता सर्व्वा चेष्टा अनुष्ठेयकर्म्मणि परिस्पन्दो यस्याम् तथोक्ता ददृशे

दृष्टा । यथा नक्षत्रसमन्विताऽपि द्यौः सूर्य्यचन्द्राभ्यां निराकृता अन्धकारचलतसर्व्व-चेष्टा सती, प्रतीयते तथा सापि नगरी नक्षत्रतुल्यैः राजभिः युक्तापि सूर्य्यचन्द्र-तुल्याभ्याम् राघवाभ्यां हीना अतः अन्धकारसदृशेन शोकेन लुप्तसर्व्वकार्य्या सती व्यलोक्यत इति भावः । उपरोक्तेषु विशेषणेषु सर्व्वत्र नगरीपक्षे उपमितसमासः, आकाशपक्षे मध्यपदलोपी समासश्च ज्ञेयः । 'प्रतीयुषा सा ददृशे' इति पाठान्तरम्, प्रतिनिवृत्तेन जनेन पूः ददृशे इति योजना । प्रतीयुषा इति इण्धातोः क्वसुप्रत्ययेन निपातितम् । अलङ्कारः श्रौती पूर्णोपमा । वृत्तम् उपजातिः, पादशेषे ऋकारस्य विभाषया दीर्घत्वम् ।

Change of V.—तां पुरं ददर्श जनः दिवं भानुशीतांशुनिराकृतामिव राजन्यनक्षत्रसमन्वितामपि शोकान्धकारचलतसर्व्वचेष्टाम् ।

Derivation.—प्रतीय—प्रति-इ-ल्यप् । ददृशे—दृशेः कर्म्मणि लिट् । कर्त्तरि लुङि अदर्शत्, अद्राक्षीत् । द्यौः—दिव-क्विप् प्रथमा । लट् दीव्यति । लुङ् अदेवीत् । लिट् दिदेव । भानु—भाधातोः नुक् । निराकृता—निर-आ-कृ-कर्म्मणि क्तः । राजन्य—राजन्-यत् । नक्षत्र—नक्ष, गतौ, इत्यस्मात् अत्रन् ।

যাহারা রামের অনুসরণ করিয়াছিল, তাহারা প্রত্যাবৃত্ত হইয়া দেখিল নগরী সূর্য্য চন্দ্র বিরহিত আকাশের ন্যায় ক্ষত্রিয়-নক্ষত্রসমন্বিত হইয়াও শোকান্ধকারে চেষ্টা শূন্য হইয়াছে।

By the people returning was the city seen like the firmament deprived of sun and moon, having all movements stopped through the darkness of grief, though attended by the warriors like so many stars.

Q. Comment gram. on प्रतीय । Ans. इङ्गतौ, इत्यस्मात् प्रतिपूर्व्वकात् ल्यप् । नतु इण्गतौ इत्यस्मात् । तथात्वे प्रतीत्य इत्येवं स्यात् । Q. Write notes on प्रतीयुषा the other reading. Ans. "उपेयिवान् अनाश्वान् अनूचानश्च" इति इण्धातोः क्वसुप्रत्ययः निपातितः । सूत्रे 'उप'ग्रहणं न तन्त्रम् । (The prefix उप in the aphorism is not compulsory) । अतः 'प्रति' इत्यस्मात् अपि इण्धातोः क्वसुः स्यात् । Q. Ac-

विलोक्य रामेण विना सुमन्त्र-
मच्योष्ट सत्त्वान्नृपतिश्च्युताशः ।
मधूनि नैषीद्व्यलिपन्न गन्धै-
र्मनोरमे न व्यवसिष्ट वस्त्रे ॥ २० ॥

count for the priority and proximity of the terms in भानुशीतांशू । Ans. सूर्यस्य अभ्यर्हितत्वात्, 'भानु' इति शब्दस्य च अल्पाच्तरत्वात्, "अल्पाच्तरम्" "अभ्यर्हितञ्च" इति सूत्रद्वयबलात् तस्य पूर्व्व निपातः । Q. Give the meaning of भानु preceded by स्वर् चित्र and दृहत् । Ans. "स्वर्भानुस्तु भवेत् राहुः । चित्रभानू रवौ वह्नौ बृहद्भानुस्तु पावके । १९ ।

20. It consists of 4 sentences :—(1) नृपतिः (कर्त्तृ) सत्त्वात् (अपादान) अच्योष्ट । (2) सः, मधूनि (कर्म्म) न ऐषीत् । (3) सः गन्धैः (करणे) न व्यलिपत् । (4) सः वस्त्रे (कर्म्म) न व्यवसिष्ट । मनोरमे—adj. to वस्त्रे । च्युताशः—adj. to नृपतिः । Subordinate to (1) रामेण (विना योगे ३) विना, सुमन्त्रं विलोक्य । विलोक्य—ल्यप् । सुमन्त्रम्—object to विलोक्य ।

Prose order :—नृपतिः रामेण विना सुमन्त्रं विलोक्य च्युताशः (सन्) सत्त्वात् अच्योष्ट । मधूनि न ऐषीत्, गन्धैः न व्यलिपत्, मनोरमे वस्त्रे न व्यवसिष्ट ।

Substance :—सुमन्त्रमेकाकिनं प्रत्यागतम् अवेक्ष्य, न रामः पौराणामपि वचनैः अनुरक्तः समायातः इति हताशः संवृत्तः । स पुनः स्वभावप्रियात् भोग्यवस्तुजातात् विरतोऽभूत् । तथाहि स मधूनि, गन्धान्, सुवस्त्राणि च विजह्रौ ।

Explanation in tika form .—नृपतिः दशरथः (अच्योष्ट, ऐषीत्, व्यलिपत् इत्येषां कर्त्तृपदम्) रामेण विना रामादिहीनं सुमन्त्रं विलोक्य दृष्ट्वा । च्युता विगलिता आशा 'गतोऽपि रामः कदाचित् पौराणामनुरोधात् मद्वचनमतिक्रम्य आगच्छेत्' इत्येवंरूपा यस्य स च्युताशः हताशः सन् सत्त्वात् स्वभावात् स्वभाव-

रुचिरेभ्यः भोग्यद्रव्येभ्यः इति यावत्। अथवा व्यवसायात्। "सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः।" "आत्मनि व्यवसायासु चित्तेष्वस्त्री तु जन्तुषु" इति मेदिनी। अच्योष्ट च्युतः। स तानि विजहौ इत्यर्थः। तथाहि, मधूनि मद्यानि नैषीत् पातुं न इष्टवान्। "मधु मद्ये पुष्परसे क्षौद्रेऽपि" इत्यमरः। अथवा मधूनि, मधुराणि द्रव्याणि; मधुरद्रव्यार्थे मधुशब्दस्य उपलक्षितत्वम्। गन्धैः चन्दनादिभिः न व्यलिपत् स्वाङ्गमिति यावत्। लिपेः लुङ्। अनुलेपनादिकमत्याक्षीत् इत्यर्थः। तथा मनोरमे चेतोहारिणी वस्त्रे वस्त्रद्वयं न व्यवसिष्ट न वसे स्म न परिहितवान् इत्यर्थः। 'वस आच्छादने' इत्यस्मात् लुङ्। सः आहारानुलेपनवस्त्रादिषु रतिं विजहौ इत्यर्थः। अनेकक्रियासु एककर्तृकत्वात् दीपकालङ्कारः। वृत्तमुपजातिः।

Change of V.—अच्यावि नृपतिना च्युतात्मेन,......न ऐषिषत, व्यलेपि ......व्यवसिषातात्।

Derivation :—अच्योष्ट—च्यु-लुङ् त। लोट् च्यवते। लिट्. चुच्युवे। ऐषीत्—इष लुङ् द। लट् इच्छति। व्यलिपत्—वि-लिप-लुङ् द। लट् लिम्पति, लिम्पते। लुङ् अलिपत्, अलिपत, अलिप्त। व्यवसिष्ट—वि-वसु-लुङ् त। लट् वस्ते वसाते वसते, वस्से वसाथे वड्ढे, वसे वस्वहे वस्महे। लिट् ववसे।

রাজা যখন দেখিলেন সুমন্ত্র রামচন্দ্র বিনা একাকী উপস্থিত হইয়াছে তখন তিনি হতাশ হইয়া সমুদয় চেষ্টা হইতে বিরত হইলেন তিনি আর মধুপানে অভিলাষ করিতেন না, গন্ধবিলেপন পরিত্যাগ করিলেন, মনোরম বস্ত্রযুগল পরিধান করিতে নিবৃত্ত হইলেন।

The king seeing Sumantra without Rama, left off, in despair, his habits. He did not wish to take sweet drinks, nor 'anoint his body with perfumes,' and did put on no fine dress.

Q. Show the significance of मधूनि नैषीत् &c. Ans. These signify that the king left off all luxuries. Q. Explain सत्वात् अच्योष्ट। Ans. See above. Q. Conjugate वस् in लट्। Ans. See above. Q. Give the different

आसिष्ट नैकत्र शुचा व्यरंसीत्
कृताकृतेभ्यः क्षितिपालभाग्भ्यः।
स चन्दनोशीरमृणालदिग्धः
शोकाग्निनागात् द्युनिवासभूयम्॥ २१॥

meanings of मधु। Ans. "मधुः (पुंसि) दैत्ये च चैत्रे च; मद्ये पुष्परसे मधु" (क्लीवे)।२०।

21. This is a compound sentence, composed of three simple sentences. (1) सः (कर्तृ) शुचा (हेतौ) एकत्र (व्यम्, अधि) न आसिष्ट। (2) सः, क्षितिपालभाग्भ्यः (अपादान) व्यरंसीत्। कृताकृतेभ्यः—adj. to क्षितिपालभाग्भ्यः। (3) सः द्युनिवासभूयम् (कर्म) अगात्। चन्दनोशीरमृणालदिग्धः—adj. to सः। शोकाग्निना—करणेन।

Prose order :—शुचा एकत्र न आसिष्ट, कृताकृतेभ्यः क्षितिपालभाग्भ्यः व्यरंसीत्, सः चन्दनोशीरमृणालदिग्धः (अपि) शोकाग्निना द्युनिवासभूयम् अगात्।

Substance :—शोकेन तथा चञ्चलोऽभूत् राजा यथा नैकत्र क्षणम् उपविष्टः। अंशतः सम्पादितम् असम्पादितं वा कार्यं राजोचितं न सम्पादितवान्। सन्तापनिवारणाय चन्दनादिकं प्रयुञ्जानोऽपि शोकाग्निना दग्धः देवत्वमवाप, अर्थात् मृतः।

Explanation in tika form :—शुचा शोकेन करणेन, हेतुना वा, रामादिविरहदुःखेन, "मन्युशोकौ तु शुक् स्त्रियाम्" इत्यमरः। एकत्र एकस्मिन् स्थाने न आसिष्ट, नोपाविष्टः शोकजनितात् मनोविक्षोभात् न एकस्मिन् स्थाने स्थिर आसीत् इत्यर्थः। नृपतिरिति शेषः। आसेरात्मनेपदिनो लुङ्। कृतानि च तानि अकृतानि चेति कृताकृतानि अंशतः सम्पादितानि वा, "क्तेन नञ्विशिष्टेनानञ्"* इति कर्मधारयः। तेभ्यः असमापितेभ्य इत्यर्थः। केचित् कृतावयव-

* Let there be कर्मधारयसमास in two words formed of क्त, of which one is preceded by नञ् but the other is without it. Thus—कृताकृतम्। दृष्टादृष्टम्। भुक्ताभुक्तम्।

सम्बन्धात् कृतं, अकृतावयवसम्बन्धात् अकृतम् इति एकार्थत्वात् कर्मधारय इत्याहुः ।
क्षितिपालं राजानं भजन्ते इति तेभ्यः क्षितिपालभाग्भ्यः ("भजो ण्विः" इति ण्विः)
राजकर्त्तव्यदूतसंप्रेषणादिभ्यः व्यरंसीत् विरतः विमुखोऽभूदित्यर्थः। "जुगुप्सा-
विरामप्रमादार्थानामुपसंख्यानम्" इति पञ्चमी। "व्याङ्परिभ्यो रमः"† इति
परस्मैपदम्। स ईदृशो राजा चन्दनञ्च उशीरञ्च वीरणमूलञ्च ('वेणामूल' इति
भाषा) मृणालं बिसञ्च तैः तापोपशान्तिसाधनैः दिग्धो लिप्तोऽपि "स्याद्वीरणं
वीरतरं मूलेऽस्योशीरमस्त्रियाम्" इत्यमरः। शोकाग्निना उद्वेगाग्निनेव हेतुना
दिवि निवासो येषां ते द्युनिवासाः देवाः तेषां भावः द्युनिवासभूयं देवभावम्,
मृत्युवशमिति यावत्। "भुवो भावे"‡ इति क्यप्। अगात् गतवान्। इणो
लुङ्। विरोधाभासः अलङ्कारः। वृत्तमुपजातिः।

Change of V.—आसि......व्यरामि। तेन च...दिग्धेनापि अगायि।

Derivations :—आसिष्ट—आस-लुङ् त। लट् आस्ते। लिट् आसाञ्चक्रे।
शुचा—शुच-क्विप्, तृतीया। व्यरंसीत्—वि-रम-लुङ् द। उपसर्गहीनस्य
रमेः लट् रमते, लुङ् अरंस्त। भाज्—भज-ण्विः। दिग्ध—दिह-कर्मणि क्त।
लट् देग्धि, दिग्धे। लुङ् अधिक्षत्, अदिग्ध, अधिक्षत। निवास—नि-वस-अधि-
करणे घञ्। द्युनिवासभूयम्—द्युनिवास-भू-क्यप्।

তিনি শোকপ্রভাবে এক স্থানে বসিতেন না। রাজার করণীয়
অসম্পূর্ণ বা আংশিক সম্পাদিত কার্য্য সম্পাদনে বিরত হইলেন।
চন্দন, বেণামূল ও মৃণাল দ্বারা তাঁহার অঙ্গ সুশীতল করিলেও তিনি
শোকাগ্নি প্রভাবে দেবত্ব প্রাপ্ত হইলেন।

He could not, for grief, sit still in one place; desisted from all royal duties not wholly accomplished or done partly. Although

---

† विरमति, आरमति, परिरमति। अन्यत्र आत्मनेपदम्, यथा अभिरमते।

‡ Let there be the affix क्यप् after भू preceded by some उपपद in the sense of भाव। ब्रह्मणो भावः ब्रह्मभूयम्। In the absence of उपपद,-भव्यम्, प्रभव्यम्।

विचुक्रुशुर्भूमिपतेर्महिष्यः
केशान् लुलुञ्चुः स्ववपूंषि जघ्नुः।
विभूषणान्युन्मुमुचुः क्षमायां
पेतुर्बभञ्जुर्वलयानि चैव ॥ २२ ॥

besmeared with sandal, the roots of Vena and lotus stalks, he, by the fire of grief was transformed into a diety.

Q. Account for परस्मैपद in व्यरंसीत् and formation of द्युनिवासभूयम्। Ans. See above. Q. Derive चिति and conjugate the root in लट्। Ans. चियन्ति अस्याम् इति चितिः। लट् चियति। "ईष्टे वा गच्छतीत्यर्थे चयतीत्यादिकं भवेत्। पृथिव्या चियतीत्यादौ निवासार्थः प्रकीर्त्तितः। पापं चिणोति लोकेऽसौ विनाशार्थं चिणुर्मतः। Q. Explain शोकाग्निनागात् &c. Ans. यथा अग्नितापात् विगलितेन लौहेन अस्त्रादिकं निर्म्मितं भवति तथा राज्ञः शीतलद्रव्यदिग्धेनापि मानुषशरीरेण शोकतापप्रभावात् देवो निर्म्मितः अर्थात् सः पञ्चत्वं गतः। २१।

22. It consists of six simple sentences. See below.

Prose order :—(1) भूमिपतेर्महिष्यः विचुक्रुशुः, (2) केशान् लुलुञ्चुः (3) स्ववपूंषि जघ्नुः, (4) विभूषणानि उन्मुमुचुः, (5) क्षमायां पेतुः, वलयानि च बभञ्जुः।

Substance :—अथ दशरथम् उपरतं विलोक्य तस्य महिष्यः उच्चैः क्रन्दितवत्यः। शोकात् केशान् उत्पाटितवत्यः। हृदि कराघातं कृतवत्यः। भूषणानि तत्यजुः, छिन्नाः तरव इव भुवि पेतुः। वलयानि तु सर्व्वथा भग्नानि चक्रुः।

Explanation in tika form :—भूमिपतेः राज्ञो दशरथस्य, शेषे षष्ठी। महिष्यः पत्न्यः कर्त्र्यः, [यद्यपि "कृताभिषेका महिषी" इत्यमरः, सा च एकैव, तथापि उपचारात् पत्नीमात्रेऽपि। तिसृणामेव कृताभिषेकात्वमिति केचित्] विचुक्रुशुः हाहा स्वामिन् इति क्रन्दितवत्यः। केशान् लुलुञ्चुः उत्पाटितवत्यः। दैधर्य्येण

हतश्रीकाणां किमस्माकं केशश्रीभया इति केशान् उत्पाटितवत्यः। अथवा केशोत्पाटनं श्रीक्षान्तिमुग्ध्यज्ञापकम्। लुलुचुरिति पदान्तरम्। स्ववपूंषि स्वानि वपूंषि अथवा स्वेषां वपूंषि। "स्वो ज्ञातावात्मनि, स्वं त्रिष्वात्मीये, स्वोऽस्त्रियां धने।" इत्यमरः। स्वशरीराणि जघ्नुः मत्या वक्षसि ताड़ितवत्यः। विभूषणानि हारादीनि उन्मुमुचुः वैधव्यात् मुक्तवत्यः। क्षमायां भुवि पेतुः "क्षिति-क्षान्त्योः क्षमा" इत्यमरः। तथा वलयानि अवैधव्यलक्षणानि बभञ्जुः चूर्णितवत्यः एव। 'एव' कारेण वैधव्ये वलयभञ्जने अवश्यकर्त्तव्यत्वं द्योतितम्। सर्व्वत्र लिट्। दीपकालङ्कारः। बहुक्रियाभिः तासाम् अस्थिरत्वम् ध्वनितम्। वृत्तमुपजातिः।

Change of V.—विचुक्रुशे......महिषीभिः, केशाः लुलुञ्चिरे...जघ्निरे, उन्मुमुचिरे, पेते, बभञ्जिरे।

Derivation.—विचुक्रुशुः—वि-क्रुश्-लिट् उस्। लट् विक्रोशति। लुङ् अक्रुक्षत्। महिषी—मह-टिषच्। लुलुञ्चुः—लुञ्च-लिट उस्। लट् लुञ्चति। लुङ् अलुञ्चीत्। जघ्नु—हन-लिट् उस्। लट हन्ति। लुङ् अवधीत्। उन्मुमुचुः—उत् मुच-लिट् उस्। लट मुञ्चति, मुञ्चते। लुङ् अमुचत्, अमुक्त। पेतुः—पत-लिट् उस्। लुङ् अपप्तत्। बभञ्जुः—भन्ज-लिट् उस्। लट् भनक्ति। लुङ् अभाङ्क्षीत्।

রাজমহিষীগণ উচ্চৈঃস্বরে চীৎকার করিতে লাগিলেন। কেশপাশ উৎপাটন করিয়া বক্ষে করাঘাত করিতে লাগিলেন। অলঙ্কারাদি পরিত্যাগ করিয়া ভূমিতে পতিত হইলেন ও বলয় ভাঙ্গিয়া ফেলিলেন।

The qneens cried aloud; they tore their hairs; they struck their persons; they threw off their jewels, fell on the groaud and then of course broke their bracelets.

Q. Show the force of एव here. Ans. See above. Q. Show the different applications of एव। Ans. "एवेत्यवधारणानियोगौपम्यनियोगेषु" यथा 'अहमेव ददामि।' 'अद्यैव'। 'श्रीः ते एव मे अस्तु'। 'अद्यैव'। Q. Give the derivative meaning of वपुष्। Expound the samas in स्ववपूंषि। Ans.

ताः सान्त्वयन्ती भरतप्रतीक्षा
तं बन्धुता न्यक्षिपदाशु तैले ।
दूतांश्च राजात्मजमानिनीषून्
प्रास्थापयन्मन्त्रिमतेन यूनः ॥ २३ ॥

उप्यन्ते देहान्तरभोगसाधनानि बीजानि अत्र इति वपुः । वप्धातोः उसिन् । स्त्री वपुः इति कर्म्मधारयसमासः अथवा स्त्रिया वा स्त्रीणां वपुः इति षष्ठीसमासः । नतु स्त्रिया वा स्त्रीणां वपुः । आत्मनि अर्थे स्वशब्दस्य पुंस्त्वविधानात् । तथाहि "स्वोज्ञातावात्मनि" इत्यमरः । See above. Q. Show the fitness of a variety of verbs to a single nominative. Ans. बहुभिः क्रियाभिः, शोकात् महिषीणाम् अधिकमनस्तापत्वं प्रदर्शितम् । २२ ।

23.. Principal parts :—(1) बन्धुता (कर्तृपदम्) तं (कर्म्म) तैले न्यक्षिपत् । (2) दूतान् (कर्म्म) च प्रास्थापयत् । Adj. to बन्धुता—सान्त्वयन्ती and भरतप्रतीक्षा । ताः—object to सान्त्वयन्ती । आशु—क्रियाविशे । Adj. to दूतान्—आनिनीषून् and यूनः । राजात्मजम्—object to आनिनीषून् । मन्त्रिमतेन—प्रकृत्यादित्वात् तृतीया ।

Prose order :—ताः सान्त्वयन्ती बन्धुता भरतप्रतीक्षा (सती) तम् आशु तैले न्यक्षिपत् । राजात्मजम् आनिनीषून् यूनः दूतान् च मन्त्रिमतेन प्रास्थापयत् ।

Substance :—अथ स्वजनाः, महिषीः प्रबोधदानेन आश्वास्य, राज्ञः और्द्ध्वदैहिककार्य्यार्थम् भरतम् अपेक्षमाणाः, पूतिगन्धनिवारणाय तं तैलपूर्णे पात्रे स्थापयामासुः । स्वतः प्रवृत्तान् दूतान् च यूनः भरतम् "आनेतुं" प्रास्थापयन् मन्त्रिमतेन ।

Explanation in tika form :—ताः महिषीः सान्त्वयित्वा 'भरशरीरिणां ध्रुवम्' इत्यादिप्रबोधवचनैः आश्वास्य । सान्त्वं करोतीति सान्त्व-धातु 'तत्करोति तदाचष्टे' इति णिच् । तस्मात् शतृ । बन्धुता (कर्त्री) बन्धु

समूहः ["ग्रामजनबन्धुसहायेभ्यः तल्" इति तल्] भरतं प्रतीक्षते इति भरत-प्रतीक्षा, तेन संस्कारः कर्त्तव्य इति अपेक्षमाणा सती। "ईक्षिक्षमिभ्यश्च"* इति अः। तं दशरथं मृतम् आशु शीघ्रं पूतिगन्धाशङ्कया तैलैः तैलपूर्णे पात्रे न्यक्षिपत् स्थापितवती। क्षिपेर्लुङ्। राजात्मजं भरतं आनिनीषून् आनेतुमिच्छून्, ये स्वतः एव भरतमानेतुमिच्छन्ति तत्प्रस्थापनं युक्तम् इति भावः। यूनः युवकान्, तेषां शीघ्रगमनसामर्थ्यात्। दूतान् मन्त्रिणां मतेन बुद्ध्या। प्रकृत्यादिभ्यः तृतीया। कैकेयीं प्रति वैमुख्यात् न तु स्वेच्छया इत्यर्थः प्रास्थापयत् प्रहितवती। जनता इति कर्तृपदेन अन्वयः। वृत्तमिन्द्रवज्रा।

Change of V.—सान्त्वयन्त्या भरतप्रतीक्षया स बन्धुतया न्यक्षेपि दूताश्च आनिनीषवः प्रास्थाप्यन्त युवानः।

Derivation.—सान्त्वयन्ती—(सान्त्व करोतीति णिच्) सान्त्वि-शतृ स्त्रीत्वाद्दीप्। बन्धुता—बन्धु-तल्। न्यक्षिपत्—नि-क्षिप-लुङ् द, पक्षे न्यक्षेप्सीत्। आनिनीषून्—आ-नी-सन्-उः। प्रास्थापयत्—प्र-स्था-णिच्-लङ् द।

আত্মীয়বর্গ তাঁহাদিগকে সান্ত্বনা করিয়া ভরতের প্রতীক্ষায় তাঁহাকে (দশরথের দেহ) তৈলে নিক্ষেপ করিল। এবং মন্ত্রিমতানুসারে রাজপুত্রকে আনয়নার্থ সমুৎসুক তরুণ বয়স্ক দূতদিগকে প্রেরণ করিল।

The relatives consoling them soon put him in oil 'in expectation of Bharat.' Agreeably to the wishes of the ministers they sent too the young messengers desirous of carrying the prince.

Q. Account for the formation of भरतप्रतीक्षा। Ans. See above. Q. Write notes on the peculiar usage of तल् in बन्धुता। Ans. अत्र तु समूहार्थे तल्, न तु भावे। Show the fitness of यूनः। Ans. तरुणवयस्त्वात् भरतम् नेतुम् क्षान्तिम् अननुभवन्तः इत्यर्थः। २१।

---

* गुरुप्रतीक्षा, बहुक्षमा (भः)।

सुप्तो नभस्तः पतितं निरीक्षा-
श्चक्रे विवस्वन्तमधःस्फुरन्तम् ।
आख्यद्वसन्मातृकुले सखिभ्यः
पश्यन् प्रमादं भरतोऽपि राज्ञः ॥ २४ ॥

24. Principal part :—भरतः (कर्त्तृ) सखिभ्यः (क्रियाग्रहणात् चतुर्थी) आख्यत् । Adjuncts to the subject—मातृकुले वसन्, राज्ञ प्रमादं पश्यन् । The other sentence—यथा, सुप्तः (भरतः इत्यस्य विश) विवस्वन्तं (कर्म) निरीक्षाञ्चक्रे । नभस्तः—अपादानम् । पतितम् and स्फुरन्तम्—Adj. to विवस्वन्तम् ।

Prose order :—भरतोऽपि मातृकुले वसन् राज्ञः प्रमादं पश्यन्, सुप्तः (अहम्) नभस्तः पतितं अधःस्फुरन्तं विवस्वन्तं निरीक्षाञ्चक्रे (इति) सखिभ्यः आख्यत् ।

Substance :—भरतः मातुलभवने स्वप्ने ददर्श, यथा सूर्यः आकाशा भूमौ पतितः स्फुरति इति । अथ राज्ञः विपदम् आशङ्कमानः तद्वृत्तान्तम् स सखिभ्यः निवेदयामास ।

Explanation in tika form :—भरतोऽपि भरतश्च इत्यर्थः । अपि रत्र समुच्चये । "गर्हा समुच्चयप्रश्नशङ्कासम्भावनास्वपि ।" मातृकुले मातामहानां वसन् तिष्ठन् राज्ञो दशरथस्य प्रमादम् अनिष्टं पश्यन् वितर्कयन्, सुप्तो निद्रितोऽहं नभस्तः आकाशात् 'ध्रुवमपायेऽपादानम्' इति अपाये अर्थात् आकाशात् विश्लेषे अपादाने पञ्चम्यां तसिल् । पतितं भ्रष्टं अधःस्फुरन्तं भूमितले दीप्यमानं विवस्वन्तम् आदित्यं निरीक्षाञ्चक्रे दृष्टवानस्मि, स्वप्ने दर्शनात् लिट्प्रयोगः । इति सखिभ्यः मित्रेभ्यः, क्रियाग्रहणमपि कर्त्तव्यम्" इति इष्टेः चतुर्थी । आख्यत् कथितवान् । ख्याधातोः लुङ् । उपजातिवृत्तम् ।

Change of V.—आख्यायि वसता.....पश्यता ।

Derivation.—सुप्तः—स्वप्-कर्त्तरि क्तः । लट् स्वपिति । लुङ् अस्वा

अभिप्रवव्राज्ययिकं तमेत्य
दूता यदार्थं प्रयियासयन्तः।
आंहिष्ट जाताभ्रिह्निषस्तदासा-
वुत्कण्ठमानो भरतो गुरूणाम्॥ २५॥

त्। निरीक्षाञ्चक्रे—निर-ईक्ष-लिट् ए। विवस्वन्तम्...वि-वस्-भावे क्विप्
प्, द्वितीया। आख्यत्...आ-ख्या-लुङ् द।

ভরত মাতামহ গৃহে অবস্থান কালে রাজা দশরথের মৃত্যু আশঙ্কা
রিয়া বন্ধুদিগকে কহিলেন, আমি নিদ্রাবস্থায় দেখিলাম সূর্য্য আকাশ
হৈতে ভূমিতে পতিত হইয়া তেজঃ বিকীরণ করিতেছে।

I have, in a dream, seen the sun dropped from the sky and shin-
; below, said Bharat to his friends, while in nis mother's family,
›rehending death of the king.

Q. Account for निरीक्षाञ्चक्रे being used in लिट्।
ıs. "परोक्षे लिट्" [Let लिट् come after a verbal root
ıployed in signifying what took place before the current
r and unperceived by the narrator] इति परोक्षे एव लिट्
ति। तथापि यः सुप्तः उन्मत्तः प्रमत्तो वा, तस्य विषयस्य अप्रत्यक्षतया तत्-
ायाम् लिट्प्रयोगो भवति। भरतः सुप्तः एव अदर्शत्, अतः 'अहं निरीक्षाञ्चक्रे',
लिट्। Q. Give the derivative meaning and the
ːmation of विवस्वत्। Ans. विवस्ते विविधप्रकारेण आच्छादयति
विवः किरणः, वि-वस्धातोः क्विप्। तत् अस्य अस्ति इति विवस्वत्,
!, "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" इति मतुपो वतुप्। २४।

25. Principal part:—तदा असौ भरतः (कर्त्ता) आंहिष्ट।
jective to भरतः—जाताभ्रिह्निषः and उत्कण्ठमानः। गुरूणाम्—
त्कण्ठमानः इत्यस्य कर्म्मणि षष्ठी)। Other sentence—यदा दूताः

(कर्त्तृ) अर्थम् (कर्म्म) न अभिश्रवन् । आत्ययिकम्—adj. to अर्थम् । प्रयियासयन्तः—Adj. to दूताः ।

Prose order :—यदा दूता एत्य प्रयियासयन्तः तम् आत्ययिकम् अर्थं न अभिश्रवन् तदा जाताभिह्विषः असौ भरतः गुरूणाम् उत्कण्ठमानः अह्विष्ट ।

Substance :—वार्त्तावहाः भरतमातुलकुलम् आगत्य, स्वप्रदर्शनेन उद्विग्न-चित्तं गृहगमनाय च उद्यतं भरतं प्रेरयितुकामाः यदा अमङ्गलवार्त्तां न श्रावयामासुः तदा गमनोत्सुकः सः सोत्कण्ठं पितरं स्मरन् गृहं चलितः ।

Explanation in tika form :—यदा दूताः सन्देशहराः "स्यात् सन्देशहरो दूतः" इत्यमरः । एत्य आगत्य भरतमातुलकुलमित्यर्थः । प्रयियासयन्तः प्रयाणेच्छुं प्रयोजयन्तः सनन्त-याधातोः णिचि शतृप्रत्ययः । तं भरतम् ["गति-बुद्धिप्रत्यवसानार्थशब्दकर्म्मकाकर्म्मकाणामणिकर्त्ता स णौ" इति 'अभिश्रवन्' इति शब्दकर्म्मकात् श्रुधातोः अणिजन्तकर्त्तुः भरत इत्यस्य कर्म्मत्वम्] अत्ययो विनाशः स प्रयोजनमस्येति आत्ययिकः तं आत्ययिकं अत्ययरूपं । तदस्य प्रयोजनमिति ठञ् । अर्थं वस्तु, "अर्थोऽभिधेये शब्दानां धनकारणवस्तुषु । प्रयोजने निवृत्तौ च विषये च प्रयुज्यते" इति शासनात् । यद्वा अर्थ्यते अनेन इति अर्थं वचनम् आत्ययिकम् अनर्थसम्बन्धीत्यर्थः । न अभिश्रवन् श्रावितवन्तः । श्रुधातोर्ण्यन्तात् लुङि । अर्थ-मित्यत्र अमुमिति पाठे अमुं भरतमिति । तदा जाता अभिह्विषा गमनेच्छा यस्येति तादृशः असौ भरतः गुरूणां पित्रादीनां [("अधीगर्थदयेशाङ्कर्म्मणि" इति स्मरणार्थक उत्कण्ठमानः इत्यस्य कर्म्मत्वात् तद्योगे षष्ठी ।] उत्कण्ठमानः सोत्कण्ठं स्मरन् "मठि कठि शोके" इत्यात्मनेपदम् । अह्विष्ट गतवान् । अह्विगतौ लुङ् । उप-जातिः । ['अभिश्रवन् आत्ययिकं तमेत्य' इति जयमङ्गलसम्मतः पदच्छेदः । तन्मते 'आत्ययिकम् अर्थम्' अर्थात् 'पिता ते स्वामः त्वां द्रष्टुमिच्छति' इति आत्ययिकम् वचनम्' अभिश्रवन् श्रावयामासुः । एतच्च सुगममेव ।]

Change of V.—यदापि सः आत्ययिकम्......दूतैः अर्थम्, प्रयियासयद्भिः । अह्विष्ट जाताभिह्विषेण अमुना उत्कण्ठमानेन भरतेन ।

Derivation.—अभिश्रवन्—(श्रु-णिच्) श्रावि-लुङ् अन् । आत्ययिकम्—अत्यय-ठञ् । एत्य—आ-इण-ल्यप् । प्रयियासयन्तः—प्र-यियास (या-सन्

बन्धून्नयक्लिष्ट समाकुलत्वा-
द्दावेदुष: स्नेहवशादपायम्।
गोमायुशारङ्गगणाश्च सम्यङ्
नायासिषुर्भीममरासिषुश्च ॥ २६ ॥

ेवप्-अह। आक्लिष्ट—अनृङ-लुङ्त। लट् संज्ञते। अक्लिक्लिषा—अनृङ-सन्-म, ततष्टाप्। उत्कण्ठमानः—उत्-कण्ठ-शानच्।

यৎকালে দূতগণ গমনার্থ উদ্যত ভরতকে পাঠাইবার জন্য বিপৎ সংক্রান্ত ঘটনা তাহাকে না শুনাইল, ভরত গুরুজনের উৎকণ্ঠায় গৃহগমনার্থ উৎসুক হইয়া প্রস্থান করিলেন। [অথবা যখন দূতগণ কহিল নৃপতির সংসয়াপন্ন পীড়া উপস্থিত।]

When the messengers, in order to have him feel desirous to go, did not let him hear of the 'disastrous affairs', Bharat anxious as he was for his parents, felt great inclination to go and departed. (Or——When the messengers let him hear of his father's illness).

Q. Account for the sixth case ending and the plural form in गुरूणाम्। Ans. उत्कण्ठमानः अर्थात् स्मरन्, इति स्मरणार्थतया "अधीगर्थदयेशां कर्मणि" इति अधीगर्थतया अर्थात् स्मरणार्थतया कर्मणि पाणिकी षष्ठी। बहुवचनं गौरवे। Q. Derive अक्लिक्लिषा and भरत। Ans. भरं तनोति इति भरतः, भर उपपदात् तनधातोः डः। For अक्लिक्लिषा see above. Q. Give the meaning of दूतः। Ans. "स्वरीत्यश्रधिकं खाय्यं तमाहुर्दूतलक्षणम्" इति षष्ठमी सर्गे श्रुतिः। दवति गच्छति इति दूतः। दुगती "दुतनिभ्यां दीर्घश्च" इति दुधातोः क्तः दीर्घश्च। Q. Give the abstract noun of दूत। Ans. दूत्यं, दौत्यं वा। २५।

26. (भरतः) समाकुलत्वात् (हेतौ पञ्चमी) बन्धून् (कर्म) अयक्लिष्ट। Adj. to बन्धून्—आवेदुषः। अपायम्—object to आवेदुषः। [Adj. to

समाकुलत्वात्—खेदवशात् । Another sentence — गोमायुसारङ्गगणाः (कर्तृ) आयासिषुः, अरासिषुः च । भीमम्—adverb to अरासिषुः । सम्यक्—(व्यम्) adv. to आयासिषुः ।

Prose order :—खेदवशात् समाकुलत्वात् (भरतः) बन्धून् अपायम् आसेदुषः अशङ्किष्ट । गोमायुसारङ्गगणाश्च सम्यक् न आयासिषुः भीमम् अरासिषुश्च ।

Substance :—भरतः खेदसम्भूतात् चित्तवैकल्यात् अचिन्तयत् यथा बन्धुषु कस्यचित् विपत् समुपस्थिता इति । शृगालाः प्रदक्षिणं गताः, मृगाश्च वामभागे चलिताः प्रतिकूलगमनात् तस्य परां शङ्कां वर्द्धयामासुः ।

Explanation in tika form :—दुःस्वप्नदर्शनात् अकस्मात् पितृ दूतागमनाच्च स भरतः, खेदवशात् खेदस्य वशं खेदवशं खेदाधीनं तस्मात् (समाकुलत्वात् इत्यस्य विशेषणम्) । समाकुलत्वात् व्याकुलचित्तत्वात्, भरत बन्धून् आत्मीयान् "सगोत्र बान्धव ज्ञाति बन्धु स्व स्वजनाः समाः" इत्यमरः अपायं विनाशम् आसेदुषः (बन्धून् इत्यस्य विशेषणम्) गतवतः अशङ्किष्ट शङ्कितवान् अस्मद्बन्धुः कश्चित् व्यसनमापन्नोऽभूदिति उत्प्रेक्षितवानित्यर्थः । 'भाषायां सदवसे' त्यादिना क्वसुः । गच्छतः तस्य गोमायुसारङ्गगणाश्च शृगालमृगसमूहाश्च (आयासिषु अरासिषुः इत्यस्य च कर्तृपदम् ।) "चातके हरिणे पुंसि सारङ्गः शबले त्रिषु" इति रभसः । सम्यक् अनुकूलं न आयासिषुः नागताः । आ-या-धातोः लुङ् शृगालाः प्रदक्षिणं गताः मृगाश्च सव्यमित्यर्थः । "वामे शवशिवाकुम्भाः दक्षिणे गो- मृगद्विजाः" यात्राशुभाः । तथा भीमं भयानकं यथा तथा अरासिषुः शब्दं कृतवन्तः । "भीमो भयानके ख्यातो भीमो पाण्डवशङ्करो ।" एतैः अनिष्टज्ञापकैः चिह्नैः तस्य बन्धुजनविपत्शङ्का समधिकं वर्द्धितामूत् । वृत्तमिन्द्रवज्रा ।

Change of V.—बन्धवः अशङ्किषत ......(भरतेन) आसेदिवांसः । गोमायुसारङ्गगणैः...नायायि...अरासि ।

Derivation :—अशङ्किष्ट—शङ्क-लुङ् त । लट् शङ्कते । आसेदुषः—आ सद-क्वसु द्वितीया । सारङ्ग—स-चिप्-अङ्गः । सम्यक्—सम्-अञ्च् क्विप् आयासिषुः—आ-या-लुङ् अन् । अरासिषुः—रस-लुङ् अन् । अरसिषुः इति पदा

स प्रोषिवानेत्य पुरं प्रवेक्ष्यन्
शुश्राव घोषं न जनौघजन्यम् ।
आकर्णयामास न वेदनादान्
न चोपलेभे वणिजां पणायाः ॥ २७ ॥

नरम्। लट् रसति। भीमः—बिभेति अस्मात् इति भीमः। भीमादीः मक्। वा षुक् आगमः। अतः भीष्मः इत्यपि भवति। गोमायुः—गां वाचं विकृतां मिनोति प्रक्षिपति इति गोमायुः। गो मा-उण्।

স্নেহসম্ভূত ব্যাকুলতা হেতু আশঙ্কা করিলেন, হয়ত ভ্রাতাদির কোন বিপদ ঘটিয়াছে। (এদিকে) শৃগাল ও মৃগগণ অনুকূল গমন করিল না, কিন্তু বিকট চীৎকার করিতে লাগিল।

From anxiety natural to fondness, he aprehended his relatives 'to have got to destruction.' Groups of Jackals and deer too did not come auspiciously but yelled fearfully.

Q. Explain the samas in गोमायुसारङ्गगणाः। Ans. गोमायवश्च सारङ्गाश्च गोमायुसारङ्गम्, द्वन्द्वैकवद्भावः। अथवा गोमायुसारङ्गाः, तस्य, ताः, तेषां गणाः। "बहुप्रकृतिः फलसेना वनस्पति मृग शकुनि क्षुद्रजन्तुधान्य-तृणानाम्" इति वक्तव्यत्वात्, बहुवचने मृगवाचकानाम् विभाषया द्वन्द्वैकवद्भावः। Q. Give the different meanings of बन्धु। Ans. "बन्धुः स्यात् पुंसि बन्धूके मित्रे भ्रातरि बान्धवे" इति मेदिनी। Q. What part of the base is वश in स्नेहवशात्। Ans. वशमत्र विशेषण-पदम्। तथाहि मेदिनी "वशा बन्ध्या सुता योषा स्त्री गवी करिणीषु च। त्रिष्वायत्ते, क्लीवमायत्तत्वे चेच्छाप्रभुत्वयोः॥" इति त्रिषु आयत्ते अर्थात् आयत्तार्थे विशेषणपदं भवति। २६।

27. Principal part :—सः (कर्त्तृ) घोषं (कर्म्म) न शुश्राव। Adj. to सः—प्रोषिवान् and प्रवेक्ष्यन्। पुरम्—object to प्रवेक्ष्यन्। एत्य—ल्यप्। Adj. to घोषम्—जनौघजन्यम्। Another sentence—

सः वेदनादान् (कर्म्म) न आकर्णयामास। The third—(सः) वणिजां (सम्ब) पणायाः (कर्म्म) न च उपलेभे।

Prose order :—प्रोषिवान्, स एत्य पुरं प्रवेक्ष्यन् जनौघजन्यं घोषं न शुश्राव। वेदनादान् न आकर्णयामास। वणिजां पणायाश्च न उपलेभे।

Substance :—मातामहकुले चिरं कृतप्रवासः भरतः यदा अयोध्यां प्रविशति तदासौ ददर्श यथा नगरी जनसमूहैः परिवृतापि कलरवशून्या वर्त्तते। वेदा न पठ्यन्ते, वणिजां क्रयविक्रयक्रियाः अस्तमुपगताः इति।

Explanation in tika form :—प्रोषिवान् मातामहकुले कृतप्रवासः। भाषायां सदवसेत्यादिना क्वसुः। स भरतः एत्य आगत्य पुरम् अयोध्यां प्रवेक्ष्यन् तत्र प्रवेशं करिष्यन् जनौघेन जनसमूहेन जन्यं उत्पाद्यं जनिधातोःयत्। घोषं शब्दं न शुश्राव न श्रुतवान्। तथा वेदनादान् वेदध्वनीन् न आकर्णयामास न श्रुतवान्। तथा वणिजां पण्यजीविनां पणायाः क्रयविक्रयव्यवहारान् न च उपलेभे ददर्श। "पणङ् व्यवहारे स्तुतौ च' इति पणधातोः आयान्तात् अः, स्त्रीत्वात् आप्। रामं नृपञ्च विना पुरी सर्व्वतः हतचेष्टा आसीत् इत्यर्थः। पणायानिति पाठे इयन्ते प्राप्यन्ते वणिग्भिरिति अयाः लाभाः 'एरच्' इति अच्। पण्यन्ते इति पणाः। पणानाम् अयान् व्यवहर्त्तव्यलाभानित्यर्थः। यद्वा पणानां अयान् लाभानित्यर्थः। प्रलापानिति तृतीय : पाठः; वणिक्प्रसारकलहानित्यर्थः। वणिगापणायामिति चतुर्थः पाठः। दीपकालङ्कारः। वृत्तमुपजातिः।

Change of V.—तेन प्रोषुषा...प्रवेक्ष्यता शुश्रुवे घोषः जनौघजन्यः, आकर्णयामासिरे न वेदनादाः, उपलेभिरे...।

Derivation.—प्रोषिवान्—प्र वस क्वसुः, प्रथमा। प्रवेक्ष्यन्—प्र-विश-स्यत। लट् विशति, लुङ् अविक्षत्। घोष—घुष-घञ्। जन्यं—जन-यत्। लुङ् अजनि, अजनिष्ट। लिट् जज्ञे। आकर्णयामास—आ-कर्ण स्वार्थे णिच् लिट्। उपलेभे—उप-लभ-लिट् ए। पणाया—पण-अः स्त्रीत्वात् टाप्। लट् पणायते, पणायति। लुङ् अपणायिष्ट, अपणिष्ट। लिट् पणायाचक्रे, पेणे।

প্রবাসে থাকিয়া তথা হইতে আগমন করিয়া পুরে প্রবেশ কালে

चक्रन्दुरुच्चैर्नृपतिं समेत्य
तं मातरोऽभ्यर्णमुपागतास्ताः ।
पुरोहितामात्यमुखाश्च योधाः
विषण्णमन्युप्रतिपूर्णमन्याः ॥ २८ ॥

জনকোলাহল শুনিতে পাইলেন না। বেদধ্বনিও শ্রবণ গোচর হইলনা। ব্যবসায়ীদিগের ক্রয়বিক্রয়াদি দেখিতে পাইলেন না।

When entering the city after a long absence he found no bustle in the streets) caused by the multitude, no chanting of the Vedas in private mansion) and no traffic (in the market place).

Q. Derive वणिज्। Ans. पणङ्व्यवहारे इति व्यवहारे अर्थात् क्रयविक्रयार्थे पण्धातोः इजिः। "पणेः इजिः, आदेश वः।" इति वणिज्-शब्दसिद्धिः। Q. Account for the formation of जन्यम्। Ans. "तकि शसि चति यति जनिभ्यो यत् वाच्यः" इति यत्प्रत्ययात् जन्धातोः यत्। (यथा, तक्यं, शस्यं, चत्यं, यत्यं, जन्यम्)। Q. Write gram. notes on प्रोषिवान्। Ans. प्र-उपसर्गात् वस्धातोः क्वसुः। क्वसुश्च लिटि प्रयुज्यते। 'परोक्षे लिट्।' अतः क्वसुरपि परोक्षे प्रयोक्तव्यः, तत् कथम् अत्र अतीते क्वसुः प्रयुक्तः, इत्यतः आह "भाषायां सद वस श्रुवः" तेषाम् अतीतेऽपि भाषायां क्वसुर्भवति, इति वस्धातोः अतीते क्वसुः। २७।

28. मातरः (कर्तृपदम्) तं (समेत्य इत्यस्य कर्म) समेत्य नृपतिं (चक्रन्दुः इत्यस्य कर्म) चक्रन्दुः। Adj. to तम् -अभ्यर्णम्। Adj. to मातरः—उपागतास्ताः। उच्चैः—व्यम्, क्रियाविशेषणम्। Other sentence—योधाः आसन्। The rest are adj. to योधाः।

Prose order :—उपागतास्ताः मातरः तम् अभ्यर्णं समेत्य नृपतिम् उच्चैः चक्रन्दुः। पुरोहितामात्यमुखाः योधाश्च विषण्णमन्युप्रतिपूर्णमन्याः (आसन्)।

Substance :—कौशल्यादयः भरतम् उपस्थितं दृष्ट्वा नृपमुद्दिश्य अमुचि

विमुच्य उच्चैः रुरुदुः । योधाश्च पुरोहितादिभिः सह शोकावरुद्धकण्ठाः सन्तः तूष्णीं स्थिताः ।

Explanation in tika form :—उपागतं प्राप्तम् अस्रं नेत्रजलं यासां ताः । "अस्रः कोणे कचे (केशे) पुंसि, क्लीवमसृग्‌धि शोणिते" इति मेदिनी । एवंविधाः सजलनयनाः मातरः कौशल्याद्याः तं भरतं अभ्यर्णं समीपवर्त्तिनं गृह-गतमित्यर्थः समेत्य प्राप्य नृपतिम् उच्चैः अत्यर्थं चक्रन्दुः राजानमुद्दिश्य हा राजन् हा स्वामिन् क्व गतोऽसि इति क्रन्दितवत्यः इत्यर्थः । पुरोऽग्रे धीयते स्थाप्यते इति पुरोहितः । अमाशब्दः सहार्थे, अमा राज्ञा सह कार्य्येषु भवतीति अमात्यः । पुरोहितामात्यौ मुखं प्रधानं येषां ते पुरोहितामात्यमुखाः "मुखं तु वदने मुख्यारम्भ द्वाराभ्युपाययोः" इति यादवः । अमात्यस्य अजाद्यदन्तत्वेऽपि पुरोहितस्य अभ्यर्हित-त्वात् पूर्ब्बनिपातः । तथाभूताः योधाः भटाः विवृद्धेन मन्युना शोकेन "मन्युः पुमान् दैन्ये शोके यज्ञे च" इति मेदिनी । प्रतिपूर्णा परिपूर्णा मन्या गलशिरा येषां ते तथाभूताः आसन् इत्यन्वयः । शोकावरुद्धकण्ठाः बाष्पम् अमुञ्चन् इत्यर्थः । "पश्चाद्ग्रीवाशिरा मन्या" इत्यमरः । वृत्तमुपजातिः ।

Change of V.—चक्रन्दे नृपतिः मातृभिः उपागतास्राभिः ; पुरोहिता-मात्यमुखैः योधैः...मन्यैः बभूवे ।

Derivation.—चक्रन्दुः—क्रन्द-लिट् उस् । लट् क्रन्दति, लुङ् अक्रन्दीत् । अभ्यर्णं—अभि अर्द्द-क्तः । लिट् आनर्द्द । पुरोहित—पुरस्-धा-कर्म्मणि क्तः । अमात्य—अमा-त्यकन् । योधाः—युध्-अच् ।

মাতৃগণ তাহাকে নিকটে উপস্থিত দেখিয়া অশ্রুপূর্ণ নয়নে নৃপতির উদ্দেশে উচ্চৈঃস্বরে ক্রন্দন করিতে লাগিলেন। পুরোহিত ও মন্ত্রি প্রমুখ যোধগণ বর্দ্ধিত শোক স্তম্ভিত করাতে তাহাদের গলশিরা স্ফীত হইয়া উঠিল।

Finding him near, the mothers with tears gushing out, cried aloud for the king. The soldiers with the priests and ministers at their head had the veins of their neck swollen with anguish.

Q. Account for पुरोहित being placed first in

दिदृक्षमाणः परितः ससीतं
रामं यदा नैक्षत लक्ष्मणञ्च ।
रोरुद्यमानः स तदाभ्यपृच्छ-
द्यथावदाख्यन्नथ वृत्तमस्मै ॥ २९ ॥

the samas. Ans. "अजाद्यदन्तम्"* । तथा "अल्पाच्तरम्"† इति सूत्रद्वयबलात् अमात्यशब्दस्य पूर्व्वनिपात: उचित: । तथापि "अभ्यर्हितञ्च" इति पुरोहितशब्दस्य अभ्यर्हितत्वात् अर्थात् पूजितत्वात् पूर्व्वनिपात: । Q. Give the derivative meaning of मातृ । Ans. मान पूजायाम्, तस्मात् तृन् निपातित: । पितुरपि अधिकपूजितत्वात् माता इति कथ्यते । तथाहि श्रुति: "सहस्रं तु पितुर्माता गौरवेणातिरिच्यते । गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥" २८ ।

29. It consists of three sentences :—(1) यदा (अयं,कालाधि) स: (कर्त्तृ) रामं लक्ष्मणं च (कर्म्म) न ऐक्षत । दिदृक्षमाण:—Adj. to स: । ससीतं—Adj. to रामम् । परित:—अव्य । (2) तदा (स:) अभ्यपृच्छत् । रोरुद्यमाण:—Adj. to स: । (3) अथ (पुरोहितादय:—उक्त कर्त्तृपदम्) यथावत् (क्रियाविशे) वृत्तम् (कर्म्म) अस्मै (क्रियायोगात् चतुर्थी) आख्यन् ।

Prose order :—यदा स: ससीतं रामं लक्ष्मणञ्च परित: दिदृक्षमाण: न ऐक्षत तदा रोरुद्यमान: (सन्) अभ्यपृच्छत्, अथ यथावत् वृत्तम् अस्मै आख्यन् ।

Substance :—इतस्तत: निरीक्षमाण: भरत: यदा रामं लक्ष्मणं सीताञ्च नापश्यत्, तदा रुदन् तेषां वार्त्तामपृच्छत् । पुरोहितादयश्च भरताय यथावत् सर्व्वं वर्णयामासु: ।

---

* What begins with a vowel or ends with short अ, must be placed first in a द्वन्द्वसमास । Thus ईशकृष्णौ ।

† What has fewer vowels must be placed first. Thus शिवकेशवौ ।

Explanation in tika form :—यदा स भरत: ससीतं सीतया सह वर्त्तमान: तम् सीतासहितं रामं लक्ष्मणञ्च परित: सर्व्वत: दिदृक्षमाण: द्रष्टुमिच्छन् "ज्ञाश्रुस्मृदृशां सन:" इति आत्मनेपदम्। न ऐक्षत न दृष्टवान्, तदा रोरुद्यमान:, पुन: पुन: अत्यर्थं रुदन् शक्ति रूपम्। अपृच्छत् पृष्टवान्। क्व ते गता: इत्यादिकं पुरोहितादीन् अपृच्छदित्यर्थ:। यथानन्तरं यथावत्, अव्ययम् (वृत्तमित्यस्य कर्त्तृपदम्।) वृत्तं भूतं, तथावत् अस्मै भरताय, क्रियाग्रहणमपि कर्त्तव्यमिति इष्टे: चतुर्थी। आख्यन् कथितवन्त:, पुरोहितामात्यमुख्या: इति कर्त्तृपदमूह्यम्। अथवा वृत्तम् घटनां यथावत् यथार्हम्, (क्रियाविशेषणम्) आख्यन् कथितवन्त: आनुपूर्व्वम् निवेदयामासु: इत्यर्थ:। वृत्तसुपजाति:।

Change of voice :—दिदृक्षमाणेन राम: ससीत: लक्ष्मणश्च ऐक्ष्यत रोरुद्यमानेन तेन अभ्यपृच्छ्यन्त (पुरोहितामात्यमुख्या:) आख्यायि तै:।

Derivation.—दिदृक्षमाण:—(दृश-सन्) दिदृक्ष-शानच्। लट् दिदृक्षते, लिट् दिदृक्षाञ्चक्रे। ऐक्षत—ईक्ष-लङ् त। लुङ् ऐक्षिष्ट। रोरुद्यमान:—(रुद-यङ्) रोरुद्य शानच्। लट् रोरुद्यते। लुङ् अरोरुदिष्ट। अभ्यपृच्छत्—अभि-प्रच्छ लङ् द। लट् पृच्छति। लुङ् अप्राक्षीत्। आख्यन्—आ-ख्या लुङ् अन्। वृत्त—वृत्-भावे क्त:, अथवा कर्त्तरि।

যখন ভরত চতুর্দ্দিক নিরীক্ষণ করিয়া রাম লক্ষ্মণ ও সীতাকে দেখিতে পাইলেন না তখন কাঁদিয়া তাঁহাদের কথা জিজ্ঞাসা করিলেন। উঁহারা, যে সমস্ত ঘটিয়াছিল আনুপূর্ব্ব নিবেদন করিল।

Looking all round when he did not see Ram and Lakshmana with Sita, he cried intensely and repeatedly and enquired of them. They narrated to him exactly what had happened.

Q. Give the gram. meaning of रोरुद्यमान:। Ans. पुन: पुन: भृशं च रुदन् इत्यर्थ:। तथाहि 'क्रियासमभिहारे यङ्'। क्रियासमभिहारे अर्थात् पौन:पुन्ये भृशार्थे च यङ् स्यात्। Q. Account for आत्मनेपद in दिदृक्षमाण:। Ans. See above. Q. Give the meaning of परित: as formed of तस्। Ans. परित: सर्व्वत:।

आबद्धभीमभ्रुकुटीविभङ्गः

प्रेङ्खीयमाणारुणरौद्रनेत्रः ।

उच्चैरुपालभ्य स कैकयीञ्च

शोके मुहुश्चाविरतं न्यमाङ्क्षीत् ॥ ३० ॥

"पर्य्यभिभ्याञ्च" । आभ्यां तसिल् स्यात् । "सर्व्वोभयार्थाभ्यामेव" । अर्थात् परितः इति पदं सर्व्वतः इत्यर्थे, तथा अभितः इति च पदम् उभयतः इत्यर्थे भवति ।२९ ।

30. It consists of two sentences :—(1) सः (कर्त्तृ) कैकयीम् (कर्म्म) उपालभ्य । उच्चैः—Adv. (2) सः शोके (अधि) मुहुः (व्यम्, क्रियाविश.) न्यमाङ्क्षीत् । अविरतम्—अत्यन्तसंयोगे द्वितीया । The rest are adj. to सः ।

Prose order :—आबद्धभीमभ्रुकुटीविभङ्गः प्रेङ्खीयमाणारुणरौद्रनेत्रः सः उच्चैः कैकयीञ्च उपालभ्य, मुहुः अविरतञ्च शोके न्यमाङ्क्षीत् ।

Substance.—भरतः भयावहं भ्रुकुटीभङ्गं कृत्वा, अधिकारुणम् नेत्रेण च भीतिम् उत्पादयन्, उच्चैःस्वरेण कैकयीं तिरस्कृतवान्, वारं वारं च शोकसागरे निमग्नोऽभूत् ।

Explanation in tika form :—भ्रुवोः कुटी कौटिल्यं भ्रुकुटी 'इको ह्रस्वोऽङ्यो गालवस्य'* इति ह्रस्वः । आबद्धः कृतः भीमः भयानकः भ्रुकुट्याः भ्रूभङ्गस्य विभङ्गो विरचनं येन तथाभूतः । प्रेङ्खीयमाणे खि गतिकम्पयोः इति वर्द्धमानार्थस्य नामधातोः यक्, शानच्, प्रेङ्खयमाने इति पाठान्तरम् । अत्यर्थं विकृते इत्यर्थः । अरुणे रक्ते रौद्रे भयानके च नेत्रे यस्य तादृशः सः भरतः उच्चैः महता ध्वनिना कैकयीं स्वमातरं मुहुर्वारं वारं यथा तथा उपालभ्यं निर्भर्त्सितवान् । उपाङ्पूर्व्वात् लभेर्ल्यप् । अविरतम् अजस्रं शोके च न्यमाङ्क्षीत् निमग्नः ।

---

* गालव-मुनिमते अङ्यन्तस्य इगन्तस्य ह्रस्वो वा स्यात् उत्तरपदे परतः । यथा भ्रुकुटी, भ्रूकुटी इत्यादि । ङ्यन्तस्य यथा गौरीपतिः, कुटीविभङ्गः । इत्यादौ न ह्रस्वः ।

नृपात्मजौ चिक्षिपतुः समीतौ
ममार राजा विधवा भवत्यः ।
शोच्या वयं भूरनृपा लघुत्वं
केकय्युपज्ञं बत बह्वनर्थम् ॥ २१ ॥

समुच्चयोर्लुङि। च-द्वयेन उभयोः क्रिययोः तुल्यकालः सूचितः। न्यमाङ्क्षीत् इति मज्जनक्रियया शोके समुद्रस्य व्यवहारसमारोपात् अत्र समासोक्तिरलङ्कारः। इन्द्र-वज्रा वृत्तम्।

Change of V.—...विभङ्गेन...नेत्रे च तेन उपालम्भि कैकयी, न्यमज्जि।

Derivation.—आवद्ध—आ-बन्ध-कर्मणि क्तः। भीम—भी-मक्। विभङ्ग—वि-भञ्ज् घञ्। श्वेश्वीयमान—(श्वि+यङ्) श्वेश्वीय-शानच्। श्विगतिवृद्ध्योः—लट् श्वयति। लुङ् अश्वत्, अशिश्वियत्, अश्वयीत्। लिट् शुशाव, शिश्वाय। उपालब्ध—उप-आ-लभ-लुङ् त। लट् लभते। न्यमाङ्क्षीत्—नि-मस्ज्-लुङ् द। लट् मज्जति। लिट् ममज्ज।

भयावह भ्रूभঙ্গি করিয়া ভয়োদ্দীপক চক্ষু লোহিত ও স্ফীত করিয়া ভরত উচ্চৈঃস্বরে কেকয়ীকে তিরস্কার করিলেন ও মুহুর্মুহুঃ শোকে নিমগ্ন হইতে লাগিলেন।

Then forming a terrible contraction of the brows, with his fearful eyes swollen and red, he chastised aloud Kekayi and sank in grief again and again.

Q. Write gram. notes on भ्रुकुटीविभङ्ग। Ans. "इको ह्रस्वोऽङ्यो गालवस्य" इति सूत्रस्य अत्र पूर्वः प्रसरः। तथाहि भ्रुकुटी इति भ्रूशब्दस्य ह्रस्वादेशः। कुटीविभङ्गः इत्यत्र च अङ्यन्तत्वात् न ह्रस्वादेशः। See the foot note above. Q. Give the meaning and explain the formation of श्वेश्वीयमान। Ans. See above. Q. Explain the force of double च। Ans. See above. । २० ।

31. It consists of 6 sentences :—(1) नृपात्मजौ (कर्तृ) चिक्लिशतुः । ससीतौ=adj. to नृपात्मजौ । (2) राजा (कर्तृ) ममार । (3) भवत्यः विधवाः (अभवन्) । (4) वयं शोच्याः अभवाम । (5) भूः अनृपा अभवत् । (6) लघुत्वम् (कर्तृ) कैकय्युपज्ञं (विधे) अभवत् । बह्वनर्थम्—adj. to लघुत्वम् ।

Prose order :—ससीतौ नृपात्मजौ चिक्लिशतुः, राजा ममार, भवत्यः विधवाः, वयं शोच्याः, भूः अनृपा, (इत्थं) बह्वनर्थं लघुत्वं कैकय्युपज्ञम् बत ।

Substance :—राजपुत्रत्वात् सुखोचितौ रामलक्ष्मणौ तथा च सीता दुःखं भजन्ते । राजा मृतः, यूयं पतिहीनाः । अहं शोच्यां दशाम् उपगतः । राज्यमराजकम् । अनर्थमूला एषा तु लघुचित्तता प्रथमं कैकेय्या एव श्रुता नतु अन्यतः ।

Explanation in tika form :—ससीतौ सीतया सह वर्त्तमानौ, समासे सह इत्यस्य स-आदेशः । सीतासहितौ नृपात्मजौ आत्मनः जायेते यौ तौ आत्मजौ जन्धातोः डः । नॄन् पाति रक्षति यः सः नृपः पालनार्थात् पाधातोः कः ; तस्य आत्मजौ रामलक्ष्मणौ चिक्लिशतुः वनवासकष्टमीयतुः । अत्र नृपात्मजशब्देन तयोः सुखार्हत्वं सूचितम् । राजा ममार प्रियपुत्रविरहात् मृतः । मातृगणं सम्बोध्योक्तम् विधवेति । भवत्यः विधवाः विगतो धवो यासां ताः पतिहीनाः । अभूवन् इति क्रियापदमूह्यम् । वयं शोच्याः अयशोभाजनत्वात् अहं शोचनीयः । "अस्मदो द्वयोश्च" इति एकवचनार्थे अस्मच्छब्दस्य बहुवचनम् । 'श्लाघ्याः' इति पाठे एतत्कृतोऽयं प्रमाद इति वितर्कणीया लोकैरित्यर्थः । भूः पृथिवी अनृपा राजशून्या जाता । इत्थं बहुः प्रचुरः अनर्थो दोषः क्लेशमरणाद्यनिष्टानां सम्भवात्, यत्र तथाभूतं लघुत्वं राज्यप्रार्थनरूपं नीचकर्म्म कैकय्या उपज्ञा कैकय्युपज्ञं षष्ठीसमासः । तस्याः प्रथमतो ज्ञातं नान्यस्य कस्यचित् पूर्व्वं ज्ञातमित्यर्थः । "उपज्ञोपक्रमान्तञ्च तदादित्वप्रकाशने" इति कोषः । "उपज्ञोपक्रम"-मिति नपुंसकता* । लघुत्वमित्यनेन एकविभक्तिः । बत इति खेदे । "खेदानुकम्पा सन्तोष विस्मयामन्त्रणे बत" इत्यमरः । वृत्तमुपजातिः ।

* "उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ।" उपज्ञायते इति उपज्ञा । तदन-

Change of V.—नृपात्मजाभ्यां चिक्लिशे ससीताभ्यां, ममे राज्ञा, विधवाभिः भवतीभिः (अभावि), शोच्यैः अस्माभिः (अभूयत), भुवा अनृपया (अभूयत), लघुत्वेन कैकय्युपज्ञेन बह्वनर्थेन (अभूयत)।

Derivation.—चिक्लिशतुः—क्लिश्-लिट् अतुस्। लट् यथा, "क्लिश्यते न तथा वाक्यम् क्लिश्यते न च निष्फलं। नेन्द्रियाणि विकारेषु क्लिश्नाति विषयेषु सः" कविरहस्यम्। ममार—मृ-लिट्। लट् म्रियते। लुङ् अमृत। लृट् मरिष्यति। शोच्या—शुच-कर्मणि यत्। अशोचत्, अशोचीत्, अशोचिष्ट लुङ्। उपज्ञा—उप-ज्ञा-अङ्, टाप्। आत्मन्—अत-मनिन्। नृप—नृ-पा-क। अपासीत् लुङ्।

সীতা সমেত রাজপুত্রদ্বয় ক্লেশ পাইলেন। রাজা পরলোক গমন করিলেন, আপনারা বিধবা হইলেন। আমার শোচনীয় দশা ঘটিল, পৃথিবী অরাজক হইল। এই বহু অনর্থমূলক লঘুচিত্ততা প্রথমে কেকয়ী হইতে জানা গেল।

The princes with Sita have got to troubles, the king has perished, you have been widows, I am to be pitied, the earth is without a king. The narrowmindedness 'replete with so many calamities' has been first observed in Kekayi.

Q. Give the meaning of वयम् here. Ans. अहम् इत्यर्थे अथवा आवाम् भरतशत्रुघ्नौ इति द्विवचनार्थे वयम् इति प्रयुक्तम्। Q. If पितृहीनाः be used here as an adjective to वयम्, should the plural form be retained? Ans. "अस्मदो द्वयोश्च" इति अहम् आवाम् वा इत्यर्थे वयम् इति प्रयुक्तम्। "सविशेषणस्य प्रतिषेधः" इति विशेषणयुक्तस्य अस्मद्-शब्दस्य बहुवचनप्रयोगप्रतिषेधात् पितृहीनाः वयम्

तत्पुरुषः नपुंसकलिङ्गो भवति आचिख्यासायां गम्यमानायाम्। आख्यातुम् इच्छा आचिख्यासा। यदि आदिः आचिख्यासितुम् इष्यते तदा एतत् भवति। If it is intended to show the first act, उपज्ञा &c in a तत्पुरुष-समास is of neuter gender.

नैतन्मतं मत्कमिति ब्रुवाणः
सहस्रशोऽसौ प्रपपात मुह्यन्।
उदाश्रमाणः पितरं सरामं
लुठन् सशोको भुवि रोदसावान्॥ ३२॥

इत्येवम् अत्र न स्यात्, अपितु पितृशोकः अरम् अथवा पितृशोकी आयाम् इति।
Q. Account for परस्मैपद in ममार। Ans. "म्रियतेर्लुङ्लिङोश्च" इति लुङि आशीर्लिङि तथा चकारात् लट् लोट् लङ् विधिलिङ्क्षु च आत्मनेपदम्। अतः लिटि परस्मैपदम्। ३१।

32. Principal parts:—असौ (कर्त्ता) प्रपपात (क्रिया) अमुह्यत्। सहस्रशः—Adj. to प्रपपात। Adj. to असौ—ब्रुवाणः, उदाश्रमाणः, लुठन् सशोकः, and रोदसावान्। इति—object to ब्रुवाणः। पितरं—object to उदाश्रमाणः। सरामम्—adj. to पितरम्। मतम्—इति योगे प्रथमा। Adj. to मतम्—एतत् and मत्कम्। न—अव्यय। Adjuncts to the subject—(1) नैतन्मतं मत्कमिति ब्रुवाणः, (2) सरामं पितरम् उदाश्रमाणः, (3) भुवि लुठन् (4) सशोकः and (5) रोदसावान्।

Prose order:—सरामं पितरमुदाश्रमाणः सशोकः, भुवि लुठन्, रोदसावान् असौ एतत् मत्कं मतं न इति ब्रुवाणः सहस्रशः प्रपपात अमुह्यत्।

Substance:—रामप्रवासनरूपं कैकेयीकार्यं न मे अभिमतम् इति कथयन् स बहुशः अपतत्। स च रामं पितरञ्च उद्दिश्य भूमौ पतन् भृशं रुरोद।

Explanation in tika form:—ननु सर्वमेव कैकेय्यापादितं भरतानुमोदितम् इति शङ्कां परिहरन्नाह नैतदिति। सरामं रामसहितं पितरं जनककम् उदाश्रमाणः आह्वयन्। "आश्र शब्दे" इति बाह्यधातोः शानच्। हा राम! हा पितः! इति उच्चैःस्वरेण आह्वयन् इत्यर्थः। सशोकः शोकाकुलः, अनेन शाठ्यं परिहृतम्। भुवि पृथिव्याम् लुठन् लुठन्, लुटिः दैवादिकात् शतृप्रत्ययः। रोदसावान् अत्यर्थं रुदन् [अत्यर्थं रोदितीति यङन्तात् रुदेः अप्रत्ययः, ततः स्त्रीत्वात् टाप्, इति रोदसा, सा, विद्यते अस्येति मतुप्] असौ भरतः [अमुह्यत् इत्यस

त्मनेपदम्] एतत् कैकय्यनुष्ठितं मत्कं [अस्मद्-शब्दात्, "स एषां ग्रामणीः"* इति कन्, एकवचने च मदादेशः] मत्कृतं मतमभिप्रायः न, नास्मत्तः अनुष्ठितम् अनया इत्यर्थः। इत्येवं ब्रुवाणः सहस्रशः बहुवारान् शपथान् सम्प्रत्ययकारण-वचनानि अशप्यत् कृतवान्। अनेकार्थत्वाद्धातूनां शपेः करणार्थे लङि रूपम्। तत्समुपजातिः।

Change of V.—ब्रुवाणेन अमुना शपथाः अशप्यन्त, उद्बाष्पमाणेन लुठ्यता सशोकेन रोरुदावता। ।

Derivations:—मत्कम्—अस्मद् कन्। ब्रुवाणः—ब्रू-कर्तरि शानच्। लट् ब्रवीति, आह, ब्रूते। लुङ् अवोचत्, अवोचत। अशप्यत्—शप-लङ् द। अशप्सीत्, अशप्त लुङ्। उद्बाष्पमाणः—उत्-बाष्प-कर्तरि शानच्। लट् बाष्पते। अबाष्पिष्ट लुङ्। लुठ्यन्—लुट-शतृ प्रथमा। लट् यथा, कविरहस्ये—"लुठ्यत्यट्टालिकान् दुर्गान् कवचानि च लोटति। रिपूणां लोटयत्याजौ कुञ्जराणां घटाश्च यः।" अलुटत् लुङ्। रोरुदावान्—यङन्तात् रुदेः-क्तः-मतुप्।

এরূপ অভিপ্রায় আমার নহে বলিয়া তিনি সহস্র সহস্র শপথ করিতে লাগিলেন, রামচন্দ্র এবং পিতাকে উচ্চৈঃস্বরে আহ্বান করিয়া সশোকে কাঁদিতে কাঁদিতে ভূতলে লুণ্ঠিত হইতে লাগিলেন।

Saying 'this is not my wish' he took oaths thousand fold. Calling aloud his father and Rama, he rolled in grief on earth with cries

Q. Parse with reason सहस्रशः। Ans. शपथान् इत्यस्य विशेषणम्। सहस्रवारान् इत्यर्थः। अतीऽत्र वारार्थत्वे शस्। "बह्वल्पार्थात् शस् कारकात् अन्यतरस्याम्" इत्यत्र अर्थशब्दप्रयोगात्, तथाह वामनः, "अर्थग्रहणात् पर्य्यायेभ्योऽपि भवति।" पर्य्यायः वारः। Q. Account for पितरं being an objective case to उद्बाष्पमाणः। Ans. Cf.

---

* "सः एषां ग्रामणीः"। ग्रामणीः प्रधानो मुख्यः। एषां प्रधानः इत्यर्थे प्रथमान्तात् कन् स्यात्। यथा अहं प्रधानः अस्य इति मत्कम्। यन्मतप्रधानमहमेव मुख्यो जनः इत्यर्थः।

तं सुस्थयन्तः सचिवा नरेन्द्रं
द्रिधक्षयन्तः समुद्रुरारात् ।
अन्याहुतिं स्रावयितुं सविप्रा-
स्त्रिचीषयन्तोऽध्वरपात्रजातम् ॥ ३३ ॥

"उपाहरोदेव नदत्पतत्त्रः कुसुम्वतीम्" II. 4. Q. Account for the formation of रोरुदावाम्। Or derive it. Ans. See above. Q. Name some verbs that govern a cognate accusative. Ans. 'अपथाम् अमम्यत्' 'वाचम् अवोचत् अच्युतः' माघः। Q. Show the difference between अपते and अप्यति। Ans. "अप उपालम्भे" कस्यचित् अरीरादिकं स्पृष्ट्वा अपथं ब्रूते आत्मनेपदं भवति। ३२।

33. Principal part :—सचिवाः (कर्तृ) नरेन्द्रं (कर्म) समुद्रुः। Adj. to सचिवाः—सुस्थयन्तः, दिधक्षयन्तः, सविप्राः and चिचीषयन्तः। तम—object to सुस्थयन्तः। स्रावयितुम्—अ्यम्। अन्याहुतिम्—object to स्रावयितुम्। अध्वरपात्रजातम्—object to चिचीषयन्तः।

Prose order :—सविप्राः सचिवाः तं सुस्थयन्तः आरात् दिधक्षयन्तः अन्याहुतिं स्रावयितुं अध्वरपात्रजातं चिचीषयन्तः (सन्तः) नरेन्द्रं समुद्रुः।

Substance :—अथ भरतं समाश्वास्य समीपे एव राजानम् दग्धुम् इच्छन्तम् भरतम् अनुमोद्य अनुमोद्य, च ब्राह्मणाः सचिवाश्च सर्व्वे अन्त्याम् आहुतिम् प्रदापयितुम् यज्ञपात्रादिकमादाय गमनेच्छुं जनं, दशरथम् श्मशानम् निन्युः।

Explanation in tika form :—सविप्राः विप्रसहिताः सचिवाः अमात्याः [कार्य्येषु सचन्ते समवयन्तीति "सचेरिवम्" इति औणादिक इवन्। यद्वा सचिः सेवा विद्यते एषामिति सचिवाः व-प्रत्ययः] तं भरतं सुस्थयन्तः सुस्थं कुर्व्वाणाः, प्रबोधदानेन समाश्वासयन्तः इत्यर्थः। तत्करोतीति णिच्। आरात् नातिदूरे "आराद्दूरसमीपयोः" इत्यमरः। दिधक्षयन्तः दग्धुमिच्छन्तं भरतं प्रयोजयन्तः [दहेः सनि प्रयोजकव्यापारे णिच्] अन्ते विनाशे भवा या आहुतिः।

दिगादित्वात् * यत्। तां अन्त्याहुतिं हावयितुम् अग्नौ प्रक्षेपयितुम्। णिजन्त हुधातोः तुमुन्। अध्वरस्य यज्ञस्य पात्राणि स्रुक्स्रुवादीनि† तेषां जातं समूहं चिचीषयन्तः चेतुं विधातुमिच्छन्तं प्रयोजयन्तः प्रेरयन्तः इत्यर्थः। सन्त पक्षं चिकीषयन्तः इति। यथाह आश्वलायनः, "अथैनां दिशम् अग्नीन् नयन्ति यज्ञपात्राणि च।" नरेन्द्रं राजानं समुदूहुः उत्थापितवन्तः शिबिकायामारोप्य इत्यर्थः। वहिः अन्तर्भावितण्यर्थोऽत्र द्रष्टव्यः।

Change of V.—दिधक्षयद्भिः चिचीषयद्भिः सविप्रैः सचिवैः सुस्थयद्भिः नरेन्द्रः समुदूहे।

Derivation.—सुस्थयन्तः—सुस्थं तत्करोतीति णिच्-शतृ प्रथमा। सचिवा—सचि-वः अथवा सच-इवन्। दिधक्षयन्तः—दह सन्-णिच्-शतृ प्रथमा। लट् दिधक्षति। समुदूहुः—सम्-उत्-वह-लिट् उस्। लट् वहति, वहते। लुङ् अवाक्षीत्, अवोढ। हावयितुं—हु-णिच्-तुम्। (अणिच्) लट् जुहोति। लुङ् अहौषीत्। लिट् जुहाव, जुहवामास, जुहवाञ्चकार, जुहवाम्बभूव। चिचीषयन्तः—चि-सन् णिच्-शतृ। लट् चिनोति, चिनुते। लुङ् अचैषीत्, अचेष्ट लिट् चिचाय, चिकाय, चिच्ये, चिक्ये।

ব্রাহ্মণ ও মন্ত্রিগণ তাঁহাকে আশ্বস্ত করিয়া, যাহাতে ভরত অদূরেই দাহন কার্য্য সমাধা করেন তাহার প্রবৃত্তি দিয়া, শেষ আহুতি প্রদান করাইবার জন্য যজ্ঞপাত্র সকল সংগ্রহেচ্ছু ব্যক্তিকে অনুমোদন করিয়া মৃতদেহ বহন করিয়া লইয়া যাইলেন।

Comforting him, the ministers with the Brahmans causing him to desire to cremate the king at a short distance, and to offer the last ablation, and allowing men desirous of collecting so many sacrificial vessels, carried the dead body.

Q. Can it be अध्वरपात्रजातस्य? Ans. "न लोकाव्ययनिष्ठाखलर्थतृनाम्" (ल=शतृ शानच्-आदि) इति षष्ठीप्रतिषेधः। Q. Show

---

* "दिगादिभ्यो यत्" दिश्यं, वर्ग्यम्, पक्ष्यम्।

† स्रुच and स्रुव—Sacrificial ladle (হাতা) made of wood.

उदक्षिपन् पट्टदुकूलकेतू-
नवादयन् वेणुमृदङ्गकांस्यम् ।
कम्बूंश्च तारानधमन् समन्तात्
तथानयन् कुङ्कुमचन्दनानि ॥ ३४ ॥

the propriety of अध्वरपात्रजातम् चिचीषयन्तः । Ans. "अथैतां दिशम् अग्नीन् नयन्ति यज्ञपात्राणि च ।" "अन्वञ्चं प्रेतमयुजोऽमिथुनाः प्रवयसः ।" इति आश्वलायनः । [अथ एताम् दिशम् then to this direction, अग्नीन् यज्ञपात्राणि च नयन्ति they take the three kinds of fire, and the sacrificial articles viz. ladle &c. अन्वञ्च' and then after, प्रवयसः elderly men, अयुजः of odd number, अमिथुनाः consisting of a single sex, प्रेतम् नयन्ति take the dead one.] । ३३ ।

34. (1) लोकाः (ऊह्यं कर्तृपदम्) पट्टदुकूलकेतून् (कर्म) उदक्षिपन् (2) ते वेणुमृदङ्गकांस्यम् (कर्म) अवादयन् । (2) कम्बून् (कर्म) समन्तात् (अव्ययम्) अधमन् । तारान्—Adj. to कम्बून् । तथा (अव्ययम्) कुङ्कुमचन्दनानि (कर्म) आनयन् ।

Prose order :—पट्टदुकूलकेतून् उदक्षिपन्, वेणुमृदङ्गकांस्यं अवादयन्, तारान् कम्बून् च अधमन् तथा कुङ्कुमचन्दनानि आनयन् ।

Substance :—अथ लोकाः मृतस्य राज्ञः अन्त्येष्टिक्रियायै पट्टवस्त्रादिरचितान् केतून् उत्क्षिप्तवन्तः, वादित्राणि अवादयन् । शङ्खध्वनीन् अकुर्वन्, कुङ्कुमचन्दनानि च आनीतवन्तः ।

Explanation in tika form .—पट्टदुकूलकेतून् पट्टानि कौषेयाणि* दुकूलानि क्षौमाणि† तेषां केतवः तन्निर्मितपताकाः तान् पट्टवस्त्रादिविरचितान् ध्वजान् "क्षौमं दुकूलं स्यात्" इत्यमरः । उदक्षिपन् उत्क्षिप्तवन्तः, तत्र नियुक्ता जना इति शेषः । क्षिपतीदादिकः । वेणवः वंशाश्च मृदङ्गा मुरजाश्च कांस्यञ्च

* Silk. † Made of flax.

त्तम् ("जातिरप्राणिनाम्" इति एकवद्भावः, न पुनः तुर्य्याङ्गत्वात्, तत्र हि तुर्य्याङ्ग-पदेन वाद्यकारा एव उक्ताः तथाहि उदाहरणे मार्दङ्गिकपाणविकमिति]। अवादयन् वादितवन्तः। तारान् उच्चतरध्वनीन् ["तारो मुक्तादिसंशुद्धौ तरणे शुद्धमौक्तिके। तारं तु रजतेऽत्युच्चस्वरेऽप्यन्यवदीरितम्" इति विश्वः।]। कम्बून् शङ्खान् ["कम्बुर्नावलये शङ्खे" इत्यमरः] अधमन् शब्दायितवन्तः। ध्माधातो-र्लङि। तथा कुङ्कुमचन्दनानि आनयन् दुर्गन्धनिवारणाय आनीतवन्तः। सर्व्वत्र लङ्। इन्द्रवज्रोपजातिः। पादशेषे ह्रस्वस्य वैकल्पिकी न दीर्घता। "तथा पादान्तगो-ऽपि वा।

Change of V.—पट्टदुकूलकेतवः उदक्षिप्यन्त, अवाद्यन्त.........., कम्बवश्च ताराः अध्मायन्त आनीयन्त......(जनैः)।

Derivation.—उदक्षिपन्—उत्-क्षिप-लङ् अन्। लुङ् अक्षैप्सीत्, अक्षिप्त। अवादयन्—(वद-णिच्) वादि-लङ् अन्। लुङ् (अणिजन्त)-अवादीत्। कांस्यम्—कमि-सः (कंसः) ष्णः यञ् च। अधमन्—ध्मा-लङ् अन्। लट् धमति। लुङ् अध्मासीत्। लिट् दध्मौ। आनयन्—आ-नी-लङ् अन्। लुङ् अनैषीत्, अनेष्ट।

তাঁহারা পট্ট ও ক্ষৌমবস্ত্রের (তিসির কাপড়) পতাকা উড্ডীন করিলেন, বংশী মৃদঙ্গ ও কাংস্য বাদিত করিতে লাগিলেন। উচ্চধ্বনি শঙ্খ চতুর্দ্দিকে নিনাদিত করিতে লাগিলেন। কুঙ্কুম ও চন্দন আনয়ন করিলেন।

They raised up flags of silk and flax, played on flutes, the drums and and gongs, sounded in all directions high sounding conches and carried saffron and sandal wood.

Q. Show the difference between पट्ट and दुकूल। Ans. See above. Q. Account for the singular number in वेणुमृदङ्गकांस्यम्। Ans. See above. Q, Derive कांस्य। Ans कम्धातोः स इति कंसः। "वृतृवदिहनिकमिकषिभ्यः सः" इति कम्धातोः सः। कंसाय पानपात्राय हितं कंसीयम्। छः। तस्य विकारः कांस्यम्। यञ्, छलोपश्च। २४।

श्रौत्राग्निमासावदनं सरुक्कं
कृत्वाजिने प्राक्शिरसं निधाय ।
सञ्चित्य पात्राणि यथाविधान-
मृत्विगजुहाव ज्वलितं चिताग्निम् ॥ ३५ ॥

35. Principal part :—ऋत्विक् ज्वलितं चिताग्निं जुहाव । Incomplete verbes—कृत्वा, निधाय and सञ्चित्य । Object to कृत्वा—श्रौत्राग्निमासावदनम् । सरुक्कम्—Adj to श्रौत्राग्निमासावदनम् । प्राक्शिरसम्—Adj. to राजानम् । पात्राणि—object to सञ्चित्य । यथाविधानम्—Adv. to जुहाव ।

Prose order :—ऋत्विक् अजिने प्राक्शिरसं निधाय, श्रौत्राग्निमासावदनं सरुक्कं कृत्वा पात्राणि यथाविधानं सञ्चित्य ज्वलितं चिताग्निं जुहाव ।

Substance :—अथ कृष्णसारचर्मणि राजानं स्थापयित्वा, पूर्वस्याम् दिशि मस्तकम् संरक्ष्य तस्य च कर्णौ नासिकां चक्षुषी च स्वर्णफलकेन आच्छाद्य स्रुवादीनि गात्रेषु संरक्ष्य तेन देहेन अग्निम् जुहाव ।

Explanation in tika form :—ऋतु' ऋतौ वा यजतीति ऋत्विक् याजकः, ऋतूपपदात् यज्धातोः क्विन् निपातितः । ["अग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते" इत्यमरः] अजिने कृष्णसारचर्मणि प्राक् पूर्व्वं शिरो मूर्द्धा यस्येति तं प्राक्शिरसं शवं निधाय स्थापयित्वा । तथाहि आश्वलायनः "तस्मिन् बर्हिरास्तीर्य्य कृष्णाजिनञ्च उत्तरलोम, तस्मिन् प्रेतं संवेशयन्ति" इत्यादि । श्रोत्रं कर्णश्च अक्षि नेत्रञ्च नासा नासिका च वदनं मुखञ्च तत् "द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानाम्"* इति एकवद्भावः । सरुक्कं ससुवर्णं तुल्ययोगे बहुव्रीहिः । "रुक्मं कार्त्त-

* A Dwandwa compound signifying members of living beings, players (singers dancers &c) and component parts of an army, shall be singular. Thus—पाणिपादम्, मार्दङ्गिकपाणविकम् players on the Mridanga and panaba (kind of drums). रथिकाश्वारोहम् ।

हाटकं जाम्बूनदमष्टापदोऽस्त्रियाम्" इति सुवर्णपर्य्याये अमरः। तथा, तथाहि नारायणः: "ग्रीवाक्षिनासावदनं सकर्णम्—ततो हिरण्यशकलैः† छिद्राण्यपि दधाति वै॥" पात्राणि स्रुगादीनि यथाविधानं विधानमनतिक्रम्य गृह्य§सूत्रोक्त प्रकारेण इत्यर्थः सन्निवेश्य अङ्गप्रत्यङ्गेषु विन्यस्य। अत्र आश्वलायनः "दक्षिणहस्ते जुहूं‡ मध्ये उपभृतं¶ दक्षिणे पार्श्वे स्फ्यम्"‖ इत्यादि। ज्वलितं चयनं चितं, तदर्थमग्निं जुहाव एतेन अन्त्येष्टिरुक्ता। इन्द्रवज्रा वृत्तम्।

Change of V.—ऋत्विजा जुहुवे ज्वलितः चिताग्निः।

Derivation.—ग्रीवा—गॄ-करणे वन्। ऋत्विग्—ऋतु-यज-क्विप् निपातः। ज्वलितं—ज्वल-कर्त्तरि क्तः। लट् ज्वलति। लुङ् अज्वालीत्। लिट् जज्वाल। जुहाव—हु-लिट्। लट् जुहोति, जुहुतः, जुह्वति। लुङ् अहौषीत्। लिट् जुहाव, जुहवामास, जुहवाञ्चकार, जुहवाम्बभूव।

মৃগচর্ম্মে পূর্ব্বশিরা শয়ান রাখিয়া কর্ণ নাসিকা ও বদন স্বর্ণে আবৃত করিয়া যজ্ঞপাত্র যথাবিধি শবের অঙ্গে রাখিয়া যাজ্ঞিক জ্বলিত হুতাশনে আহুতি দিলেন।

Laying him on the skin with his head eastward and placing pieces of gold on the ears, the eyes, the nose and the mouth and putting the vessels agreeably to ordirance, the priest made it as offering on the kindled fire of cremation.

Q. Account for the singular number in ग्रीवाक्षिनासावदनम्। Ans. See above.। २५।

---

† Pieces of gold.

§ The name of a book containing directions for religious rites.

‡ A wooden vessel of the shape of a crescent.

¶ A round vessel made of the wood of अश्वत्थ।

‖ A piece of wood shaped like a sword for stirring the boiled rice.

क्षतेषु पिण्डोदकसञ्चयेषु
हित्वाभिषेकं प्रकृतं प्रजाभिः ।
प्रत्यानिनीषुर्विनयेन रामं
प्रायादरण्यं भरतः सपौरः ॥ ३६ ॥

36. Principal part :—भरतः (कर्त्तृ) अभिषेकं हित्वा अरण्यं (कर्म) प्रायात्। Adj. to भरतः—प्रत्यानिनीषुः and सपौरः। पिण्डोदकसञ्चयेषु—भावे सप्तमी। क्षतेषु—Adj. to it. प्रकृतम्—Adj. to अभिषेकम्। प्रजाभिः—nominative to प्रकृतम् (passive) विनयेन—करणे वा उपलक्षणे तृतीया।

Prose order :—पिण्डोदकसञ्चयेषु क्षतेषु भरतः प्रजाभिः प्रकृतं अभिषेकं हित्वा सपौरः विनयेन रामं प्रत्यानिनीषुः अरण्यं प्रायात्। अथवा विनयेन प्रायात्।

Substance :—पिण्डदानात् तर्पणक्रियायाः अस्थिसञ्चयनात् च परं प्रजाभिः प्रस्तुतं राज्यं परित्यज्य भरतः विनयप्रदर्शनेन रामम् आनेतुम् पुरवासिभिः सह अरण्यं गतः।

Explanation in tika form :—पिण्डः पिण्डदानं, उदकं तर्पणं तयोरस्थिसञ्चयनस्य तेषु क्षतेषु पिण्डोदकदानास्थिसञ्चयेषु अनुष्ठितेषु सत्सु। "यस्य च भावेन भावलक्षणम्" इति सप्तमी। [तत्र पिण्डोदकपदेन दाने लक्षणा। पिण्डोदकानां सञ्चया इति केचित्] भरतः प्रजाभिः प्रकृतिभिः "प्रजा स्यात् प्रकृतौ जने" इत्यमरः। प्रकृतं प्रस्तुतं अभिषेकं राज्याभिषेकं हित्वा त्यक्त्वा 'ओहाक् त्यागे' इति धातोः क्त्वा। हाक्धातोः क्त्वा। ["आदि कर्मणि निष्ठा (क्त्वा)" इति वचनात् आदिकर्मणि क्रियारम्भे योग्ये निष्ठा] हित्वा त्यक्त्वा सपौरः पुरवासिभिः सह, मया एकेन प्रसाद्यमानः कदाचित् नागच्छेदित्याशङ्कया पौरैः समम्। विनयेन करणेन रामं प्रत्यानिनीषुः प्रत्यानेतुमिच्छुः सन् ["सनाशंसभिक्ष उः" इति उः] अथवा विनयेन प्रसादनया उपलक्षितः सन् उपलक्षणे तृतीया। अरण्यं वनं प्रायात् गतवान्। जातिरलङ्कारः। इन्द्रवज्रोपजातिः।

शीघ्रायमाणैः ककुभोऽम्बुवानै-
र्जनैरपन्थानमुपेत्य क्लान्तैः ।
शोकादभूषैरपि भूश्चकासा-
ञ्चकार नागेन्द्ररथाश्वमिश्रैः ॥ ३७ ॥

Change of V.—प्रत्यानिनीषुणा......प्रायायत अरण्यं भरतेन स पौरेण ।

Derivation.—क्रत—क्र-कर्म्मणि क्तः । हित्वा—हा-क्त्वा । लट् जहाति, जहितः, जहीतः, जहति । लोट् (2nd person sing.) जहाहि जहिहि । जहीहि । लुङ् अहासीत् । प्रक्रतम्—प्र-क्र-कर्म्मणि (आदिकर्म्मणि) क्तः । प्रजा—प्र-जन-डः । लुङ् अजनि, अजनिष्ट । प्रत्यानिनीषुः—प्रति-आ-नी-सन्-उः । प्रायात्—प्र-या-लङ् द् ।

পিণ্ডদান ও তর্পণকার্য্য সমাধা হইলে, প্রজাগণ অভিষেক প্রস্তা করিল, তিনি তাহা পরিত্যাগ করিয়া সবিনয়ে রামচন্দ্রকে আনিবার জন্য পুরবাসিদিগের সহিত অরণ্যে প্রস্থান করিলেন ।

After the oblation of food and libation of water were offered, and the bone was preserved, Bharata rejecting the inauguration proposed by the subjects set out for the forest with the citizens, desiring to bring back Rama with entreaties.

Q. Account for क्त being used in प्रक्रतम् । Ans. "आदिकर्म्मणि निष्ठा वक्तव्या" । Of the two verbs viz. प्रजाः 'प्रक्रतवत्यः' and भरतः 'जहौ' the verb i. e. प्र-क्र denoting the first action, has had the निष्ठा i. e. क्त । Q. Can it be रामस्य प्रत्यानिनीषुः ? Ans. "न लोकेत्यादिना" प्रत्यानिनीषुः इत्यत्र उप्रत्ययात् षष्ठीप्रतिषेधः । Q. Of what other verb can हित्वा be formed ? Ans. It can be formed of धा । "दधातेः हिः" । ३६ ।

37. Principal part :—भूः (कर्त्तृपदम्) जनैः (करणैः) चकासा-

चकार। Adj. to जनैः—शीघ्रायमाणैः, अश्नुवानैः, सृप्तैः, अभूषैः and नागेन्द्ररथाश्वमिश्रैः। ककुभः—object to अश्नुवानैः। उपेत्य—अप्। अपन्थानम्—object to उपेत्य। शीकात्—हेतौ।

Prose order :—शीघ्रायमाणैः, ककुभः अश्नुवानैः, अपन्थानम् उपेत्य सृप्तैः नागेन्द्ररथाश्वमिश्रैः शीकात् अभूषैः अपि जनैः भूः चकाशाञ्चकार।

Substance :—अथ प्रजावर्गः हस्तिभिः रथैः अश्वैश्च सह दिशो व्याप्य, जनबाहुल्यात् अमार्गमपि गच्छन् द्रुतं रामम् अनुससार, तेन च पृथ्वी शुशुभे।

Explanation in tika form :—शीघ्रायमाणैः अशीघ्रैः शीघ्रैर्भवद्भिः कार्य्यवशाद्द्रुतं गच्छद्भिरित्यर्थः। ["भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः"* इति अभूततद्भावे क्यङ्। इति शीघ्राय नामधातुः, ङित्त्वात् आत्मनेपदम् अतः शानच्।] ककुभः दिशः ["दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरः] अश्नुवानैः व्याप्नुवद्भिः। अपन्थानमुपेत्य सृप्तैः बहुत्वात् अमार्गमपि गत्वा गतैः ["अपन्थानम्" इत्यत्र "पथो विभाषा" इति नञ्पूर्व्वात् पथः समासान्तविधेर्वैकल्पिकत्वात् अत्र न समासान्तः] नागेन्द्रा हस्तिश्रेष्ठाः रथाः अश्वाश्च इति नागेन्द्ररथाश्वम्, द्वन्द्वे सेनाङ्गत्वात् एकवद्भावः, तेन मिश्रैः युक्तैः [अल्पाच्तरस्य न पूर्व्वनिपातः, बहुष्वनियम इति वचनात्] शीकात् हेतोः अभूषैः अनलङ्कारैरपि जनैः करणभूतैः भूः भूमिः चकाशाञ्चकार दिदीपे। अत्र भूषणरहितानां भूषणं विरोधः। इति विरोधालङ्कारः। तल्लक्षणं यथा, "विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः" इति। छन्दोऽत्र उपजातिर्नाम।

Change of V.—भुवा चकाशाञ्चक्रे।

Derivation :—शीघ्रायमाणैः—(शीघ्र-क्यङ्) शीघ्राय-शानच्। अश्नुवानैः—अश (स्वादिः) शानच्। लट् अश्नुते। लुङ् आशिष्ट, आष्ट। लिट् आनशे। सृप्तैः—सृप-कर्त्तरि क्तः। लट् सर्पति। लुङ् असृपत्, असार्प्सीत्,

* अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्यात्, हलन्तानामेषां लोपश्च, अच्वौ भृशो भवति भृशायते। हल्लोपः यथा, असुमनाः सुमनाः भवति सुमनायते। सुमनस् इत्यस्य स-लोपः।

उच्चिच्छिरे पुष्पफलं वनानि
सस्नुः पितॄन् पिप्रियुरापगासु।
आरेमुरित्वा पुलिनान्यशङ्कं
छायां समाश्रित्य विशश्रमुश्च ॥ ३८ ॥

अकासीत्। भूषा—भूष-अः। भूषयति। चकासाञ्चकार—चकास-लिट्। लट् चकास्ति। लङ् अचकात्।

जनगण सत्वर हइया दिक् व्याप्त करिया पथहीन स्थानेओ गमन करिते लागिल। शोके ताहादेर वेश-भूषा ना थाकिलेओ अश्व-नागेन्द्र-रथ-मिश्रित सेइ जनसमूह पृथिवीके सुशोभित करिल।

Men supplied with the best of elephants, the chariots and horses bedecked the earth, unadorned though they were on account of grief, men, who making haste spread themselves in all directions and proceeded on, in pathless places.

Q. Why not चकासाञ्चक्रे, 'कृ, being an उभयपदी, and the fruit of the action accruing to the agent? Ans. कृधातोः उभयपदित्वात् आत्मनेपदित्वं युज्यते, क्रियाफलस्य कर्तृगामित्वात्। तत् कथमत्र न आत्मनेपदम्? अत आह। आमः परं कृधातोः अनुप्रयोगात् चकास्धातोः परस्मैपदित्वम् कृ-धातौ युज्यते। अतः नात्र कृधातौ आत्मनेपदित्वम् अपितु चकास-धातुवत् परस्मैपदित्वम्। "कृञ् चानुप्रयुज्यते" इति शासनात्। Q. Decline अश् in लट्। Ans. "अश्नाति सुचिमाहारम् अश्नुते च परन्तपः" इति कविरहस्यम्। Q. Explain the formation of शीघ्रायमाणैः and समास in नागेन्द्ररथाश्वमिश्रैः। Ans. See above. । ३७।

38. (1) ते (उक्तं कर्तृ) वनानि (गौणं कर्म) पुष्पफलं (मुख्यं कर्म) उच्चिच्छिरे। (2) ते आपगासु (अधिकरण) सस्नुः, पितॄन् (च) (कर्म) पिप्रियुः। (3) ते पुलिनानि (इत्वा इत्यस्य कर्म) इत्वा (अं)

चारेमुः। (4) ते छायां (समाश्रित्य इत्यस्य कर्म) समाश्रित्य (ल्यं) विश्रश्रमुः च।

Prose order :—(जनाः) पुष्पफलं वनानि उच्चिक्यिरे, आपगासु सस्नुः, पितृन् पिप्रियुः, पुलिनानि इत्वा चारेमुः छायां समाश्रित्य अश्रङ्कं विश्रश्रमुश्च।

Substance :—ते जनाः वनेभ्यः पुष्पाणि कुसुमानि च अचिन्वन्, नदीषु स्नात्वा पितृन् तर्पयामासुः। पुलिनानि प्राप्य तत्र रमन्ते स्म, छायामवाप्य विश्राममवापुः।

Explanation in tika form :—ते जनाः गच्छन्तः पुष्पाणि फलानि च पुष्पफलं "जातिरप्राणिनाम्" इति एकवद्भावः। वनानि उच्चिक्यिरे वनानि वघटयन्तः फलानि अपहृतरित्यर्थः। फलवत्कर्त्तरि आत्मनेपदम्। वनानीत्यस्य 'अकथितञ्च" इति कर्म्मसंज्ञा। तथाचोक्तम् भाष्ये "दुहि याचि रुधि प्रच्छि भिक्षि चिञामुपयोगनिमित्तमपूर्व्वविधौ। ब्रुविशासिगुणेन च यत् सचते तदकीर्त्तितमाचरितं कविना॥" उच्चिच्यिरे इति पाठान्तरम्। आपगासु नदीषु अपां समूहः आपं, समूहे अण्; तेन गच्छतीति आपगा, गमेः डः] "स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा" इत्यमरः। सस्नुः स्नातवन्तः, पितृन् पिप्रियुः तर्पितवन्तः उदकाञ्जलिना इति शेषः। पुलिनानि सैकतानि "तोयोत्थितं तत् पुलिनं सैकतं सिकतामयम्" इत्यमरः। इत्वा गत्वा चारेमुः श्रोकापनोदनार्थं चक्रीडुः। "व्याङ्परिभ्यो रमः" इति परस्मैपदम्। चारेटुरिति पाठे श्रोकात् भ्रष्टं चक्रुरित्यर्थः। छायामनातपं समाश्रिता अश्रङ्कं विस्रब्धं यथा तथा विश्रश्रमुः विश्रान्ताः। अनेकक्रियासु एककर्तृकत्वात् दीपकालङ्कारः। इत्तमिन्द्रवज्रा।

Change of V.—(जनैः) सस्ने, पितरः पिप्रियिरे, चारेमे, विश्रश्रमे।

Derivation :—उच्चिक्यिरे—उत्-चि-लिट् इरे। लट् चिनोति, चिनुते। लुङ् अचैषीत्, अचेष्ट। लिट् चिकाय, चिचाय, चिक्ये, चिच्ये। सस्नुः—स्ना-लिट् उस्। लट् स्नाति। लुङ् अस्नासीत्। लिट् सस्नौ। पिप्रियुः—प्री-लिट् उस्। लट् प्रीणाति, प्रीणीते। चारेमुः—आ-रम-लिट् उस्। लट् रमते। लुङ् अरंस्त। विश्रश्रमुः—वि-श्रम-लिट् उस्। लट् श्राम्यति। लुङ् अश्रमत्, अश्रमीत्।

संप्राप्य तीरं तमसापगाया
गङ्गाम्बुसम्पर्कविशुद्धिभाजः ।
विगाहितुं यामुनमम्बु पुण्यं
ययुर्निरुद्धश्रमहत्तयस्ते ॥ ३९ ॥

তাহারা বন হইতে পুষ্প ফল সংগ্রহ করিল। নদীতে স্নান করিয়া পিতৃলোকের তর্পণ করিল, পুলিনে গমন করিয়া ছায়া অবলম্বন করিয়া নিঃশঙ্কে বিশ্রাম করিতে লাগিল।

They "rifled the forests of" fruits and flowers, they bathed in the rivers where they offered libations of water to the manes a[nd] going to the sand bank they under the shelter of shades rest[ed] fearlessly.

Q. Explain the samas in पुष्पफलम् । Ans. S[ee] above. Q. Change the voice in वनानि पुष्पफलम् उ[च्चि]क्यिरे । Ans. The same. "गौणे याचादयः" इति कर्मणि वाच्ये याचादी[नां] गौणे कर्मणि प्रथमाविधानात् अत्र वनानि इत्यत्र प्रथमा, पुष्पफलम् इत्य[त्र] द्वितीया । Q. Account for आत्मनेपद in उच्चिक्यिरे । An[s.] "स्वरितञितः कर्त्रभिप्राये क्रियाफले । इति फलवत्कर्तृकत्वात् आत्मनेपदम् Q. Account for परस्मैपद in चारेमुः । Ans. "वि-आङ्-परि[भ्यो] रमः" इति आ-रम्धातोः परस्मैपदम् । ३८ ।

39. ते (कर्तृ) अम्बु (विगाहितुम् इत्यस्य कर्म) विगाहितुम् ययुः निरुद्धश्रमहत्तयः—Adj. to ते । यामुनम् and पुण्यम्—Adj. to अम्बु Subordinate sentence—तमसापगायाः (सम्ब) तीरं (कर्म) संप्राप्य गङ्गाम्बुसम्पर्कविशुद्धिभाजः—Adj. to तमसापगायाः ।

Prose order :—ते गङ्गाम्बुसम्पर्कविशुद्धिभाजः तमसापगायाः तीरं संप्रा[प्य] निरुद्धश्रमहत्तयः (सन्तः) पुण्यं यामुनम् अम्बु विगाहितुं ययुः ।

Substance :—या तमसा नदी गङ्गाजलसम्पर्कात् पुण्या तस्याः, तीर

आसाद्य, ते छायानिलादिना अध्वखेदम् अपनीय सन्निकृष्टायाः यमुनानद्याः पुण्य-जलं स्नातुम् जग्मुः।

Explanation in tika form :—ते जनाः गङ्गाम्बुसम्पर्कः गङ्गाम्बुना सम्पर्कः भागीरथीसलिलसंयोगः तृतीयासमासः। तेन विशुद्धिः अतिशयितपवित्रता तृतीयासमासः। तां भजते या तस्याः। "भजो ण्विः" इति ण्विः। उपपद-समासः। ताम्यति स्मरणात् पापं नाशयतीति तमसा, तमधातोः असच्, तदाख्या आपगा नदी, मध्यपदलोपी समासः। तस्याः तीरं कूलं संप्राप्य गत्वा ['तरसा इति पाठे वेगेनेत्यर्थः। "तरसी बलरंहसी"।] निरुद्धा छायानिलादिसेवनात् प्रशमिता श्रमवृत्तिः खेदव्यापारः येषां ते तथाभूताः सन्तः, पुण्यं पवित्रं पावनं वा यमुनाया इदं यामुनम्, अण्प्रत्ययः। यमुनासम्बन्धि जलं विगाहितुं वि-गाहधातोः तुमुन्। तत्र स्नातुमित्यर्थः, ययुः गताः। तमसानदी यमुनासन्निकृष्टा गङ्गा-सङ्गता च, यस्याः समीपे वाल्मीकितपोवनमासीत्। वृत्तमुपजातिः।

Change of V.—ययै निरुद्धश्रमवृत्तिभिः तैः।

Derivation.—तमसा—तम-असच्। गङ्गा—गम-गन्। सम्पर्क—सम् पृच भावे घञ्। विगाहितुम्—लट् गाहते। लुङ् अगाहिष्ट। यामुनम् यमुना-अण्। निरुद्ध—नि-रुध-कर्म्मणि क्तः। लट् रुणद्धि, रुन्धे। लुङ् अरुधत्, अरौत्सीत्, अरुद्ध।

গঙ্গাজলের সম্পর্কে যে তমসা নদী সুবিশুদ্ধ তাহার তীরে উপনীত হইয়া ও শ্রান্তি দূর করিয়া, যমুনার পবিত্র জলে স্নান করিবার জন্য গমন করিল।

Reaching the bank of the river Tamasa that attained purity from contact with the waters of the Ganga, they went to have a dip in the holy water of the Jamuna after they had been relieved of fatigue.

Q. Give the derivative meaning of आपगा।

Ans. अपां समूहः आपम्। अण्। आपं जलसमूहं तेन तत् वा गच्छति (प्राप्नोति) या सा आपगा नदी। गम्धातोः डः। १९।

ईयुर्भरद्वाजमुनेर्निकेतं
यस्मिन् विशश्राम समेत्य रामः।
च्युताशनायः फलवद्विभूत्या
व्यस्यन्नुदन्यां शिशिरैः पयोभिः॥ ३९

40. Principal sentence:—ते (कर्तृ) भरद्वाजमुनेः (सम्ब) निकेतम् (कर्म) ईयुः। Cor-relative sentence—रामः (कर्तृ) यस्मिन् (अधि) विशश्राम। Adj. to रामः—च्युताशनायः। फलवद्विभूत्या and पयोभिः—करणे, वा कर्त्तरि तृतीया। शिशिरैः—Adj. to पयोभिः। उदन्याम्—object to व्यस्यन्।

Prose order:—यस्मिन् रामः समेत्य फलवद्विभूत्या च्युताशनायः, (तथा) शिशिरैः पयोभिः उदन्यां व्यस्यन् (सन्) विशश्राम, भरद्वाजमुनेः (त) निकेतम् (ते) ईयुः।

Substance:—यत्र भरद्वाजाश्रमे रामोऽपि उपस्थाय आश्रमवृक्षफलैः शीतलपयोभिश्च निवृत्तक्षुत्पिपासः आसीत्, तत्र भरतानुगाः पौराः अपि समुपस्थिताः।

Explanation in tika form:—यस्मिन् भरद्वाजाश्रमे रामः समेत्य संगत्य फलवतां फलितानां वृक्षाणां विभूत्या समृद्ध्या हेतुभूतया, "फलवान् फलिनः फली" इत्यमरः। च्युता अपगता अशनाया भोजनेच्छा बुभुक्षा इति यावत्, यस्य स तथाभूतः "अशनाया बुभुक्षा क्षुत्" इत्यमरः। तथा शिशिरैः शीतलैः पयोभिः सलिलैः उदन्यां पिपासां "उदन्या तु पिपासा तृट् तर्ष." इत्यमरः। व्यस्यन् वारयन्। असेर्दैवादिकस्य शतरि रूपम्। विशश्राम विश्रान्तः तं भरद्वाजमुनेः निकेतम् आश्रमम् ईयुः प्रापुः, ते जनाः इति शेषः। [अशनाया उदन्या च इति शब्दौ "अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु"* इति क्यजन्तौ

* The nominal verbs (नामधातु) viz. अशनाय उदन्य and धनाय are formed irregularly (निपातनसिद्ध) with the affix क्यच् in the sense of hunger thirst and avarice respectively.

वाचंयमान् स्थण्डिलशायिनश्च
युयुक्षमाणाननिशं मुमुक्षून् ।
अध्यापयन्तं विनयात् प्रणेमुः
पद्गा भरद्वाजमुनिं सशिष्यम् ॥ ४१ ॥

निपातितौ। तत: य-प्रत्यय:। स्त्रीत्वात् च चाप्। इति अशनाया उदन्या च शब्दद्वयं निष्पन्नम्। इत्तमुपजाति:।

Change of V.—ईये निकेत:। विश्रमो रामेण क्षुतात्रशनायेन व्यस्यता।

Derivation.—ईयु:—इ-लिट् उस्। लङ् ऐयात्। अशनाया—(अशन-क्यच्) अशनाय-अ: स्त्रीत्वात् टाप्। व्यस्यन्—वि-अस-शतृ। लट् अस्यति। लङ् आस्यत्। उदन्या—(उदक-क्यच्) उदन्य-अ-स्त्रीत्वात् टाप्।

তাহারা ভরদ্বাজ মুনির নিকেতনে উপস্থিত হইল। এই স্থানে রামচন্দ্র আসিয়া ফলবান বৃক্ষের ফলসম্পদে ক্ষুধা নিবৃত্ত করিয়া ও সুশীতল জলে তৃষ্ণা নিবারণ করিয়া বিশ্রাম লাভ করিয়াছিলেন।

Thy reached the residence of the ascetic Bharadwaja where Rama having come had rested, having been relieved of hunger by the abundant products' of the fruitful trees, and of thirst by cold water.

Q. Explain the formation of अशनाया and उदन्या। Ans. See above. Q. Give the meaning of मुनि:। Ans. मननात् मुनि:। "मन्यतेरुच्च"। इति मन्धातो: इकारे कृते अकारस्य उकारादेश:। "दु:खेष्वनुद्विग्नमना:, सुखेषु विगतस्पृह:। वीतरागभयक्रोध: स्थिरधी मुनिरुच्यते। ४०।

41. Principal part :—ते (कर्तृ) भरद्वाजमुनिं (कर्म) प्रणेमु:। Adj. to ते—पद्गा:। Adj. to भरद्वाजमुनिम्—अध्यापयन्तं and सशिष्यम्। विनयात्—ल्यब्लोपे पञ्चमी। अनिशम्—Adv. to युयुक्षमाणान्। मुमुक्षून् —object to अध्यापयन्तम्। The rest are adj. to मुमुक्षून्।

Prose order :—(ते) विनयात् पद्गा: (सन्त:) वाचंयमान् स्थण्डिल-

शायिनः युयुक्षमाणान् अनिशं मुमुक्षून् अध्यापयन्तं सशिष्यं भरद्वाजमुनिं प्रणेमुः ।

Substance :—अथ विनयवशात् पद्गिः गच्छन्तः भरतादयः शिष्यैः सह वर्त्तमानं भरद्वाजमुनिं प्रणेमुः । तदा स: संयतवाक्यान् स्थण्डिलस्थितान् योगाभ्यासरतान् सततं मोक्षार्थिनः अध्यापयन् आस ।

Explanation in tika form :—ते जनाः विनयात् विनयेन, हेतौ अथवा ल्यब्लोपे पञ्चमी । पादाभ्यां गच्छन्तीति पद्गाः पादचारिणः ["अन्येष्वपि दृश्यते" इति गम्धातोः डः, पादस्य च पदादेशः*] । एतेन यानस्था अपि पादचारिणः अभवन् इति गम्यते । वाचंयमान् मौनव्रतिनः ["वाचि यमो व्रते" इति खच्] स्थण्डिले परिष्कृतभूमौ शेरते इति स्थण्डिलशायिनः भूशायिनः "यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ" इत्यमरः । तथोक्तान् । "व्रते" † इति णिनिः । युयुक्षमाणान् योक्तुमिच्छतः, योगाभ्यासनिष्ठानित्यर्थः । अनिशं अविच्छेदेन मुमुक्षून् मोक्षाभिलाषिणश्च अध्यापयन्तं पाठयन्तं सशिष्यं शिष्यैः सहितं भरद्वाजमुनिं प्रणेमुः प्रणमन्ति स्म । अथवा विनयात् प्रणेमुः इत्यन्वयः । वृत्तमुपजातिः ।

Change of voice :—अध्यापयन् प्रणेमे पद्गैः भरद्वाजमुनिः सशिष्यः ।

Derivation.—वाचंयमान्—वाच्-यम-खच्, निपातः । अपरे, वाचा-यम-ख । स्थण्डिलशायिनः—स्थण्डिल-शी-णिनिः । लट् शेते । लुङ् अशयिष्ट । युयुक्षमाणान्—युज-सन्-शानच् । मुमुक्षून्—मुच-सन्-उः । लट् मुञ्चति, मुञ्चते लुङ् अमुचत्, अमुक्त । अध्यापयन्तं—अधि-इङ्-णिच्-शतृ । लट् अध्यापयति । लुङ् अध्यजीगपत्, अध्यापिपत् । प्रणेमुः—प्र-नम-लिट् उस् । लुङ् अनंसीत् । पद्गा—पाद-गम्-डः ।

---

* "हिमकाषिहतिषु च" The word पाद followd by हिम काषि and हति is transformed into पद । The च in the aphorism represents such as are not contained in the above one. So पद्ग by the force of च, can be formed accordingly.

† "व्रते" व्रते गम्यमाने सुबन्त-उपपदे धातोः णिनिः प्रत्ययो भवति । व्रताभावे न णिनिः स्यात् । अतः व्रताभावपक्षे 'स्थण्डिले शेते' इत्येवं स्यात् ।

आतिथ्यमेभ्यः परिनिर्विवप्सोः
कल्पद्रुमा योगवलेन फेलुः ।
धामप्रथिम्नो म्रदिमान्वितानि
वासांसि च द्राघिमवन्त्युदूहुः ॥ ४२ ॥

তাহারা পদব্রজে গমন করিয়া সশিষ্য ভরদ্বাজ মুনিকে সবিনয়ে প্রণাম করিল। যাঁহারা বাক্য সংযমন করিয়াছিলেন, স্থণ্ডিলে অর্থাৎ ভূমিতে শয়ন করিতেন, যোগে নিরত ও সততই মুমুক্ষু তাহাদিগের অধ্যাপনায় মুনিবর তৎকালে নিযুক্ত ছিলেন।

They going on foot humbly prostrated themselves before Bharadwaja the ascetic with his disciples when the former was teaching the latter ones who vowed to silence and used to sleep on the open ground, were always desirous of salvation and were given to yoga. (fixed contemplation).

Q. Explain the formation of वाचंयमान् । Ans. "वाचि यमो व्रते"। वाक्‌शब्दे उपपदे यम्‌धातोः खच् स्यात् व्रते गम्ये । ततः "वाचंयमपुरन्दरौ च" इति अमन्तत्वं निपातितम् ।. Q. Parse अनिशम् । Ans. नास्ति निशा चेष्टाविघाती यस्य तादृशं समयम् इत्यर्थे अत्यन्तसंयोगे द्वितीया । अथवा न निशेते अत्र इति नि-शीधातोः डमुः । "सातत्ये अशराद्याकृतिगणत्वेन तस्य तत्र पाठः" इति प्रौढमनोरमावचनात् अव्ययपदम् । अत्रापि अत्यन्तसंयोगे द्वितीया । Q. Account for पञ्चमी in ञ्विनयात् । Ans. See above. Q. Conjugate the root of युयुक्षमाणान् in लट् । Ans. दिवादिगणीयस्य आत्मनेपदिनः युज्‌धातोः लटि रूपं यथा— 'युज्यते' &c. । ४१ ।

42. Principal sentences :—(1) (मुनेः) कल्पद्रुमाः (कर्तृ) फेलुः, (2) वासांसि च (कर्म) उदूहुः । Adj. to वासांसि—म्रदिमान्वितानि and द्राघिमवन्ति । Adj. to मुनेः—परिनिर्विवप्सोः । एभः:— [illegible] ।

आतिथ्यम्—object to परिनिर्व्विवप्सोः । योगबलेन—हेतुना । धामप्रथिम्नः—हेतौ: (पञ्चमी) । अथवा "मुनेः इत्यस्य विशेषणम् ।

Prose order :—एभ्यः आतिथ्यं परिनिर्व्विवप्सोः, तथा प्रथितधाम्नः (मुनेः) योगबलेन कल्पद्रुमाः फेलुः । म्रदिमान्वितानि द्राघिमवन्ति वासांसि च उदूहुः ।

Substance.—भरतादिभ्यः आतिथ्यं विधातुम् तपोमहिमान्वितः भरद्वाजः योगबलेन कल्पद्रुमेभ्यः इष्टानि सुरसफलानि, कोमलानि वसनानि च दीर्घाणि उत्पादयामास ।

Explanation in tika form :—एभ्यः भरतादिभ्यः, सम्प्रदाने चतुर्थी, अतिथये इदम् इति आतिथ्यम् अतिथ्यर्थं अन्नपानादिकम् इत्यर्थः । "अतिथे र्ञ्यः" इति ञ्यः । परिनिर्व्विवप्सोः सर्व्वतोभावेन दातुमिच्छोः । निर्पूर्व्वो वपिः दानार्थकः । तस्य भरद्वाजस्य योगबलेन समाधिबलेन कल्पद्रुमाः कल्पवृक्षाः फेलुः अन्नपानादिकमिति शेषः । तथा तस्य मुनेः धामप्रथिम्नः (धाम्नः प्रथिमा तस्मात् इति हेतौ पञ्चमी) तेजोबाहुल्याद्धेतोः । केचित् धाम्ना तेजसा प्रथिमा पृथुत्वं यस्य इति मुनिविशेषणमाहुः, तेजसो बहिर्निर्गमात् शरीरस्य पृथुत्वं जायते इत्यर्थः । ते कल्पद्रुमाः म्रदिम्ना मृदुत्वेन अन्वितानि युक्तानि, द्राघिमा दैर्घ्यं विद्यते येषां तानि तथाभूतानि वासांसि वस्त्राणि च । चकारः समुच्चये । उदूहुः उदवहन्ति स्म । [पृथु मृदु दीर्घशब्देभ्यः तस्य भाव इत्यर्थे "पृथ्वादिभ्य इमनिच् वा" इति इमनिच् । "रऋतो हलादेर्लघोः" इति पृथुमृदुशब्दयोः 'ऋ' इत्यस्य रादेशः । दीर्घशब्दस्य 'प्रियस्थिर' इत्यादिना द्राघादेशः । पश्चात् मतुप् ।] इन्द्रवज्रा ।

Change of V.—कल्पद्रुमैः फेले......उदूहिरे ।

Derivation.—आतिथ्यम्—अतिथि ञ्यः । परिनिर्व्विवप्सोः—परि-निर्-वप्-सन्-उः षष्ठी । योग—युज-घञ् । लट् युज्यते (दिवादिः) । लुङ् अयुक्त । फेलुः—फल-लिट् उस् । लट् फलति । लुङ् अफालीत् । प्रथिमन्—पृथु इमनिच् । म्रदिमन्—मृदु-इमनिच् । द्राघिमवन्ति—(दीर्घ-इमनिच्) द्राघिमन्-मतुप् । उदूहुः—उत्-वह-लिट् उस् । लट् वहति, वहते । लुङ् अवाक्षीत्, अवोढ ।

आज्ञां प्रतीयुर्विनयादुपांशु
जगुः सरागं ननृतुः सहावम्
सविभ्रमं नेमुरुदारमूचु
स्तिलोत्तमाद्या वनिताश्च तस्मिन् ॥ ४३ ॥

তাহাদের আতিথ্যক্রিয়া সম্পাদনার্থ সমুৎসুক তপোমহিমান্বিত ঋষির যোগবল প্রভাবে কল্পদ্রুম হইতে অভীষ্ট ফল, এবং সুকোমল ও সুদীর্ঘ বসন উৎপন্ন হইল।

By the power of divine contemplation of the ascetic, great in lustre, who was desirous of conducting entertainments to the guests the celestial trees yielded fruits and clothes of fineness and of sufficient length.

Q. Parse धामप्रथिम्नः। Ans. भरद्वाजस्य ऋषेः विशेषणम्। अथवा पञ्चम्यन्तमेतत्। तथात्वे हेतौ पञ्चमी। Q. Decline प्रथिमन्। Ans. पुंसि विशेष्यपदमेतत्। प्रथिमा प्रथिमानौ प्रथिमानः, प्रथिम्नः प्रथिम्ना, प्रथिमभ्याम् &c. Q. Give the past participle form of फल alone and with the prefixes of सम्, उत् and प्र। Ans. फल क्तः—फुल्लः, फुल्तः, फलितः। सम्-फल, संफुल्लः, उत्-फल, उत्फुल्लः। प्र फल, प्रफुल्तः। ४२।

43. (1) वनिताः (कर्त्तृ) आज्ञां (कर्म्म) प्रतीयुः। तिलोत्तमाद्याः—Adj. to वनिताः। (2) वनिताः विनयात् (ल्यप्लोपे पञ्चमी) उपांशुः। (3) ताः सरागं (क्रिविश) जगुः। सहावं (क्रि-विश) ननृतुः। (4) ताः सविभ्रमं (क्रि-विश) नेमुः। (5) ताः उदारम् (क्रिविश) ऊचुः। तस्मिन्—अधिकरणे सप्तमी।

Prose order :—तस्मिन् तिलोत्तमाद्याः वनिताश्च आज्ञां प्रतीयुः, विनयात् उपांशुः, सरागं जगुः, सहावं ननृतुः सविभ्रमं नेमुः, उदारम् ऊचुः।

Substance :—तपःप्रभावात् तिलोत्तमाप्रभृतयः स्वर्गस्त्रियः तस्मिन्

भरद्वाजाश्रमे भरतानुगामी सैन्याय तेषाम् आतिथ्यं पाकशासनाद्याः, तथा तत्र नाम् सिषेविरे, तत्कृतेषु गीतेषु रागः प्रकटितोऽभूत्। नृत्येषु विलासादि-कम् अलक्ष्यत। प्रणतिषु विभ्रमः अदृश्यत। वचनेषु उदारता अचिता इति।

Explanation in tika form:—अथ तपःप्रभावात् समुचित राजोचितम् आतिथ्यम् प्रकटयन्नाह आश्रममिति। तस्मिन् आश्रमे तिलोत्तमा तन्नाम्नी अप्सराः आद्या यासां ताः तिलोत्तमाद्याः वनिताः, वनन्ति सम्भजन्ते इति वनिताः, वन् धातोः क्तच्। दिव्ययोषितः "वनिता जनितात्यर्थानुरागायाञ्च योषिति" इति अमरः। आश्रमे मुनेरादेशं प्रतीयुः अङ्गीकृतवत्यः चेटीवत् इत्यर्थः। ज्ञानार्थकात् प्रति-इणधातोः लिटि उस्। विनयात् विनयेन उपास्थुः उपात् स्थाधातोः लुङ्। उपस्थिताः पादोदकादिदानेन उपसर्गाः अकुः। ननु देवताबुद्ध्या पूजयामासुः, तथात्वे आत्मनेपदं स्यात्। रागं मालवादिरागयुक्तं यथा स्यात्तथा जगुः गीतवत्यः। सहावं विलासादिचेष्टायुक्तं ननृतुः नर्त्तितवत्यः। "स्त्रीणां विलासबिब्बोकविभ्रमा ललितं तथा। हेला लीलेत्यमी हावाः।" इत्यमरः [उक्तञ्च दर्पणकृता, "भ्रूनेत्रादिविकारैस्तु सम्भोगेच्छाप्रकाशकः। भाव एवाल्पसंलक्ष्यविकारो हाव उच्यते" इति] सविभ्रमं अनुरागात् भ्रान्तियुक्तं यथा स्यात् तथा नेमुः प्रणताः ["विभ्रमस्त्वरया काले भूषास्थानविपर्य्ययः।" इति] उदारम् ऊचुः यथाव्यम् उक्तवत्यः। "उदारो दातृमहतोर्दक्षिणे चाभिधेयवत्" इति शाश्वतात्। दीपकालङ्कारः। इत्थम् उपजातिः।

Change of V.—आश्रमे प्रतीये, उपास्थायि, जगे, ननृते, नेमे, ऊचे तिलोत्तमाद्याभिः वनिताभिः।

Derivation.—प्रतीयुः—प्रति-इण-लिट् उस्। लट् प्रतीयन्ति। लुङ् प्रत्यैषीत्। उपास्थुः—उप-स्था-लुङ् अन्। एकवचने उपास्थात्। जगुः—गै-लिट् उस्। लट् गायति। ननृतुः—नृत्-दिवादिः। लट् नृत्यति। लुङ् अनर्त्तीत्। लृट् नर्त्तिष्यति, नर्त्स्यति। वनिता—वन्-सेवने इति, वन-क्तच्। वनति लट्। अवानीत्, अवनीत् लुङ्।

वक्त्रासवपानं नयनञ्च नाना
कृत्वावकाशे रुचिसंप्रसूनम् ।
तान् प्रीतिमानाह मुनिस्ततः स्म
निबध्यमानं पिबतास्तु प्रेम्णम् ॥ ৪৪ ॥

তিলোত্তমা প্রভৃতি রমণীগণ ঋষির আজ্ঞানুবর্ত্তিনী হইল। তাহারা সবিনয়ে ভবতানুগদিগের পরিচর্য্যা করিতে লাগিল। মালবাদি রাগ রাগিণী সহিত সঙ্গীত করিতে লাগিল, ভাবভঙ্গির সহিত নাচিতে লাগিল, সবিভ্রমে প্রণাম করিয়া উদারবাণী প্রয়োগ করিতে লাগিল।

Loving women such as Tilottoma yielded to the directions of the ascetic, served them humbly, sang in musical harmony, danced with coquettish gestures, bowed with grace (or amorous gestures) and spoke politely.

Q. Account for परस्मैपद in उपास्थुः। Ans. "उपात् देवपूजासङ्गतिकरणमित्रकरणपथिषु ।" इति उपपूर्वकात् स्थाधातोः देवपूजार्थे आत्मनेपदं स्यात्। अत्र तु न देवबुद्ध्या पूजनम्, अतः परस्मैपदम्। "स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती" इत्यत्र तु रघौ देवत्वाभावात् देवत्वारोपः, अतः तत्र आत्मनेपदम्, इति भट्टोजिदीक्षितः। Q. Define हाव and विभ्रम Ans: "ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकासकृत्। भावादीषत् प्रकाशो यः स हाव इति कथ्यते।" "चित्तवृत्त्यनवस्थानं शृङ्गाराद् विभ्रमो मतः।" Q. Enumerate the राग। Ans. भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा। श्रीरागो मेघरागश्च रागाः षट् इति कीर्तिताः। ४३।

44. Principal part :—मुनिः (कर्तृ) ताम् (कर्म) आह स्म। Incomplete verb—कृत्वा। वक्त्रासवपानं and नयनम्—object to कृत्वा। नाना—नाम्, adj. to वक्त्रासवपानम् and नयनम्। रुचिसंप्रसूनम्—adj. to वक्त्रासवपानम्। अवकाशे—आधाराधिकरणे आधाराधिकरणे वा। प्रीतिमान्—Adj. to मुनिः। ततः—पञ्चम्यन्तमव्ययम्। Subordinate

sentence—(1) यूयम् (अनुक्तम् कर्तृपदम्) निवद्ध्वम्, पिबत, अत्त and शेध्वम्।

Prose order :—ततः अवकाशे रुचिसंप्रक्लृप्तं नाना अन्नपानं शयनञ्च कृत्वा प्रीतिमान् मुनिः तान्, 'निवद्ध्वम्', 'आध्व' 'पिबत' 'अत्त' 'शेध्वम्' इति आह स्म।

Substance :—भरद्वाजः अस्मिन् अवसरे यथायोग्यप्रदेशे वा वसनानि भोज्यानि, पानीयानि तथा शय्याः विधाय तान् ससन्तोषम् उवाच, यूयं तावत् वसनानि परिधत्त, आसनेषु उपविशत, पानीयानि पिबत, भोज्यानि खादत शयनेषु स्वपित इति।

Explanation in tika form :—ततः वनितोपस्थानानन्तरं अवकाशे यथायोग्यप्रदेशे अवसरे वा, रुच्या संप्रक्लृप्तं रुचिसंप्रक्लृप्तं तृतीया समासः। यस्य यावती अभिरुचिः तथैव सम्पादितं वस्त्रं वासश्च अन्नं भोज्यञ्च पानं पानीयञ्च तत्, समाहारद्वन्द्वः। सर्व्वो द्वन्द्वः विभाषयैकवद्भवति इति एकवद्भावः। शयनञ्च शय्याश्च नाना नानाविधं "नाना विनोभयानेकार्थेषु"* इति हेमः। कृत्वा विधाय प्रीतिमान् हृष्टो मुनिः भरद्वाजः तान् भरतादीन्, निवद्ध्वं परिधत्त वस्त्राणीति शेषः। नि-वस्धातोः लोटि ध्वम्। आध्वम् उपविशत। आस्-धातोः लोटि ध्वम्। पिबत पय इति शेषः। अत्त भक्षयत अन्नादिकमिति शेषः। तथा शेध्वं स्वपित, शयने इति शेषः। सर्व्वत्र विधौ लोट्। इति आह स्म उक्तवान्। दीपकालङ्कारः। वृत्तमुपजातिः।

Change of V.—ते प्रीतिमता उच्यन्ते स्म मुनिना।

Derivation.—वस्त्र—वस-त्र। लट् वस्ते। लुङ् अवसिष्ट। अन्नं—अद-क्तः। लुङ् अघसत्। पान—पा-कर्म्मणि ल्युट्। लुङ् अपात्। शयनम्—शी-अधिकरणे ल्युट्। संप्रक्लृप्तं—सं-प्र-क्लृप-कर्म्मणि क्तः। लट् कल्पते। लुङ् अक्लृपत्, अकल्पिष्ट, अक्लृप्त। लृट् कल्प्स्यति, कल्पिष्यते, कल्प्स्यते। लिट् चक्लृपे। लुट् कल्पिता, कल्प्ता। निवद्ध्वं—नि-वस-लोट् ध्वम्। लट् वस्ते।

* विनार्थे यथा—विष्णुं नाना मोक्षदो नास्ति देवः। उभयार्थे—नानाविधं न सर्व्वत। अनेकार्थे यथा अर्थं च।

ते भुक्तवन्तः सुसुखं वसित्वा
वासांस्युषित्वा रजनीं प्रभाते।
द्रुतं समध्वा रथवाजिनागै-
र्मन्दाकिनीं रम्यवनां समीयुः ॥ ४५ ॥

आद्ध्वम्—आस-लोट् ध्वम्। लट् आस्ते। अत्त—अद-लोट् त। लट् अत्ति। शेध्वम्—शी-लोट् ध्वम्। लट् शेते।

ইতি মধ্যে মুনিবর প্রত্যেকের রুচির অনুরূপ নানাবিধ বস্ত্র, অন্ন, পানীয় ও শয্যা প্রস্তুত করিয়া আনন্দমনে তাহাদিগকে বলিলেন, বস্ত্র পরিধান কর, আসনে উপবেশন কর, অন্ন ভক্ষণ কর, পানীয় পান কর, ও শয্যায় বিশ্রাম লাভ কর।

During the intermission, the ascetic preparing, to their taste, the various sorts of clothes, food, drink and bed, was glad to say, 'O put on the clothes, take your seats, drink and eat and take rest.

Q. Account for the singular number in वस्त्रान्नपानम्। Ans. See above. Q. Show the propriety of the epithet प्रीतिमान्। Ans. योगबलात् राजोचिताहारादिसमुत्पादनात् भरद्वाजः महतीं प्रीतिमगच्छत्, इत्यस्य सार्थकम्। Q. What विभक्ति does तस् represent here. In what other विभक्ति can it be used? Ans. अत्र पञ्चम्यां तस्। 'सार्व्वविभक्तिकस्तसिल्' इति 'तस्' सर्व्वासु विभक्तिषु प्रयुज्यते। यथा, अतो भवान्, ततो भवन्तम्, अतो भवते इत्यादि। ४४।

45. Principal part :—ते (कर्त्तृ) द्रुतम् (क्रियाविशेषण) मन्दाकिनीं (कर्म्म) समीयुः। Adj. to ते—समध्वाः and भुक्तवन्तः। Adj. to मन्दाकिनीम्—रम्यवनाम्। रथवाजिनागैः—गम्यमान 'सह'शब्दयोगे तृतीया। Incomplete verbs—वसित्वा and उषित्वा। वासांसि—object to वसित्वा। सुसुखम्—Adv. to भुक्तवन्तः। रजनीम्—अत्यन्तसंयोगे द्वितीया। प्रभाते—कालाधिकरणे।

Prose order :—सुसुखं भुक्तवन्तः ते वासांसि वसित्वा रजनीम् उषित्वा प्रभाते समध्वाः (सन्तः) रथवाजिनागैः द्रुतं रम्यवनां मन्दाकिनीं समीयुः।

Substance :—सुखेन आहारादिकं कृत्वा वस्त्राणि च परिधाय एकां रजनीं यापयित्वा प्रातः रथादिभिः सह मार्गानुवर्त्तिनः सन्तः रमणीयवनां मन्दाकिनीं नाम नदीं प्राप्ताः।

Explanation in tika form :—सुसुखं यथा तथा भुक्तवन्तः कृतभोजनाः ते भरतादयः वासांसि वस्त्राणि वसित्वा परिधाय "वस्त्रमाच्छादनं वासः" इत्यमरः। रजनीं रात्रीम् उषित्वा स्थित्वा। "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया। प्रभाते प्रातःकाले, सङ्गता अध्वनः इति समध्वाः अविच्छिन्नाध्वानः सन्तः। प्रादिसमासः। "उपसर्गादध्वनः" इति समासान्तष्टच्। रथश्च वाजी अश्वश्च रथवाजि, द्वन्द्वैकवद्भावः। तेन सहिता नागा इति शाकपार्थिवादित्वात् समासः, तैः, अन्यथा सेनाङ्गत्वात् समुदायस्यैकवद्भावः स्यात्। अपरे, रथश्च वाजिनोऽश्वाश्च नागा हस्तिनश्च इति इतरेतरद्वन्द्वः इत्याहुः। परे तु 'सेनाङ्गानां बहुत्वे समाहार' इति रथश्च वाजी च नागश्च इत्येकवचनेन विग्रहं वदन्ति। समाहारविधेरनित्यत्वमित्यन्ये। द्रुतं शीघ्रं रम्याणि वनानि काननानि यत्र ताम् रम्यवनां रमणीयकाननां रमणीयजलां वा "वनं काननमीरयोः" इति विश्वः। मन्दाकिनीं नदीं [मन्दाकिनी चित्रकूटवर्त्मनि नदीविशेषो गर्भदेति प्रसिद्धा। गङ्गामात्रे मन्दाकिनीति केचित्] समीयुः सङ्गतवन्तः। वृत्तमुपजातिः।

Change of V.—तैः भुक्तवद्भिः समध्वैः मन्दाकिनी रम्यवना समीये।

Derivation.—भुक्तवन्तः—भुज-क्तवतुः। लट् भुङ्क्ते। लुङ् अभुक्त। लिट् बुभुजे। वसित्वा—वस्-(अदादिः) क्त्वा। लट् वस्ते। उषित्वा—वस (भ्वादिः) क्त्वा। लट् वसति। लुङ् अवात्सीत्। समीयुः—सम-इ-लिट् उस्। लट् एति। लुङ् अगात्। लिट् इयाय।

তাহারা পরম সুখে আহার করিয়া, বস্ত্রাদি পরিধান করিয়া ও রাত্রিতে তথায় অবস্থান করিয়া প্রভাতে সংবদ্ধ হইয়া রথাশ্বহস্তি সহ রাজপথ আশ্রয় করিল ও রম্যবন (রম্যজল) মন্দাকিনী নদীতে উপনীত হইল।

वैखानसेभ्यः श्रुतरामवार्त्ता-
स्ततो विविक्तानपतत्रिसङ्घम् ।
अभ्रंलिहाग्रं रविमार्गभङ्ग-
मानंशिरेऽद्रिं प्रति चित्रकूटम् ॥ ४६ ॥

Dining in great delight, dressing themselves with the clothes and staying there for the night and then in the morning quickly taking to the roads with the chariots the horses and the elephants, they reached the Mondakini with lovely forests attached to it (or with lovely waters).

Q. What should be the form of वस with the affix क्त्वा। Conjugate it in लट् and लुङ्। Ans. वस् आच्छादने इत्यर्थे 'वसित्वा' इत्येवं स्यात्। लुङि अवसिष्ट। 'वस्' निवासे इत्यर्थे तु 'उषित्वा' इति। लुङि अवात्सीत्। लटि यथा कविरहस्ये—"वस्ते वस्त्रवरं निवासयति यः चित्रञ्च चीनांशुकम्। यो वस्त्यरिषु प्रवासयति यः क्रुद्धः कुलं विद्विषाम्। लक्ष्मीर्यस्य मुखाम्बुजे निवसति प्रीत्या सरस्वत्यपि॥" स्तम्भनार्थस्य दैवादिकस्य लुङि अवासीत् अवसीत्। प्रोषणार्थस्य चुरादिगणीयस्य लुङि अवीवसत्। ४५।

46. Principal part:—ततः (ते) चित्रकूटम् (अद्रिमित्यस्य विशेषणम्) अद्रिं (प्रतियोगे द्वितीया) प्रति आनंशिरे। Adj. to ते—श्रुतरामवार्त्ताः। Adj. to अद्रिं—विविक्तानपतत्रिसङ्घम्, अभ्रंलिहाग्रं and रविमार्गभङ्गम्। वैखानसेभ्यः—अपादानम्। प्रति—कर्मप्रवचनीयम्।

Prose order:—ततः वैखानसेभ्यः श्रुतरामवार्त्ताः (ते) विविक्तानपतत्रिसङ्घम् अभ्रंलिहाग्रं रविमार्गभङ्गं चित्रकूटम् अद्रिं प्रति आनंशिरे।

Substance:—ते भरतादयः वैखानसेभ्यः रामवार्त्तामाकर्ण्य चित्रकूटं प्रति प्रस्थिताः। स च चित्रकूटः कूजद्भिः पक्षिभिः पूरित आसीत्। तस्य शृङ्गं गगनमस्पृशत्, सूर्यस्य च पन्थानम् अरुधत्।

Explanation in tika form :—ततो मन्दाकिनीगमनानन्तरं वैखानसेभ्यः वानप्रस्थेभ्यः वानप्रस्थधर्म्मावलम्बिभ्यः तापसेभ्यः इत्यर्थः। 'श्रुत्युर्थानां श्रावयिता' इति पञ्चमी। "वैखानसो वनेवासो वानप्रस्थश्च तापसः" इति वैजयन्ती। श्रुता आकर्णिता रामस्य वार्त्ता 'चित्रकूटे रामोऽस्तीति' वृत्तान्तः यैः तादृशाः "वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः" इत्यमरः। ते भरतादयः विशिश्रानः कूजन् पतत्त्रिणां पक्षिणां सङ्घः समूहो यत्र एतादृशं, कूजत्पक्षिगणमित्यर्थः। "सङ्घसार्थौ तु जन्तुभिः" इत्यमरः। अभ्रं मेघं लेढीति अभ्रंलिहं मेघस्पृक् "वहाभ्रे लिहः"* इति खश्। तथाभूतम् अग्रं शिखरदेशः यस्य तादृशं अभ्रस्पृष्टशिखरमित्यर्थः। "अग्रं पुरस्तादुपरि परिमाणे फलस्य च" इति मेदिनी। रवेः सूर्य्यस्य मार्गभङ्गः उच्चैस्तरत्वात् वर्त्मविघातो यत्र तादृशं चित्रकूटनामानम् अद्रिं पर्व्वतं प्रति ["लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्य्यनवः"† इति प्रतेः कर्म्मप्रवचनीयसंज्ञा, तद्योगे "कर्म्मप्रवचनीययुक्ते द्वितीया" इति द्वितीया] आनंहिरे तं लक्षीकृत्य जग्मुः। गत्यर्थस्य अन्ह्धातोः लिटि इरे। वृत्तमुपजातिः।

Change of V.—श्रुतरामवार्त्तैः आनंहे।

Derivation.—विशिश्रान—वि-श्रिञ-आनच्। पतत्त्रिन्—पतत्त्र-इनिः। अभ्रंलिह—अभ्र-लिह खश्। आनंहिरे—अन्ह् लिट् इरे। लट् अंहते। लुङ् आंहिष्ट। अद्रिः—अद-क्रिन्। रविः—रु-इः।

অনন্তর তাহারা বানপ্রস্থদিগের নিকট হইতে রামচন্দ্রের সংবাদ পাইয়া নানাপক্ষিনিনাদিত চিত্রকূটপর্ব্বতের অভিমুখে গমন করিল।

---

* वहंलिहो गौः, अभ्रंलिहो गिरिः।

† "लक्षण इत्थम्भूताख्यान भाग वीप्सासु प्रतिपर्य्यनवः।" प्रति परि अनु इति त्रीणि लक्षणादिषु अर्थेषु कर्म्मप्रवचनीयसंज्ञानि भवन्ति। लक्षणे चिह्ने यथा, वृक्षं प्रति परि अनु विद्योतते विद्युत्। इत्थम्भूताख्याने यथा, भक्तो विष्णुं प्रति &c. भागे यथा लक्ष्मीः हरिं प्रति; हरेर्भाग इत्यर्थः। वीप्सायां (pervasion) यथा वृक्षं वृक्षं प्रति &c.

दृष्ट्वोर्णुवानान् ककुभो बलीघान्
वितत्य शार्ङ्गं कवचं पिनह्य।
तस्थौ सिसंग्रामयिषुः श्रितेषुः
सौमित्रिरस्त्रिम्भ्रुवमुज्जिहानः॥ ४७॥

এই পর্ব্বতের শিখরদেশ মেঘ স্পর্শ করিয়াছিল ও সূর্য্যের পথরোধক হইয়াছিল।

Hearing the tidings of Rama from the mendicants they then proceeded towards the mount Chitrakuta, the peaks of which touched the clouds and obstructed the course of the sun and which had a large number of birds chirping (merrily).

• Q. Give the derivative meaning of पतत्त्रिन्।
Ans. पतत्रं त्रायते यत् तत् पतत्रं पक्षः, तत् अस्यास्तीति पतत्री पक्षी।
Q. What do you mean by a कर्म्मप्रवचनीय ; when is प्रति called a कर्म्मप्रवचनीय ? Ans. कर्म्म क्रियां प्रवचनीयम् प्रोक्तवत् इति कर्म्मप्रवचनीयम्। प्र-वच् धातोः अतीते कर्त्तरि अनीयर्। [प्रति &c when detatched from a verb i. e. kept alone, are कर्म्मप्रवचनीय i. e. ones that expressed action sometime ago] लक्षणादिषु अर्थेषु 'प्रति' कर्म्मप्रवचनीयं भवति। ४६।

47. Principal part :—सौमित्रिः (कर्त्तृ) सिसंग्रामयिषुः (विध) तस्थौ। Adjunct to बलीघान्—ककुभः ऊर्णुवानान्। Adj. to सौमित्रिः सिसंग्रामयिषुः, श्रितेषुः and उज्जिहानः। अस्त्रिम्भ्रुवम्—object to उज्जिहानः। Incomplete verbs—दृष्ट्वा, वितत्य, पिनह्य। बलीघान्—object to दृष्ट्वा। ऊर्णुवानान्—adj. to बलीघान्। ककुभः—object to ऊर्णुवानान्। शार्ङ्गम्—object to वितत्य। कवचम्—object to पिनह्य।

Prose order :—श्रितेषुः सौमित्रिः ककुभः ऊर्णुवानान् बलीघान् दृष्ट्वा, शार्ङ्गं वितत्य, कवचं पिनह्य सिसंग्रामयिषुः (सन्) अस्त्रिम्भ्रुवम् उज्जिहानः तस्थौ।

Substance :—दिशः परिव्याप्य गच्छतः सैन्यसमूहान् अवलोक्य लक्ष्मणः अचिन्तयत् यथा कश्चित् अस्मान् परिभवितुम् आगच्छतीति, अतः सः धनुः सज्यं कृत्वा, वर्म परिधाय, तीक्ष्णान् बाणान् आदाय अक्षिभ्रुवं संकोच्य युद्धार्थम् उद्यतः आसीत् (रामस्तु याथार्थ्यं जानन् न तथाभूत्)।

Explanation in tika form :—शितः तीक्ष्णः इषुः बाणो यस्येति तीक्ष्णशर इत्यर्थः। सुमित्राया अपत्यमिति सौमित्रिः लक्ष्मणः "बाह्वादिभ्यश्च" इतीञ् (इ)। ककुभः दिशः "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरः। ऊर्णुवानान् आच्छादयतः ऊर्णुधातोः शानच्, बलौघान् सैन्यसमूहान् "बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः" इति मेदिनी। इष्वा शार्ङ्गं शृङ्गस्य विकारम्, अण्प्रत्ययः। धनुः विततं सज्यं कृत्वा, आकर्षणेन विस्तार्य वा, तन्धातोः ल्यप्। कवचं वर्म पिनह्य बद्ध्वा "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इति अपेः अकारस्य लोपः। तथाच, भुजङ्गपिहितद्वारं पातालमधितिष्ठति" इति रघुः। सिसंग्रामयिषुः संग्रामयितुं योद्धुमिच्छुः सन्, कश्चित् अभिभवितुम् आगच्छतीति सम्भाव्य संग्रामोद्यतः सन् इत्यर्थः। अक्षिणी भ्रुवौ च अक्षिभ्रुवं। प्राण्यङ्गत्वात् समाहारद्वन्द्वः, अचतुरेत्यादिना* अच्प्रत्ययान्तो निपातितः। उज्जिहानः ऊर्ध्वं नयन् तस्थौ स्थितः। रामस्तु तत्त्वं ज्ञातवान् अतः स न तथा स्थितः इति व्यज्यते। वृत्तमुपजातिः।

Change of V.—तस्थे सिसंग्रामयिषुणा शितेषुणा सौमित्रिणा...उज्जिहानेन।

Derivations :—ऊर्णुवानान्—ऊर्णु (अदादि) शानच् द्वितीया। लट् ऊर्णौति, ऊर्णोति, ऊर्णुते। लुङ् और्णुवीत्, और्णवीत्, और्णावीत्। शार्ङ्गं—शृङ्ग-अण्। पिनह्य—अपि-नह-ल्यप्। लट् नह्यति, नह्यते। लुङ् अनात्सीत्, अनद्ध। लिट् ननाह, नेहे। सिसंग्रामयिषुः—संग्राम (चुरादिः)

---

* "अचतुर-विचतुर-सुचतुर-स्त्रीपुंस-धेन्वनडुह-ऋक्साम-वाङ्मनस-अक्षिभ्रुव-दारगव-ऊर्वष्ठीव-पदष्ठीव-नक्तन्दिव-रात्रिन्दिव-अहर्दिव-सरजस-निःश्रेयस-पुरुषायुष-द्व्यायुष-त्र्यायुष-ऋग्यजुष-जातोक्ष-महोक्ष-वृद्धोक्ष-उपशुन-गोष्ठश्वाः।" एते पञ्चविंशतिः अच्प्रत्ययान्ताः निपात्यन्ते।

शुक्लोत्तरासङ्गभृतो विनम्रान्
पादैः शनैरापततः समन्यून् ।
औहिष्ट तान् वीतविकत्थबुद्धीन्
विवल्गिषून् दाशरथिः स्ववर्ग्यान् ॥ ४८ ॥

सन्नन्तः उः । शित—शो-कर्मणि क्तः । लट् श्यति, लुङ् अशात्, अशासीत् । लिट् शशौ । उज्जिहानः—उत्-हा शानच् । लट् जिहीते (जुहोत्यादिः) जिहाते, जिहते ।

সৈন্যবৃন্দ নানাদিক্ আচ্ছন্ন করিয়া আসিতেছে দেখিয়া সুমিত্রা-নন্দন তীক্ষ্ণবাণ গ্রহণানন্তর ধনুকে জ্যা যোজনা করিয়া, কবচ পরিধান করিলেন এবং সংগ্রামার্থ প্রস্তুত হইয়া চক্ষু ও ভ্রূযুগল উৎক্ষেপ করিয়া দণ্ডায়মান রহিলেন ।

Seeing the multitudes of forces spreading in all directions, the son of Sumitra, with his sharp arrows, stretched the bow made of horn, put on the armour and stood ready for a fight with his eyes and brows raised up.

Q. Write gram. notes on पिनह्य । Ans. पिनह्य अपिनह्य इति पदद्वयं स्यात् । भागुरिमतेन अपि अव इत्येतयोः अकारलोप-विधानात् अत्र अकारस्य वैकल्पिकः लोपः । "वष्टि भागुरिः अल्लोपम् अवाप्योः उपसर्गयोः ।" Q. Expound the samas in अधिज्यम् and derive विसंयामयिषुः । Ans. See above. । ४७ ।

48. Principal part :—दाशरथिः (कर्त्ता) तान् (उद्देश्य कर्म) स्ववर्ग्यान् (विधेय कर्म) औहिष्ट । Adj,s to तान्—शुक्लोत्तरासङ्गभृतः विनम्रान्, आपततः, समन्यून्, विवल्गिषून्, वीतविकत्थबुद्धीन् and तान् । पादैः —करणे । शनैः—अव्ययम् (क्रियाविशे) ।

Prose order :—दाशरथिः शुक्लोत्तरासङ्गभृतः विनम्रान्, शनैः पादैः आपततः, समन्यून् तान् वीतविकत्थबुद्धीन् विवल्गिषून् स्ववर्ग्यान् औहिष्ट ।

Substance :—रामाभिमुखम् आगच्छतः तान् शुक्लम् उत्तरासङ्गं धारयतः

शस्त्रहीनान्, पादैः आगच्छतः, सशोकान् अतएव अनिष्टबुद्धिम् अप्रकटयतः तान् दृष्ट्वा रामः तर्कितवान् यथा एते मम आत्मीया वन्दितुमभिलषन्तः समागच्छन्तीति।

Explanation in tika form :—दशरथस्यापत्यं दाशरथिः, रामः "अत इञ्" इति इञ्। उत्तरस्मिन् देहभागे आसज्यते इति उत्तरासङ्गः, शुक्लः यः उत्तरासङ्गः उत्तरीयं "द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा। संव्यानमुत्तरीयञ्च" इत्यमरः। शुक्ले शुक्लोत्तरासङ्गो निषिद्धः। तत् बिभ्रतीति शुक्लोत्तरासङ्गभृतः तान्। सत्सूद्विषेत्यादिना क्विप्। तथा विगतं शस्त्रं येभ्यः तान् विशस्त्रान् निरायुधान्, तथा शनैः मन्दं पादैः आपततः आगच्छतः त्यक्तवाहनत्वात्, समन्यून् दीनान् सशोकान्, इति यावत्। "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः। तुल्ययोगे बहुव्रीहिः, [प्रमन्यूनिति पाठे प्रकृष्टशोकान् आगतशोकान् वा] तान् वलोघान् वीता अपगता विरुद्धबुद्धिः शत्रुबुद्धिः येषां तथाभूतान् विवन्दिषून् वन्दितुमिच्छून् स्ववर्गे भवान् स्ववर्ग्यान् आत्मीयान् ["अशब्दे यत्खौ अन्यतरस्याम्" इति यत्, अशब्दे किम् कवर्गीयः वर्णः] औहिष्ट तर्कितवान् ज्ञातवानित्यर्थः। ऊहधातोः लुङिरूपम्। वृत्तमुपजातिः।

Change of V.—......विशस्त्रा......समन्यवः औह्यन्त ते वीतविरुद्धबुद्धयः विवन्दिषवः दाशरथिना स्ववर्ग्याः।

Derivation.—आपततः—आ-पत-शतृ द्वितीया। औहिष्ट—ऊह लुङ् त। लट् ऊहते। लिट् ऊहाञ्चक्रे। विवन्दिषून्—वि वन्द-सन्नन्त उः द्वितीया। लट् वन्दते। शुक्ल—शुच्-लक्। उत्तर—उत्-तृ-अप्। तरति—लट्। अतारीत् लुङ्। आसङ्ग—आ-सञ्ज-घञ्। सजति लट्। असाङ्क्षीत् लुङ्। शस्त्र—शस्-ष्ट्रन्। शसति लट्। अशासीत् अशसीत् लुङ्। मन्यु—मन्-युच्। पाद—पद्यते गम्यते अनेन इति पदधातोः करणे घञ्। अपादि लुङ्।

রামচন্দ্র বুঝিতে পারিলেন ইহারা আপনার লোক। কারণ ইহাদের উত্তরীয় বস্ত্র শুক্ল। (লোহিত রক্ত যুদ্ধের চিহ্ন) নিকটে অস্ত্র নাই, সশোকে ধীরে ধীরে পদসঞ্চারে আগমন করিতেছে। অনিষ্ট বাসনা নাই, অধিকন্তু বন্দনার্থ প্রয়াসী।

समूलकाषं चकषुरुदन्तो
रामान्तिकं दुःखितमन्युवेगाः ।
आवेदयन्तः क्षितिपालमुच्चैः-
कारं मृतं रामवियोगशोकात् ॥ ४८ ॥

Rama, the son of Dasaratha recognized them to be of his own clan s they wore white overcovering, were weaponless, approached lowly on their feet with grieved hearts, showed no hostile motives nd were desirous of doing homage.

Q. Show the fitness of the adjectives to स-र्थान् । Ans. एतैः विशेषणैः न ते युद्धाभिलाषिणः इति सूचितम् । तथाहि यामे शुक्लवस्त्रोत्तरासङ्गी निविडः । शस्त्रहीनता शोकसम्भ्रमता शनैः पादे-नागमनञ्च संग्रामात् अन्यथात्वम् प्रकटयति । Q. Decline पाद । Ans. पादः पादौ पादाः । पादम् पादौ पादान्, पदः । पादेन पदा पादाभ्यां द्भ्याम् &c । ४८ ।

49. Principal part :—(ते) रामान्तिकं (कर्म) समूलकाषं (व्यम्) चकषुः । Adv. to ते—रुदन्तः, दुःखितमन्युवेगाः and आवेदयन्तः । Object to आवेदयन्तः—क्षितिपालम् । मृतम्—Adj. to क्षितिपालम् । उच्चैःकारम्—adverb to आवेदयन्तः । रामवियोगशोकात्—हेतौ ।

Prose order :—दुःखितमन्युवेगाः रुदन्तः ते रामवियोगशोकात् मृतं क्षितिपालं उच्चैःकारम् आवेदयन्तः रामान्तिकं समूलकाषं चकषुः ।

Substance :—अथ भरतानुगाः पौराः राममासाद्य शोकात् दशरथम् उच्चैः आघोषयन्तः धरायां पतिताः तत्पुरोभूमिम् देहलुण्ठनेन पिष्टवन्तः ।

Explanation in tika form :—दुःखितः विरुद्धः मन्युवेगः शोक-प्रसरो येषां तथाभूताः ["मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः, दैन्यम्=शोकः] अतएव रुदन्तः विलपन्तः ते जनाः रामवियोगशोकात् रामविरहदुःखाद्धेतोः



मृतम् उपरतं क्षितिपालं नृपतिम् उच्चैःकारम् उच्चैः कृत्वा आवेदयन्तः कथयन्तः "अव्ययेऽयथाभिप्रेताख्याने* कृञः क्त्वाणमुलौ" इति कृञो णमुल्, यथा कारं प्रियं क्षितिपालम् उच्चैः यथा स्यात् तथा आवेदयन्तः। रामवियोगे प्राणवियोगकारितेनैव विपन्नम्। रामान्तिकं रामसमीपप्रदेशं समूलकाषं समूलं कषित्वा ; कष्-धातोः णमुल्। अकषुः पिष्टवन्तः। मूलेन सह समूलं। "निमूलसमूलयोः कषः"† इति णमुल्। "कषादिषु यथाविध्यनुप्रयोगः"। णमुलन्तस्यात्र पृथगर्थाभावः, तेन समूलकाषं अकषुः समूलं अकषुरित्यर्थः। [अत्र प्रकरणे पूर्वकाल इति न सम्बध्यते इति भट्टोजिदीक्षितः] यद्वा भूमौ शरीराघातात् समूलस्य साधोभागस्य रामसमीपदेशस्य काषः पेषणं यस्मात् इति क्रियाविशेषणम्। अन्ये, समूलं भूमेरधोभागमपि कषित्वा पिष्ट्वा पुनः पिष्टवन्तः इति व्याख्याय णमुलन्तस्य पूर्वकालत्वमाहुः। रामान्तिकं प्राप्ता इति वा अन्वयः। वृत्तमुपजातिः।

Change of V.—अकषि वदद्भिः, बृंहितमन्युवेगैः, आवेदयद्भिः।

Derivation.—समूलकाषं—समूल-कष-णमुल्। अकषुः—कष लिट् उस्। लट् कषति। लुङ् अकाषीत्, अकषीत्। वदन्तः—वद-शतृ प्रथमा। लट् वदति। लुङ् अवदत्, अवादीत्। बृंहित—बृंह-क्तः। आवेदयन्तः—आ-विद-णिच्-शतृ। लट् आवेदयति। उच्चैःकारं—उच्चैः—कृ-णमुल्।

তাহারা বর্দ্ধিত শোক বেগে আকুল হইয়া ক্রন্দন করিতে করিতে, মহারাজ দশরথ রামবিয়োগশোকে প্রাণ ত্যাগ করিয়াছেন এই সংবাদ উচ্চৈঃস্বরে ঘোষণা করিয়া, রামসমীপস্থ ভূমিতে লুণ্ঠিত হইয়া তাহা সমূলে বিঘট্টিত করিতে লাগিল।

---

* अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य च नीचैः कथनम्। यथा उच्चैः कारम् उच्चैःकृत्य उच्चैः कृत्वा अप्रियम् आचष्टे। नीचैःकारम् &c. प्रियम् ब्रूते।

† निमूलः समूल इत्येताभ्यां कष्धातोः णमुल् स्यात्। "कषादिषु यथाविध्यनुप्रयोगः।" कषादिषु मध्ये यस्मात् णमुल् उक्तः स एव अनुप्रयोक्तव्यः। The verb after which णमुल् takes place, should be repeated.

चिरं रुदित्वा करुणं सशब्दं
गोत्राभिधायं सरितं समेत्य ।
मध्येजलाद्राघवलक्ष्मणाभ्यां
प्रत्तं जलं ह्यञ्जलमन्तिकेऽपाम् ॥ ५० ॥

Owing to the increased flow of grief they with cries dug up the round near Rama to the very foundation as it were, declaring aloud ıe king to have perished owing to the pangs caused by Ram's ɜparation.

Q. Explain the euphonic combination in चक्षूरुदन्तः । Ans. चक्षुः रुदन्तः चक्षूरुदन्तः । रकारे परे विसर्गजातस्य रकारस्य लोपः, पूर्वस्वरस्य च दीर्घः । Q. Give the other orms of उच्चैःकारम् । Ans. उच्चैःकृत्य and उच्चैःकृत्वा । Q. ːxplain ऋंहितमन्युवेगाः । Ans. रामदर्शनात् तेषां शोकः विवृद्ध इव ासीत् । "स्वजनस्य हि दुःखमग्रतः विवृतद्वारमिवोपजायते ।" कुमारः । Q. ıf what part of प्रातिपदिक is समूलकाषम् ? Ans. अव्ययतत् । ४९ ।

50. Principal sentence :—राघवलक्ष्मणाभ्यां (अनुक्त कर्तृ) मध्येलात् (ल्यब्लोपे पञ्चमी) जलं (उक्त कर्म) प्रत्तम् । Incomplete ɜrb—रुदित्वा । चिरम् (अत्यन्तसंयोगे द्वितीया, अव्ययं वा) । Adv. to दित्वा and समेत्य—करुणं and सशब्दम् । गोत्राभिधायम् (णमुल्) । सरितम् -object to समेत्य । अपाम्—सम्ब । अन्तिके—अधिकरणे ।

Prose order :—राघवलक्ष्मणाभ्यां चिरं करुणं सशब्दं रुदित्वा, सरितं मेत्य, मध्येजलात् अपाम् अन्तिके ह्यञ्जलं जलं गोत्राभिधायं प्रत्तम् ।

Substance :—रामो लक्ष्मणश्च बहुधा करुणम् उच्चैः रुदित्वा नदीासाद्य, जलमध्यमवगाह्य उच्चार्य च पितुर्नाम जलसमीपे एव अञ्जलिद्वयपरिमितं लिलं प्रददौ ।

Explanation in tika form :—राघवलक्ष्मणाभ्यां रामलक्ष्मणाभ्यां चिरं महान्तं कालम्, अत्यन्तसंयोगे द्वितीया । करुणं सशोकं यथास्यात् तथा रुदित्वा क्रन्दित्वा सरितं नदीं, समेत्य सम्भूय गत्वा, जलस्य मध्यम् मध्येजलं तस्मात्, तत् आसाद्य तस्मिन् अवतीर्य्य वा । "ल्यब्लोपे कर्म्मण्यधिकरणे च" इति पञ्चमी । "पारे मध्ये षष्ठ्या वा"* इति अव्ययीभावः । यद्वा मध्ये इति असमस्तं पदं, मध्ये अवतीर्य्य जलादाकृष्य इत्यर्थः । अपाम् अन्तिके जलसमीपे तटे द्व्यञ्जलं अञ्जलिद्वयपरिच्छिन्नं जलं ताभ्यां प्रत्येकमञ्जलिदानात् । द्वौ अञ्जली परिमाणम् अस्य इति विग्रहे "द्वित्रिभ्यामञ्जलेः"† इति तद्धितार्थे द्विगौ समासान्तः टच्प्रत्ययः । गोत्राभिधायं गोत्रं नाम अभिधाय "द्वितीयायाञ्च" इति णमुल् । यद्वा गोत्रस्य नाम्नः अभिधायः अभिधानं यत्र तत् यथा स्यात् तथा प्रत्तं दत्तम् । "अच उपसर्गात्तः"‡ पक्षे प्रदत्तमिति । मध्ये समेत्य जलादुत्थाय जलं प्रत्तमिति केचित् । केचित्तु, आत्मीयैर्न ताभ्यां नीताभ्यां रामलक्ष्मणाभ्यां अपामन्तिके चिरं रुदित्वा तदनु मध्ये मध्यभागसमीपे सरितं समेत्य नाभिपर्य्यन्तं जलं गत्वा जलं प्रत्तम् । कीदृशं जलं जलात् § जलस्य जड़स्य अदनीयं । अदेः भावे क्विप् । लोकान्तरं प्राप्तस्यापि दशरथस्य जड़त्वं त्यक्तरामत्वात् मृतत्वाद्वा । इन्द्रवज्रोपजातिः ।

Change of V.—राघवलक्ष्मणौ जलं प्रदत्तवन्तौ ।

Derivation.—अभिधायम्—अभि-धा-णमुल् । यद्वा, अभि-धा-घञ् । प्रत्त—प्र दा-कर्म्मणि क्तः । लुङ् अदात्, अदित । सरित्—सृ-इतिः ।

---

* "पारे मध्ये षष्ठ्या वा ।" पार and मध्य are compounded with the words of the 6th case ending, in an अव्ययीभावसमास optionally and the words पार and मध्य end in 'ए' । So the other form is जलमध्यात् in which there is षष्ठीसमास ।

† टच् (अ) takes place after अञ्जलि preceded by द्वि or त्रि in a द्विगु compound.

‡ अजन्तादुपसर्गात् परस्य दा इत्यस्य धातोः अचः तः स्यात् वा ।

§ जलात् adjective to जलम् । जल-अद क्विप् ।

अरण्ययाने सुकरे पिता मां
प्रायुङ्क्त राज्ये बत दुष्करे त्वाम्।
मागा: शुचं वीर भरं वहासु-
माभाषि रामेण वच: कनीयान्॥ ५१।

রাম ও লক্ষ্মণ বহুক্ষণ করুণ ও উচ্চৈঃ স্বরে ক্রন্দন করিলেন, পরে নদীতে গমন করিয়া মধ্য জল হইতে দুইজনে এক এক অঞ্জলি জল লইয়া পিতার নাম উচ্চারণ করিয়া জলাঞ্জলিকে নিক্ষেপ করিলেন।

Water two palmsful was given from the midst of water near it as oblation, by Rama and Laksmana, taking the name of their father, after they had cried aloud piteously long, and then reached the river.

Q. Why does राघव signify here राम and not लक्ष्मण? Ans. रघोर्गोत्रापत्यं पुमान् इति राघव:। न पतति कुलम् अस्मात् इति अपत्यम्। ज्येष्ठपुत्रेणैव वंशस्य संस्थित्या रामे एव रघोः गोत्रापत्यत्वम्। अत: राघव इति पदेन ज्येष्ठो राम: एव उद्दिष्ट:। वस्तुतस्तु "सामान्यशब्दस्य क्वचित् विशेषपरत्वम्।" इति सामान्यराघवशब्देन विशेषो राम एव गमित: लक्ष्मणसाहचर्य्यात्। तथाहि, रामलक्ष्मणौ भरतशत्रुघ्नौ द्वन्द्वं बभूवतु:। इति रघु:। Cf. "सखीतयो: राघवयोरधीयन्"। १। १८। Q. Explain the samas in मध्येजलात्। What other samas is possible here?. Can it be मध्येजलेन? Ans. जलस्य मध्यम् इति मध्येजलम्, अव्ययीभाव:, तस्मात् इति मध्येजलात्। "अमन्तु अपञ्चम्या:" इति पञ्चम्यां न अम्। अत: मध्येजलेन इत्यत्र मध्येजलम् इत्येवं स्यात्, पञ्चम्या अभावात्। अव्ययीभाव वैकल्प्यात् षष्ठीतत्पुरुषश्च स्यात्, यथा जलमध्यात्। षष्ठीविभाषया 'जलस्य मध्यात्' इत्यपि भवति। Q. Expound the samas in सरज्जलम्। Ans. See above. । ५०।

51. Consisting of 6 sentences :—(1) रामेण (अनुक्त कर्तृ) कनीयान् (गौण कर्म्म) वच: (मुख्य कर्म्म) आभाषि। (2) पिता (कर्तृ)

मां (कर्म्म) अरण्ययाने (अधि) प्रायुङ्क्त । सुकरे—Adj. to अरण्ययाने । (3) पिता त्वां राज्ये प्रायुङ्क्त । दुष्करे—Adj. to राज्ये । (4) मृधं (कर्म्म) त्वम् (उक्तं कर्त्तृ) मागाः । (5) हे वीर भरं (कर्म्म) वह (त्वम्) । अह्रम्—Adj. to भरम् ।

Prose order :—पिता मां सुकरे अरण्ययाने प्रायुङ्क्त यत । त्वां दुष्करे राज्ये (प्रायुङ्क्त) । हे वीर मृधं मा गाः । अह्रं भरं वह (त्वम्) इति वचः रामेण कनीयान् आभाषि ।

Substance :—रामः कनीयांसं भरतमेवमवोचत् । यथा पिता मां सुसाध्यम् अरण्यगमनरूपं कार्य्यं साधयितुम् आदिदेश । त्वान्तु राज्यरक्षणरूपं दुःसाध्यं कार्य्यं साधयितुम् । दुर्वहभारवहनोचितं वीरं त्वां शोकः न पराभवितुमर्हति । धारय तावत् भारमह्रम् इति ।

Explanation in tika form :—पिता मां सुकरे सुखसाध्ये "ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्"* इति खल्प्रत्ययः । अरण्याय** यानं अरण्ययानं चतुर्थीसमासः । वनगमनं तस्मिन् प्रायुङ्क्त नियुक्तवान् । युजेः रुधादिगणीयस्य लङि रूपम् । "प्रोपाभ्यां युजेरयज्ञपात्रेषु"† इति आत्मनेपदम् । यत इति सिद्दे, त्वां दुष्करे आयासभूयिष्ठे प्रजारक्षणत्वात्, राज्ये राजकर्म्मणि, पुरोहितादित्वात् यत् । प्रायुङ्क्त इति शेषः । एवञ्च सति हे वीर मृधं शोकं मदविवासनादिति शेषः ।

---

* The affix खल् takes place after roots preceded by ईषत् दुर् and सु, in the sense of ease or difficulty.

** "गत्यर्थकर्म्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" गत्यर्थानां धातूनाम्, अध्वभिन्ने कर्म्मणि द्वितीया चतुर्थी वा स्यात्, यदि चेष्टा गम्यते । (If there be some attempts actual and not imaginary, in the act of going, the object takes 4th case as well.) इति चतुर्थी ।

† The root युज् when preceded by प्र and उप is used in आत्मनेपद, if it's object be other than the vessels of sacrifice. So 'यज्ञपात्राणि प्रयुनक्ति' and not प्रयुङ्क्ते ।

जाती स्मृती हृष्टमतेषु धीमा
त्वं पैतृकं चेद्वचनं न कुर्याः ।

मागाः माकार्षीः, पित्रादेश इति मत्वा न शोचितुमर्हसि इति भावः। अत्र वीरपदेन 'न शोकः त्वाम् अभिभवितुम् अर्हति' इति व्यज्यते। अमुं भरं पितृनियोगरूपं वह धारय, विधौ लोट्। "भरोऽतिशयभारयोः" इति कोषः। इत्येवं वचः रामेण कनीयान् अनुजो भ्राता भरतः "गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्" इति वचनात् गौणे कर्मणि प्रथमा। अल्पशब्दात् ईयसुनि "युवाल्पयोः कन् अन्यतरस्याम्" इति अल्पशब्दस्य कनादेशः। आभाषि कथितः। कर्मणि लुङ्। ब्रुवीत्यर्थग्रहणात् द्विकर्मकता। वृत्तमुपजातिः।

Change of voice :—रामः कनीयांसं वचः आभाषिष्ट।

Derivation.—सुकरे — सु-कृ-कर्मणि खल्। प्रायुङ्क्त—प्र-युज-(रुधादि) लङ् त। लट् प्रयुङ्क्ते। राज्ये—राजन्-यत्। दुष्करे—दुः-कृ-कर्मणि खल्। गाः—इन्-लुङ् स, माङ्योगे अडागमनिषेधः। भरं—भृ-अप्। वह—वह-लोट्, विधौ लोट्। लुङ् अवाक्षीत्, अवोढ़। आभाषि—भाष-लुङ् त। कनीयान्—अल्प-ईयसुन्।

राम কনিষ্ঠকে বলিলেন। পিতা আমাকে সহজ সাধ্য বনগমন ব্যাপারে নিযুক্ত করিয়াছেন, কিন্তু তোমাকে দুঃসাধ্য রাজকার্য্যে রাখিয়াছেন। হে বীর শোক করিও না, উক্ত ভার বহন কর।

My father has directed me to go to the forest, an office very easy to perform, appointing thee to the hard affairs of government. Do not give thyself up to grief, but bear that burden, valiant as thou art. This speech was the younger one addressed by Rama.

Q. Explain the propriety of वीर। Ans. See above.

Q. Write gram. notes on मा गाः। Ans. मा गाः, माङ्योगात् अगाः इत्यत्र न अकारस्थितिः। "न माङ्योगे"। अत्र च लुङ् विधेर्लिङि प्रयुक्तम्। 'माङि लुङ्'। [माङ्योगे लुङ् सर्व्वकाले भवति।] ५१।

विच्छिद्यमानेऽपि कुले परस्य
पुंसः कथं स्यादिह पुत्रकाम्या ॥ ५२ ॥

52. Principal sentence:—इह (व्यम्, अधि) परस्य (विश) पुंसः (सम्ब) कथं (व्यम्) पुत्रकाम्या (कर्तृ) स्यात्। Sub. sentence.—त्वं (कर्तृ) चेत् (व्यम्) वचनं (कर्म) न कुर्य्याः। Adj. to त्वम्—कृती श्रुती and धीमान्। कुले—अधिकरणे। Adj. to कुले—विच्छिद्यमाने।

Prose order:—वृद्धमतेषु कृती श्रुती धीमान् त्वं चेत् पैतृकं वचनं न कुर्य्याः, कुले विच्छिद्यमानेऽपि इह परस्य पुंसः पुत्रकाम्या कथं स्यात्।

Substance:—येन त्वया पण्डितमतानि श्रुतानि अनुष्ठितानि च धीमता तेन त्वया चेत् पितृवचनं न क्रियते, तदा वंशलोपम् अवालोकयन्तोऽपि "बहवस्ते करिष्यन्ति पुत्रेभ्यः पुत्रिणः स्पृहाम्।" इति।

Explanation in tika form:—वृद्धानां पण्डितानां "वृद्धकृती पण्डितेऽपि" इत्यमरः। मतानि वृद्धमतानि। वृद्धमतानि कृतानि अनुष्ठितानि अनेनेति वृद्धमतेषु कृती। तथा, वृद्धमतानि श्रुतानि अनेन इति वृद्धमतेषु श्रुती। "इष्टादिभ्यश्च" इति कर्त्तरि इनिः। "क्तस्येन्विषयस्य कर्म्मण्युपसंख्यानम्" इति वचनात् वृद्धमतेषु इत्यत्र कर्म्मणि सप्तमी*। यद्वा कृतं करणं श्रुतं श्रवणं, भावे क्तः। ततः अस्त्यर्थे इन्। धीमान् बुद्धिमान्। प्रशंसायां मतुप्। त्वं चेत् यदि पैतृकं पितुरागतं "पितुर्यच्च" इति चकारात् ठञ्। वचनं न कुर्य्याः न करिष्यसि तदा कुले वंशे "कुलं जनपदे गोत्रे सजातीयगणेऽपि च। भवने च

* "इष्टादिभ्यश्च"। इष्टमनेन इति इष्टी। कृतम् अनेन इति कृती। अधीतमनेन इति अधीती। गृहीतमनेन इति गृहीती इत्यादि। इष्टादयः यथा इष्ट, पूर्त, उपासादित, निगदित, अर्चित, गणित, गृहीत, आम्नात, श्रुत, कृत, अधीत प्रभृतयः त्रिंशत् क्तान्तशब्दाः। "क्तस्य इन्विषयस्य कर्म्मणि उपसंख्यानम्"। Words such as इष्ट, अधीत &c with the affix इन् have their objects in the 7th case. Thus instead of तेन व्याकरणम् अधीतम् there will be स व्याकरणे अधीती।

अस्माकमुक्तं बहुमन्यसे चेत्
यदीप्सिषे त्वं न मयि स्थिते च।

तनौ ह्रीवम्" इति कोषः। विच्छिद्यमाने नश्यमानेऽपि। अपिशब्दो भिन्नक्रमः। भावे सप्तमी। इह अस्मिन् लोके परस्य उत्तरकालीनस्य अन्यस्य वा पुंसः पुत्रस्य पुत्रकाम्या आत्मनः पुत्रेच्छा [पुत्रशब्दात् "काम्यच" इति काम्यच्, तदन्तात् अप्रत्ययः, ततष्टाप्] कथं स्यात्। भवन्तं दृष्ट्वा अधिमस्य लोकस्य वचनाबरणेन पुत्रमात्रेऽपि अश्रद्धाप्रसङ्गात् इति। उपजातिः।

Change of V.—कृतिना श्रुतिना धीमता त्वया क्रियेत। पुत्रकाम्यया भूयेत।

Derivation.—कृती—(कृ भावे क्तः) कृतम् इनिः। श्रुती—श्रुतम्-इनिः, अथवा अस्त्यर्थे इनिः। धीमान्—धी-प्रशंसायां मतुप्। पैतृकं—पितृ-ठञ्। विच्छिद्यमाने—वि-छिद्-कर्मकर्त्तरि शानच्। लट् छिनत्ति, छिन्ते। लुङ् अच्छिदत्, अच्छैत्सीत्, अच्छित्त। पुत्रकाम्या—पुत्रकाम्य नामधातुः-अः-टाप्।

তুমি প্রাচীন শাস্ত্রকার দিগের উপদেশ কার্য্যে পরিণত করিয়াছ ও পাঠ করিয়াছ। অধিকন্তু তুমি বুদ্ধিমান্। তুমি যদি পিতৃ বাক্য পালন না কর, তবে বংশ লোপ হইতেছে দেখিয়াও অপরের পুত্রবাসনা কেন হইবে?

If you, who have practised and learned the doctrines of the ancients, and are wise, do not obey your father's directions, how there can be then any desire for a son, in any other person even on the family race becoming extinct.

Q. Write gram. notes on श्रुतवेत्तु कृती। Ans. See above, Q. Give the meaning of कुर्य्याः। Ans. धातूनामनेकार्थत्वात् कृधातोरत्र पालनार्थत्वम्। Q. Decline पर in the first case. Ans. परः परौ परे, पुंसि। परं परे पराणि नपुंसके। परा परे पराः स्त्रियाम्। उत्कृष्टार्थस्य 'पर'शब्दस्य तु न सर्व्वनामता। ६२।

जिह्रेष्यतिष्ठन् यदि तातवाक्ये
जहीहि शङ्कां व्रज शाधि पृथ्वीम् ॥ ५३ ॥

53. Principal sentence— ('त्वम्' कर्तृ उक्तम्) शङ्कां (कर्म) जहीहि, व्रज, पृथ्वीं (कर्म) शाधि। Other sentences (1) अस्माकम् (सम्ब) उक्तं (कर्म) चेत् (अ) बहुमन्यसे, (2) यदि (अ) मयि (भावे सप्तमी) स्थिते च त्वं (कर्तृ) ईशिषे। and (3) यदि तातवाक्ये (अधिकरणे) अतिष्ठन् (त्वम् इत्यस्य विण) जिह्रेषि।

Prose order :—अस्माकम् उक्तं चेत् बहु मन्यसे, यदि च त्वं मयि स्थिते न ईशिषे, यदि तातवाक्ये अतिष्ठन् जिह्रेषि (तदा) शङ्कां जहीहि, व्रज, पृथ्वीं शाधि।

Substance :—यदि मद्वचनम् पालयितुम् कृतार्थतां मन्यसे। मयि वर्त्तमाने यदि प्रभुवत् स्थातुं न इच्छसि (अर्थात् यदि मत्समीपे अनुगत इव तिष्ठसि) यदि वा पितृवाक्यम् अवमत्य लज्जां भजसे, तत् निःशङ्को गच्छ, कुरु च राज्यम्।

Explanation in tika form :—चेत् यदि अस्माकं अस्मत्सम्बन्धि, गौरवे बहुवचनम्, अथवा "अस्मदो द्वयोश्च" इति बहुवचनम्। न लोकेत्यादिना षष्ठी निषेधात् "शेषे षष्ठी" इति षष्ठी। केचित् भावार्थक्ते प्रयुज्यमाने वा षष्ठी इष्यते। उक्तं वचनम्। भावे क्तः। बहुमन्यसे आद्रियसे, यदि अग्रजस्य मम वचने तव श्रद्धा वर्त्तते इति भावः। यदि च मयि स्थिते वर्त्तमाने न ईशिषे न प्रभुत्वं करोषि यदि मदाज्ञाकारी भवसि इत्यर्थः। "यदि तातवाक्ये पितृनियोगे अतिष्ठन् पितृवचनम् अकुर्व्वाण इत्यर्थः। "लक्षण-हेत्वोः क्रियायाः" *

* क्रियायाः परिचायके हेतौ च अर्थे वर्त्तमानात् धातोः लट् शतृशानचौ स्तः। शतृ and शानच् take place in the present tense after the roots expressive of some action or cause or effect. (हेतुः = कारणम्, फलञ्च)। यथा शयाना भुञ्जते यवनाः। अर्जयन् वसति। हरिं पश्यन् मुच्यते।

बृहोरसां राज्यधुरां प्रवोढुं,
कथं कनीयानहमुत्सहेय ।

इति भरतप्रत्ययः । जिह्रेषि लज्जसे । गुरुवचनमनतिक्रमणीयं विशेषतः पितृवाक्यम् इति मत्वा तदकरणे यदि लज्जसे इति सरलार्थः । तर्हि शङ्कां भयभी॰ भयं जहीहि त्यज, व्रज गच्छ अयोध्यामिति शेषः । पृथ्वीं पृथिवीं शाधि पालय, शास् धातोः लोटि हि-विभक्तिः । वृत्तमुपजातिः ।

Change of Voice.—बहुमन्यते, त्वया ईश्यते मतिष्ठता ह्रीयते । शङ्का हीयताम्, व्रज्यताम्, शिष्यतां पृथ्वी ।

Derivation :—उक्तम्—वच् भावे क्तः । ईशिषे—ईश-लट् से । लट्-ईष्टे । जिह्रेषि—ह्री लट् सि । लट् जिह्रेति, जिह्रीतः जिह्रियति । लिट् जिह्रयाञ्चकार &c जिह्राय । जहीहि—हा-लोट् हि । पक्षे जहिहि, जहाहि । लट् जहाति, जहितः जहीतः, जहति । लुङ् अहासीत् । शाधि—शास-लोट् हि । लट्-शास्ति, शिष्टः शासति । लुङ्-अशिषत् । लङ्-अशात् ।

যদি আমার কথা মান্য কর, যদি আমি থাকিতে তুমি আপনি আপনার প্রভু না হও, যদি পিতার বাক্য পালন না করিতে পারিলে লজ্জিত হও, তবে শঙ্কা ত্যাগ কর, ফিরিয়া যাও, রাজ্য শাসন কর ।

If you esteem my words highly, if you do not rule yourself while I live, if again you feel ashamed not standing by the father's injunctions, then give up apprehensions, go and rule over the earth.

Q. Explain यदीशिषे त्वं न मयि स्थिते च । Ans. See above. Q. give the other forms of जहीहि । Ans. See above. Q. Account for षष्ठी in अस्माकम् । Ans. अस्माकम् उक्तम्, इति उक्तमित्यत्र 'निष्ठायोगात्' " न लोकाव्ययनिष्ठा खलर्थ तृनाम्" इति षष्ठीप्रतिषेधः । अतः शेषे षष्ठी इति षष्ठी । Q. Account for the plural form of अस्माकम् । Ans. See above.

54. Principal sentences—(1)भरतः (कर्ता) अपि (अव्य) रामं (गौणकर्म) अर्थ्यं (वचनमिति अनुक्तमुख्यकर्मणः विशेषणम्) आह । (2)

मा मां प्रयुङ्क्थाः कुलकीर्त्तिलोपे
प्राह स्म रामं भरतोऽपि धर्म्यम् ॥ ५४ ॥

Another sentence—अहं (कर्त्तृ) राज्यधुरां (प्रवोढुमित्यस्य कर्म्म) प्रवोढुम् (Infinitive mood) कथम् (व्यं) उत्सहेय। उज्ज्वोरसाम्= Adj. to राज्यधुराम्। कनीयान्=Adj. to अहम्। (3) The third sentence—त्वम् (उक्तं कर्त्तृ) कुलकीर्त्तिलोपे (विषये ७मी) मां (कर्म्म) मा (व्यम्) प्रयुङ्क्थाः।

Prose order:—कनीयान् अहं उज्ज्वोरसां राज्यधुरां प्रवोढुं कथम् उत्सहेय, मां कुलकीर्त्तिलोपे मा प्रयुङ्क्थाः (इति) धर्म्यं (वचः) भरतः अपि रामं प्राह स्म।

Substance.—यस्य राज्यस्य भारं वोढुं ज्येष्ठ औरसश्च पुत्रः विद्यते, तत् पालयितुं कथमहं कनिष्ठः शक्नुयाम्? न कदाचित् कनिष्ठेन कोशलराज्यं पालितम्, अतः मां तत्र नियुज्य मा कुलकीर्त्तिं नाशय। इत्थं धर्म्मानुगतं वचनं भरतोऽपि कथयामास रामम्।

Explanation in tika form:— कनीयान् कनिष्ठः अहं [अल्पशब्दादीयसुनि "युवाल्पयोः कन् अन्यतरस्याम्" इति कनादेशः] उरसा निर्म्मितः औरसः सवर्णायामूढायां स्वस्माज्जातः पुत्रः, "स्वजाते त्वौरसोरस्यौ" इत्यमरः। "उरसोऽण् च" इत्यण्। उज्ज्वः ज्येष्ठः औरसः पुत्रो यस्यां तां राज्यस्य धूः भारः राज्यधुरा "धूः स्यात् भारचिन्तयोः" इति कोषः। "ऋक् पुरब्धूः पथा मानक्षे" "इति समासान्तः अः प्रत्ययः। "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति स्त्रीत्वम्।" यद्वा राज्यस्य सप्ताङ्गस्य धूः धात्री प्रकृतिरिति विग्रहः। तां प्रवोढुं कथमुत्सहेय उत्साहं करिष्यामि। अतः कुलस्य रघुवंशस्य कीर्त्तिः यशः तस्याः लोपे नाशे पूर्व्वैरनाचरितत्वात् मां मा प्रयुङ्क्थाः न नियोजय। "माङि लुङ्" इति भविष्यति लुङ्। इति धर्म्यं धर्म्मादनपेतं वचः "धर्म्मपथ्यर्थन्यायादनपेते" इति यत्। भरतोऽपि भरतश्च, अपि शब्दः समुच्चये। रामं "अकथितञ्च" इति गौणे कर्म्मणि द्वितीया। प्राह स्म उक्तवान्।

"दुह्याच् पच् दण्ड् रुधि प्रच्छि चि ब्रू शासु जि मथ्य मुषाम्।
कर्म्मयुक् स्यादकथितन्तथा स्यान्नीहृकृष्वहाम्॥"

इति ब्रू धौ द्विकर्म्मकता। वृत्तमुपजातिः।

Change of V.—प्रोच्यते स्म रामः भरतेन धर्म्म्यम्।

Derivation.—औरस—उरस्-अण्। कनीयान्—अल्प-ईयसुन्। उत्सहेय—उत्-सह-लिङ् ईय। लट् सहते, लुङ् असहिष्ट, लुट्- सहिता, सोढा। प्रयुङ्क्थाः—प्र-युज लुङ् थास्, मा योगे अडागमनिषेधः। लट् प्रयुङ्क्ते। लोपः—लुप्-घञ्। धर्म्म्यम्- धर्म्म-यत्। प्रवोढुम—प्र-वह-तुम्।

যে রাজ্যভার বহন করিতে জ্যেষ্ঠ ঔরস পুত্র বিদ্যমান আছে আমি কনিষ্ঠ হইয়া তাহা বহন করিতে কিরূপে সাহস করিব। আপনি কুলকীর্ত্তিলোপে আমাকে নিযুক্ত করিবেন না। ভরত রামচন্দ্রকে এই ধর্ম্মানুগত বাক্য বলিলেন।

Younger as I am, how can I bear the burden of the government proper to the eldest legitimate son. You will not appoint me to the ruining of family reputation. These words consistent with duties said Bharata to Rama.

Q. Give the other form of कनीयान्। Ans. "युवाल्पयोः कन् अन्यतरस्याम्" इति वैकल्प्यविधानात् पक्षे यवीयान् अल्पीयान्। इष्ठ-प्रत्यये च कनिष्ठ, यविष्ठ, अल्पिष्ठ इत्यादयोऽपि स्युः। Q. Account for आ in राज्यधुरा। Ans. राज्यस्य धूः इति षष्ठीसमासे "ऋक् पुर् अप् धुर् पथाम् अ अनक्षे" इति अः स्यात्, अर्थात् राज्यधुर इति अकारान्तः शब्दः स्यात्। किन्तु धुर् शब्दः स्त्रीलिङ्गः, तत्पुरुषे च न शेषपदे लिङ्गपरिवर्त्तनम्, अकारान्तश्च शब्दः स्त्रियाम् आकारान्तः स्यात्, अतः राज्यधुरा इत्येवं आकारान्ती भवति। Q. Parse धर्म्म्यम्। Ans. वचनमिति ऊह्य कर्म्मणः विशेषणम्। Q. Give the different applications of अपि। Ans. "गर्हासमुच्चय प्रश्न शङ्का सम्भावनास्वपि"। समुच्चय=And. Q. Write gram. note on प्रयुङ्क्थाः। Ans. "माङि लुङ्"

ऊर्ज्जस्वलं हस्तितुरङ्गमेत-
दमूनि रत्नानि च राजभाञ्जि ।
राजन्यकं चैतदहं क्षितीन्द्र-
स्त्वयि स्थिते स्यामिति भ्रान्तमेतत् ॥ ५५ ॥

माङ् योगे लुङ् सर्व्वकाले भवति, इति भविष्यति लुङ्। "न माङ्योगे" माङ्योगे लुङादिषु न अड़ागमः स्यात्, इति अड़ागमप्रतिषेधः । ५४ ।

55. Principal sentence :—अहं (कर्त्तृ) क्षितीन्द्रः (विधेय) स्याम् ('अहम्' इत्यस्य क्रियापदम्) इति (अयं) एतत् (कर्त्तृ, 'भवतु' क्रियापदम् ऊह्यम्) भ्रान्तं (एतत् इत्यस्य विशेषणम्) भवतु (ऊह्यम्)। त्वयि भावे सप्तमी। स्थिते Adj. to त्वयि। Other sentences (1) हस्तितुरङ्गम् (तव 'अस्ति' इति क्रियापदस्य कर्त्तृपदम्)। ऊर्ज्जस्वलम् and एतत् = Adj. to हस्तितुरङ्गम्। (2) रत्नानि (सन्ति इति क्रियापदस्य कर्त्तृपदम्)। अमूनि and राजभाञ्जि = Adj. to रत्नानि। (3) राजन्यकम् (अस्ति इति ऊह्यक्रियापदस्य कर्त्तृपदम्)। एतत् Adj. to राजन्यकम्।

Prose order :—एतत् ऊर्ज्जस्वलं हस्तितुरङ्गम्, अमूनि राजभाञ्जि रत्नानि च एतत् च राजन्यकम् (तवैव-)। त्वयि स्थिते अहं क्षितीन्द्रः स्याम् इति एतत् भ्रान्तम्।

Substance :—बलवत् यदेतत् हस्त्यादिकम्, यानि च कोशस्थानि रत्नानि राजोचितानि, यदेतच्च पुरोवर्त्ति क्षत्रियकुलम्, तत् सर्व्वं तवैव वर्त्तते आज्ञावचनात्। त्वयि वर्त्तमाने अहं राजा इत्येतत् न कथमपि घटताम्।

Explanation in tika form—एतत् समीपवर्त्ति ऊर्ज्जस्वलं बलवत् ["ज्योत्स्नातमिस्रा शृङ्गिणोर्ज्जस्विन्नूर्ज्जस्वल गोमिन् मलिन मलीमसाः" इति मत्वर्थे वलच् निपातः] हस्तिनो गजाः तुरङ्गाः अश्वाश्च तेषां समाहारः हस्ति-तुरङ्गं सेनाङ्गत्वादेकवद्भावः। अमूनि अपुरोवर्त्तीनि, नगरीस्थितानि इत्यर्थः। राजानं भजन्ते इति राजभाञ्जि राजयोग्यानि रत्नानि च। "भजो ण्विः"। इति ण्विः। रमन्ते एषु इति रत्नानि "कमलं कुलिशं गोत्रं पद्मरागश्च मौक्तिकं।

एतानि पञ्चरत्नानि रत्नशास्त्रविदो विदुः' इति शासनात्। एतत् समीपवर्त्ति राजन्यकं क्षत्रियसमूहः "राजन्यादिभ्यो वुञ्" इति वुञ्। एतत् सर्व्वं तवैव इत्यर्थः। त्वयि स्थिते विद्यमाने अहं क्षितीन्द्रः क्षितेः पृथिव्याः इन्द्रः प्रभुः राजा स्याम् भवेयं, निमन्त्रणे (नियोगकरणे) लिङ्। इति एतत् शान्तं प्रतिहतम्। नैतत् कदापि घटताम् इत्यर्थः। अथवा एतत् शान्तम् अलीकम्। यत् कारणं प्रदर्श्य मां राज्यं पालयितुम् प्रवर्त्तयसि तत् कारणं न प्रशस्तमित्यर्थः। वृत्तमुपजातिः।

Change of V.—ऊर्ज्जस्वलेन हस्तितुरङ्गेण एतेन (भूयते), अमीभिः रत्नैः राजभाग्भिः (भूयते), राजन्यकेन एतेन (भूयते), मया क्षितीन्द्रेण भूयेत, एतेन शान्तेन भूयताम्।

Derivation :—ऊर्ज्जस्वलं (ऊर्ज्ज-असुन्) ऊर्ज्जस्-वलच् निपातः। तुरङ्गः—तुर-गम खच् अथवा त्वरा-गम-खः। राजभाक्—राजन्-भज्-ण्विः। राजन्यकं—राजन्य-वुञ्।

এই সমস্ত বলবান হস্তী ও তুরঙ্গ, সেই সকল রাজোচিত রত্ন, এই সমস্ত ক্ষত্রিয় বৃন্দ, সকলই আপনার। আপনি থাকিতে আমি রাজা? এ পাপ শান্ত হউক।

These mettlesome elephants and horses, those jewels proper to kings, and these warriors are thine. Be it forbidden that I should be a king whilst thou art alive.

Q. Show the difference among इदम् एतद्, अदम् and तद्। Ans. "इदमस्तु सन्निकृष्टं समीपवर्त्ति चैतदोरूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्।" Q. In what sense is अदस् used here? Ans. न दस्यते उपक्षिप्यते अङ्गुलियैव इति न-दस्-क्विप्। अपुरोवर्त्तिनि परोक्षे स्थिते वस्तुनि 'अदस्' इति प्रयुक्तम्। अतः अमूनि रत्नानि अर्थात् कोशलराज्यस्थानि रत्नानि, न तु पुरोवर्त्तीनि इति विभाव्यम्। See above "अदसस्तु विप्रकृष्टम् तदिति परोक्ष विजानीयात्।" (विप्रकृष्टम्=दूरवर्त्ति)। Q. Explain fully the application of विधिलिङ् here

इति निगदितवन्तं राघवस्तं जगाद
व्रज भरत गृहीत्वा पादुके त्वं मदीये
च्युतनिखिलविशङ्कः पूज्यमानो जनौघैः
सकलभुवनराज्यं कारयास्मन्मतेन ॥ ५६ ॥

in स्याम् । Ans. "विधि-निमन्त्रण-आमन्त्रण अधीष्ट-संप्रश्न प्रार्थनेषु लिङ् । विधिः प्रेरणं, भृत्यादेर्निकृष्टस्य प्रवर्त्तनम् । निमन्त्रणं नियोगकरणम् आवश्यके प्रवर्त्तनम् । (यस्य अकरणे प्रत्यवायोऽस्ति तत्र नियोगकरणम् निमन्त्रणम्) । आमन्त्रणं कामाचारानुज्ञा । अधीष्टः सत्कारपूर्व्वकः व्यापारः (solicitation) इत्यादिषु अर्थेषु लिङ् स्यात् । अत्र तु निमन्त्रणार्थत्वात् "राज्यपालनमवश्यं मय एव कर्त्तव्यम्, अन्यथा प्रत्यवायोऽस्ति इत्येवं मदर्थं मां प्रवर्त्तयसि इत्यादि अर्थागमो भवति । Q. Give the different meanings of इन्द्रः । Ans. "इन्द्रः सचीपतावन्तरात्मन्यादित्ययोगयोः" इति विश्वः (शचीपतौ अन्तरात्मनि आदित्ये योगे च) । ५५ ।

56. Principal sentence :—राघवः (कर्तृ) तं (कर्म्म) जगाद । निगदितवन्तम्—Adj to तम् । इति Object to निगदितवन्तम् । Other sentence. हे भरत (सम्बो) त्वम् (कर्तृपदम्) व्रज, सकल भुवनराज्यं (कर्म्म) कारय । Incomplete verb गृहीत्वा । पादुके object to गृहीत्वा । मदीये adj to पादुके । जनौघैः (पूज्यमानः इत्यस्य अनुक्तकर्तृपदम्) । अस्मन्मतेन—प्रकृत्यादिभ्यः तृतीया । Adjectives to त्वम्—च्युतनिखिलविशङ्कः and पूज्यमानः ।

Prose order :—राघवः इति निगदितवन्तं तं जगाद । भरत त्वं मदीये पादुके गृहीत्वा व्रज । जनौघैः पूज्यमानः च्युतनिखिलविशङ्कः सन् (त्वं) सकलभुवनराज्यं अस्मन्मतेन कारय ।

Substance :—एवं कथितवन्तं भरतं रामः प्रोवाच । हे भरत प्रतिगच्छ स्वराजधानीम् गृहीत्वा मे पादुके । भयशोभयं मा कुरु, अपितु लोकैः पूजितः सन् ममाज्ञया पृथ्वीं पालय ममाज्ञया ।

Explanation in ṭika form :—राघवो रामः इत्येवं निगदितवन्तं उक्तवन्तं तं भरतं जगाद उक्तवान्। हे भरत ! त्वं मदीये मत्सम्बन्धिनि "वृद्धाच्छः"* इति छः। पादुके उपानहौ "अथ पादुका पादूरुपानत् स्त्री" इत्यमरः। गृहीत्वा व्रज गच्छ अयोध्यामिति शेषः। विधौ लोट्। अतएव जनौघैः जनसमूहैः पूज्यमानः त्वं, च्युता अपगता निखिला अशेषा विशङ्का स्वा-यशोरूपा यस्य तथाभूतः सन् सकलभुवनराज्यं सर्व्वत्र भूमण्डले राज्यं अस्मन्मतेन अस्माकम् अभिप्रायेण। प्रकृत्यादिभ्यः तृतीया। गौरवे अस्मदो बहुवचनम्। कारय अनुष्ठापय, पादुके इति शेषः। किंवा अस्मन्मतेन प्रयोज्यकर्त्रा राज्यं कारय। किंवा स्वार्थे णिः। किंवा हे अस्मन्मते ! अस्मत्सदृशबुद्धे राज्यं न कारय न घातय शत्रुभिरित्यर्थः। शीघ्रं गत्वा राज्यं रक्ष इति भावः। किंवा अस्मन्मतेन राज्यं कारय ज्ञापय लोकान् इति शेषः। स्वयमहं राज्यं न करोमि किन्तु रामाज्ञया करोमीति पादुकाग्रहणविनयेन लोकान् ज्ञापय इत्यर्थः।

न न म य य

इ ति नि । ग दि त । व न्तं रा । घ व स्तं । ज गा द ।

ननमयययुतेयं मालिनी भोगिलोकैः। इति मालिनी वृत्तम्। (भोगिन् = ८ लोकाः = ७)

Change of V.—निगदितवान्, स राघवेण जगदे। त्वया व्रज्यताम्, च्युतनिखिलविशङ्केन, पूज्यमानेन कार्य्यताम्।

Derivation.—निगदितवन्तम्—नि-गद क्तवत्-द्वितीया। लुङ्—अगदीत्, अगादीत्। पूज्यमानः—पूज-कर्म्मणि शानच्। लुङ्—अपूपुजत्।

ভরত এই সমস্ত কহিতেছিলেন। রামচন্দ্র সম্বোধন করিয়া কহিলেন, ভরত, তুমি আমার পাদুকাদ্বয় লইয়া প্রতিনিবৃত্ত হও। সমুদয় শঙ্কা পরিত্যাগ করিয়া, আমার কথানুসারে সমস্ত ভুবনের রাজ-কার্য্য সম্পাদন কর। লোকে তোমাকে বিশেষ শ্রদ্ধা করিবে।

---

* वृद्धम्—"त्यदादीनि च" त्यदादीनि सर्व्वनामानि वृद्धसंज्ञानि स्युः। त्यदादिः यथा, त्यद् तद् यद् एतद् इदम् अदस् एक &c।

To Bharat who had said so, spoke Rama., Go back, O Bhara taking my shoes. Devoid of all scruples and respected by 'the mu titude of men carry on the government of the whole world to m wishes.

Q. Account for the plural form of अस्मद् in अस्मते । Ans. See above. Q. Show the force of the causative form of कारय । Ans. पादुके मे चेतनरहितेऽपि ता उपायप्रयोगात् राज्यं पालयितुं शक्नुयाताम् इति णिजन्तस्यार्थक्यम् । ५६ ।

Purport of the canto III.—राक्षसादिवधात् सर्व्वप्रियं रा राज्ये अभिषेक्तुं सिंहासनं रत्नमयम् आदिश्य तीर्थजलम् आनेतुं पुरुषा समन्तात् प्रेषयामास नगरञ्च पताकादिभिः सुशोभितं कारयामास राजा । केकयं तु तत् असहमाना पूर्व्वप्रतिश्रुतेन वरेण रामस्य वनगमनं याचमाना, राज्ञा कथमपि अध्यवसायात् अस्मात् निवारिताभूत् । सत्यसन्धो राजा सत्यपालनार्थं रामं निरवासयत् न्यमज्जयच्च सर्व्वाः प्रजाः शोके । पौरैरनुगम्यमानः ससीतः स लक्ष्मणो रामः छलेन तेभ्यः अपससार । राजापि शोकवशात् कालमुपागतः । अथ वृद्धमन्त्रिभिः मातुलकुलात् आनीतो भरतः स्वमातरं भृशमुपालभ्य,, शोकं पितुः पिण्डोदकसञ्चयान् कृत्वा रामं प्रत्यानिनीषुः सपौरः प्रायात् अरण्यम् । अथ स मिलिता रामेण, तेनैव प्रबोधितः तत्पादुके समादाय कोशलं प्रति निवृत्तः ।

—o—

The conversation in brief between Rama and Bharata —रामः उवाच, पिता माम् वनगमनरूपं सुकरमेव कार्य्यमनुष्ठातुम् आदिदेश त्वं तु महावीरं सम्भाव्य दुष्करं कार्य्यं राज्यपालनरूपम् अनुज्ञातवान् । अहो वीरो ऽपि तत् कथं अधीर इव शोकेन मुह्यसीति । नार्हसि त्वं ज्ञानवान् पित्राज्ञा अन्यथा कर्त्तुम् । यदि ते भक्तिरस्ति मयि, तत् मम वचनात् प्रतिनिवर्त्तस्व शाधि च पृथ्वीमिति । सर्व्वमेतत् आकर्ण्य भरतः प्राह तिष्ठति ज्येष्ठे कनिष्ठः पालयति राज्यं शास्त्रं पापम् । सर्व्वमेतत् रक्षादिकं तवैव । Add sloka 56.

चतुर्थः सर्गः ।

निवृत्ते भरते धीमानत्रे रामस्तपोवनम् ।
प्रपेदे पूजितस्तस्मिन् दण्डकारण्यमीयिवान् ॥ १ ॥

चतुर्णां पूरणः चतुर्थः । पूरणे थक् । सर्गः—"सर्ग स्वभाव निर्मोक्ष निश्चयाध्याय सृष्टिषु ।" सृज् धातोः घञ् ।

44. Principal sentences (1) रामः (कर्तृ) अत्रेः (सम्ब) । तपोवनं (कर्म) प्रपेदे । (2) (रामः) दण्डकारण्यम् (कर्म) ईयिवान् । Adj to रामः—धीमान् and पूजितः ।

Prose order :—भरते निवृत्ते (सति) धीमान् रामः अत्रेः तपोवनं प्रपेदे, तस्मिन् पूजितः (सन्) दण्डकारण्यम् ईयिवान् ।

Substance :—भरते गृहं प्रतिगते, रामः अत्रिनाम्नः मुनेः आश्रमं प्राप । तत्र च मुनिभिः सत्कृतः पश्चात् दण्डकारण्यं जगाम ।

Explanation in tika form :—भरते निवृत्ते प्रत्यागते सति । भावे सप्तमी । रामपादुके गृहीत्वा कोशलं प्रतिगते सति इत्यर्थः । धीमान् बुद्धिमान् । प्रशंसायाम् मतुप् । कदाचित् पुनः प्रजावर्गः भरतो वा तत्परिचितं स्थानमवाप्य तम् उद्वेजयिष्यति इति ज्ञानवान् इत्यर्थः । रामः अत्रेः महर्षेः तपोवनम् आश्रमं प्रपेदे । भरतादीनां प्रत्यागमनाशङ्कया गतः इत्यर्थः । तस्मिन् तत्र तपोवने पूजितः मुनिभिः अर्घ्य पाद्यादिभिः सत्कृतः सन् । "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्त्तमाने क्तः । अतः पूजां लभमानः इत्यर्थः । दण्डकारण्यम् ईयिवान् गतवान् । "उपेयिवाननाश्वाननूचानश्च" इति इन् धातोः क्वसुप्रत्ययेन निपातनात् सिद्धम् । वृत्तं नाम पथ्यावक्त्रम्, तल्लक्षणं यथा, "युजोश्चतुर्थतो येन पथ्यावक्त्रं निगद्यते ।"

ज ज

नत्रे रामस्तंपोवं ; दण्डकारण्यॅमीयिँ ;

अटाट्यमानोऽरण्यानीं समीत: सहलक्ष्मण:।
बलाद्बुभुक्षुणोत्क्षिप्य जह्रे भीमेन रक्षसा ॥४७॥

इति, द्वितीयचतुर्थयो: पादयो: चतुर्थवर्णात् परम् ज-गणप्रयोगात् पथ्यावक्त्रम् वृत्तम्।

Pouranic reference in दण्डक—भार्गवस्य कन्यां हरन् दण्डको नाम राजा तेनाभिशप्त: सबन्धु: सप्रजावर्गश्च पञ्चत्वम् उपगत:। तस्य च राज्यम् अरण्यम् अभवत् इति पौराणिकी वार्त्ता।

Change of V.—धीमता रामेण, पूजितेन ईयुषा भूतम्। Or simply ईये।

Derivation.—निवृत्ते—नि वृत्-कर्त्तरि क्त:। लुङ्, अवृतत्, अवर्त्तिष्ट। धीमान्—धी-मतुप्। प्रपेदे—प्र-पद लिटि ए। लट्—पद्यते, लुङ्-अपादि, अपत्साताम्। ईयिवान्—इ-लिटि, क्वसु:। लट् एति।

ভরত প্রতিনিবৃত্ত হইলে ধীমান্ রামচন্দ্র অত্রি মুনির তপোবনে উপনীত হইলেন। তথায় অভ্যর্থনা লাভ করিয়া দণ্ডকারণ্যে উপস্থিত হইলেন।

Bharat having gone back, the wise Rama reached the asylum of Atri. There being received with respects, he then proceeded to Dandakaranya the forest of Dandaka.

Q. Point out the nominative to पूजित:। Ans. मुनीनां पूजित:। मुनीनाम् इति षष्ठ्यन्तपदं कर्त्तृकारकम्। "क्तस्य च वर्त्तमाने" इति कर्त्तरि षष्ठी। Q. Is there any Pouranic Reference in दण्डक? Ans. See above. Q. Show the Euphonic combination in अविराम:। Ans. अवि: राम: इति पदद्वयं। रकारे परे विसर्गजातरकारस्य लोप:। १।

47. Principal part :—रक्षसा (अनुक्तकर्त्तृ) बलात् (ल्यबलोपे ५मी) उत्क्षिप्य (व्यम्) जह्रे (राम:—उक्तकर्म्म जह्रम्)। Adj to रक्षसा—बुभुक्षुणा and भीमेन Adj to राम:—समीत: सहलक्ष्मण: and अटाट्यमान:। अरण्यानीं—object to अटाट्यमान:।

Prose order—ससीतः सहलक्ष्मणः अरण्यानीम् अटाट्यमानः (रामः) बुभुक्षुणा भीमेन रक्षसा बलात् उत्क्षिप्य जह्रे।

Substance:—अथ विराधनामा कश्चित् भीषणो राक्षसः क्षुधातुरः अरण्ये भ्रमतः सीतारामलक्ष्मणान् बलात् उत्थाप्य आक्रान्तवान्।

Explanation in tika form:—सीतया सह वर्त्तमानः ससीतः। तुल्ययोगे बहुव्रीहिः। लक्ष्मणेन सह वर्त्तमानः सहलक्ष्मणः ["वोपसर्जनस्य" बहुव्रीह्यवयवस्य सहस्य सः स्यात् इति विकल्पेन स-भावः] अरण्यानीं महारण्यम् 'महारण्यमरण्यानी" इत्यमरः। "हिमारण्ययोर्महत्त्वे" इति महत्त्वे आनुगागमः, ङीष् च। अटाट्यमानः भृशमटन्, क्रियासमभिहारे यङ्। रामः, बुभुक्षुणा क्षुधितेन। सन्नन्तात् उः। भीमेन भयानकेन रक्षसा राक्षसेन विराधेन बलात् उत्क्षिप्य हस्ताभ्यां उत्थाप्य जह्रे हृतः गृहीत इत्यर्थः। वृत्तं नाम पथ्यावक्त्रम्।

• Allusion, see the next sloka.

Change of V.—अटाट्यमानं ससीतं सहलक्ष्मणं बुभुक्षु जहार भीमं रक्षः।

Derivation.—अटाट्यमानः—(अट यङन्तः) अटाट्य-शानच्। लट्-अटाट्यते अरण्यानी—अरण्य-ङीष्, आनुगागमः। बुभुक्षुणा—(भुज+सन्) बुभुक्ष-उः। जह्रे—हृ-कर्म्मणि लिट् ए। कर्म्मणि लट् ह्रियते। लुङ्-अहारि। भीमेन—भी-मक्।

সীতা ও লক্ষ্মণ সহিত রামচন্দ্র মহাবনে ভ্রমণ করিতেছিলেন, এক ভয়াবহ বুভুক্ষু রাক্ষস তাঁহাদিগকে ঊর্দ্ধে উঠাইয়া হরণ করিল।

Wandering in the great forest Rama with Sita and Laksman was, with force, seized up by a terrible hungry demon.

Q. Distinguish between अरण्य and अरण्यानी। Ans. महारण्यमरण्यानी। See above. Q. Write gram. notes on सह in ससीत and सहलक्ष्मणः। Ans. See above. Q. Explain the force of यङ् in अटाट्यमानः। Ans. क्रियासमभि-

अवाक्शिरसमुत्पादं कृतान्तेनापि दुर्द्दमम् ।
भंक्त्वा भुजौ विराधाख्यं तं तौ भुवि निचख्नतुः ॥३॥

शरे अर्थात् भज्ञार्थे पौनःपुन्ये च अर्थे यङ् स्यात् । अतः रामः सततं भ्रमं च भ्रमणशील आसीत् इति गम्यते । २ ।

3. Principal part.—तौ (कर्त्तृ) तं भुवि (अधि) निचख्नतुः । Adj to तं—विराधाख्यम्, अवाक्शिरसम्, उत्पादं and दुर्द्दमम् । कृतान्तेन—दुर्द्दममित्यस्य अनुक्तकर्तृपदम् । Incomplete verb—भङ्क्त्वा । भुजौ object to भङ्क्त्वा ।

3. Prose order—तौ अवाक्शिरसम्, उत्पादं कृतान्तेनापि दुर्द्दमं विराधाख्यं तं, भुजौ भंक्त्वा भुवि निचख्नतुः ।

Substance :—यमोऽपि यं स्ववशम् आनेतुं न समर्थः, राघवौ तस्य हस्तद्वयं भङ्क्त्वा, ऊर्द्ध्वपादम् निम्नमस्तकञ्च कृत्वा भुवि निखातवन्तौ ।

Explanation in tika form :—तौ रामलक्ष्मणौ अवाक् शिरो यस्य सः अवाक्शिराः तम् अवाकशिरसम् अधोमस्तकम्, तथा ऊर्द्धं पादौ यस्येति उत्पात् तम् । कृतान्तेन यमेनापि "कृतान्तो यमसिद्धान्तदैवाकुशलकर्म्मसु" इत्यमरः दुर्द्दमं दुःखेन दमनीयम् "ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्" इति कर्म्मणि खल् खल् प्रयोगात् च "नलोके"ति अस्य कर्त्तरि तृतीया, नतु षष्ठी । विराधाख्यं विराधनामानं तं राक्षसं भुजौ भंक्त्वा मोटयित्वा भुवि पृथिव्यां निचख्नतुः निखातवन्तौ । यमोऽपि यस्मात् बिभेति तमपि रामलक्ष्मणौ विनाशितवन्तौ इत्यर्थः । अत्र विराधशब्देन पुंस्त्वावगमात् तम् इति पुंलिङ्गनिर्द्देशः । अन्यथा पूर्व्वश्लोके रक्षः इत्यनेन अन्वयित्वात् अस्य क्लीवत्वमुचितमेव ।

Change of V.—अवाक्शिराः उत्पादः, दुर्दमः विराधाख्यः स ताभ्यां निचख्ने ।

Derivation.—अवाक्—अव-अन्च क्विप् । भंक्त्वा—भन्ज-क्त्वा । लट्—भनक्ति, लुङ्-अभाङ्क्षीत् । दुर्दमं—दुर-दम्-कर्म्मणि खल् । निचख्नतुः—नि-खन्-लिट् अतुस् । लट् खनति, लुङ्-अखानीत् अखनीत् ।

তাঁহারা দুইজনে যমের ও দুর্দ্দর্ষ উক্ত বিরাধ নামক রাক্ষসের হস্ত

आंक्षिषातां रघुव्याघ्रौ शरभङ्गाश्रमं ततः ।

अध्यासितं श्रिया ब्राह्म्या शरण्यं शरणैषिणाम् ॥ ४ ॥

দ্বয় ভগ্ন করিয়া নিম্নমস্তক ও ঊর্দ্ধপাদ অবস্থায় তাহাকে ভূমিতে নিখাত করিলেন।

They two buried under the ground, the demon called Viradh indomitable even by Pluto, having at first broken his two arms.

Q. Write notes on गम् being of masculine gender. Ans. See above. Q. Why was the demon interred with his head downward. Ans. शस्त्रैः विनाशम् अनुपगतस्य विराधाख्यां राक्षसीं तनुं प्रविष्टस्य तुम्बुरुनाम्नः कस्यचित् वैश्रवणाभिशप्तस्य गन्धर्व्वस्य विनाशार्थम् रामः तत्कण्ठं पादेन आक्रम्य स्थितः तेनैव आदिष्टः

"अवटे चापि मां राम निक्षिप्य कुशली व्रज ।

रक्षसां गतसत्त्वानाम् एष धर्म्मः सनातनः ॥" रामा० ॥ (अवटे=गर्त्ते)।

तदादेशाच्च रामः त गर्त्ते एव निक्षिप्य विनाशयितुं निम्नमस्तकं निखातवान् । कालिदासस्तु रघौ, "तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीम् । गन्धेनाशुचिना चेति वसुधायां निचख्नतुः ।" Q. Decline the base of उत्पादम् । Ans. उत्पाद-शब्दस्य रूपं यथा, उत्पात् उत्पादौ उत्पादः, उत्पादम् उत्पादौ उत्पदः । उत्पदा उत्पाद्भ्याम् इत्यादि । (Mark उत्पदः उत्पदा &c "पादः पत्" इति पदादेशः, अथवा "पात्पत् पौ" सु०) । २ ।

4. Principal part :—ततः (व्यम्, अनन्तरार्थे ५मी) रघुव्याघ्रौ (कर्त्तृ) शरभङ्गाश्रमम् (कर्म्म) आंक्षिषाताम् । Adj. to शरभङ्गाश्रमम्—अध्यासितम् and शरण्यम् । श्रिया (अध्यासितम् इत्यस्य अनुक्त कर्त्तृपदम्) ब्राह्म्या—adj. to श्रिया । शरणैषिणाम्—सम्ब, syntactically connected with शरण्यम् ।

Prose order :—ततः रघुव्याघ्रौ ब्राह्म्या श्रिया अध्यासितं शरणैषिणां शरण्यं शरभङ्गाश्रमम् आंक्षिषाताम् ।

Substance :—अथ विराधादेशात् राघवौ शरणार्थिनाम् शरण्यम् तपोमहिमान्वितं शरभङ्गमुनेः आश्रमम् आश्रितवन्तौ ।

Explanation in tika form :—अथ विराधादेशात् तौ शरभङ्गाश्रमम् श्रितौ इति वर्णयन्नाह आहिषातामिति। ततो विराधवधानन्तरं, रघु व्याघ्राविव रघुव्याघ्रौ राघवश्रेष्ठौ रामलक्ष्मणौ "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति उपमितसमासः। "स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः।" इत्यमरः। ब्रह्मणः तपसः इयं ब्राह्मी। "ब्राह्मो जातौ" इति टिलोपः निपातितः। स्त्रीत्वात् ङीप। "वेदस्तत्त्वं तपो ब्रह्म" इत्यमरः। तया ब्रह्मसम्बन्धिया श्रिया लक्ष्म्या, शोभया इति यावत्। "श्रीः वेशरचना शोभा" इति मेदिनी अध्यासितम् आश्रयीकृतं शरणं त्राणम् अवस्थानं वा एषितुं शीलं येषामिति शरणैषिणां शरणार्थिनाम्। शरणे त्राणे अवस्थाने वा साधु शरण्यम्। "शरणं रक्षणे गृहे" इति विश्वः। तत्र साधुरिति यत्। शरभङ्गनाम्नो मुनेराश्रमं तपोवनम् आहिषातां गतवन्तौ। अंहेर्लुङि रूपम्।

Change of V.—आहि रघुव्याघ्राभ्यां शरभङ्गाश्रमः अध्यासितः।

Derivation.—आहिषाताम्—अन्ह लुङ् आताम्। लट् अंहते। लुङ आंहिष्ट। अध्यासितम्—अधि-आस-कर्म्मणि क्तः। श्रीः—श्रीयते श्रयति गुणिनम् वा इति श्रीः, श्रिधातोः क्विप्, दीर्घश्च।

অনন্তর রঘুশ্রেষ্ঠ রাম ও লক্ষ্মণ শরভঙ্গ নামক মুনির আশ্রমে গমন করিলেন। এই আশ্রম আশ্রয়ার্থিগণের আশ্রয় স্থান। ইহাতে তপোমাহাত্ম্য বিরাজ করিতেছিল।

The two excellent descendants of Raghu went to the hermitage of Sarabhanga the refuge of the shelter-seekers and the abode of ascetic splendour.

Q. Decline श्रीः। Ans. श्रीः श्रियौ श्रियः. श्रिया श्रीभ्याम् इत्यादि। "लक्ष्मी श्रीशब्दौ अन्तौ वा" इति छन्दचन्द्रः। अतः, श्री श्र्यौ श्र्यः, श्रीम् श्र्यौ श्रीः, श्र्या श्रीभ्याम इत्यादि वा रूपम्। **Q. Distinguish between** उपमित **and** उपमानसमास। Ans. "उपमितं व्याघ्रा-

पुरो रामस्य जुहवाञ्चकार ज्वलने वपुः।
शरभङ्गः प्रदिश्यारात् सुतीक्ष्णमुनिकेतनम् ॥ ५ ॥

द्भिः सामान्याप्रयोगे" सामान्यस्य प्रयोगे तु उपमानसमासः स्यात्। (सामान्य =point of similarity). When the point of similarity is not mentioned it is उपमित, otherwise it is उपमानसमास। Thus रघुव्याघ्री means रघू व्याघ्री इव शूरी। Here शूर which is the point of similarity, is not mentioned. But where it is mentioned it is उपमानसमास, thus रघू व्याघ्रशूरी wherein व्याघ्रशूरी has उपमानसमास। ४।

5. Principal part :—शरभङ्गः (कर्तृ) रामस्य (सम्ब, पुरः इत्यनेन सम्बन्धः) पुरः (व्यम्) ज्वलने (अधि) वपुः (कर्म) जुहवाञ्चकार। Incomplete verb—प्रदिश्य। Object to प्रदिश्य—सुतीक्ष्णमुनिकेतनम्, आरात—(व्यम्)।

Prose order :—शरभङ्गः आरात् सुतीक्ष्णमुनिकेतनं प्रदिश्य रामस्य पुरः ज्वलने वपुः जुहवाञ्चकार।

Substance :—शरभङ्गनामा कुष्ठरोगाक्रान्तः कश्चित् मुनिः रामम् सुतीक्ष्णनाम्नः कस्यचित् मुनेः आश्रमं गन्तुमादिश्य अग्नौ स्वदेहं रोगक्लिष्टं भस्मसात् अकरोत्।

Explanation in tika form—शरभङ्गः तदाख्यः कुष्ठरोगाक्रान्तः कश्चित् मुनिः आरात् समीपे "आराद्दूरसमीपयोः" इत्यमरः। सुतीक्ष्णनामा मुनिः सुतीक्ष्णमुनिः। मध्यपदलोपी कर्मधारयः। तस्य निकेतनम् गृहम् आश्रममिति यावत्। "केतनन्तु निमन्त्रणे, गृहे केतौ च कृत्ये च।" इति मेदिनी। प्रदिश्य तत्र वासमुपकल्पय इति कथयित्वा, रामस्य पुरोऽग्रतः "पुरश्च गुण सुहितार्थ सत् अव्यय तव्य समानाधिकरणेन" इति पुर इत्यनेन षष्ठीसमासनिषेधः। ज्वलने अग्नौ वपुः शरीरं जुहवाञ्चकार हुतवान्। रोगक्लिष्टं स्वदेहं भस्मसात् अकरोत् इत्यर्थः।

यूयं समैष्यथेत्यस्मिन्नासिष्महि वयं वने ।
दृष्टाःस्थ स्वस्ति वो याम: स्वपुण्यविजितां गतिम् ॥६॥

Change of V.—शरभङ्गेण जुहवाञ्चक्रे ।

Derivation.—जुहवाञ्चकार—हु लिटि च । पक्षे जुहवाम्बभूव जुहवामास जुहाव । लट् जुहोति । लङ् अन् अजुहवुः । लुङ् अहौषीत् । ज्वलने—ज्वल-युच् । वपुस्—उप्यन्ते देहान्तरभोगसाधनानि बीजानि अत्र इति वपुः वपधातोः उसिन् । तीक्ष्ण—तिज-क्स्न: ।

निकटে সুতীক্ষ্ণ ঋষির আশ্রম প্রদর্শন করিয়া শরভঙ্গ রামচন্দ্রের সম্মুখে হুতাশনে নিজ শরীর আহুতি দিলেন।

Sarabhanga threw down his body into the flames before Rama showing nigh the asylum of the ascetic Sutiksna.

Q. Why did the ascetic throw his body into the flames? Ans. See the above substance. Q. Derive वपुस् and तीक्ष्ण and conjugate the root of the latter in लट् and लुङ् । Ans. तेजयति लट्, अतीतिजत् लुङ् For the rest see above. । ५ ।

6. Consists of 5 sentences. See below.

Prose order :—(1) यूयं समैष्यथ (2) इति अस्मिन् वयम् आसिष्महि, (3) दृष्टाः स्थ, (4) वः स्वस्ति, (5) स्वपुण्यविजितां गतिं यामः ।

Substance :—कदा यूयमत्र आगमिष्यथ इति अहम् अपेक्षमाणः अत्र वने तिष्ठामि । न मे लोचनपथं अगोहि यावदहं ते पुरतः देहं त्यजामि, शुभमस्तु ते

Explanation in tika form :—न केवलं सुतीक्ष्णमुनिकेतनं प्रदिश्य एतदपि प्रदिश्येति योज्यम् । अपि नाम यूयं, बहुवचनात् ससीतः सहलक्ष्मणः रामः गम्यते । समैष्यथ आगमिष्यथ इति हेतोः अस्मिन् वने वयम् आसिष्महि स्थिताः । विष्णुरूपे त्वयि दृष्टे शोभना गतिर्भविष्यतीत्याशया एतावन्तं कालं स्थिताः इति भावः । आसीर्लुङि उत्तमपुरुषबहुवचनरूपम् । "अस्मदोद्वयोश्च इति एकत्वेऽपि बहुवचनम् । अस्मदागमने किन्ते फलमिति चेदाह, दृष्टाः

तस्मिन् क्षणानुसादभूते सुतीक्ष्णमुनिसन्निधौ।
उवास पर्णशालायां भ्रमन्ननिशमाश्रमान्॥ ७॥

अधुना दृष्टा भवथ। यस्य मे पश्यतः पुरतः देहं त्यजतो मे सङ्गतिर्भवेत् तस्यैव दर्शनलाभः स्यात् अविच्छिन्नो भवतु इत्यर्थः। वः युष्मभ्यं स्वस्ति कल्याणं भवतु। "नमः स्वस्ति स्वाहा स्वधा अलं वषट् योगाच्च" इति चतुर्थी। स्वपुण्येन विजितां लभ्यां गतिं यामः गच्छामः। रामरूपिणः विष्णोस्ते दर्शनेन कृतार्थोऽहम् स्वर्गं गच्छामि इति भावः। अत्र रामायणम्—"अहं ज्ञात्वा नरव्याघ्र वर्त्तमानमदूरतः। ब्रह्मलोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिम्॥" इत्तं पश्चावक्रम्।

Change of V.—युष्माभिः समैष्यते, आसि अस्माभिः, दृष्टैः भूयताम्। स्वस्ति भूयताम्, मया यायते स्वपुण्यविजिता गतिः।

Derivation :—समैष्यथ—सम्-आ-इ लृट् स्यथ। लट् एति। लुङ् अगात्। आसिषमहि—आस-लुङ् महि। लट् आस्ते। लुङ् आसिष्ट। लिट् आसाञ्चक्रे। स्थ—अस्-लट् थ। विजिताम्—वि-जि-कर्म्मणि क्तः। लट जयति। लुङ् अजैषीत्। लिट् जिगाय।

তোমরা এখানে আসিবে বলিয়া আমি এই বনে অবস্থান করিয়াছি। তোমাদের দর্শন লাভ হইল। তোমাদের মঙ্গল হউক, আমি নিজপুণ্যবিজিত লোকে গমন করি।

I stayed in this forest, that you would come here. Now you have been seen. Let me go to the world won by my piety.

Q. If any adjective to वयम् be inserted, should it take the plural form? Ans. "सविशेषणस्य प्रतिषेधः" इति बहुवचनप्रतिषेधः। Q. Explain स्वपुण्यविजितां गतिम्। Ans. "मामेव (शक्रः) वरदो राम ब्रह्मलोकं निनीषति। जितमूर्य्यो मया तपसा दुष्प्रापमकृतात्मभिः॥" रामा०। ६।

7. Principal part :—(रामः) पर्णशालायाम् (अधि) उवास। भ्रमन्—adj. to रामः। अनिशम् अव्ययम्, अत्यन्तसंयोगे द्वितीया)। तस्मिन्—

('भावे सप्तमी)। कृशानुसाद्भूते—adj. to तस्मिन् : सुतीक्ष्णमुनिसन्निधौ—अधिकरणे सप्तमी।

Prose order :—तस्मिन् कृशानुसाद्भूते (रामः) अनिशम् आश्रमान् भ्रमन् सुतीक्ष्णमुनिसन्निधौ पर्णशालायाम् उवास।

Substance :—शरभङ्गदेहदाहात् परं तदादेशेन सुतीक्ष्णनाम्नः ऋषेः पर्णशालायाम् वसन् मुनीनाम् आश्रमान् विचचार।

Explanation in tika form :—तस्मिन् शरभङ्गे कृशानुसाद्भूते कार्त्स्न्येन अग्नीभूते सति, दग्धे इति यावत्। भावे सप्तमी। "विभाषा साति कार्त्स्न्ये"* इति कार्त्स्न्ये सातिः। रामः अनिशं सर्व्वदा आश्रमान् भ्रमन् पर्य्यटन् मुनीन् उपासितुमिति शेषः। "लक्षणहेत्वोः क्रियायाः" इति शतृप्रत्ययः। सुतीक्ष्णस्य मुनेः सन्निधौ समीपे पर्णशालायां पर्णकुट्याम् उवास वासमकरोत्। ससीतस्य सहलक्ष्मणस्य च रामस्यैव उक्तत्वात् सीतालक्ष्मणयोरुपलब्धिर्भवति।

Change of V.—ऊषे भ्रमता।

Derivation.—कृशानुसात्—कृशानु-(कृश-आनुक्)-सातिः। उवास—वस-लिट् ण। लट् वसति। लुङ् अवात्सीत्।

তিনি অগ্নিসাৎ হইলে, রামচন্দ্র সুতীক্ষ্ণ-মুনি সন্নিধানে পর্ণশালায় বাস করিতে লাগিলেন। এই কালে তিনি অবিরত আশ্রমে ভ্রমণ করিতেন।

He having been reduced to fire, Rama lived in a cottage near the ascetic Sutiksna, often wandering over hermitages.

Q. Parse अनिशम्। Ans. नास्ति निशा चेष्टाविघातः यस्मिन् स अनिशः कालः तम्, इत्यादि विग्रहे व्याप्तौ द्वितीया। अथवा न निशैते अत्र इति

---

* च्विविषये सातिर्वा स्यात् कार्त्स्न्ये (totality). If it does not signify totality, च्वि will take place instead of साति। So in the sense of being partly burnt, it should be कृशानुभूते (साति=च्वात्)।

वनेषु वासतेयेषु निवसन् पर्णसंस्तरः ।
शय्योत्थायं मृगान् विध्यन्नातिथेयो विचक्रमे ॥ ८ ॥

अनिशम् । णमुल्, नि-शी-उमु । अत्र अव्ययपदम् (क्रियाविशे)। "सातत्ये स्वरादेराकृतिगणत्वेन तस्य तत्र पाठः इति अव्ययम्" इति प्रौढ़मनोरमा । Q. Write notes on the स of कृपानुसात् । Ans. "सात् पदाद्योः" इति सात् इत्यस्य न षत्वम् । ७ ।

8. Principal part :—(रामः) विचक्रमे । Adj. to रामः—निवसन्, पर्णसंस्तरः, विध्यन् and आतिथेयः । वनेषु—(अधिकरणे, निवसन् इत्यनेन अन्वयः) । Adj. to वनेषु—वासतेयेषु । मृगान्—object to विध्यन् । शय्योत्थायम्—adverb, gram. connected with विध्यन् ।

Prose order :—आतिथेयः (रामः) वासतेयेषु वनेषु निवसन् पर्णसंस्तरः (सन्) शय्योत्थायं मृगान् विध्यन् विचक्रमे ।

Substance :—रामो वासार्हेषु वनेषु वसतिं कुर्व्वन् अतिथिपरिचर्य्यापरः, पर्णशय्यायां शयानः प्रातश्च द्रुतं शय्याया उत्थाय मृगान् विध्यन् भ्रमितुमारब्धवान् ।

Explanation in tika form :—आतिथेयः अतिथौ साधुः "पथ्यतिथि वसति स्वपतेःढञ्"* इति ढञ् । अनेन विशेषणेन अनात्मम्भरित्वं सूचितम् । रामः, वसतौ निवासे रात्रौ वा "वसती रात्रिवेश्मनोः" तत्र साधूनि वासतेयानि तेषु वासतेयेषु वनेषु निवसन् वासं कुर्व्वन् शयानो वा, संस्तीर्य्यते इति संस्तरः शय्या । "संस्तरः प्रस्तरे यज्ञे सङ्गरो युधि चापदि । क्रियाकारे विषे चाङ्गीकारे क्लीवं शमीफले" (प्रस्तरः=कुशशय्या) इति मेदिनी । पर्णानि संस्तरो यस्येति पर्णसंस्तरः पत्रशय्यः सन् शय्यायाः त्वरया उत्थाय शय्योत्थायम् "अपादाने परीप्सायाम्"† इति णमुल् (परीप्सा—त्वरा) । यथा स्यात् तथा, त्वरया मुखधावनादीन्यपि न

* 'तत्र साधुः' इत्यर्थे । ढकारात् एयः । यथा पाथेयम्, वासतेयम्, स्वापतेयम् । श्लोकोऽयञ्च "पथ्यतिथि" इत्यादिसूत्रोदाहरणरूपेण प्रदत्तः ।

† परीप्सा त्वरा । त्वरायां गम्यमानायाम् अपादानात् णमुल् स्यात् । यथा शय्यायाः उत्थाय शय्योत्थायम् ।

ऋग्यजुषमधीयानान् सामन्यांश्च समर्चयन् ।
बुभुजे देवसात् कृत्वा शूल्यमुख्यञ्च होमवान् ॥ ९ ॥

कृत्वा मृगान् विध्यन् ताड़यन् विचक्रमे विहरति स्म । "वेः पादविहरणे"‡ इति आत्मनेपदम् । पथ्यावक्त्रं वृत्तम् ।

Change of V.—निवसता पर्णसंस्तरेण विध्यता आतिथेयेन विचक्रमे ।

Derivation.—वासतेयेषु—वसति-ढञ् सप्तमी । संस्तरः—सं-स्तृ-अप् अध्युत्थायं—अध्या-उत्-स्था-णमुल् । विध्यन्—व्यध-शतृ । लट् विध्यति । लुङ् अव्यात्सीत् । लिट् विव्याध । आतिथेयः—अतिथि ढञ् । विचक्रमे—वि-क्रम लिट् ए । क्रम्यति क्रामति लट् इति वोपदेवः । क्राम्यति क्रामति इति पाणिनिः

অতিথিপরায়ণ রামচন্দ্র, বাসোপযুক্ত বনে বাস ও পর্ণ শয্যায় শয়ন করিতেন। প্রত্যুষে শয্যা হইতে সত্বর গাত্রোত্থান করিয়াই মৃগয়া বনে বনে ভ্রমণ করিতেন।

Living in forests fit for habitation, with beds of leaves, he wandered killing the deer just after he rose up from his bed given as he was to hospitality.

Q. Give the meaning of संस्तरः and अध्युत्थायम् Ans. See above. Q. Account for आत्मनेपद in विचक्रमे Ans. See the foot note. Q. Give the different meanings of वन, give also its feminine form. Ans "वनं नपुंसकं नीरे निवासालयकानने" इति मेदिनी । स्त्रियां वनी । ८ ।

9. Principal part :—(रामः) शूल्यम् उख्यं च (कर्म्म) देवसात् (व्यम्) कृत्वा (व्यम्) बुभुजे । Adj. to the subject (रामः)—होमवान् and समर्चयन् । सामन्यान् and अधीयानान्—Adj to मुनीन् (जन्मम्) which is the object to समर्चयन् । ऋग्यजुषम्—object to अधीयानान् ।

‡ वि इत्यस्मात् क्रम्धातोः आत्मनेपदं स्यात्, पादगमने अर्थे । यथा विक्रमते रामः । पादविहरणे किम् ? सन्धिः विक्रामति स्फुटति इत्यर्थः ।

Prose order :—होमवान् (सः) ऋग्यजुषमधीयानान् सामन्यान् च समर्चयन् शूल्यम् उख्यञ्च दैवसात् कृत्वा बुभुजे।

Substance.—ऋग्वेदं यजुर्वेदं सामवेदञ्च पठतः ऋषीन् पूजयन्, अग्नौ आहुतिं प्रयच्छंश्च शूल्यं स्थालीपक्वं वा मांसं देवेभ्यो दत्त्वा भुक्तवान्।

Explanation in tika form:—होमो नित्यं विद्यतेऽस्येति होमवान् कृताग्निकार्य्य इत्यर्थः। स रामः ऋक् च यजुश्च ऋग्यजुषम् [अचतुरेत्यादिना निपातितम्] ऋग्वेदं यजुर्वेदञ्च अधीयानान् पठतः "न लोकाव्ययनिष्ठाखलर्थतृनाम्" इति शानच्प्रयोगे कर्म्मणि षष्ठीनिषेधः। तथा सामसु साधून् [तत्र साधुरिति यत्] सामन्यान् सामवेदकुशलांश्च विप्रान् समर्चयन्, शूले संस्कृतं शूल्यं शूलेन पक्वं मांसं, तथा उखा स्थाली "स्थाली स्यात् पाटल्युखयोः" इति मेदिनी। तत्र पक्वम् उख्यम्, स्थालीसंस्कृतम् मांसमित्यर्थः। "शूलाकृतं भटित्रं स्याच्छूल्य-मुख्यं तु पैठरम्" इत्यमरः। ["शूलोखाद् यत्" इति यत्] दैवसात् कृत्वा देवेभ्यो दत्त्वा तदधीनं कृत्वा इति यावत्। ["देये त्रा च"* इति चकारात् सातिच्] बुभुजे भुक्तवान् "भुजोऽनवने" इति आत्मनेपदम्। पथ्यावक्त्रं वृत्तम्।

Change of V.—समर्चयता..... होमवता बुभुजे।

Derivation :—अधीयानान्—अधि-इङ्-शानच्। लट् अधीते। लुङ् अध्यैष्ट, अध्यगीष्ट। सामन्यान्—सामन्-यत्। बुभुजे—भुज लिट् ए। लट् भुङ्क्ते। शूल्यम्—शूल-यत्। उख्यम्—उखा-यत्। होमवान्—होम-मतुप्।

রামচন্দ্র হোম করিতেন, যাঁহারা ঋগ্বেদ যজুর্ব্বেদ ও সামবেদ অধ্যয়ন করিতেন তাঁহাদের অর্চ্চনা করিতেন। শূলে কিংবা স্থালীতে মাংস পাক করিয়া দেবতাদিগকে নিবেদন করিয়া ভক্ষণ করিতেন।

Rama who was practised in offering oblation on fire, respected those who chanted Ric or Jajus as well as those who chanted Sama. He ate the meat prepared on sticks or in pots, offering it at first to the gods.

---

* तदधीने देये त्रा स्यात् सातिच कृभ्वादियोगे। विप्राधीनं देयं करोति विप्रत्रा करोति। पक्षे विप्रसात् करोति।

वसानस्तन्त्रकनिभे सर्व्वाङ्गीने तरुत्वचौ ।
काण्डीरः खाड्गिकः शार्ङ्गी रचन् विप्रांस्तनुत्रवान् ॥१०
छित्वाश्रितङ्गवीनानि फलैर्येष्वाशितम्भवम् ।
तेष्वसौ दन्दशूकारिर्वनेष्वानभ्र निर्भयः ॥ ११ ॥ युग्मकम् ।

Q. Distinguish between बुभुजे and बुभोज । Ans. भोगार्थे आत्मनेपदं, अवने अर्थात् पालनार्थे तु परस्मैपदं स्यात् । बुभोज ररक्ष इत्यर्थः । Q. Account for the formation of शूल्यम् and उख्यम् and सामन्यः । Ans. See above. Q. Account for आत्मनेपद in अधीयान । Ans. See above. Q. Write gram. notes on ऋग्यजुषम् । Ans. See above. Q. Parse शूल्यम् । Ans. 'बुभुजे' इत्यस्य कर्म्मपदम् । 'बुभुजे' इति प्रधानक्रियापदेन अन्वयित्वात् अस्याः क्रियाया एव कर्म्मत्वम् । ९ ।

10, 11. Principal part :—असौ आश्रितङ्गवीनानि छित्वा तेषु वनेषु आनभ्र । Adj. to असौ—वसानः, काण्डीरः, खाड्गिकः, शार्ङ्गी, रचन्, तनुत्रवान्, दन्दशूकारिः and निर्भयः । Adjunct to वनेषु—येषु फलैः आशितम्भवम् (भवति) ।

Prose order :—तन्त्रकनिभे सर्व्वाङ्गीने तरुत्वचौ वसानः काण्डीरः खाड्गिकः शार्ङ्गी तनुत्रवान् दन्दशूकारिः निर्भयः असौ विप्रान् रचन् आश्रितङ्गवीनानि छित्वा येषु फलैः आशितम्भवं तेषु वनेषु आनभ्र ।

Substance :—वस्त्रयन्त्रात् प्रत्ययम् उद्धृतं वसनं यथा सुन्दरं तथा वल्कलयुगलम् सुदीर्घं वसानः रामः खड्गादिभिरुपेतः, ब्राह्मणान् रचन्, वर्म्मधारी, राचसान् विनाशयन् तत्रैव विचचार यत्र फलादीनि पर्य्याप्तानि लभ्यन्ते, यत्र तु गावः तृणानि खादन्ति तत् विजहौ ।

Explanation in tika form :—तन्त्रात् पटोपकरणात् वस्त्रयन्त्रात् इति यावत्, अचिरोद्धृतवस्त्रं तन्त्रकं नवाम्बरम् । "तन्त्रकञ्च नवाम्बरे" इत्यमरः ।

तन्निभे तत्तुल्ये नूतनवस्त्रतुल्ये इत्यर्थः ["तन्त्रादचिरापहृते"* इति कन्] सर्व्वाङ्गानि व्याप्नुवत्यौ सर्व्वाङ्गीणे। ["तत् सर्व्वादेः पथ्यङ्गकर्म्मपत्रपात्रं व्याप्नोति"† इति खः] तरुत्वचौ वल्कले वसानः परिदधानः काण्डोऽस्यास्तीति काण्डीरः प्रशस्तबाणधरः इत्यर्थः । ["काण्डाण्डात् ईरन् ईरचौ" इति ईरन्प्रत्ययः]¶ खड्गोऽस्यास्तीति खाड्गिकः असिहस्तः ["अत इनि ठनौ" इति ठन् । यद्वा खड्गः प्रहरणमस्येति, तदस्य "प्रहरणम्" इति ठक्] शृङ्गस्य विकारः शार्ङ्गं धनुः तदस्यास्तीति शार्ङ्गी धानुष्कः, इनिप्रत्ययः । तनुं शरीरं त्रायते इति तनुत्रं कवचं ["आतोनुपसर्गे कः" इति कः] "अथ तनुत्रं वर्म्मदंशनम्" इत्यमरः । तद्युक्तः तनुत्रवान् पिनद्धकवच इत्यर्थः । संसर्गे मतुप् । दन्दशूकानां राक्षसानाम् अरिः हन्ता ["दन्दशूकश्च लिङ्गो राक्षसे च सरीसृपे" इति मेदिनी, "यज जप दशां यङः" इति ऊकप्रत्ययः दन्शधातोः ऊकः] निर्भयः भयरहितः असौ रामः विप्रान् ब्राह्मणान् रक्षन् पालयन्, आश्रिताः तृणाः तृणप्रायत्वात् गावो येषु भवन्ति तानि; यद्वा पूर्व्वं यत्र गावः तृणाः इदानीम् व्याघ्रपूर्णानि, तानि आशितङ्गवीनानि, खप्रत्ययः, पूर्व्वपदस्य मान्तत्वं निपातनम् । ["विष्वाशितङ्गवीनं तत् गावो यत्राशिताः पुरा" इत्यमरः] वनानि हित्वा त्यक्त्वा येषु वनेषु फलैः आशितः तृप्तः तस्य भवनं आशितम्भवं तृप्तिः भवति इति शेषः । ["आशिते भुवः करणभावयोः"§

---

* The word तन्त्र is followed by कन् when it signifies a cloth taken fresh from तन्त्र (the cloth machine). Thus तन्त्रात् अचिरापहृतं तन्त्रकम् ।

† In the sense of 'wholly covering', ख (ईन्) takes place after सर्व्व followed by पथिन्, अङ्ग, कर्म्मन्, पत्र and पात्र in their second case. Thus सर्व्वपथान् व्याप्नोति सर्व्वपथीनः, सर्व्वाङ्गं व्याप्नोति सर्व्वाङ्गीनः ।

¶ काण्ड and अण्ड are respectively followed by ईरन् and ईरच् । काण्डीरः, अण्डीरः ।

§ आशितशब्दे सुबन्ते उपपदे भूधातोः करणे भावे च अर्थे खच्प्रत्ययो

इति भावे खच्] तेषु वनेषु आनश बभ्राम [“भ्रम गत्याम्” इत्यस्य लिटिरूपम्] युग्मकम्। तल्लक्षणं यथा, “द्वाभ्यान्तु युग्मकं प्रोक्तं त्रिभिः श्लोकैः विशेषकम्। कलापकं चतुर्भिः स्यात् तदूर्द्ध्वं कुलकं स्मृतम्।” पथ्यावक्त्रं वृत्तम्।

Change of V.—वसानेन, काण्डीरेण खाड्गिकेन; शार्ङ्गिणा, रचता, तनुत्रवता......अमुना दन्दशूकारिणा आनशे निर्भयेन।

Derivation.—वसानः—वस (अदादिः) शानच्। लट् वर्त्ते। [तन्त्रक —तन्त्र-कन्। सर्व्वाङ्गीणे—सर्व्वाङ्ग-खः। काण्डीरः—काण्ड-ईरन्। खाड्गिकः—खड्ग-ठक् अथवा ठन्। शार्ङ्गी—(शृङ्ग-अण्) शार्ङ्ग-इन्। तनुत्रवान्—तनुत्र (तनु-त्रै-कः) मतुप्। आशितम्भवम्—आशित-भू-भावे खच्। दन्दशूक—(दन्श् यङन्तः) दन्दश-ऊकः। आनश—अश-लिट् ण। [illegible] अभ्रमति।

সর্ব্বাঙ্গ ঢাকিতে পারা যায় এরূপ দুইখানি বল্কল তাঁহার পরিধান দেখিলে বোধ হয় যেন তন্তুবায়ের তন্ত্র হইতে উহা তুলিয়া লওয়া হইয়াছে। বাণ, খড়্গ শৃঙ্গনির্ম্মিত ধনুক ও বর্ম্ম ধারণ করিয়া তিনি ব্রাহ্মণদিগকে রক্ষা করিতেন। যে স্থানে গবীগণ তৃণ ভক্ষণে তৃপ্তি লাভ করে সেই সেই স্থান পরিত্যাগ করিয়া, যেখানে ফল ভক্ষণে তৃপ্তি জন্মে তথায় রাক্ষসনিসূদন রামচন্দ্র নির্ভয়ে ভ্রমণ করিতে লাগিলেন।

Wearing two pieces of bark fit to cover the entire body, and resembling the cloth taken afresh from the loom, and protecting the Brahmans, furnished as he was with the arrows, the sword, the bow made of horn, and the armour, Rama, the enemy of the demons began fearlessly to roam over the sites where fruits might be fed on to ones satisfaction, leaving places where grazed the cows.

भवति। करणे यथा, आशितो भवति अनेन इति आशितम्भवः ओदनः। भावे यथा, आशितस्य भवनं आशितम्भवम्।

व्रातीनव्यालदीप्तास्त्रैः सुत्वनः परिपूजयन्।
पर्षद्वलान् महाब्रह्मैराट नैकटिकाश्रमान्॥ १२॥

12. सः (उक्तं कर्तृ) नैकटिकाश्रमान् (कर्म) आट। Adj. to सः—व्रातीनव्यालदीप्तास्त्रः and पूजयन्। सुत्वनः—object to परिपूजयन्। पर्षद्वलान्—Adj. to सुत्वनः। महाब्रह्मैः—सहार्थे तृतीया।

Prose order :—व्रातीनव्यालदीप्तास्त्रः (सः) पर्षद्वलान् सुत्वनः परिपूजयन् महाब्रह्मैः सह नैकटिकाश्रमान् आट।

Substance :—शरीरम् आयास्य जीवितानाम् यतिविशेषाणां हिंसारतान् विनाश्य, प्राणिषु स्नेहवतः सोमयाजिनः अर्चयन्, श्रेष्ठैः ब्राह्मणैः सह, ग्रामात् क्रोशे वसतां यतीनाम् आश्रमान् विचचार।

Explanation in tika form :—व्रातीनेति। व्रातीनव्यालदीप्तास्त्रः। व्रतम् एषाम् अस्ति इति व्राताः, व्रत इत्यस्मात् अण्। [नानाजातीयाः अनियतवृत्तयः, शरीरम् आयास्य ये जीवन्ति ते व्राताः कथ्यन्ते] तेषां यत् कर्म तत् व्रातम्। तेन जीवन्ति ये ते व्रातीनाः। "व्रातेन जीवति"* इति खञ् (ईन)। तेषां व्यालाः क्रूराः श्वापदादयः, "व्याली भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनि" इति विश्वः। तेषु दीप्तास्त्रः उद्यतास्त्रधरः इत्यर्थः। सः रामः इति शेषः। पर्षद्वलान् 'सुत्वनः' इत्यस्य विशेषणम्। पर्षते स्निह्यति इति पर्षत् स्नेहः, पर्ष इत्यस्मात् औणादिकः अदिः। पर्षत् विद्यते एषाम् इति पर्षद्वलाः। "रजः कृष्यासुतिपरिषदो वलच्"† वलच्प्रत्ययः। तान् सर्वप्राणिषु स्नेहवतः इत्यर्थः। सुत्वनः सोमरसपायिनः। "सुयजोर्ङ्वनिप्" इति सुधातोः ङ्वनिप्। परिपूजयन् अर्चयन्। महाब्रह्मैः, महान्तः ब्राह्मणाः इति महाब्रह्माः, "कुमहद्भ्यामन्यतरस्याम्"‡ इति

---

* व्रातेन शरीरायासेन जीवति न तु बुद्धिवैभवेन सः व्रातीनः। खञ्।

† "रजःकृष्यासुतिपरिषदो वलच्"। यथा रजस्वला, कृषीवलः, आसुतीवलः, परिषद्वलः। पर्षत् इति पाठान्तरम्, अतः पर्षद्वलः।

‡ टच् takes place optionally after ब्रह्मन् preceded by कु and महत्। महाब्रह्मः, महाब्रह्मा।

वैकल्पिकः टच्। तैः सह इति शेषः। [ब्राह्मणवाचके महच्छब्दविशेषणस्य विरुद्धार्थत्वात् महाब्रह्मैर्महातपोभिरुपलक्षितवान् सुत्वनः, इति उपलक्षणे तृतीया, इति केचित्] नैकटिकाश्रमान्। ग्रामात् क्रोशे यतयो भिक्षवो ये निवसन्ति ते नैकटिकाः "निकटे वसति"§ इति ठक्। तेषाम् आश्रमाः तपोवनानि, तान् आट बभ्राम। अट्धातोः लिट्। परिषद्बलान् इति पाठे, पूर्ववत् बलच्। अथवा परिषीदन्ति अस्याम् इति परिषत् सभा सा बलं सहायो येषां ते तान् इति बहुव्रीहिः। नवाक्षरपादस्यापि दृष्टत्वात् न चात्र छन्दोभङ्गः। वृत्तं पथ्यावक्त्रम्।

Change of voice :—व्रातीनव्यालदीप्रास्त्रैः परिपूजयता आटि नैकटिकाश्रमाः।

Derivation.—व्रातीनः—(व्रत-अण्=व्रातः, व्रात-अण् व्रातम्। व्रात-खञ् (ईन)=व्रातीनः। सुत्वन्—सु-क्वनिप्। पर्षद्वलः—पर्ष-अदिः=पर्षद्। पर्षद्-वलच्। नैकटिकः—निकट ठक्। दीप्र—दीप्-र। अस्त्रम्—अस्-ष्ट्रन्।

যে সকল যতি শরীরে ক্লেশ দিয়া ব্রত আচরণ করে, তাহাদের বিরোধীদিগের প্রতি অস্ত্র ধারণ করিয়া ও সোমরসপায়ী স্নেহপূর্ণ ঋষিদিগের অর্চনা করিয়া রামচন্দ্র শ্রেষ্ঠ ব্রাহ্মণদিগের সহিত গ্রামের সন্নিহিত আশ্রমে বিচরণ করিতে লাগিলেন।

He began to wander in the hermitages of the Naekatika (a sort of ascetics who live within two miles from the villages) in company with the distinguished Brahmans respecting the feelinghearted ascetics who used to drink up the Somajuice, holding his sharp weapon against the molesters of the mendicants living by manual labour.

Q. Decline सुत्वन्। Ans. सुत्वा, सुत्वानौ सुत्वानः, सुत्वा

---

§ सप्तम्यन्तात् निकटशब्दात् 'वसति' इत्यर्थे ठक् स्यात्। आस्वतो निकटवासश्चेत् गम्यते।

परेद्यव्यद्य पूर्व्वेद्युरन्येद्युश्चापि चिन्तयन् ।
वृद्धिच्छयौ मुनीन्द्राणां प्रियम्भावुकतामगात् ॥ १३ ॥
आ तिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम् ।
प्रातस्तरां पतत्त्रिभ्यः प्रबुद्धः प्रणमन् रविम् ॥ १४ ॥
युग्मकम् ।

सुत्वभ्याम् &c । Q. Give the derivative meaning of सुत्वन् । Ans. सुन्वन्ति सोमरसं पीड़यन्ति ये ते सुत्वानः । सोमपायिन इत्यर्थः । सोमरसपीड़नार्थस्य सुधातोः क्वनिप् (वन्) तकारागमश्च । Q. Give the other form of महावृक्षैः । Ans. महावृक्षभिः । टच्प्रत्ययस्य पाक्षिकविधानात् । Q. Name some words the meaning of which is depreciated by महत् । Ans. "ब्रह्मणि तथा मांसे वैद्ये ज्योतिषिके द्विजे । यात्रायाम् पथि निद्रायां महत्शब्दो न दीयते ॥ Q. Can the epithet नैकटिक be applied to every thing nigh ? Ans. निकट इत्यस्मात् ठक् स्यात्, यस्य शास्त्रतो निकटनिवासः तस्मिन् गम्ये । "आरण्यकेन भिक्षुणा ग्रामात् क्रोशे वस्तव्यम्" इति शास्त्रम् । Q. Is there any defect in the metre, if परिषत्वलान् be used instead of पर्षद्वलान् ? Ans. See above. । १२ ।

13. 14. Principal part :—रामः (उक्तं कर्तृ) प्रियम्भावुकताम् (कर्म) अगात् । Adj. to रामः—चिन्तयन्, जपन्, प्रबुद्धः and प्रणमन् । Object to चिन्तयन्—वृद्धिच्छयौ । Object to प्रणमन्—रविम् । मुनीन्द्राणाम्—सम्बन्धे षष्ठी, 'वृद्धिच्छयौ' इत्यनेन सम्बन्धः । परेद्यवि, अद्य, पूर्व्वेद्युः, अन्येद्युः—कालाधिकरणे । आ—कर्मप्रवचनीयम् । तिष्ठद्गु—अव्ययम् । 'आ योगे' पञ्चमी । सन्ध्याम्—व्याप्तौ द्वितीया । प्रक्रान्ताम्—adj. to सन्ध्याम् । आयतीगवम्--अव्ययम् , कालाधिकरणे । पतत्त्रिभ्यः—निकृष्टादेरुत्कर्षे इति पञ्चमी । प्रातस्तराम्—अव्ययम्, क्रि-विण, gram. connected with प्रबुद्धः ।

Prose order :—(रामः) आयतीगवं प्रक्रान्तां सन्ध्यां (व्याप्य) तिष्ठद्गु आ अपन्, तथा, पतन्निभ्य. प्रातस्तरां प्रबुद्धः, तथा रविम् प्रणमन्, परेद्यवि, अद्य, पूर्व्वेद्युः, अन्येद्युः च अपि, मुनीन्द्राणाम् वृद्धिक्षयौ चिन्तयन्, (तेषां) प्रियम्भावुकताम् अगात्।

Substance :—यदा गावः गोचारणात् स्थानात् प्रत्यावर्त्तन्ते, तदैव सन्ध्या प्रवर्त्तते। गावः गृहं प्रत्यावर्त्त्य प्रथमं कियन्तं कालं दोहनात् पूर्व्वं विश्राम्यन्ति यदा गावः प्रत्यावर्त्तन्ते सः कालः 'आयतीगवम्' इति कथ्यते। यावन्तं कालं व्याप्य दुह्यन्ते सः कालः तिष्ठद्गु इति च कथ्यते। एतावान् एव समयः शास्त्रतः सन्ध्याख्यां लभते। एवंविधं सन्ध्याकालं व्याप्य गायत्रीं जपन् रामः पक्षिणामपि जागरणात् पूर्व्वं शय्याया उत्थाय, सूर्य्यं प्रणमन्, पूर्व्वदिने, वर्त्तमानदिवसे, परदिने, अन्यस्मिन् वा अहनि ऋषीणाम् आयव्ययौ पर्य्यालोच्य तेषां प्रियोऽभूत्।

Explanation in tika form :—परेद्यवीति। आयतीगवम्, आयत्यः (आ-इण-शतृ, ङीप्) आगच्छन्त्यः गावः यत्र स कालः आयतीगवम्, तस्मिन्। कालाधिकरणे सप्तमी। "तिष्ठद्गुप्रभृतीनि च"* इति अव्ययीभावे निपातनात् सिद्धम्। आयतीगवं प्रक्रान्ताम् आरब्धां सन्ध्याम् व्याप्य इति व्याप्त्यर्थे द्वितीया। यस्मिन् काले गावः प्रत्यागच्छन्ति तम् आरभ्य इत्यर्थः। तिष्ठद्गु, तिष्ठन्त्यः गावः यस्मिन् काले स कालः तिष्ठद्गु, "तिष्ठद्गुप्रभृतीनि च" इति पूर्व्ववत् अव्ययीभावे निपातनम्। तस्मात् आ इति तिष्ठद्गु आ। "पञ्चम्यपाङ् परिभिः" इति आयोगे पञ्चमी, तिष्ठद्गु इत्यत्र च पञ्चमीविभक्तिलोपः। ननु आतिष्ठद्गु इति एकपदम्। अपन् गायत्रीं देवताम् आराधयन्, रामः इति ऊह्यं कर्तृपदम्। तथा, पतन्निभ्यः

---

* The compound words तिष्ठद्गु, आयतीगवम् &c are formed irregularly in अव्ययीभाव samas, the former signifying the time in which the cows take rest after their arrival from their pasture ground, before they are milked. The word आयतीगवम् signifies the time when cows return i. e. the twilight.

पतन्तं त्रायन्ते इति पतत्त्राणि पक्षाः तानि सन्ति एषां ते पतत्त्रिणः पक्षिणः, तेभ्यः प्रातस्तरां पूर्व्वमित्यर्थः । "पञ्चमी विभक्ते" इति पञ्चमी (अथवा "निकृष्टादेकोत्कर्षे" इति पञ्चमी) प्रबुद्धः जागरितः पक्षिजागरणात् पूर्व्वमपि शय्याया उत्थायी इत्यर्थः । तथा रविं सूर्य्यं प्रणमन् तस्मै नमस्कुर्व्वन् स रामः इति अध्याहार. । परेद्यवि परस्मिन् दिवसे, अद्य अस्मिन् अहनि, पूर्व्वेद्युः पूर्व्वस्मिन् दिवसे तथा अन्येद्युः अन्यस्मिन् अहनि । सर्व्वाण्येतानि निपातनात् सिद्धानि । कालाधिकरणे सप्तमी । मुनीन्द्राणाम्, मुनयः इन्द्रा तपना इव, इति मुनीन्द्राः तपनवत् तेजस्विनो मुनयः, उपमितसमासः । "इन्द्रः मघोपतावन्तरात्मन्यादित्ययोगयोः" इति विश्वः । अथवा मुनिषु इन्द्राः श्रेष्ठाः इति । तेषां वृद्धिक्षयौ आयव्ययौ शरीरादीनां तपसां वा, यथा तेषां देहस्य तपसो वा वृद्धिः भवेत् क्षयश्च न जायेत तथा मनसि चिन्तयन्, प्रियम्भावुकताम् प्रियताम् अगात् लेभे । मुनीनां प्रियोऽभूदित्यर्थः । अप्रियः प्रियः भवति इति प्रियम्भावुकः, अभूततद्भावार्थे खुकञ् । तस्य भावः प्रियम्भावुकता ताम्, अगात् इत्यस्य कर्म्मपदम् । युग्मकम्, "द्वाभ्यान्तु युग्मकं प्रोक्तं त्रिभिः श्लोकैः विशेषकम् । कलापकं चतुर्भिः स्यात् तदूर्द्ध्वं कुलकं स्मृतम् ॥ वृत्तम् अपरावक्त्रं नाम । सन्ध्याजपविषये यथोक्तं साङ्ख्यायनगृह्ये— "अरण्ये समित्पाणिः सन्ध्यामुपास्ते नित्यं वाग्यतः सावित्रीं जपन् इत्यादि" ।

Change of V.—चिन्तयता प्रियम्भावुकता अगायि अपता, प्रबुद्धेन प्रणमता ।

Derivation.—इन्द्रः—इदि-र: । प्रियः—प्री-कः । प्रियम्भावुकः—प्रिय-भू-खुकञ् । सन्ध्या—सम्-ध्यै-अङ् । ध्यायति, अध्यासीत् । पतत्त्रिन्—पतत्-त्रै-क, इति पतत्त्रम्, ततः इन् ।

গবীগণের প্রত্যাগমন কাল হইতে আরম্ভ করিয়া তাহাদের দোহন কার্য্য শেষ পর্য্যন্ত সন্ধ্যাকালে গায়ত্রী জপ করিয়া, প্রত্যূষে পক্ষীদিগেরও জাগরণের পূর্ব্বে গাত্রোত্থান করিয়া ও সূর্য্যদেবকে প্রণাম করিয়া, ঋষিদিগের বর্ত্তমান দিবস পূর্ব্ব দিবস পর দিবস ও অন্য দিবসের আয় ব্যয় চিন্তা করণান্তর তিনি মুনীন্দ্রদিগের প্রিয়পাত্র হইয়া ছিলেন ।

Repeating Gayatris in the evening commencing from the return

दहशे पर्णशालायां राक्षस्याभिकयाथ सः ।
भार्य्योढ़ं तमवज्ञाय तस्थे सौमित्रयेऽसकौ ॥ १५ ॥

of sows, till they were milked after a short rest, awaking in the morning earlier than birds, bowing to the sun, and thinking over th income and expenses (or rise and decline) of the ascetics, to-day tomorrow, yesterday or any other day, he became a favourite with the best of ascetics.

Q. Is आतिष्ठद्गु a single word? Ans. "तिष्ठद्गु प्रभृतीनि च" इति सूत्रे 'च'कारः अवधारणार्थः । अनेन समासान्तरं न भवति अतः आ तिष्ठद्गु इति पदद्वयम् । Q. Parse तिष्ठद्गु । Ans. आ इति कर्म्मप्रवचनीययोगे पञ्चमी । Q. Parse आयतीगवम् and give its meaning. Ans. कालाधिकरणे सप्तमी । See above। १३, १४ ।

14. First sentence :—अथ राक्षस्या (अनुक्तकर्त्तृ) सः (उक्त कर्म्म) दहशे । अभिकया—Adj to राक्षस्या । पर्णशालायाम्—अधिकरणे। 2nd sentence—असकौ (कर्त्तृ) सौमित्रये (स्थायोगे ४र्थी) तस्थे। Incomplete verb—अवज्ञाय । तम्—object to अवज्ञाय । भार्य्योढम् —Adj to तम् ।

Prose order—अथ सः (रामः) अभिकया राक्षस्या पर्णशालायाम् दहशे । असकौ (राक्षसी) भार्य्योढ़ं तम् अवज्ञाय सौमित्रये तस्थे ।

Substance :—अनन्तरं कदाचित् कामुकी सूर्पणखा ददर्श रामं पर्णशालायाम् । सा च रामं सपत्नीकम् दृष्ट्वा अवज्ञाय च, लक्ष्मणं स्वामिनं वृतवती।

Explanation in tika form :—अथ अनन्तरम्, "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इत्यमरः । सः रामः, दहशे इत्यस्य उक्ते कर्म्मणि प्रथमा । अभिकामयते इति अभिका कामुकी तया अभिकया, अभि इत्यस्मात्

म्। "अनुकाभिकाभीकः कमिता"* पचे अभीकया। राक्षस्यां सूर्पणखया र्णशालायाम् पर्णकुटीरे ददृशे अवलोकितः। असकौ राक्षसी कुत्सिता असौ ति असकौ, पापा असौ राक्षसी इत्यर्थः। "कुत्सिते"§ इति कुत्सितार्थे असौ न्यस्य औकारात् पूर्व्वं अकच् (अक्)। भार्य्योढ़म् कृतदारं तं रामम् अवज्ञाय नादृत्य। ऊढ़ा भार्य्या येन स ऊढ़भार्य्यः भार्य्योढ़ः इति पदद्वयं सिद्धम्।" हिताग्न्यादिषु"।† सौमित्रये लक्ष्मणाय तस्थे, लक्ष्मणसमीपे स्वाभिप्रायं काशितवती इत्यर्थः। "श्लाघ ह्नुङ् स्था शपां ज्ञीप्स्यमानः"‡ इति स्थाधातुयोगे ौमित्रये इत्यत्र चतुर्थी। "प्रकाशनस्थेयाख्ययोश्च"‖ इति स्थाधातोः अभिप्राय-काशार्थे आत्मनेपदम्। वृत्तं पथ्यावक्त्रं नाम।

Change of V.—ददृशे राक्षसी अभिका तम्, तस्थे अमुयका।

Derivation.—अभिका—अभि-कन्। भार्य्या—भृ-ण्यत्। सौमित्रिः—मित्रा-इञ्। असकौ—(सुबन्त) अदस्-अकच्। क्वचित् प्रातिपदिकात्, चित् सुबन्तात् टेः प्राक् अकच् विधानात्।

অনন্তর কামার্ত্তা এক রাক্ষসী তাঁহাকে পর্ণশালায় অবলোকন

---

* अनुक अभिक अभीक इत्येते शब्दाः कन्प्रत्ययान्ता निपात्यन्ते कमिता ustful) इत्यस्मिन् अर्थे। अभि इत्यस्य पचे दीर्घत्वञ्च निपात्यते। अनुकामयते ति अनुकः। अभिकामयते इति अभिकः अभीको वा।

§ In expressing contempt अकच् takes place before the st vowel of a pada. So in the 3rd case अमुया becomes मुयका।

† आहिताग्न्यादिषु क्तप्रत्ययान्तं वैकल्पिकेन पूर्व्वं प्रयुज्यते। आहिताग्निः न्याहितः, ऊढ़भार्य्यः, भार्य्योढ़ः इत्यादि।

‡ The man desired to be informed gets the 4th case, hen followed by श्लाघ, ह्नु, स्था and शप्।

‖ स्था takes आत्मनेपद in the sense of expression (प्रकाशन) arbitration (स्थेय)।

दधाना वलिभं मध्यं कर्णजाहविलोचना ।
वाक्‌त्वचेनातिसर्व्वेण चन्द्रलेखेव पक्षती ॥ १६ ॥

করিল। তাঁহাকে পরিণীত জানিয়া অবজ্ঞাপূর্ব্বক সেই মন্দস্বভাবা রাক্ষসী সুমিত্রানন্দন লক্ষ্মণের নিকট আত্ম অভিপ্রায় প্রকাশ করিল।

He was then met in the 'leaf-thatched' hut by a lustful female demon. Disregarding him for his being married to a wife, the vile one expressed her desire to Laksman the son of Sumitra.

Q. Comment gram. on अभिका, भार्य्योढ़म्, तस्थे, सौमित्रिं and असकौ। Or grammatically comment on the whole sloka. Ans. See above. । १५ ।

16. It contains only some adjectives to असौ in असौ प्रार्थयाञ्चक्रे (sloka 19) viz. दधाना, कर्णजाहविलोचना and वाक्‌त्वचेन उपलक्षिता। चन्द्रलेखा—उपमान कर्त्तृपदम्। मध्यम्—object to दधाना। वलिभम्—Adj to मध्यम्। वाक्‌त्वचेन—उपलक्षणे तृतीया। अतिसर्व्वेण—Adj. to वाक्‌त्वचेन। पक्षती—अधिकरणे।

Prose order :—वलिभं मध्यं दधाना, कर्णजाहविलोचना, अतिसर्व्वेण वाक्‌त्वचेन उपलक्षिता, तथा पक्षती चन्द्रलेखा इव (प्रतीयमाना) असौ (शूर्पणखा) प्रार्थयाञ्चक्रे ।

Substance :—त्रिवलीसमेतं कटिदेशं आकर्णविश्रान्तञ्च लोचनद्वयं धारयन्ती, तथा सर्व्वातिगेन वाक्‌शरीरयोर्माधुर्य्येण उपलक्षिता, द्वितीयाचन्द्रकलावत् लक्ष्यमाणा असौ लक्ष्मणं प्रार्थयामास ।

Explanation in tika form :—दधानेति। असौ प्रार्थयाञ्चक्रे इति परश्लोकेन (१९) अन्वयः। असौ कीदृशी इत्याह, दधानेति। वलिभं वलयः सन्ति अस्मिन् इति वलिभं त्रिवलिसमेतं, 'तुन्दि वलिवटेः भः'* इति

* तुन्दिभः (having a large belly), वलिभः (having a wrinkled waist), वटिभः (having louse).

भः। मध्यं स्तनजघनयोः अन्तरं दधाना धारयन्ती। तथा कर्णजाहविलोचना, कर्णयोः मूले कर्णजाहे, कर्ण इत्यस्मात् मूले अर्थे जाहचप्रत्ययः।† तयोः (७मी) विश्रान्ते विलोचने नयने यस्याः, "सप्तम्युपमानपूर्व्वस्य च उत्तरपदलोपः" इति सप्तम्यन्तात् उत्तरपदलोपो बहुब्रीहिः। सा आकर्णविस्तृतनयना। तथा सर्व्वम् अतिक्रान्तम् अतिसर्व्वम्, "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति द्वितीयातत्पुरुषः। तेन अतिसर्व्वेण सर्व्वातिशायिना वाक्त्वचेन इत्यस्य विशेषणम्। वाक् च त्वक् च वाक्त्वचम्, टच्प्रत्ययः, प्राण्यङ्गत्वात् च एकवद्भावः। तेन वाक्त्वचेन उपलक्षिता अतः उपलक्षणे तृतीया। सा वाण्या देहकान्त्या च सर्व्वान् अतिक्रम्य अवर्त्तत इत्यर्थः। तथा पक्षस्य अर्द्धमासस्य मूलम् इति पक्षतिः। पक्ष इत्यस्मात् मूले अर्थे तिः। प्रतिपत् इत्यर्थः। लक्षणया द्वितीया इति गम्यते, प्रतिपदि चन्द्रस्य अदर्शनात्। पक्षतौ द्वितीयायाम् चन्द्रस्य शशिनः लेखा कला इव, तद्वत् प्रतीयमाना इत्यर्थः। द्वितीयाचन्द्रस्य कार्श्यात् सा कृशाङ्गी इति गम्यते। उपमालङ्कारः। वृत्तम् पथ्यावक्त्रम्।

Change of V.—दधानया कर्णजाहविलोचनया चन्द्रलेखया इव सः प्रार्थयाञ्चक्रे।

Derivation.—वलिभम्—वलि-भः। कर्णजाह—कर्ण-जाहच्। चन्द्रः—चदि-रः। पक्षतिः—पक्ष-तिः। विलोचनम्—विलोक्यते अनेन इति लोच्-धातोः करणे ल्युट्। लोचते लट्। अलोचिष्ट लुङ्।

সেই রাক্ষসী ত্রিবলীযুক্ত মধ্যদেশ ও আকর্ণবিস্তৃত নয়ন ধারণ করিয়াছিল, বাক্য ও দেহকান্তিতে সকলকে পরাভূত করিয়াছিল, দেখিতে যেন প্রতিপচ্চন্দ্রকলার ন্যায়।

With waist undulated and eyes extended to the bottom of the ears, and appearing like the lunar digit on the first day of lunar fortnight, surpassing all others in voice and complexion. (She solicited &c. sl. 19.)

---

† "तस्य मूले कर्णादिभ्यो जाहः पक्षात् तिः" कर्णजाहम्, पक्षतिः। आ० बो०॥

सुपाद् द्विरदनासोरुर्मृदुपाणितलाङ्गुलिः ।
प्रथिमानं दधानेन जघनेन घनेन च ॥ १७ ॥

Q. Show the propriety of the simile. Ans. See above. Q. Explain the formation of the words वलिभ, कर्णजाह and पचति: । Ans. See above. Q. What is the samas in अतिसर्व्वेण and वाकलचेन। Ans. See above. । १६ ।

17. Adjectives to असौ (सूर्पणखा, sloka 19.)—सुपात्, द्विरदनासोरुः, मृदुपाणितलाङ्गुलिः and जघनेन उपलक्षिता । Adj. to जघनेन—दधानेन and घनेन। प्रथिमानम्—object to दधानेन ।

Prose order :—सुपात्, द्विरदनासोरुः, मृदुपाणितलाङ्गुलिः, प्रथिमानं दधानेन घनेन जघनेन च उपलक्षिता (असौ सूर्पणखा प्रार्थयासक्त ।)

Substance :—तस्याः राक्षस्याः पादौ शोभनौ आस्ताम् ऊरुद्वयं करिकरौ इव अलक्ष्यत पाणितलम् सुकोमलम् आसीत् अङ्गुलिश्च, सा च राक्षसी पृथुं घनञ्च जघनं धृतवती ।

Explanation in tika form—पुनः कीदृशी असौ सूर्पणखा, तदाह सुपादिति । शोभनौ पादौ यस्याः सा सुपात । "संख्या सु पूर्व्वस्य"* इति बहुव्रीहिसमासे अकारलोपः । रद्यते उत्खन्यते अनेन इति रदः दन्तः रदधातो करणार्थे घः † । द्वौ रदौ यस्य स द्विरदः हस्ती तस्य नासा शुण्ड इव ऊरू यस्याः सा द्विरदनासोरुः "ऊरूत्तरपदात् औपम्ये"+ इति ऊङ् वम् । करभोरु.

* संख्या पूर्व्वस्य सु पूर्व्वस्य च बहुव्रीहेः पादशब्दान्तस्य अकारस्य लोपः स्यात् । यथा द्विपाद्, सुपाद् इति । पक्षे सुपदी । "पादः अन्यतरस्याम्" इति ङीप्-विधानस्य वैकल्प्यात् ।

† "पुंसि संज्ञायां घः प्रायेण" इति पुंलिङ्गे । संज्ञायाञ्च, करणे अधिकरणे वा घः ।

+ When ऊरु is the last word of a compound word,

इत्यर्थः । पुनः कीदृशी तदाह, मृदुपाणितलाङ्गुलिः । तलञ्च अङ्गुलयश्च तलाङ्गुलि, प्राण्यङ्गत्वात् समाहारद्वन्द्वः । पाण्योः तलाङ्गुलि पाणितलाङ्गुलि, मृदु कोमलं पाणितलाङ्गुलि यस्याः तादृशी तथा, पृथोः भावः प्रथिमा, पृथु इत्यस्मात् इमनिच् । ऋकारस्य च रकारः । तं प्रथिमानं स्थूलत्वं दधानेन धारयता धा-धातोः शानच्, घनेन निविड़ेन जघनेन कट्याः पुरोभागेन उपलक्षिता, "इत्थंभूतलक्षणे" इति तृतीया । "पश्चात् नितम्बः स्त्रीकट्याः क्लीवे तु जघनं पुरः" इत्यमरः । वृत्तम् पथ्यावक्त्रम् ।

Change of V.—सुपदा, द्विरदनासोर्व्वा मृदुपाणितलाङ्गुल्या (अमुया प्रार्थयाचक्रे) ।

Derivation.—रद-—रद-घ । जघनम्—वक्रं हन्ति चलति इति जघनं यङ्लु हन्धातोः अच्, नि । पाणिः—पण व्यवहारे इति पणधातोः इन् । लट् पणायते,पणते । लुङ् अपणायिष्ट अपणिष्ट । लिट् पणायाम्बभव, पणायामास, पणायाञ्चक्रे, पेणे । प्रथिमन्—पृथु-इमनिच् । रूपं यथा, प्रथिमा, प्रथिमानौ प्रथिमानः । प्रथिमानं प्रथिमानौ प्रथिम्नः । प्रथिम्ना, प्रथिमभ्याम &c ।

তাহার পাদদ্বয় সুগঠিত, ঊরুদ্বয় হস্তিশুণ্ডবৎ, হস্ততল ও অঙ্গুলি কোমল, জঘন ঘন ও বিস্তৃত।

With feet well formed, with thighs shaped like the trunks of an elephant, with loins extensive and firm, and having soft palms and fingers (she solicited &c.)

Q. Has सुपाद any other form ? Ans. सुपदी इति पदान्तरं । "पादः अन्यतरस्याम्" इति वैकल्पिक-ईप्विधानेन सुपदी सुपाद् इति पदद्वयम् । **Q. Account for long ऊ at the end of** द्विरदनासोरुः । Ans., See above. **Parse** जघनेन **and expound the samas in** मृदुपाणितलाङ्गुलिः । Ans. See above. । १७ ।

---

and is preceded by a word signifying an object of comparison, the short उ in ऊरु is transformed into long ऊ ।

उन्नसं दधती वक्त्रं शुद्धदल्लोलकुण्डलम् ।
कुर्व्वाणा पश्यतः शंयून् स्रग्विणी सुहसानना ॥ १८ ॥

18. Adj. to शूर्पणखा—दधती, कुर्व्वाणा, स्रग्विणी and सुहसानना । Object to दधती—वक्त्रम् । Adj. to वक्त्रम्—उन्नसम्, शुद्धदत्, लोल-कुण्डलम् । Object to कुर्व्वाणा—पश्यतः (जनान्) । Adj. to पश्यतः —शंयून् ।

Prose order :—उन्नसं शुद्धदत् लोलकुण्डलं वक्त्रं दधती, पश्यतः शंयून् कुर्व्वाणा स्रग्विणी, सुहसानना सा ("तं प्रार्थयाञ्चक्रे" इति परेण अन्वयः ।)

Substance :—नासिका तस्याः उन्नतासीत्, दन्तास्तस्याः शुभ्राः आसन्, तदाननं कुण्डलशोभि हसितमनोरमञ्च आसीत्, पुष्पमालां धारयन्ती सा द्रष्टृणाम् सुखमावहन्ती लक्ष्मणं प्रार्थयाञ्चक्रे ।

Explanation in tika form :—उन्नता नासिका यस्मिन्निति उन्नसम् ["उपसर्गाच्च" उपसर्गात् परो यो नासिकाशब्दः तदन्तात् बहुव्रीहेरच नासिकाया नसादेशश्च] अथवा नसाशब्दस्य रूपं । तथा च रभसः "लपनं वदनं तुण्डमाननं नासिका नसा ।" शुद्धाः शुक्ला दन्ता यस्मिन् तत् शुद्धदत् ["अग्रान्त शुद्ध शुभ्र वृष वराहेभ्यश्च"* इति दन्तस्य दतृ वा, पक्षे शुद्धदन्तमिति] तथा लोले चञ्चले कुण्डले यत्र तत्तथाभूतं वक्त्रं मुखं [उच्यते अनेनेति वक्त्रं, वच् धातोश्च औणादिकष्ट्रन्] दधती बिभ्राणा । ["नाभ्यस्ताच्छतुः" इति नुमभाव] स्रग्विणी सृज्यते इति स्रक् सा विद्यते अस्याः इति स्रग्विणी मालावती "अस्माया मेधास्रजो विनिः", इति विनिः । शोभनः हसो हास्यं यत्र तादृशम् आननं यस्य सा तथाविधा । अतएव पश्यतः जनान् शं सुखं तदेषां सन्तीति तथोक्तान् शंयून् विद्यमानसुखान् "कंशंभ्यां बभयुस्तितुतयसः"† इति युस् । कुर्व्वाणा अयः

---

* The word दन्त preceded by such words as end in अग्र (कुद्मलाग्र &c) and the words viz. शुद्ध, शुभ्र, वृष, वराह, is changed into दतृ (दत्) ।

† कम् उदकसुखयोः, शम् सुखे । आभ्यां सप्त प्रत्ययाः स्युः । कंवः, कंभः, कंयुः, कंतिः, कन्तुः, कन्तः, कंयः एवं शंवः, शंभः, शंयुः &c.

प्राप्य चञ्चूर्य्यमाणासौ पतीयन्ती रघूत्तमम्।
अनुका प्रार्थयाञ्चक्रे प्रियाकर्त्तुं प्रियंवदा ॥ १८ ॥

अपश्यतः ग्रंयून् कुर्व्वाणा पश्यतान् पीडाकरो इत्यर्थः। एतादृशी सूर्पणखा प्रार्थयाञ्चक्रे इति परेण अन्वयः। वृत्तम् पथ्यावक्त्रम्। काव्यलिङ्गमलङ्कारः।

Change of V.—दधत्या......कुर्व्वाणया स्रग्विण्या......सुहसाननया (न प्रार्थयाञ्चक्रे)।

Derivation.—दधती—धा शतृ ङीप्। लट् दधाति, धत्ते। लुङ् अधात्, अधित। ग्रंयून्—ग्रम्-युस्। स्रग्विनी—स्रज् विनि:-ङीप्।

সে উন্নতনাসিক বিশুদ্ধদন্ত ও লোলকুণ্ডল বদন ধারণ করিতেছিল। সহাস্যবদনা ও পুষ্পমালাবিভূষিতা (রাক্ষসী) দর্শনকারীদিগকে পরিতৃপ্ত করিতেছিল।

Having a face with prominent nose, with clean white teeth and with rolling earrings and possessing garlands, with her face smiling, and thus delighting those who looked at her, (she solicited &c.)

Q. Decline दन्त and नासिका। Ans. दन्तः दन्तौ दन्ताः। दन्तम् दन्तौ दन्तान् दतः। दन्तेन दता दन्ताभ्याम् दद्भ्याम् &c। नासिका नासिके नासिकाः, नासिकाम् नासिके नासिकाः नसः, नासिकया नसा नासिकाभ्याम् नोभ्याम् &c। Q. Account for आत्मनेपद in कुर्व्वाणा। Ans. "फलवत्कर्त्तरि आत्मनेपदम्।" पश्यतः ग्रंयून् कुर्व्वती आत्मानं लाभवन्तं मन्यमाना इत्यर्थः। Q. Is दधन्ती correct? Ans. दधती इति साधु। "नाभ्यस्तात् शतुः नुम्" इति नुमागमप्रतिषेधः। १८।

19. Principal part:—असौ (कर्त्तृ) रघूत्तमं (कर्म्म) प्राप्य प्रियाकर्त्तुं (व्यम्) प्रार्थयाञ्चक्रे। Adj. to असौ—चञ्चूर्य्यमाणा, पतीयन्ती, अनुका and प्रियंवदा। रघूत्तमम्—object to पतीयन्ती।

Prose order:—चञ्चूर्य्यमाणा पतीयन्ती, अनुका प्रियंवदा असौ रघूत्तमं प्राप्य प्रियाकर्त्तुं प्रार्थयाञ्चक्रे।

Substance :—इत्वरी विचरन्ती प्रियभाषिणी सा कामुकी राघवश्रेष्ठं लक्ष्मणम् उपेत्य तम् अनुकूलयितुम् प्रार्थितवती।

Explanation in tika form :—चञ्चूर्यमाणा गर्हितमाचरन्ती ("लुप सद चर जप जभ दह दश गृभ्यो भावगर्हायाम्" इति धात्वर्थगर्हार्थां* यङ्] पतीयन्ती आत्मनः पतिमिच्छन्ती ["सुपः आत्मनः क्यच्" इति आत्मनः इच्छायाम् क्यच्] अनुका कामुकी "कामुके कमितानुकः" इत्यमरः। अनुकामयते इति अनुका निपातनात् सिद्धम्। प्रियं वदतीति प्रियंवदा मधुरभाषिणी ["प्रियवशे वदः खच्] असौ राक्षसी रघुषु उत्तमं रघुश्रेष्ठं लक्ष्मणं प्राप्य प्रियाकर्तुं सुमिष्टवचसा अनुकूलयितुम्। "सुखप्रियात् आनुलोम्ये"† इति प्रिय इत्यस्मात् डाच्। प्रार्थयाञ्चक्रे प्रार्थितवती। परिगृहेण मामनुगृहाण् अर्हसि इत्यादि रूपं याचितवती इत्यर्थः। "कलापकं चतुर्भिः स्यात्" इति कलापकम्।

Change of V.—चञ्चूर्यमाणया पतीयन्त्या अनुकया प्रियंवदया रघूत्तमः प्रार्थयाञ्चक्रे।

Derivation.—चञ्चूर्यमाणा—चर-यङ्-शानच्। पतीयन्ती—पति-स्वेच्छायां क्यच्। प्रियाकर्तुम्—प्रिय-कृ-डाच्।

. গর্হিত চারিণী সেই কামাতুরা প্রিয়ভাষিণী রাক্ষসী রঘুশ্রেষ্ঠকে আপন পতিরূপে বরণ করিতে অভিলাষিণী হইয়া তাঁহার নিকট উপস্থিত হইয়া আপনার প্রতি অনুকূল করিবার জন্য প্রার্থনা করিল।

Acting a part censurable, and desirous of getting her husband she found the best of Raghus, and lustful as she was, solicited him with kind words, to secure his good will.

Q. 'कटु औषधं प्रियाकरोति'। Correct or justify the

---

* When it is used in bad sense.

† डाच् takes place after सुख and प्रिय in the sense of being agreeable. औषधं प्रियं करोति, here no डाच्, the medicines being disagreeable.

सौमित्रे मामुपायंस्थाः कन्यामिच्छुर्वशंवदाम् ।
सुभोगीनां सहचरीमशङ्कः पुरुषायुषम् ॥ २० ॥

above. Ans. 'सुखप्रियात् आनुलोम्ये' । अनुकूलतायां मय्यायाम् डाच् स्यात् । औषधस्य अरुचिकरत्वात् न डाच् स्यात् । अतः 'कटु औषधं प्रियं करोति' इत्येवं भवति । Q. Write notes on the word रघु here. Ans. रघोः अपत्यानि पुमांसः इति राघवः, राजवाचिभ्यः बहुवचने अण् लोपः । Q. Account for आत्मनेपद of चक्रे in प्रार्थयाञ्चक्रे । Ans. 'कृञ्च अनुप्रयुज्यते' इति आत्मनेपदिनः अर्थधातोः अनुप्रयोगात् 'कृ'-धातोरपि आत्मनेपदम् । १९ ।

20. Principal part.—सौमित्रे माम् उपायंस्थाः (त्वमिति शेषः) Adj.s to माम्—कन्यां, वशंवदाम्, सुभोगीनां and सहचरीम् । Adj.s to त्वम्—इच्छुः and अशङ्कः । पुरुषायुषम् (अत्यन्तसंयोगे द्वितीया) ।

Prose order :—सौमित्रे ! इच्छुः अशङ्कः सन् कन्यां वशम्वदां सुभोगीनां पुरुषायुषम् सहचरीं मां उपायंस्थाः (त्वमिति शेषः) ।

Substance :—सुमित्रानन्दन ! अहं त्वां कामये, तव वशस्य समागता अहम् । आमृत्योरहं ते सहचरी । भोगक्षमां मां निःशङ्कं स्वेच्छया परिणेतुमर्हसि ।

Explanation in tika form :—सुमित्रायाः अपत्यं पुमानिति सौमित्रिः तत्सम्बोधने, हे लक्ष्मण इत्यर्थः । सुमित्राशब्दस्य बाह्वादिषु परिगणनात् "बाह्वादिभ्यश्च" इति अपत्यार्थे इञ् । त्वम् इति शेषः । इच्छतीति इच्छुः अभिलाषुकः "विन्दुरिच्छुः" § इति निपातितः । अशङ्कः निर्विकल्पः सन् कन्यां कामयमानां रूपवतीमित्यर्थे "नमि कम्पि स्म्यजस कम हिंस दीपो रः" * इति रप्रत्ययः ।

---

§ विदधातोः नुम्, इष्धातोः छत्वं निपात्यते । वेत्ति इति विन्दुः, इच्छतीति इच्छुः ।

* नम, कम्प, स्मि, अजस, कम. हिंस, दीप । यथा नम्रः कम्प्रः (कम्पान्वितः) स्मेरः, अजस्रम्, कम्रः (कामुकः) हिंस्रः, दीप्रः ।

वशंवदां अहं ते वश्या इति वदन्तीम् "प्रियवशे वदः खच्" इति खच्प्रत्ययः। भुज्यतेऽनेन अस्मिन् वा इति भोगः शरीरम् उपभोग इत्यन्ये "भोगः सुखे स्त्र्यादि-भृतौ अहेश्च फणकाययोः" इत्यमरः। सुभोगाय हितां सुभोगीनां "आत्मन् विश्वजन भोगोत्तरपदात् खः"† इति खः। पुरुषस्य आयुः पुरुषायुषम् यावत्, अत्यन्तसंयोगे द्वितीया अचतुरेत्यादिना ‡ निपातितः। सहचरीं सहगामिनीं माम् उपायंस्थाः परिणय। आशंसायां भूतवच्च इति लुङ्। "उपाद्यमः स्वकरणे" [स्वकरणं स्वीकारः, स्वीकारार्थे उपाद्यमः आत्मनेपदम्] इति आत्मनेपदत्वम्, उपायथाः इति पदान्तरम्।

Change of V.—अहं उपायंसि कमा इच्छुना वशंवदा सुभोगीना सह-चरी भवद्भिः।

Derivation :—उपायंस्थाः—उप-यम-लुङ् थास्। लट् उपयच्छते कमाम्—कम-रः ततष्टाप्। लट् कामयते। लुङ् अचीकमत, अचकमत। इत्—इण-उ (निपातः)। वशंवदाम्—वश-वद-खच्। सुभोगीनां—सुभोग-ख-टाप्। सहचरीम्—सह-चर-टः स्त्रीत्वादीप्।

হে সুমিত্রানন্দন, আমি তোমার জন্য লালায়িত, তোমার বশংবদ, ভোগক্ষম ও যাবজ্জীবন তোমার অনুচর। আমাকে স্বেচ্ছাক্রমে নিঃশঙ্কে বিবাহ কর।

O thou! the son of Sumitra, marry me of your own accord without hesitation, me who am willing and under your subjection, fit to be enjoyed and a companion to the full term of man's life.

---

† The affix ख (ईन) takes place after आत्मन्, विश्वजन and such words as end in भोग। Thus आत्मनीन, विश्वजनीन सुभोगीन।

‡ अचतुर, विचतुर, सुचतुर, स्त्रीपुंस, धेन्वनडुह, ऋक्साम, वाङ्मनस अक्षिभ्रुव, दारगव, ऊर्वष्ठीव, पदष्ठीव, नक्तन्दिव, रात्रिन्दिव, अहर्दिव, सरजस निःश्रेयस, 'पुरुषायुष', द्व्यायुष, त्र्यायुष, ऋग्यजुष, जातोक्ष, महोक्ष, वृद्धोक्ष उपशुन, गोष्ठश्वप्रभृतयः अचतुरादयः।

तामुवाच स गोष्ठीने वने स्त्रीपुंसभीषणे।
असूर्य्यम्पश्यरूपा त्वं किमभीरुररार्य्यसे॥ २१॥

Q. Account for the लुङ् form in उपायंस्ताः। Ans. "आशंसायां (desire) भूतवच्च" भविष्यति काले भूतवत् वर्त्तमानवच्च प्रत्ययाः भवन्ति आशंसायाम् इति भविष्यति काले लुङ्। Q. Can लङ् or लिट् be used under the above condition? Ans. "सामान्यातिदेशे (extended application of a common term) विशेषानतिदेशः" तेन लङ्लिटौ न। Q. Comment gram. on the above sloka. (i. e. on सौमित्रिः, उपायंस्ताः, वशंवदाम्, धर्म्मोनाम् and पुरुषायुषम्)। Ans. See above.। २०।

. 21. Principal sentence :—स ताम् उवाच। Sub-ordinate sentence—त्वं किं अरार्य्यसे। Adj. to त्वं—असूर्य्यम्पश्यरूपा and अभीरुः। वने अधिकरणं। Adj. to वने—स्त्रीपुंसभीषणे and गोष्ठीने।

Prose order—स ताम् उवाच। असूर्य्यम्पश्यरूपा त्वं गोष्ठीने स्त्रीपुंसभीषणे वने अभीरुः (सती) किं अरार्य्यसे।

Substance :—यस्मिन् अत्र वने इदानीं व्याघ्रादिभयात् गावः न सञ्चरन्ति कथं तस्मिन् मानुषभीषणे वनेऽस्मिन् असूर्य्यम्पश्यरूपापि त्वं अभीरुरिव पर्य्यटसि इति ताम् उवाच लक्ष्मणः।

Explanation in tika form :—स लक्ष्मणः तां राक्षसीम् उवाच उक्तवान्। किमित्याह, असूर्य्यम्पश्यरूपा अपरिहार्य्यदर्शनं सूर्य्यमपि न पश्यतीति असूर्य्यम्पश्यं 'असूर्य्यललाटयोः दृशि तपोः' इति खश्। दृशिना सम्बन्धस्य नञः सापेक्षत्वेऽपि गमकत्वात् समासः। तथाभूतं रूपं यस्याः सा तथोक्ता एतेन अमानुषीत्वं दर्शितम्। त्वं गोष्ठीने गोष्ठं भूतपूर्व्वं यस्मिन् अधुना गोसञ्चारोऽपि नास्ति तथाभूते, 'गोष्ठात् खञ् भूतपूर्व्वे' इति खञ् (ईन)। हिंस्रजन्तुभयात् नेदानीं गावोऽत्र सञ्चरन्ति अतः भयजनके इत्यर्थः। स्त्री च पुमांश्चेति स्त्रीपुंसौ [अचतुरेत्यादिना निपातः] तयोः भीषणं भयजनकं ['कृत्यल्युटो बहुलम्' इति कर्त्तरि

मानुषानभिलष्यन्तो रोचिष्णुर्दिव्यधर्म्मिणी ।
त्वमप्सरायमाणेह स्वतन्त्रा कथमश्वसि ॥ २२ ॥

ल्युट्] तस्मिन् अभीरु: भयरहिता सती 'ऊङुत:'* इति न ऊङ् । किम कथं आरार्यसे अत्यर्थम् अटसि । यङन्तात् ऋधातो: लट् । अस्मिन् भयावहे स्थाने न मानुषप्रचार: सम्भवति, अत: त्वं मानुषरूपधारिणी काचित् निशाचरी भवे: इति गमितार्थ: । वृत्तं पथ्यावक्त्रम् ।

Change of V.—सा तेन ऊचे । असूर्य्यम्पश्यरूपया त्वया अभीर्वा अरार्य्यते ।

Derivation.—उवाच—ब्रू-लिट् । लट् ब्रवीति, आह, ब्रूते । लुङ् अवोचत्, अवोचत । गोष्ठीने—गोष्ठ (गोस्था-क) खञ् । भीषण—भी-णिच् कर्त्तरि ल्युट् । असूर्य्यम्पश्य—न सूर्य्य-दृश-खश् । अभीरु:—न-भी-क्रु । अरार्य्यसे—ऋ-(यङन्त) लट से । आरत् आर्षीत् लुङ् ।

लक्ष्मण তাহাকে বলিলেন, তোমার রূপ সূর্য্য অবলোকন করে নাই। যাহাকে দেখিয়া স্ত্রীপুরুষ উভয়েই ভীত হয় সেই এই হিংস্র-জন্তুপূর্ণ বনে তুমি কেন নির্ভয়ে বিচরণ করিতেছ ?

Why do you walk fearless, said he to her, in this forest rendered fearful both to the males and females, having no mark of cattle-fields which it had once possessed, you being one whose person has not seen the sun. (Has not been exposed to the sun.)

Q. Show the propriety of यङ् **in** अरार्य्यसे । Ans. भृशं पुन: पुन: इतस्तती भ्रम्यसि इति यङा सूच्यते । **Q. Comment gram. on** असूर्य्यम्पश्यरूपा । Ans. See above. **Q. In what other sense can** किम् **be used ?** Ans. कुत्सितार्थेऽपि किम शब्दप्रयोगोऽस्ति । यथा किंपुरुष: । २१ ।

---

* "ऊङुत:" । उकारान्तात् अयोपधात् मनुष्यजातिवाचिन: स्त्रियामूङ् स्यात् इति न ऊङ्, मनुष्यजातित्वाभावात् । अयोपधात् किम्, अध्वर्यु: ।

22. Principal part :—इह त्वं कथम् अत्वसि। Adj. to त्वम्— अभिलष्यन्ती, रोचिष्णुः, दिव्यधर्म्मिणी, अप्सरायमाणा and स्वतन्त्रा। मानुषान् —object to अभिलष्यन्ती।

Prose order :—मानुषान् अभिलष्यन्ती, रोचिष्णुः, दिव्यधर्म्मिणी, अप्सरायमाणा त्वं स्वतन्त्रा (सती) इह कथम् अत्वसि ?

Substance.—देववत् स्वेच्छया पररूपमास्थाय अप्सरस इव प्रतीयमाना त्वं मानुषं कामयमाना कथमिह सौन्दर्य्यशोभिता स्वाधीना भ्रमसि ?

Explanation in tika form:—मनोरपत्यानि मानुषाः ["मनोर्जाता-वञ्यतौ षुक् च"* इति अञ्] तान् अभिलष्यन्ती कामयमाना रन्तुमिच्छन्ती (पक्षे अभिलषन्ती) रोचिष्णुः रोचनस्वभावा दीप्ता इत्यर्थः। अलं कृञित्यादिना इष्णुच्। अतएव दिवि भवा दिव्या देवाः, राक्षसा अपि देवयोनित्वात्, तेषां धर्म्मः स्वभावः सोऽस्या अस्तीति [इनिप्रत्ययः] अप्सरस इव आचरन्तीति अप्सरायमाणा अप्सरसभावं गता मित्यर्थः। ["कर्त्तुः क्यङ् सलोपश्च"† त्वं स्वं तन्त्रं प्रधानं यस्याः सा तथा "तन्त्रः कुटुम्बे कृत्ये स्यात् कारणेऽपि परिच्छदे। शास्त्रे प्रधाने सिद्धान्ते तन्त्रवाये गदोत्तमे" इति विश्वः। स्वाधीना सती, अपराधीनत्वात्। अनया उक्त्या राक्षसीत्वं दर्शितम्। इह अस्मिन् वने कथम् अत्वसि भ्रमसि। इतं पथ्यावक्त्रम्।

Change of V.—त्वया मानुषान् अभिलष्यन्त्या, रोचिष्ण्वा, दिव्यधर्म्मिण्या अप्सरायमाणया, स्वतन्त्रया अत्यते।

Derivation :—मानुष—मनु-अञ् षुगागमः। अभिलष्यन्ती—अभि-लष-श्यत, स्त्रीत्वात् ईप्। लट् लष्यति लष्यते। लुङ् अलाषीत् अलषीत्। रोचिष्णुः—रुच-इष्णुच्। अप्सराय—शानच्। अत्वसि—अनुच। लुङ् आत्वीत्।

---

* अञ् and यत् preceded by षुक (ष) take place after मनु to signify a race. Thus मानुष, मनुष्य।

† उपमानात् कर्त्तुः सुबन्तात् आचारात् (to act for) क्यङ् वा स्यात्, मानस्य तु कर्त्तृवाचकस्य लोपो वा स्यात्। "ओजसोऽप्सरसो नित्य"मिति वचनात् नित्यं सलोपः।



उग्रंपश्याकुलेऽरण्ये शालीनत्वविवर्ज्जिता।
कामुकप्रार्थनापट्वी पतिवत्नी कथन्न वा ॥ २३ ॥

তুমি দেখিতে অপ্সরার ন্যায়, তোমার রূপের ছটা বাহির হইয়াছে। তুমি দিব্যধর্ম্ম অবলম্বন করিতেছ। মানুষের প্রতি আসক্ত হইয়া কেন স্বাধীনভাবে ভ্রমণ করিতেছ।

Lusting for men and guided by your own self, why do you walk like an Apsaras, possess as you do the power of the dwellers of heaven and appear resplendent.

Q. Explain the signification of अप्सरायमाणा। Ans. अप्सरस इव आचरन्ती। अनेन तस्याः राक्षसीत्वं गमितम्। Q. Give the derivative meaning of अप्सरस् and decline it. Ans. अद्भ्यः सरन्ति उद्गच्छन्ति इति अप्सरसः। अप्-सृ-असुन्। "अप्सु निर्म्मथनादेव रसात्तस्मात् वरस्त्रियः। उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन् ॥" Q. Which of the two viz. अप्सरसम् and अप्सराम् is oorrect? Ans. The latter one is correct. The first form is the 2nd case singular of the base अप्सरस which is often used in the plural number. The latter one is of the base अप्सरा। अप्सर कुम्भरादित्वात् रः। Declension—अप्सरसः अप्सरसः अप्सरोभिः अप्सरोभ्यः अप्सरसाम्, अप्सरःसु। Q. Decline स्व and सर्व्वस्व in the 4th case singular. Ans. स्वस्मै स्वाय, सर्व्वस्वाय। "स्वमज्ञातिधनाख्यायाः।" २२।

23. Principal part :—अरण्ये (त्वम्) पतिवत्नी कथं वा न (भवसि) Adj. to अरण्ये—उग्रंपश्याकुले। Adj. to त्वम्—शालीनत्वविवर्ज्जिता and कामुकप्रार्थनापट्वी।

Prose order :—उग्रंपश्याकुले अरण्ये शालीनत्वविवर्ज्जिता, कामुकप्रार्थनापट्वी, (त्वम्) पतिवत्नी कथं वा न भवसि।

Substance :—धृष्टा कामुकानां प्रार्थनायाम् चतुरा त्वं कथं न भवसि पतिसमेता अस्मिन् सिंहव्याघ्रसमाकुले अरण्ये।

Explanation in tika form :—उग्रं पश्यन्तीति उग्रंपश्याः सिंह-व्याघ्रादयः पापाशयत्वात् शवरादयो वा ['उग्रंपश्य इरम्मद पाणिन्धमाश्च' इति खश् निपात्यते] तैः आकुले व्याप्ते अरण्ये अस्मिन् वने। शालाप्रवेशमर्हतीति शालीना अधृष्टा ["शालीनकौपीने अधृष्टाकार्य्ययोः" इति खञ् निपात्यते] शालीनाया भावः शालीनत्वम् अधृष्टत्वम्, तेन विवर्ज्जिता शालीनत्वविवर्ज्जिता धृष्टा इत्यर्थः। कामुकस्य कामलोलस्य प्रार्थनायां पट्वी चतुरा "वोतोगुणवचनात्"* इति ङीष्। एवम्भूता त्वं पतिर्विद्यतेऽस्या इति पतिवत्नी सभर्त्तृका "पतिवत्नी सभर्त्तृका" इत्यमरः। ["अन्तर्वत्नपतिवतोर्नुक्" इति ङीपि, नुगागमः] कथं वा न भवसि। पत्या अविच्छिन्ना भवितुमर्हसि पतिसत्त्वे ईदृक्स्वातन्त्र्या-भावः इत्यर्थः।

Change of V.—शालीनत्वविवर्ज्जितया कामुकप्रार्थनापट्व्या पतिवत्न्या कथं वा न भूयते।

Derivation :—उग्रंपश्य—उग्र दृश खश् (निपातनम्)। अरण्ये—ऋ अन्यः। ऋच्छति लट्। आरत् आर्षीत लुङ्। शालीनत्व—शाला-खञ्-त्व। कामुक—कम-उकञ। कामयते लट्। अचीकमत अचकमत लुङ्। पतिवत्नी—पति-मतुप् ङीप। विवर्ज्जित—वि-वृज क्त।

তুমি কামুকপ্রার্থনায় চতুরা ও লজ্জাহীনা। তুমি এই ভীষণ জন্তু-সমাকুল বনে কেন পতিসঙ্গতা নহ ?

Devoid of modesty and dexterous in amorous solicitations, why have you not husband with you in this forest infested by fierce animals.

Q Give the other form of पट्वी। Ans. पटुः। 'वोतो

---

* Adjectives ending in उ take ई in the feminine gender optionally. Thus पट्वी पटुः, गुर्वी गुरुः &c.

राघवं पर्णशालायामिच्छानुरहसं पतिम्।
यः स्वामी मम कान्तावानौपकर्णिकलोचनः॥ २४॥

'गुणवचनात्' इति विभाषया ङीप् विधानात्। Q. Conjugate वृज् in लट्। Ans. 'वृणक्ति वृजिनैः सङ्गं वृक्ते च वृषलैः सह। वर्जत्यनार्जवोपेतैः स वर्जयति दुर्जनैः।' इति कविरहस्यम्। वृज्=to avoid, वृजिन=the wicked, वृषल=शूद्र, अनार्जव=wickedness.। २३।

24. Principal part :—त्वं (कर्तृ, उत्तम) राघवं (कर्म) पतिम् (विधेय विशेषणम्) इच्छ। पर्णशालायाम्—अधिकरणे। अनुरहसम्—Adj. to राघवम्। Another sentence—यः (कर्तृ) मम (सम्ब) स्वामी (विध) भवति। Adj. to यः—कान्तावान्, औपकर्णिकलोचनः।

Prose order :—पर्णशालायां (स्थितं) अनुरहसं राघवं पतिम् इच्छ। यः मम स्वामी, कान्तावान्, औपकर्णिकलोचनः (भवति)।

Substance :—पर्णशालायाम् निर्ज्जनप्रदेशस्थितं राममेव तावत् पतिं स्वीकुरु। स प्रभुः, अहन्तु परवान्, स कान्तारसज्ञः अहन्तु तपस्वी, स सुदर्शनः नाहं तथा, अतः त्वं तमेव भजस्व इति।

Explanation in tika form :—पर्णैः निर्म्मिता शाला पर्णशाला उटजं तत्र स्थितम्। अनुगतो रहः इति अनुरहसं (प्रादिसमासः) ["अन्ववतप्ताद्रहसः"* इति समासान्त अच्, विजनस्थानगतमित्यर्थः। राघवं रामं पतिम् इच्छ पतित्वेन कामयस्व इत्यर्थः। यो राघवः ममापि स्वामी प्रभुः तस्मिन् सति मद्वरणं न युक्तमिति भावः। तथा कान्तावान् सभार्य्यः कान्तासुखाभिज्ञः अहन्तु तपस्वी इति ध्वनिः। तथा कर्णयोः समीपं उपकर्णम् सामीप्यार्थे अव्ययीभावः। तत्र प्रायभवे औपकर्णिके, कर्णान्तायते ["उपजानूपकर्णोपनीवेष्ठक्"† इति ठक् प्रत्ययः] तादृशे लोचने यस्य स कर्णान्तविश्रान्तनेत्रः, भवतीति शेषः। एतेन रामस्य रूपवत्त्वं दर्शितम्। पथ्यावक्त्रं वृत्तम्।

---

* अनु अव तप्त इत्येतेभ्यः परो यः रहसशब्दः तदन्तात् समासान्त अच् प्रत्ययो भवति इति समासान्त अच्। यथा, अनुरहसम्, अवरहसम्, तप्तरहसम्।

† औपजानुकः, औपकर्णिकः, औपनीविकः।

वपुश्चान्दनिकं यस्य कार्णवेष्टनिकं मुखम्।
संग्रामे सर्व्वकर्म्मीणौ पाणी यस्यौपजानुकौ ॥ २५ ॥

Change of V.—राघवः अनुरहसः पतिः इष्यताम्। येन स्वामिना, कान्तीवता, औपकर्णिकलोचनेन (भूयते)।

Derivation.—राघवः—रघु-अण्। पर्ण—पृ नः। इच्छ—इष-लोट् हि। लुङ् ऐषीत्। लिट् इयेष। स्वामी—स्व-आमिनच्। कान्तावान्—कान्ता-मतुप्। औपकर्णिक—उपकर्ण ठक्।

রামচন্দ্র পর্ণশালায় নির্জ্জনে অবস্থান করিতেছেন। তুমি তাঁহাকে পতিরূপে বরণ কর। আকর্ণবিস্তৃতনয়ন রামচন্দ্র আমার প্রভু। তিনি স্ত্রীসম্ভোগ করেন।

Desire to get a husband in Raghava (Rama) who is solitary in the leaf-thatched cottage. He is my master, has a wife (has had a married life) with his eyes extended to the corner of his ears.

Q. Show the significance of स्वामी। Ans. स्वः ऐश्वर्य्यं विद्यते अस्य असौ स्वामी। "स्वामिन् ऐश्वर्य्ये" इति ऐश्वर्य्यं गम्ये स्व-शब्दात् आमिनच्। अहं हि तस्य धनम्, अतः न मे स्वातन्त्र्यमस्ति इति स्पष्टार्थः। २४।

26. Analysis is not necessary. See below.

Prose order :—यस्य वपुः चान्दनिकम् यस्य मुखं कार्णवेष्टनिकम्, यस्य औपाजानुकौ पाणी संग्रामे सर्व्वकर्म्मीणौ (भवतः, तमिच्छ)।

Substance :—यस्य रामस्य शरीरं चन्दनशोभितं मुखञ्च कर्णवेष्टनाभ्यां शोभते यस्य च आजानुलम्बितौ बाहू युद्धे सर्व्वकर्म्मणि व्यापृतौ भवतः तमेव वीरं पतिम् इच्छ।

Explanation in tika form :—यस्य राघवस्य वपुः शरीरं, उप्यन्ते देहान्तरभोगसाधनानि बीजानि अत्र इति वपुः, वप्धातोः उसिन्। *चान्दनिकं चन्दनेन सम्पादि इति चान्दनिकम्, तेन अधिकं शोभते इत्यर्थः। "सम्पादिनि"*

---

* तृतीयान्तात् सम्पादिनि अर्थे ठञ् स्यात्। यथा चन्दनेन सम्पादि

इति ठञ] मुखञ्च कार्णवेष्टनिकं कर्णवेष्टनाभ्यां कर्णालङ्काराभ्यां कुण्डलाभ्यां शोभते [अत्रापि "सम्पादिनि" इति ठञ्प्रत्ययः' कार्णवेष्टकिकमिति वा, जानुनोः समीपं उपजानु, सामीप्ये अव्ययीभावः। तत्र प्रायभवौ इति औपजानुकौ ["उपजानूपकर्णोपनीवेष्ठक्" § इति निपातः। आजानुलम्बितौ इत्यर्थः।] पाणी बाहू संग्रामे युद्धे सर्व्वकर्मीणौ सर्व्वस्मिन् कर्म्मणि धनुःखड्गादिव्यापारकर्म्मणि व्यापृतः. ["तत्सर्व्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति"‡ इति खः। तत् इत्थ इति पूर्व्वेण अन्वयः।

Change of V.—वपुषा चान्दनिकेन (भूयते), कार्णवेष्टनिकेन मुखेन (भूयते) सर्व्वकर्म्मीणाभ्यां पाणिभ्यां औपजानुकाभ्यां (भूयते)।

Derivation.—वपुः—वप-उस्। चान्दनिक—चन्दन-ठक्। कार्णवेष्टनिक —कर्णवेष्टन-ठक्। सर्व्वकर्म्मीणौ—सर्व्वकर्म-खः। औपजानुकौ—उपजानु-ठक्। पाणि—पण-इण्।

তাঁহার শরীর চন্দনাক্ত, তাঁহার মুখমণ্ডল কর্ণবেষ্টনে সুশোভিত। তাঁহার আজানুলম্বিত বাহুদ্বয় সংগ্রামে সর্ব্ব কার্য্যেই ব্যাপৃত থাকে।

One whose body is besmered with sandal paste, whose head hol s

---

चान्दनिकम् वपुः, कर्णवेष्टनाभ्यां सम्पादि कार्णवेष्टनिकम् मुखम्; वस्त्रयुगेन सम्पादि वास्त्रयुगिकं शरीरम्। वपुरादीनि एतैः अधिकं शोभन्ते इत्यर्थः।

§ ठक (कण) takes place after उपजानु, उपकर्ण and उपनीवि in the sense of प्रायभव (almost reaching) Thus औपजानुकौ पाणी means the arms almost reaching the nearest part of the knees. See औपनीविकः in the next sloka.

‡ ख (ईन) takes place after पथिन् अङ्ग कर्म्मन् पत्र and पात्र preceded by सर्व्व in the sense of pervasion. Thus सर्व्वपथान् व्याप्नोति इति सर्व्वपथीनः। सर्व्वकर्म्माणि व्यापृतः सर्व्वकर्म्मीणौ। एवं सर्व्वपथीनः सर्व्वाङ्गीनः सर्व्वपत्रीणः सर्व्वपात्रीणः।

वद्धो दुर्ब्बलरक्षार्थमसिर्येनौपनीविकः ।
यश्चापमाश्मनप्रख्यं सेषुं धत्तेऽन्यदुर्व्वहम् ॥ २६ ॥

earrings and arms reaching the knees, are dexterous in all the deeds in a battle.

Q. Translate into sanskrit—Falling on his knees he begged. Ans. जानुभ्याम् अवनीं स्पृष्टा ययाचे। Q. In what sense are the words चान्दनिकम् and सर्व्वकर्मीणो formed? Ans. See above. Q. Name some words that have ण not preceded by ऋ, र, ष। Ans. वाणी तृणीर वेणी फणि मणि लवणं कोण कल्याण बाणाः। गौणी श्रोणीर्गुणागर्गु च विपणि पणं स्थाणु पुण्यम् &c, २५।

26. Principal part :—(1) येन दुर्व्वलरक्षार्थम् असिः वद्ध., (2) यश्च चापं धत्ते। Adj. to असिः—औपनीविकः। Adj.s to चापम्—आश्मनप्रख्यं सेषुं and अन्यदुर्व्वहम्।

Prose order :—येन दुर्व्वलरक्षार्थम् औपनीविकः असिः वद्धः। यश्च आश्मनप्रख्यं सेषुं अन्यदुर्व्वहं चापं धत्ते (तमिक्ष इत्यन्वयः)।

Substance :—यो रामः दुर्व्वलानां त्राणार्थं नीविसमीपे असिं धारयति, पाषाणवत् दृढ़ञ्च सवाणं धनुः धत्ते तमेव भजस्व।

Explanation in tika form :—येन राघवेण दुर्व्वलरक्षार्थं हीनबलानां त्राणार्थं, नीविः कटौ "स्त्रीकटीवस्त्रबन्धेऽपि नीविः मूलधनेऽपि च" इति कोषः। तस्याः समीपे उपनीवि तत्र प्रायभवः औपनीविकः नीविं प्राप्य वर्त्तमानः वामपार्श्वाधोभागस्थायी असिः खड्गः वद्धः धृतः। पूर्व्ववत् ठक्प्रत्ययो निपातः। यश्च अश्मनो विकारः आश्मनः अण्प्रत्ययः। तेन प्रख्या सादृश्यम् अस्य तत् आश्मनप्रख्यं उपलघटितमिव सेषुं सशरम् अन्येन रामादन्येन दुर्व्वहं चापं धनुर्धत्ते। तदाश्रयणात् त्वं निःशङ्का इत्यर्थः।

Change of V.—वद्धवान् असिं यः औपनीविकं। येन चापः आश्मनप्रख्यः सेषुः अन्यदुर्व्वहः धीयते।

जेता यज्ञद्रुहां संख्ये धर्म्मसन्तानसूर्वने ।
प्राप्य दारगवानां यं मुनीनामभयं सदा ॥ २७ ॥

Derivation.—बद्ध—बन्ध-कर्म्मणि क्तः। बध्नाति लट्। अभान्त्सीत् लुङ्। असि—अस-इन्। अस्यति लट। आस्थत् लुङ्। औपनीविक—उप-नीवि-ठक्। आश्मन—अश्मन्-अण्। धत्त—धा-लट् ते। लुङ् अधात, अधित। दुर्व्वह—दुर्-वह-कर्म्मणि खल्। अश्मन्—अश्नुते संहन्ति अनेन इति अश्मन्। अश्धातोः मनिन्। लुङ् आशिष्ट आष्ट।

তিনি দুর্ব্বলদিগের রক্ষার্থ কটিদেশে অসি ধারণ করিতেছেন, এবং পাষাণবৎ কঠিন সবাণ ধনু ধারণ করিতেছেন, এই ধনুক অন্যের বহন করিবার সামর্থ্য নাই।

One who has fastened a sword to his side for the protection of the weak,and holds a bow like one made of stone, fitted with arrow and hard to be borne by any others.

Q. Can there be षष्ठीसमास in अन्यदुर्व्वहम् ? Ans. अन्येन दुर्व्वहम् इति तृतीयासमास एव युज्यते। दुर्व्वहमित्यत्र खल्विधानात्, "न लोकाव्ययनिष्ठाखलर्थतृनाम्" इति षष्ठीप्रतिषेधात् नात्र षष्ठीसमासः। २६।"

27. For analysis see the prose order below.

Prose order :—(1) धर्म्मसन्तानसूः (यश्च) संख्ये यज्ञद्रुहां जेता; (2) यं प्राप्य वने मुनीनां दारगवानां सदा अभयं (तमिच्छ इत्यन्वयः)।

Substance :—यो रामः धर्म्मकार्य्यं सन्ततमाचरति, युद्धे यज्ञविघ्नान् जेतुं समर्थः, यम् आश्रित्य मुनयः स्त्रीरक्षणे गोरक्षणे च निःशङ्काः भवन्ति तमेव सेवस्व।

Explanation in tika form :—धर्म्मसन्तानं यज्ञादिकार्य्यकलापं सूते आचरतीति धर्म्मसन्तानसूः यागाद्यनुष्ठाता इत्यर्थः। [सत्-सू-द्विषेत्यादिना क्विप्]* यश्च संख्ये युद्धे संख्यायते परस्परनामोच्चारणं क्रियते अत्र इति संख्यम्,

* सद सू द्विष द्रुह दुह युज विद भिद छिद जि नी राजाम उपसर्गेऽपि क्विप्।

संपूर्व्वकात् स्याधातोः घञर्थे कः। "मधमास्कन्दनं संख्यम्" इत्यमरः। यज्ञार्थं द्रुह्यन्तीति यज्ञद्रुहो राक्षसाः [सत्सूद्विषेत्यादिना क्विप] तेषां "कर्त्तृकर्म्मणोः कृति।" इति कृत्प्रत्यययोगे कर्म्मणि षष्ठी। जेता विजेता। तृच् इति कृत्प्रत्ययः। अथवा तच्छीलार्थे तृन्प्रत्ययः। यं राघवं प्राप्य आश्रयत्वेन लब्ध्वा वने वर्त्तमानानां मुनीनां वानप्रस्थानाम्, तेषामार्त्त्याग्निपरिग्रहात्। दारयन्ति स्वामिनं भ्रातृभ्यः पृथक् कुर्व्वन्ति इति दाराः, स्त्रियः घञ् प्रत्ययः। दाराश्च गावश्च दारगवानि [अचतु-रेत्यादिना निपातनम्] तेषां सदा अभयं भयाभावः। अभावार्थेऽव्ययीभावः। अस्तीति इति शेषः। येषामेव प्राप्तिः तेषामेव यदभयं तदभाव उक्त इति समान-कर्त्तृत्वमस्त्येव। वृत्तं पथ्यावक्त्रम्।

Change of V.—जेता, धर्म्मसन्तानसुवा भूयते। अभयेन भूयते।

Derivation.—जेता—जि-तृच्। लट् जयति। लुङ् अजैषीत्। लिट् जिगाय। यज्ञद्रुहाम्—यज्ञ-द्रुह-क्विप। लट् द्रुह्यति। लङ् अद्रुहत्। लिट् 2nd person singular दुद्रोग्ध, दुद्रोढ़, दुद्रोहिथ। लृट् द्रोहिष्यति ध्रोक्ष्यति।

যিনি ধর্ম্মে রত ও যুদ্ধে যজ্ঞবিঘ্নকারী রাক্ষসগণের বিজেতা; যাহাকে প্রাপ্ত হইয়া অরণ্যে মুনিগণের ভার্য্যা ও গবাদি সর্ব্বদা অভয় প্রাপ্ত হইয়াছে (তাহাকে বরণ কর)।

He practises religious rites in the forest, and subdue those that stand in the way of sacrifice. The ascetics finding him among them have left off all anxieties for their family and cows.

Q. Show समानकर्त्तृत्व of प्राप्य with the principal verb. Ans. "यं प्राप्य मुनीनाम् अभयमस्ति" इति 'अस्ति' क्रियया 'प्राप्य' इत्यस्य न समानकर्त्तृत्वम्। किन्तु "यं प्राप्य स्थितानाम् मुनीनाम्" इति स्थितक्रियया एककर्त्तृतानिर्व्वाहः। Q. Name some words of the masculine gender that are used only in the plural number. Ans. "दाराक्षतलाजासूनां बहुत्वञ्च"। Q. Parse अभयम्। Ans. कर्त्तृकारकम्। अस्ति इत्यनेन अन्वयः।

ततो वावृत्यमानासौ रामशालां न्यविक्षत ।
मामुपायंस्त रामेति वदन्ती सादरं वचः ॥ २८ ॥

Q. Point out the words here that have been formed of क्विप् । Ans. यज्ञद्रुह्, धर्मसन्तानसू । २७ ।

28. Principal part :—ततः (व्यम्) असौ (कर्त्री) रामशालां न्यविक्षत । Adj. to असौ—वावृत्यमाना and वदन्ती । Adj. sentence हे राम ! (Vocative) माम् (object) उपायंस्त इति वचः (objects to वदन्ती) सादरं (adv) वदन्ती ।

Prose order :—ततः असौ वावृत्यमाना, राम ! माम् उपायंस्त इति वचः सादरं वदन्ती रामशालां न्यविक्षत ।

Substance :—लक्ष्मणेन इत्यमभिहिता सा शूर्पणखा पुनरेव रामगृहं प्रविश्य, उवाच च सादरं हे राम त्वमेव मां गृहाण इति ।

Explanation in tika form :—ततो लक्ष्मणवचनान्तरं असौ राक्षसी वावृत्यमाना रामं वृण्वाना [वावृतु वरणे इति वावृत्धातुः दैवादिकः आत्मनेपदी हे राम ! भवान् मां उपायंस्त परिणयतु [''आशंसायां भूतवच्च'' वर्त्तमानसामीप्ये भविष्यति काले भूतवद्वर्त्तमानवच्च प्रत्यया वा स्युः आशंसायाम् (अप्राप्तस्य प्राप्तुमिच्छायाम्) इति लुङ् ।* "उपाद्यमः स्वकरणे"† इति आत्मनेपदम् । इति वचः सादरं आदरेण सह वदन्ती कथयन्ती सती "शप् श्यनोर्नित्यम्" इति नित्यं नुम् । रामस्य शालां पर्णकुटीरं न्यविक्षत प्रविष्टा "नेर्विशः" इति आत्मनेपदम् ।

Change of V.—वावृत्यमानया अमुया रामशाला न्यवेशि...वदन्त्या ।

Derivation.—वावृत्यमाना—वावृत् कर्त्तरि शानच् । लट् वावृत्यते । अवावर्त्तिष्ट लुङ् । न्यविक्षत—नि-विश-लुङ् त । लिट् निविविशे । शाला—

---

* यथाहि देवश्चेत् अवर्षीत्, वर्षति, वर्षिष्यति वा धान्यं अवाप्स्म, वपामः, वप्स्यामो वा । सामान्यातिदेशे विशेषानतिदेशः तेन लङ् लिटौ न ।

† स्वकरणं स्वीकारे अर्थे उपात् यम्धातोः आत्मनेपदम् स्यात् ।

अस्त्रीकोऽसावहं स्त्रीमान् स पुष्यतितरां तव।
पतिरित्यब्रवीद्रामस्तमेव व्रज मा मुचः॥ २८॥

र्मी-कामन्। उपायंस्त—उप-यम-लुङ् त। पक्षे उपायत। अवदन्ती—वद-शत-ईप्। लुङ् अवादीत्।

অনন্তর ঐ রাক্ষসী রামচন্দ্রকে বরণ করিতে অভিলাষ করিয়া হে রাম! তুমি আমাকে বিবাহ কর, এই কথা সাদরে বলিতে বলিতে রামের পর্ণকুটীরে প্রবেশ করিল।

Then desirous to have Rama for her husband the female demon entered the cottage of the former, saying ardently O Rama, marry me.

Q. Account for आत्मनेपद in अविशत and उपायंस्त। Account also for लुङ् in the latter. Ans. See above. Q. Point out the root in वाञ्छमाना। Ans. See above.

२८।

29. Principal sentence :—रामः इति अब्रवीत्। Subordinate sentences—(1) असौ अस्त्रीकः। (2) अहं स्त्रीमान्। (3) स (कर्त्तृ) तव पतिः (विधेय विश) पुष्यतितराम्। (4) तमेव व्रज। (5) मा मुचः।

Prose order :—असौ अस्त्रीकः, अहं स्त्रीमान्, स तव पतिः पुष्यतितराम् (त्वामिति शेषः), तमेव व्रज, मा मुचः इति रामः (ताम्) अब्रवीत्।

Substance :—मम सकाशे पत्नी विद्यते, लक्ष्मणसमीपे तु न। अतः तेनैव त्वम् आदृता भवेः। तत् कथमपि तं मा त्यज, गच्छ तावत् तस्यैव सकाशमिति।

Explanation in tika form :—असौ लक्ष्मणः, न विद्यते स्त्री यस्य सोऽस्त्रीकः। नारीविरहितः ["नद्यृतश्च" इति कप्]* अहं पुनः स्त्रीमान्

In a बहुव्रीहिसमास, कप् takes place after the words

सभार्य्यः, प्रशंसायां मतुप् ।† स तव पतिः पुष्यतितराम् अतिशयेन पालयति, त्वामिति शेषः । भविष्यत्सामीप्ये लट् । ["द्विवचनविभज्योपपदे तरबीयसुनौ" इयोरेकस्य अतिशये विभक्तव्ये चोपपदे सुप्तिङन्तात् एतौ स्तः इति तरप्-प्रत्ययः । "तनः किमेत्तिङव्ययघादाम्‌ अद्रव्यप्रकर्षे" ‖ इति आमुः । अथवा स पुष्यतितराम् त्वामिति शेषः, स एव च तव पतिः इत्यन्वयः । तुष्यतीति क्वचित् पाठः । तस्मात् तमेव लक्ष्मणं व्रज गच्छ मा मुचः मात्याचीः "माङि लुङ्"‡ इति लुङ् । "न माङ्योगे" इति मा योगे अड़ागमनिषेधः । इति रामः अब्रवीत् तामिति शेषः । शूर्पणखां प्रति उक्ति । वृत्तं पथ्यावक्त्रम् ।

Change of V.—अमुना अस्त्रीकेण, मया स्त्रीमता (भूयते) तेन (त्वम्) पुष्यसितरां...पत्या, स व्रज्यताम् मा मोचि......रामेण औच्यत ।

Derivation.—पुष्यतितराम्—पुष्-लट् ति तर-आमुः । अपुषत्—लुङ् । मुचः—मुच-लुङ् सः, मायोगे अमागमप्रतिषेधः । अब्रवीत्—ब्रू-लङ् द । लट् ब्रवीति, आह, ब्रूते । लुङ् अवोचत्, अवोचत ।

রাম কহিলেন, উহার সহিত স্ত্রী নাই, আমার সমভিব্যাহারে বনিতা রহিয়াছে; তিনি তোমার পতি হইয়া পরম সমাদরে তোমাকে প্রতিপালন করিবে, অতএব তাহারই নিকট পুনরায় গমন কর, তাহাকে কোন ক্রমে পরিত্যাগ করিও না।

---

ending in ईप् (feminine) or ऋत् (ऋ) । ईप् यथा अस्त्रीकः, ऋ यथा बहुकर्तृकः।

‖ किम् यथा किन्तराम्, एत् यथा प्राह्णेतराम्, तिङ् यथा पुष्यतितराम्, अव्ययं यथा उच्चैस्तराम् । (घ=तरप्तमपौ घः) द्रव्यप्रकर्षे (in being an adjective and not an adverb) तु न भवति । यथा उच्चैस्तरो वृक्षः (here उच्चैस्तरः being an adjective can not be उच्चैस्तराम्) ।

† "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने संसर्गे अस्तिविवक्षायां भवन्ति मतुबादयः ।"

‡ माङ्योगे लुङ् सर्व्वकालेषु भवति, इति अत्र भविष्यति लुङ् ।

लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवागमत् ।
मन्मथायुधसम्पातव्यथ्यमानमतिः पुनः ॥ ३० ॥

'I have' said Rama, 'my wife with me, but he has none. He being your husband, will cherish you better. You should indeed go to him, do not leave him.

Q. Show the signification of मतुप in स्त्रीमान् । Ans. See the footnote. Q. Correct उच्चैस्तराम् वृक्षः । Ans. "आमु अद्रव्यप्रकर्षे" इति द्रव्यप्रकर्षे न आमु स्यात् (आमु never takes place, after an adjective) अतः उच्चैस्तरः वृक्षः इत्येव स्यात् । २९ ।

30. Principal part.—सा (कर्त्री) पुनः लक्ष्मणं (कर्म), गौः (उपमानकर्त्री) महोक्षं (उपमानकर्म) इव अगमत् । Adj. to सा—वृषस्यन्ती and मन्मथायुधसम्पातव्यथ्यमानमतिः ।

Prose order :—वृषस्यन्ती मन्मथायुधसम्पातव्यथ्यमानमतिः सा गौः महोक्षमिव लक्ष्मणं पुनः अगमत् ।

Substance :—वृषेण मिलितुं यथा गवी धावति तथा सा सूर्पणखा कन्दर्पबाणपीड़िता पुनर्लक्ष्मणं प्रति चलिता ।

Explanation in tika form :—वृषस्यन्ती मैथुनेच्छावती, वृषं शुक्रलं पुरुषं मैथुनाय* इच्छन्तीति कामुकी इत्यर्थः, गोपक्षे वृषं वृषभमिच्छन्ती "शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे वृषः" इत्यमरः । ["अश्व क्षीर वृष लवणानाम् आत्मप्रीतौ क्यचि" इति क्यचि असुगागमः 'अश्ववृषयोः मैथुनेच्छायाम्' इति कात्यायनवचनात् मैथुनेच्छायाम् गम्यायाम् वृषस्यन्ती इत्यत्र क्यच् सुक् च ।† मन्मथस्य कन्दर्पस्य आयुधानि शराः तेषां सम्पातः संश्लेषः तेन व्यथ्यमाना पीड़िता मतिर्मनो

* To couple, to marry.

† क्यच् is used after अश्व क्षीर वृष लवण and is preceded by असुक् । It is used after अश्व and वृष in the sense of coupling.

तस्याः सासह्यमानाया लोलूयावान् रघूत्तमः ।
असिं कौक्षेयमुद्यम्य चकारापनसं मुखम् ॥ ३१ ॥

यस्याः तथोक्ता सा सूपणखा गौः महान्तं उक्षाणं महोक्षं वृषमिव, अचतुरेत्यादिना निपातितम् ।§ लक्ष्मणं पुनः अगमत् तत्समीपम् अगात् । गमेः लुङ् । उपमालङ्कारः । वृत्तं पथ्यावक्त्रम् ।

Change of V.—लक्ष्मणः तया वृषस्यन्त्या महोक्षः गवा इव अगामि ......मत्या ।

Derivation.—लक्ष्मणः—लक्ष्मी-नः । वृषस्यन्ती—(वृष क्यच्) वृषस्य शतृ-ङीप् । अगमत्—गम-लुङ् । आयुध—आ-युध-कः । सम्पात—सम्-पत-घञ् । लुङ् अपप्तत् । व्यथमान—व्यथ-कर्म्मणि शानच् । लट् व्यथते । मतिः —मन-करणे क्तिः ।

কামশরে প্রপীড়িত-হৃদয়া রাক্ষসী, গাভী যেরূপ বৃষভের নিকট মিলিবার জন্য গমন করে সেইরূপ পুনরায় লক্ষ্মণের সমীপে গমন করিল ।

She with her mind under the pressure of Cupid's weapons went again to Lakṣmana like a cow lusting after a bull, desirous as she was to take him for her husband.

Q. Show the propriety of the simile. Ans. अनेन तस्याः लज्जाहीनता प्रकटिता । **Q.** Show the fitness of the adjective मन्मथायुधसम्पातव्यथमानमतिः । Ans. यथा प्रपीड़ितः कश्चित् परित्राणार्थं इतस्ततो धावति तथा सा कन्दर्पशरपीड़िता त्राणार्थं प्रथमं रामसकाशम् पश्चात् लक्ष्मणसमीपम् अधावत् इति विशेषणसार्थक्यम् । **Q.** Give the meaning of वृषस्यन्ती and account for the formation of महोक्ष । Ans. See above. । ३० ।

31. Principal part :—रघूत्तमः (कर्त्तृ) असिम् (उद्यम्य इत्यस्य

---

§ Instead of महोक्षाणम् it becomes महोक्षम् by the aphorism "अचतुर &c."

कर्म) उद्यम्य (व्यम्) तस्याः (सम्ब) मुखं (कर्म) अपनसं (मुखमित्यस्य विशेषणम्) चकार। Adj. to तस्याः—सासूयमानायाः। Adj. to रघूत्तमः—लोलूयावान्। Adj. to असिम्—कौक्षेयम्।

Prose order :—लोलूयावान् रघूत्तमः कौक्षेयम् असिम् उद्यम्य सासूयमानायाः तस्याः मुखम् अपनसं चकार।

Substance :—छेदनक्रियायाम् सुनिपुणः, यथापराधदण्डानां रघूणां श्रेष्ठ स लक्ष्मणः दुःशीलां तां विरूपां कर्तुम् इत्थं गर्हितं सीदन्त्याः शूर्पणखायाः मुखं विगतनासिकमकरोत्।

Explanation in tika form :—पुनः पुनरतिशयेन लुनातीति लोलूया लुञो क्रियासमभिहारे पौनःपुन्ये भृशार्थे च यङ्; यङन्तात् "अ प्रत्ययात्"* इति अकारः] सा विद्यते यस्य इति लोलूयावान् अतिशयेन छेदनक्रियायुक्तः। रघुषु उत्तमः श्रेष्ठः रघूत्तमः लक्ष्मणः "न निर्द्धारणे" इति षष्ठीसमासनिषेधात् सप्तमीसमासः। रघूणाम् उत्तमः इति च केचित्। कुक्षौ भवः कौक्षेयः, कटिस्थं तीक्ष्णलोहभवं, कोषस्थमिति वा "कुक्षिः खड्गपिधाने स्यात् तीक्ष्णलोहे जठोदरे" इति कोषः। "दृति कुक्षि कलसिवस्त्यस्त्यहेः ढञ्"‡ (एय) इति ढञ्। असिं खड्गं उद्यम्य उत्क्षिप्य सासूयमानायाः समीपे गर्हितं सीदन्त्याः गर्हितम् उपविशन्त्याः "लुप सद चर जप जभ दह दश गृभ्यो भाव गर्हायाम्" इति निन्दार्थे यङ्। (See p. 322) तस्याः राक्षस्याः मुखम्, अपगता नासिका यस्मात् तत् अपनसं अपगतनासिकम् "उपसर्गाच्च"† इति समासान्तः अच्

---

* प्रत्ययान्तेभ्यः धातुभ्यः स्त्रियाम् अकारः प्रत्ययः स्यात्। इति यङ्प्रत्ययान्तात् लूधातोः अः। स्त्रीत्वात् टाप्। इति लोलूया, अतिशयछेदनक्रिया। तस्मात् मतुः।

‡ दृति (a bag), कुक्षि (the womb), कलसि (a pitcher), वस्ति (abdomen), अस्ति(being) अहि (snake)। एतेभ्यः ढञ् (एय)। यथा, दार्तेयं, कौक्षेयं, कालसेयं, वास्तेयम् आस्तेयम् and आहेयम्।

† उपसर्गात् यो नासिकाशब्दः तदन्तात् बहुव्रीहेः अच्, नासिकायाः नसादेशश्च।

अहं सूर्पणखा नाम्ना नूनं नाज्ञायिषि त्वया।
दण्डोऽयं क्षत्रियो येन मय्यपातीति साब्रवीत्॥ ३२॥

नासिकाया नसादेशः। चकार कृतवान् नासिकाछेदेन तां विरूपामकरोत्। काव्यलिङ्गमलङ्कारः। वृत्तं पथ्यावक्त्रम्।

Change of V.—लोलूयावता रघूत्तमेन.....चक्रे।

Derivation :—सासद्यमानायाः—(सद्-यङ्) सासद्य शानच्, टाप् षष्ठी। सीदति लट्। असदत् लुङ्। लोलूयावान्—(लू-यङ्) लोलूय-अः, मतुप्। लुनाति लट्। अलावीत् लुङ्। असि—अस-इ। अस्यति लट्, आस्यत् लुङ्। कौक्षेय—कुक्षि-ढञ्। उद्यम्य—उत्-यम-ल्यप्। लट् यच्छति लुङ् अयंसीत्।

ছেদন কার্য্যে সুনিপুণ রাঘবশ্রেষ্ঠ লক্ষ্মণ, কুক্ষিস্থ খড়্গ উত্তোলন করিয়া নিন্দিতভাবে স্থিতা সূর্পণখার আনন নাসিকাবিহীন করিলেন।

The best of Raghus, Lakṣmana, dexterous in the act of lopping drawing aloft his sword that was at his side, made her face noseless as she stayed ill.

Q. Why did Laksmana cut off her nose. Ans. इयं शालीनत्वविवर्जिता न केनापि उद्वोढुम् योग्या। अतः एनां विरूपां कर्तुं अस्याः नासिकां चिच्छेद लक्ष्मणः। Q. Comment gram. on सासद्यमाना, लोलूयावान् अपनसम् and कौक्षेयम्। Ans. See above. Q. Show the significance of रघूत्तमः। Ans. दुःशीलाया इत्थम् उचितं दण्डं विदधत् लक्ष्मणः यथापराधदण्डानां रघूणाम् श्रेष्ठत्वमं प्रकटितवान् इत्यर्थः। ३१।

32. Principal part :—सा (कर्त्री) इति (कर्म) अब्रवीत्। Subordinate sentences—(1) अहं (इतियोगे १मा) नाम्ना (प्रकृत्यादित्वात् तृतीया) सूर्पणखा (विधेय विश)। (2) अहं (कर्म) त्वया (कर्त्रा) नूनं न अज्ञायिषि। (3) येन (त्वया) (कर्त्रा) मयि (अधि) दण्डः (कर्म) अपाति। Adj. to दण्डः—अयं and क्षत्रियः।

Prose order—अहं नाम्ना सूर्पणखा नूनं त्वया न अज्ञायिषि येन अयं चैविर्यो दण्डः मयि अपाति इति सा अब्रवीत्।

Substance :—न जानासि यदहं नाम्ना सूर्पणखा। यतः अस्मिन् जन्मनि अप्रतिविधेयं दण्डमेतं मयि त्वं प्रयुक्तवान् इति।

Explanation in tika form—अहं नाम्ना, "प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया। सूर्पवत् नखाः यस्याः सा सूर्पणखा। "पूर्व्वपदात् संज्ञायाम् अगः"* इति णत्वम्। नूनं निश्चितं त्वया न अज्ञायिषि न ज्ञाताऽस्मि। कर्म्मणि लुङ्। अहम् इति उक्तकर्म्मणा अन्वयः। येन हेतुना अयं चैवियः जन्मान्तरशरीरचिकित्स्यः एतज्जन्मनि नासाया अनुत्पत्त्या शरीरान्तरे एव तत्सम्भवात्। ["चैवियच् परचैवि चिकित्स्य." इति निपातितम्]† दण्डः नासाच्छेदरूपः मयि अपाति निपातितः इति सा अब्रवीत् नासाच्छेदनरूपो दण्डोऽयम् अतीव दुःसहः अप्रतिविधेयत्वात्, अतः मां तत्त्वतो जानन् वैरभिया कथमपि मयि दण्डमेतं विधातुं त्वं समर्थो नाभविष्यः इति भावः।

Change of V.—मां सूर्पणखां त्वं न अज्ञासीः, इमं दण्डं चैवियं...... अपीपतः तया प्रोच्यत।

Derivation.—अज्ञायिषि—ज्ञा-कर्म्मणि लुङ् इ। चैवियः—चैव-??? अच् (निपातनात् सिद्धं)। अपाति—पत-णिच् कर्म्मणि लुङ् त।

আমার নাম যে সূর্পণখা তুমি নিশ্চয়ই জান না। অন্যথা তুমি আমাতে এমন দণ্ডবিধান করিতে না যাহার পর জন্মে প্রতিবিধান হয়।

---

* When ऋ र ष take place in the first word as सूर्प and न in the second as नख, the न not preceded by ग is changed into ण, if the two words combined signify a name. Thus—खरणसः सूर्पणखा। In ऋगयनम्, न is preceded by ग।

† परचैवं चिकित्स्यः इत्यस्मिन् अर्थे "चैवियच्" इति अच्प्रत्ययान्तो निपात्यते। परचैवं जन्मान्तरशरीरम्, तत्र चिकित्स्य, अस्मिन् जन्मनि अप्रतिकार्य्य इत्यर्थः।

पर्य्यशाप्सीद्दिविष्ठासौ सन्दर्श्य भयदं वपुः ।
अपिस्फवच्च बन्धूनां निनङ्क्षुर्विक्रमं मुहुः ॥ ३३ ॥

'That I am Surpanakha (sieve-nailed) by name' said she, 'is not certainly known to you. Otherwise you would not have inflicted on me such penalty as is curable only in the second birth.

Q. Account for ण in सूर्पणखा। Ans. See above. Q. Give the different meanings of नूनम्। Ans. "नूनं तर्केऽर्थनिश्चये" इत्यमरः। Q. Parse नाम्ना। Ans. See above. । ३२ ।

33. Principal part :—(1) असौ (sub.) वपुः सन्दर्श्य पर्य्यशाप्सीत्। Adj. to असौ दिविष्ठा and निनङ्क्षुः। Adj. to वपुः—भयदम्. Another sentence—(असौ) बन्धूनां विक्रमं मुहुः अपिस्फवत् च ।

Prose order :—असौ दिविष्ठा (सती) भयदं वपुः सन्दर्श्य पर्य्यशाप्सीत् निनङ्क्षुः च बन्धूनां विक्रमम् अपिस्फवत् ।

Substance :—अथ गगनस्य उर्द्धदेशमारुह्य आत्मनः रूपं प्रकाशयन्ती सा सूर्पणखा लक्ष्मणादीन् भृशं तिरश्चकार। तांश्च हन्तुमिच्छन्ती ज्ञातीनाम् उग्रं प्रतापं वर्णयामास ।

Explanation in tika form :—असौ राक्षसी दिवि नभसि तिष्ठतीति दिविष्ठा नभःस्था सती "तत्पुरुषे कृति बहुलम्" इति सप्तम्या अलुक्। "दिवि अम्बिभ्यःस्थः" इति स्था इत्यस्य षत्वम्। यथा दिविष्ठः अग्निष्ठः इत्यादि। भयदं भयजनकं वपुः सन्दर्श्य पर्य्यशाप्सीत् आक्रुष्टवती। तथा, निनङ्क्षुः नष्टुमिच्छुः सती, बध्नन्ति मनः स्नेहादिना इति बन्धवः ज्ञातयः तेषां बन्धूनां खरादीनाम् "सगोत्र बान्धव ज्ञाति बन्धु स्व स्वजनाः समाः" इत्यमरः। विक्रमं पराक्रमं मुहुः वारंवारं अपिस्फवत् वर्द्धयामास। स्फायतेर्णिजन्तात् लुङ्। "स्फायो वः" इति वकारः। अहं चेत् दुर्बला उग्रप्रतापैः मम आत्मीयैः यूयं हताः भविष्यथ इति भावः। वृत्तं पथ्यावक्त्रम्।

खरदूषणयोर्भ्रात्रोः पर्य्यदेविष्ट सा पुरः।
विजिग्राहयिषू रामं दण्डकारण्यवासिनोः॥ ३४।

Change of V.—पर्य्यशापि दिविषया अमुया अस्फावि निमङ्क्षुणा।

Derivation.—पर्य्यशापसीत्—परि-शप-लुङ्। लट् शपति, शपते, शप्यति &c. Cf. "सहस्रशोऽसौ शपथान् अशप्यत्" ३।२२। दिविषा—दिव स्था-क। वपुस्—वप्-उसिन्। बन्धु—बन्ध-उ। अपिस्फवत्—स्फाय-णिच्-लुङ्। स्फायते लट्। अस्फायिष्ट अस्फास्त लुङ्। निमङ्क्षुः—मस्ज्-सन्-उः।

অনন্তর ঐ রাক্ষসী আকাশ-মণ্ডলে উৎপতিত হইয়া ভয়ঙ্কর শরীর প্রদর্শন পূর্ব্বক লক্ষ্মণ প্রভৃতিকে গালি দিয়াছিল এবং তাহাদিগকে বিনাশ করিবার জন্য স্বকীয় বন্ধুবর্গের পরাক্রম বর্ণনা করিতে লাগিল।

Rising high in the sky, she censured them, showing her body terrible, and magnified repeatedly the prowess of her relations, desirous as she was to kill them.

Q. Can पर्य्यशापसीत् be used in आत्मनेपद ? Ans. शरीरस्पर्शपूर्व्वकशपथे आत्मनेपदं स्यात्। यथा, कृष्णाय शपते गोपी। तस्य शरीरं स्पृष्ट्वा इत्यर्थः। अत्रोक्तेऽस्मिन् उपालम्भनार्थत्वात् परस्मैपदम्। ३३।

34. Principal part :—सा (कर्त्तृपदम्) खरदूषणयोः, पुरः पर्य्यदेविष्ट। Adj. to खरदूषणयोः—भ्रात्रोः and दण्डकारण्यवासिनोः। Adj. to सा—विजिग्राहयिषुः। Object to विजिग्राहयिषुः—रामम्।

Prose order :—रामं विजिग्राहयिषुः सा दण्डकारण्यवासिनोः भ्रात्रोः खरदूषणयोः पुरः पर्य्यदेविष्ट।

Substance :—युद्धं राममभिभवितुम् इच्छुः सा खरं दूषणञ्च भ्रातृद्वयं तत्र प्रवर्त्तयितुं तयोः पुरः भृशं चक्रन्द।

Explanation in tika form :—रामं विजिग्राहयिषुः विग्राहयितुं खरादिभिः योधयितुमिच्छुः, संग्रामे रामादीन् विनाशयितुमभिलषन्तीत्यर्थः।

दण्डकारण्ये वसत: इति दण्डकारण्यवासिनौ, ताच्छील्ये णिनि:। तयो: भ्रात्रो: खरदूषणयो: पुर: अग्रत: "षष्ठ्यतसर्थप्रत्ययेन"* इति पुरस् योगे षष्ठी, पर्य्यदेविष्ट क्रन्दितवती। परिदेवते: लुङ्। तयोर्मानसं क्रन्दनेन अभिमुखीकर्त्तुम् अत्यर्थं रोद इति भाव:।

Change of V.—पर्य्यदेवि तया विजिघांसया......।

Derivation.—दूषण—दूष-णिच्-ल्यु। भ्रात—भ्राज्-तृच्। पर्य्यदेविष्ट—परि-दिव-लुङ् त। लट् देवति। विजिघांसु:—वि-हन्-णिच-सन् उ:।

সূর্পণখা রামের সহিত যুদ্ধে প্রবৃত্ত করাইবার অভিলাষে দণ্ডকারণ্যবাসী খরদূষণ নামক ভ্রাতৃদ্বয়ের সমীপে নানাবিধ বিলাপ করিতে লাগিল।

She lamented before Khara and Dusana, the two brothers residing in the forest of Dandaka, desirous as she was to have them war against Rama.

Q. Show clearly that the 6th case ending is rightly applied in खरदूषणयो:। Ans. By an aphorism of पाणिनि words followed by such as signify (दिग्देशकाल) direction, place and time, take the 5th case endings. The word पुरस् is formed of पूर्व्व with अस् for its affix. So the word खरदूषण followed by पुरस् as here, should have been in the 5th class. By the rule "षष्ठी अतसर्थप्रत्ययेन" however, खरदूषण takes the 6th case ending. **Q. Show the euphonic combination in विजिघांसुर्रामम्।** Ans. विजिघांसु: रामम्। रकारे परे विसर्गस्य रकार:। तस्य च लोप:। पूर्व्वस्वरस्य च दीर्घ:। १४।

---

* अतसर्थेन प्रत्ययेन युक्ते षष्ठीविभक्तिर्भवति। अतसर्थ: यथा, अतस् (दक्षिणत:, उत्तरत:), अस् (पुरस्, अवस्, अधस्)।

कृते सौभागिनेयस्य भरतस्य विवासितौ।
पित्रा दौर्भागिनेयौ यौ पश्यतं चेष्टितं तयोः ॥ ३५ ॥

35. Principal part :—तयोः (सम्ब) चेष्टितं (कर्म्म) पश्यतं (युवामिति शेषः)। Subordinate sentence—पित्रा (कर्त्तृ) यौ (उक्तकर्म्म) भरतस्य (सम्ब) कृते (व्ययम्) विवासितौ। Adj. to यौ—दौर्भागिनेयौ। Adj. to भरतस्य—सौभागिनेयस्य।

Prose order :—सौभागिनेयस्य भरतस्य कृते दौर्भागिनेयौ यौ पित्रा विवासितौ तयोः चेष्टितं पश्यतम् (युवाम्)।

Substance :—सुभगातनयस्य भरतस्य हेतोः तस्य पिता दशरथः यौ रामलक्ष्मणौ दुर्भगातनयौ वनं प्रेरयामास ताभ्यां कृतम् एतत् नासाच्छेदनं कर्म्म अवलोकयतम् युवाम्।

Explanation in tika form :—सुभगा कैकेयी तस्याः अपत्यं सौभागिनेयः तस्य सुभगापुत्रस्य इत्यर्थः ["स्त्रीभ्यो ढक्" इति ढक् (एय) प्रत्यये "कल्याण्यादीनाम् इनङ् च" इति इनङ्। "हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च" इति पूर्व्वोत्तरपदयोरादेरचो वृद्धिः] भरतस्य कृते निमित्तम्। कृते इति अव्ययं निमित्तार्थे वर्त्तते। क्विबन्तकृत्शब्दात् चतुर्थी इति केचित्, कृतशब्दात् सप्तमी इत्यन्ये। दुर्भगे कौशल्यासुमित्रे, तयोरपत्ये दौर्भागिनेयौ (पूर्व्ववत् ढक्) यौ रामलक्ष्मणौ पित्रा जनकेन दशरथेन विवासितौ राष्ट्रात् निष्कासितौ तयोः चेष्टितं नासाच्छेदनरूपं पश्यतं युवामिति शेषः। विधौ प्रार्थनायां वा लोट्। यत्तदोर्नित्यसम्बन्धत्वात् तद्शब्दप्रयोगः। वृत्तं पथ्यावक्त्रम्।

Change of V.—विवासितवाम् पिता......दृश्यताम् (युवाभ्याम्)।

Derivation.—सौभागिनेय...सुभगा ढक् (इनङादेशः)। विवासितौ—वि-वस-णिच्-कर्म्मणि क्तः। दौर्भागिनेयौ—दुर्भगा-ढक् (इनङादेशः)। पश्यतम्—दृश-लोट्। लुङ् अदर्शत्, अद्राक्षीत्। चेष्टितम्—चेष्ट-भावे क्तः।

ভাগ্যবতী কৈকেয়ীর পুত্র ভরতের নিমিত্ত পিতা (দশরথ) যে দুর্ভাগাতনয় রামলক্ষ্মণকে বনবাস দিয়াছেন তাহাদিগের কার্য্য দেখ।

मम रावणनाथाया भगिन्या युवयोः पुनः ।
अयं तापसकाद्ध्वंसः क्षमध्वं यदि वः क्षमम् ॥ ३६ ॥

Witness the deeds of those two, the sons of the wretched queens, who have been, by their father, banished for the sake of Bharat, the son of a fortunate queen.

Q. Can you omit यद् in the above. If so justify it. Ans. "भरतस्य कृते पित्रा रामलक्ष्मणौ विवासितौ। तयोः चेष्टितं पश्यतम् ।" इति वाक्ये यद्शब्दः न प्रयुज्यते। रामलक्ष्मणौ इत्यनेन प्रसिद्धत्वात् । तथाहि "प्रक्रान्तः (अन्वयी) प्रसिद्धार्थः अनुभूतार्थविषयः तद्शब्दः यद्शब्दोपादानं न अपेक्षते इति मम्मटभट्टः। Q. Account for the formation of सौभागिनेय and दौर्भागिनेय। Ans. See above. । ३५ ।

36. Principal part :—(1) तापसकात् मम ध्वंसः (हतः) Adj. to मम—रावणनाथायाः, भगिन्याः। युवयोः (सम्ब)। पुनः – व्ययम् (2) यदि. वः क्षमम्। (3) तत क्षमध्वम्।

Prose order :—रावणनाथायाः पुनः युवयोः भगिन्याः मम अयं तापसकात ध्वंसः वः यदि क्षमं (तदा) क्षमध्वं। ·

Substance.—रावणो यस्याः प्रभुः युवाञ्च भ्रातरौ, तस्याः कस्माश्चित् तापसाधमात् नासाच्छेदः हतः। यदि तत् क्षमार्हं स्यात् तत् क्षमेथाम् इति।

Explanation in tika form:—रावणः नाथः प्रभुः यस्यास्तादृश्या पुनः पक्षान्तरे "पुनरप्रथमे मतम्। अधिकारे च भेदे च तथा पक्षान्तरेऽपि च" इति मेदिनी। पुर इति पाठान्तरम् युवयोः भगिन्या मम अयं तापसकात् क्षुद्रतपस्विनः सकाशात् अथवा कुत्सिततापसात् [कुत्सायां कन्] ध्वंसः नासाच्छेदनरूपः हतः इति शेषः। यदि वः युष्माकं "युष्मदि गुरौ एकेषाम्"* इति वामनवचनात् बहुवचनं, तयोः ज्येष्ठत्वात्। क्षन्तुं योग्यं सामान्यत्वात् नपुंसकं

* According to some, says Vamana, युष्मद् signifying one superior, takes the plural form.

“युक्ते योग्ये हिते क्षमम्” इति कोषः। क्षमम् अव्ययमित्यर्थः। तदा यूयं क्षमध्वं उपेक्षध्वं। युवयोः उपेक्षायान्तु रावण एव मास्यतीति भावः।

Change of V.—अनेन ध्वंसेन क्षमेण (भूयते)..... क्षम्यताम्।

Derivation.—तापसक—तपस्-अण् कुत्सायां कन्। ध्वंसः—ध्वन्स-, घञ्। क्षमम्—क्षम-भावे अच्।

রাবণ আমার রক্ষক, তোমরা আমার ভ্রাতা। মন্দবুদ্ধিতাপসকৃত এই নাসিকাচ্ছেদ যদি তোমরা ক্ষমা করিবার উপযুক্ত বিবেচনা কর তবে ক্ষমা কর।

Bear up, if you can, with this my mutilation by a base mendicant, of one who is a sister of you two and has Ravana for her protector.

Q. Is वः used always? Ans. “अपादवाक्यादौ च च वा हा ह एव चहगदृश्यर्थैः” इति न सर्वत्र। [वस् नस् &c take place if they are not at the beginning of a foot of a distitch or a sen tence ; or are not followed by the indeclinables च वा हा ह एव or the roots signifying ‘seeing’but undergoing a change of meaning other than seeing. Thus—Beginning of a foot—युष्मान् अवतुविरतम्, of a sentence—अस्मान् पातु हरः.। In contact with the indeclinables ह वा &c—तव मम च, ममैव वा अयं दोषः &c.—Roots signifying originally seeing—त्वाम् अपेक्ष्य &c (अपेक्ष्य=waiting) though the root ईक्ष primarily signifies seeing.] Q. Parse तापसकात्। Ans. तापसकात् ध्वंसः इत्तः। इति अन्यमानक्तक्रियापेक्षया अपादानत्वम्। “क्रियान्वयि कारकम्” इति कारकस्य क्रियया अन्वयित्वात् क्रियापदम् अवश्यम् अध्याहार्यम्। १६।

असंस्कृत्रिमसंव्यानावनुप्त्रिमफलाशनौ ।
अभृत्रिमपरीवारौ पर्य्यभूतां तथापि माम् ॥ ३७ ॥

37. Principal part :—तथापि (त्वं) तौ (कर्त्तृपदम्) (कर्म) पर्य्यभूतां। Adj. to तौ—असंस्कृत्रिमसंव्यानौ, अनुप्त्रिमफलाश and अभृत्रिमपरीवारौ।

Prose order—(तौ) असंस्कृत्रिमसंव्यानौ, अनुप्त्रिमफलाशनौ अभृ परीवारौ स्तः, तौ तथापि मां पर्य्यभूताम्।

Substance :—रामलक्ष्मणयोः उत्तरीयवस्त्रयुगं वल्कलनिर्म्मितम्। वन्यानि फलानि भुञ्जाते। न मृगेभ्यः कश्चिदपरः परिवारोऽस्ति। अहो वि मत् तथाभूतौ अपि तौ मां परिभूतवन्तौ।

Explanation in tika form :—तन्त्वादीनां संस्कारेण जातं संस्कृ मत् न विद्यते येषामिति नञ्समासः। असंस्कृत्रिमाणि संव्यानानि उत्तरीया ययोः असंस्कृत्रिमसंव्यानौ वल्कलवाससौ इत्यर्थः। "संव्यानमुत्तरीयञ्च" इत्यमर वपनेन जातम् उप्त्रिमम्, अनुप्त्रिमाणि वन्यानि फलानि अशनं आहारो य तौ वन्यफलाशनौ नतु शालिभोजनौ। फलाशिनावित क्वचित् पाठः। भर पोषणेन जातो भृत्रिमः। परिव्रियते अनेनेति परीवारः "उपसर्गस्य घञ्यमनु बहुलम्" इति दीर्घः मृगाणां अमनुष्यत्वात्। अभृत्रिमः परीवारः अनुजी लोको ययोस्तौ मृगपरीवारौ इत्यर्थः। सर्व्वत्र "ड्वितः क्त्रिः क्त्रेर्म्मप् ।" तौ यद ईदृशौ तथापि मां पर्य्यभूतां पारभूतवन्तौ।

Change of V.—असंस्कृत्रिमसंव्यानाभ्याम् अनुप्त्रिमफलाशनाभ्या अभृत्रिमपरीवाराभ्याम् पर्य्यभविषि अहम्।

Derivation :—संस्कृत्रिम—सं-कृ-त्रिमक्। संव्यान—सं-व्ये-ल्युट् फलाशन—फल्-अश्-युच्। अश्नाति लट्। अनुप्त्रिम—न-वप-त्रिमक् भृत्रिम—भृ-त्रिमक्। परीवार—परि-वृ-घञ्। पर्य्यभूतां—परि-भू-लुङ् ताम्।

যদিও তাহাদিগের উত্তরীয় তন্তুজাত নহে, যদিও তাহারা ব ফল আহার করে। যদিও মৃগ ব্যতিরিক্ত তাহাদিগের অন্য অনুচ নাই তথাপি তাহারা আমাকে এইরূপ পরাভব করিয়াছে।

श्वःश्रेयसमवाप्तासि भ्रातृभ्यां प्रत्यभाणि सा ।
प्राणिष्यस्तव मानार्थं व्रजाश्वसिहि मा रुदः ॥ ३८ ॥

Although they have not their garments finely wrought, and live n fruits produced of uncultivated trees, and have for companions, he animals whom they do not support, they have yet been able to ssail me.

Q. Quote some words formed of विमक्, from our own text. Ans. Quote the above. Q. Show the orce of तथापि । Ans. निराश्रयो हि न किमपि अभिभवितुं समर्थः । ी तु निराश्रयावपि यत् माम् अभिभवितुम् समर्थौ तस्मैं विस्मयमावहति इति पि शब्देन सूच्यते । ३७ ।

38. Principal sentence :—सा (उक्तकर्म) भ्रातृभ्यां (अनुक्त र्तृ) प्रत्यभाणि । Subordinate sentences—(1) श्वःश्रेयसम् (obj.) वाप्तासि । (2) (आवां) तव मानार्थं प्राणिष्व: (3) व्रज, (4) आश्वसिहि 5) मा रुदः ।

Prose order :—सा भ्रातृभ्याम् प्रत्यभाणि । (किमत्) श्वःश्रेयसमवाप्तासि, व मानार्थं प्राणिष्वः व्रज, आश्वसिहि, मा रुदः ।

Substance :—त्वं कल्याणम् प्राप्स्यसि । यथा ते मानहानिः न स्यात् था अनुष्ठातुम् तावत् आवां प्राणान् धारयावः । गच्छ तावत्, आश्वस्ता भव । लं रोदनेन ।

Explanation in tika form :—सा राक्षसी भ्रातृभ्यां खरदूषणाभ्यां त्यभाणि प्रतिभणिता, कथिता इति यावत् । भणधातोः कथनार्थस्य कर्मणि लुङ् । श्वस्शब्दः प्रशंसावाचकः । शोभनं श्रेयः श्वःश्रेयसं कल्याणम् "श्वसो सीयः श्रेयसः" इति समासान्तः अच्प्रत्ययः । मयूरव्यंसकादित्वात् समासः । अवाप्तासि प्राप्स्यसि [लुट् तसि] भविष्यत्येन इत्यर्थः । तव मानार्थं तव मानहानिः माभूदिति प्राणिष्वः जीवावः । अन्धातोः लट् । तस्मात्, व्रज यथा-स्थानं गच्छ, आश्वसिहि आश्वस्ता भव, उद्वेगं त्यज इत्यर्थः । मा रुदः त्वं मा रोदीः । "माङि लुङ्" इति लुङ् । माङयोगे अडागमप्रतिषेधः ।

जघ्निमोऽनपराधेऽपि नराम्नक्तन्दिवं वयम्।

कुतस्त्यं भीरु यत्तेभ्यो द्रुह्यद्भ्योऽपि क्षमामहे ॥ ३९ ॥

Change of V.—श्वश्रेयसं अवाप्ता, भ्रातरौ प्रत्यभाषिषाताम् तां। आवाभ्यां प्राण्यते। (त्वया) व्रज्यतां आश्वस्यतां मा रोदि।

Derivation.—अवाप्तासि—अव-आप-लुट् तासि। प्रत्यभाषि—प्रति-भष-कर्म्मणि लुङ् त। प्राणिव:—प्र-अन-लट् वस्। लट् अनिति। लुङ् आनीत्। व्रज—व्रज-लोट् हि, प्रार्थनायां लोट्। आश्वसिहि—आ-श्वस-लोट् हि। लट् आश्वसिति। लुङ् आश्वसीत्। रुद:—रुद-लुङ् स। मायोगे अड़ागमनिषेध:। पक्षे अरोदी:। लट रोदिति।

ভ্রাতৃদ্বয় তাহাকে প্রত্যুত্তরপ্রদানে কহিল, তোমার কল্যাণ হইবে, এক্ষণে আমাদের প্রাণ ধারণ করা তোমার সম্মান রক্ষার জন্য। তুমি যথাভিলষিত স্থানে গমন কর, আশ্বস্তা হও, আর ক্রন্দন করিও না।'

You will gain prosperity, we live now for the restoration of your honor ; go and take comfort ; thus was she addressed by her two brothers.

Q. **Change the voice in the above extract** Ans. See above. Q. **Give the meaning of** श्व:श्रेयस्। Ans. See above. Q. **Conjugate the root of** प्राणिम: **in** लट्। Ans. प्राणिति प्राणित: प्राणन्ति। प्राणिषि &c। ३८।

39. Principal part :—अनपराधे (भावे सप्तमी) वयं (कर्तृ) नक्तन्दिवं (व्यं व्याप्तौ द्वितीया) नरान् (कर्म्म) जघ्निम:। (2) तेभ्य: (क्षम-योगे ४र्थी) क्षमामहे। Adj. to तेभ्य:—द्रुह्यद्भ्य:।यत् (इति योगे प्रथमा) तत् (कर्तृ जन्यम्) कुतस्त्यम् (विधेय) भवेत्।

Prose order :—वयं अनपराधे अपि नक्तन्दिवं नरान् जघ्निम:। भीरु द्रुह्यद्भ्योऽपि तेभ्य: क्षमामहे इति यत् (तत्) कुतस्त्यम् (भवेत्)।

Substance :—ये नाम अस्माकम् भीत्या: अपराधस्य विना सततम् हतव्या:, ते इदानीम् अप्रियम् आचरन्त: कथं न वधम् अर्हेयु:।

Explanation in tika form :—यमर्थं यदि वः क्षमम् इत्यस्य प्रति-वचनमाह जक्षिम इति । वयम् अपराधस्य अभावेऽपि नक्तं च दिवा च नक्तन्दिवम् अहोरात्रम् अचतुरेत्यादिना निपातितम् । नरान् जक्षिमः भक्षयामः । "अस्मदो-द्वयोश्च" इति द्वित्वे वयमिति बहुवचनम् । यद्वा अस्मदो द्वित्वे बहुत्वविवक्षा, अप-राधवयोगाद्बहुत्वम् । हे भीरु द्रुह्यद्भ्योऽपि द्रोहं कुर्वद्भ्योऽपि तेभ्यो नरेभ्यः वयं क्षमामहे ("क्रुध द्रुहेर्ष्यासूयार्थानां यम्प्रति कोपः" इति सम्प्रदानत्वम् अमि-रसूयार्थत्वात् ।*) यत् इति, तत् कुतस्त्यं कुत आगतम् "अव्ययात् त्यप्" इति त्यप्प्रत्ययः भवेत् इति शेषः । इतं पथ्यावक्त्रम् ।

Change of V.—जक्ष्यन्ते नरा अस्माभिः...... ।......क्षम्यते ।

Derivation :—जक्षिमः—जक्ष लट् मस् । लट् जक्षिति, जक्षितः, जक्षति । कुतस्त्यम्—कुतस्-त्यप् । भीरु—भी-रु: (सम्बुद्धौ) । द्रुह्यद्भ्यः—द्रुह्-शतृ-४र्थी । क्षमामहे—क्षम-लट् महे । लट क्षमते । लुङ अक्षमिष्ट ।

অপরাধ না করিলেও আমরা দিবারাত্রি মনুষ্যদিগকে ভক্ষণ করিয়া থাকি । অয়ি ভয়শীলে ! এক্ষণে তাহারা আমাদিগের অনিষ্ট করিয়াছে অতএব তাহাদিগকে ক্ষমা করিব এ কথা কিরূপে সম্ভবে ?

Thou timid ! how is it possible that we who devour men day and night even when they are innocent, shall spare them when they have quarreled with us ?

Q. Account for the case ending in तेभ्यः । Ans. See above. Q. Parse यत् । Ans. 'इति' ऊह्यम् । इति योगे प्रथमा । Q. Explain the formation of कुतस्त्यम् । Ans. किम् इत्यस्मात् तसि कृते कुतः इति अव्ययपदं निष्पन्नम् । ततः "अव्ययात् त्यप्"

---

* अक्षमा असूया । So क्षमा is negative term of असूया । As the terms क्रुध (to be angry with) द्रुह (to injure) ईर्ष्या (to envy) असूया (to quarrel=अक्षमा=resentment) might be taken in their positive as well as negative sense, क्षमा is looked upon as negative असूया, and so falls under the rule "क्रुधद्रुहेति" ।

तौ चतुर्दशसाहस्रबलौ निर्ययतुस्ततः ।
पारश्वधिकधानुष्कशाक्तीकप्रासिकान्वितौ ॥ ४० ॥

इति ल्यप् । "अमा इह क तसि त्रेभ्यः एव" इति कात्यायनवचनात् तसन्तात् अव्ययादेव अत्र त्यप् । ३९ ।

40. Principal part :—ततः तौ निर्ययतुः । Adj. to तौ—चतुर्दशसाहस्रबलौ and...प्रासिकान्वितौ ।

Prose order :—ततः चतुर्दशसाहस्रबलौ पारश्वधिकधानुष्कशाक्तीकप्रासिकान्वितौ तौ निर्ययतुः ।

Substance :—अथ तौ खरदूषणौ चतुर्दशसहस्रैः बलैः बहुप्रहरणोपेतैः अन्वितौ संग्रामार्थं निर्गतौ ।

Explanation in tika form :—ततौ वचनान्तरं चतुर्दशसहस्राणि परिमाणमस्य चतुर्दशसाहस्रं, अण्प्रत्ययः, उत्तरपदस्य च वृद्धिः ।* तथाभूतं बलं सैन्यं ययोः तौ । तथा, परश्वधः प्रहरणमेषामिति पारश्वधिकाः "परशुश्च परश्वध" इत्यमरः "परश्वधात् ठञ्च" इति ठञ्प्रत्ययः । धनुः प्रहरणमेषामिति धानुष्काः "प्रहरणम्" † इति ठक् । शक्तिः प्रहरणमेषामिति शाक्तीकाः "शक्तियष्ट्योरीकक्" इति ईकक् । प्रास्यन्ते इति प्रासः कुन्तः । , कर्म्मणि घञ् । स प्रहरणमेषामिति प्रासिकाः "प्रहरणम्" इति ठक् । तेषां समाहारः, सेनाङ्गत्वात् एकवद्भावः । तेन अन्वितौ समेतौ तौ खरदूषणौ निर्ययतुः निर्गतौ । वृत्तं पथ्यावक्त्रम् ।

Change of V.—ताभ्यां ... बलाभ्यां निर्ययै...अन्विताभ्याम् ।

Derivation.—पारश्वधिक—परश्वध+ठञ् । धानुष्क—धनुष्+ठक् ।

---

* "शतमान विंशतिक सहस्र वसनात् अण् ।" इति सहस्रात् अण् । "संख्यायाः संवत्सरसंख्यस्य च" । When a numeral is preceded by another numeral, वृद्धि takes place in the latter word. The word चतुर्दशसाहस्रम् is thus formed.

† ठक् takes place after the words signifying weapons in the sense of belonging to.

अथ सम्पततो भीमान् विशिखै रामलक्ष्मणौ ।
बहुमूर्ध्नो द्विमूर्धांश्च त्रिमूर्धांश्चाहतां मृधे ॥ ४१ ॥

शाक्तीकः—शक्ति-ईकक्। प्रासिक—(प्र-अस-घञ्) प्रास-ठक्। अभ्यितौ—अर्द्-इ-क्तः। लुङ् अगात्।

অনন্তর তাহারা দুই জনে পরশুধারী ধনুর্দ্ধারী শক্তিধারী ও কুন্তধারীদিগের সহিত মিলিত হইয়া চতুর্দ্দশ সহস্র সৈন্য লইয়া যাত্রা করিল।

Then the two, fourteen thousand strong, marched out, accompanied by those who held the axe, the bow, the spear and the lances.

Q. Expound the samases in the 2nd line. Ans. See above. Q. Show the grama. peculiarity in the stanza. Ans. The consecutive aphorisms of Panini viz. "प्रहरणम्" "परश्वधात् ठञ्" "शक्तियष्ट्योः ईकक्" have been cleverly illustrated in this single distitch. । ४० ।

41. Principal part :—अथ (व्यम्) रामलक्ष्मणौ (कर्तृ) मृधे (अधि) (राक्षसान्) विशिखैः (करणैः) आहताम्। Adj.s to तान्—सम्पततः, भीमान् बहुमूर्ध्नः, द्विमूर्धान् and त्रिमूर्धान्।

Prose order :—अथ रामलक्ष्मणौ मृधे बहुमूर्ध्नः, द्विमूर्धान्, त्रिमूर्धान् भीमान् सम्पततः (राक्षसान्) विशिखैः आहताम्।

Substance :—Not necessary

Explanation in tika form :—अथ निर्गमानन्तरम्, 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यमरः। रामलक्ष्मणौ मृधे संग्रामे "मृधमास्कन्दनं संख्यं समीकं साम्परायिकम्" इत्यमरः। बहवः मूर्द्धानः येषां तान् बहुमूर्ध्नः अनेकशिरसः। तथा द्वौ मूर्द्धानौ येषां तयोस्तान्, तथा त्रिमूर्द्धान् त्रिशिरस्कान्, "द्वित्रिभ्यां षो मूर्ध्नः" इति समासान्तः षः। अतएव भीमान् भयानकान् "भीमो भयानकेऽपि स्यात् भीमो पाण्डवभूद्धरी।" सम्पततः संगच्छतः तान् राक्षसान्,

तैर्वृकण रुग्न संभुग्न भुग्न भिन्न विपन्नकैः।
निमग्नोद्विग्न संक्लीपैः पप्रे दीनैश्च मेदिनी ॥ ४२ ॥

विशेषणोपादानात् विशेष्यप्रतिपत्तिः, प्रकृतत्वाद्वा। विशिखैः वाणैः आहतां इतवन्तौ आ इत्यस्मात् हन्तेः लङ्। इत्तं पथ्यावक्त्रम्।

Change of V.—सम्पततः भीमाः रामलक्ष्मणाभ्यां बहुमूर्द्धानः द्विमूर्द्धाः, त्रिमूर्द्धाः आहन्यन्त।

Derivation.—सम्पततः—सम्-पत-शतृ-द्वितीया। भीम—भी-अपादाने मक्। विशिखः—विशिष्टा शिखा यस्य सः। शी-खक=शिखा। मूर्द्धन्—मुर्छ-कनिन्। आहताम्—आ-हन्-लङ् ताम्।

অনন্তর রাম ও লক্ষ্মণ যুদ্ধে তদভিমুখে ধাবমান সেই রাক্ষসদিগকে শরদ্বারা আহত করিয়াছিলেন; তাহাদিগের কাহার দুই, কাহার তিন, কাহারও বা অনেক মস্তক ছিল।

Rama and Laksmana wounded, with the arrows, the terrible demons, some having heads numerours, many two, and the others three, rushing forward in the field.

Q. Account for the different forms in बहुमूर्द्धः and विमूर्द्धान्। Ans. "द्वित्रिभ्याम् षो मूर्द्धः" इति द्विशब्दात् समासान्त षः, बहुशब्दात् तु न षः, अतः बहुमूर्द्धन् इति अन्भागान्तस्थितिः। ४१।

42. Principal part :—तैः (अनुक्त कर्तृ) मेदिनी (उक्त कर्म) पप्रे। All other words are adjectives to तैः।

Prose order :—वृकणरुग्णसंभुग्नभुग्नभिन्नविपन्नकैः निमग्नोद्विग्नसंक्लीपैः दीनैः तैः मेदिनी पप्रे।

Substance :—केचित् राक्षसाः छिन्नदेहाः आसन्। केचित् भग्नहस्तपादाः अभवन्। केषाञ्चित् देहैर्वक्रीभूतैः संपिष्टैर्विदारितैर्वा अभूयत। केचित् प्रनष्टा अभूवन्। केऽपि भयेन आत्मनः जुगुपुः। अन्ये भयमुपगताः। अपरे लज्जिताः संवृत्ताः। एवंविधैः रक्षोभिः पृथ्वी पूरिता अभवत्।

Explanation in tika form :—अथ निशा-चरा' प्रदर्शयितुमाह

तैरिति । वृक्णाः छिन्नाः, तथा रुग्णा भग्नहस्तपादाः, तथा संभुग्ना वक्रीकृतदेहाः तथा क्षुण्णाः संपिष्टशरीराः, तथा भिन्ना विदारिताः तथा विपन्नका नष्टाश्च । (अनुकम्पायां कन्) इति विशेषणसमासः, परविशेषणं विशेष्यवत् वाच्यम् । तथाभूतैः । तथा निमग्ना भीत्या युक्ता रुधिरप्रवाहैर्मग्ना वा, उद्विग्नाः भीताः; संक्रीणाः लज्जिताः तथाभूतैश्च । पूर्ववत् विशेषणसमासः । दीनैः हा पितः हा मातः ! इति विलपद्भिः तैः राक्षसैः मेदिनी पृथिवी पप्रे पूरिता (पृ पूर्त्तौ इत्यस्मात् कर्म्मणि लिट्) राक्षसाः सर्व्वे विपत्तिमशेषां भेजिरे इत्यर्थः ।

Change of V.—ते........ विपन्नकाः.........संक्रीणाः पपुः दीनाः मेदिनीम् ?

Derivation.—वृक्ण—व्रश्च-क्तः । लट् (तुदादिः) वृश्चति । लुङ् अव्रश्चीत्, अव्राक्षीत् । लिट् वव्रश्च । रुग्ण—रुज (तुदादिः) क्तः । लट् रुजति लुङ् अरौक्षीत् । संभुग्न—सं-भुज (तुदादिः) क्तः । लट् भुजति । लुङ् अभौक्षीत्, अभौक्ताम् &c । क्षुण्ण—क्षुद (रुधादिः) क्तः । लट् क्षुणत्ति, क्षुन्ते लुङ् अक्षुदत्, अक्षौत्सीत्, अक्षुत्त । भिन्न—भिद (रुधादिः) क्तः । लट् भिनत्ति, भिन्ते । लुङ् अभिदत्, अभैत्सीत्, अभित्त । विपन्नक—वि-पद-क्त (अनुकम्पायां कन्) । लट् पद्यते । लुङ् अपादि । निमग्न—नि-मस्ज-क्तः तुदादिः । लट् मज्जति । लुङ् अमाङ्क्षीत् । लिट् 2nd person singular. ममङ्क्थ, ममज्जिथ । उद्विग्न—उत्-विज-क्तः । तुदादिः प्रायेण उत्पूर्व्वश्च । उद्विजते (लट्) लुङ् उदविजिष्ट । संक्रीण—सं-ह्री-क्तः (जुहोत्यादिः) लट् जिह्रेति, जिह्रीतः, जिह्रियति &c । पप्रे—पृ-लिट् ए । लट् पिपर्त्ति । लुङ् अपारीत् । दीन—दी-क्तः (दिवादिः) लट् दीयते । लुङ् अदास्त । लिट् दिदीये । लुट् दाता ।

ছিন্নদেহ, ভগ্নহস্তপদ, বক্রীকৃতদেহ, সংপিষ্ট শরীর, বিদারিত, মৃত, পরিভূত, ভীত, লজ্জিত ও দীনচেতা রাক্ষসগণ কর্তৃক পৃথিবীতল পরিপূর্ণ হইল।

The earth was filled up by them, some torn to pieces, some mutilated, some crooked, some pierced, others lifeless, some drowned in blood, some worried with cares, some ashamed while others helpless.

केचिद्वेपथुमासेदुरन्ये दवथुमुत्तमम्।
सरक्तं वमथुं केचिद्भ्राजथुं न च केचन ॥४३॥

Q. Quote some instances of त being changed into न in निष्ठा and show they are conformable to Panini's aphorisms. Ans. Quote the above sloka. The words वृक्ण, रुग्ण, भुग्न, मग्न, विग्न and दीन from the roots व्रश्च, रुज, भुज मस्ज, विज and दी respectively are formed by the aphorism "ओदितश्च"। क्षुण्ण, भिन्न and पन्न from the roots क्षुद, भिद and पद are by the aphorism "रदाभ्याम् निष्ठातो नः पूर्व्वस्य च दः।" क्षीब from the root क्षी is formed by the rule "नुद विद उन्द त्रा घ्रा ह्रीभ्योऽन्यतरस्याम्।" ४२।

43. Compounded of 4 simple sentences as below.

Prose order :—(1) केचित् वेपथुम् आसेदुः, (2) अन्ये उत्तमं दवथुं (आसेदुः), (3) केचित् सरक्तं वमथुम् आसेदुः (4) केचन भ्राजथुं न च (आसेदुः)।

Substance :—युद्धे राक्षसानां केऽपि कम्पिताः आसन्, केऽपि क्लिष्टा अभवन्। केचित् अत्यर्थप्रहारात् शोणितं वेमुः। जयश्रियन्तु न केऽपि अवापुः।

Explanation in tika form :—अथ अथुच्प्रत्ययस्य उदाहरणम् प्रदर्शयन्नाह केचिदिति। तेषां मध्ये केचित् वेपथुं कम्पम् आसेदुः प्रापुः। "वेपथुः कम्पः" इत्यमरः। अन्ये राक्षसा 'उत्तमं महान्तं दवथुं उपतापम् आसेदुरिति शेषः। केचित् राक्षसा रक्तेन सह सरक्तं शोणितयुक्तं वमथुं छर्दिमासेदुरिति शेषः। प्रहारात् शोणितं वेमुरित्यर्थः। केचन च पश्चान्नरि भ्राजथुं दीप्तिं शोभामिति यावत् नासेदुरिति शेषः। न केऽपि जयश्रियमवापुः इत्यर्थः। सर्व्वत्र "ट्वितोऽथुच्"* इति अथुच्प्रत्ययः। इत्तं पथ्यावक्त्रम्।

---

* Roots preceded by टु in गण have the affix अथुच् (अथु) after them.

मृगयुमिव मृगोऽथ दक्षिणेर्म्मा
दिशमिव दाहवतीं मरावुदन्यन्।
रघुतनयमुपाययौ विमूर्द्धौ
विषभृदिवोग्रमुखं पतत्त्रिराजम्॥ ४४॥

Change of V.—कैश्चित् वेपथुः आसेदे, अन्यैः दवथुः उत्तमः, अपरैः वमथुः कैश्चित्, भाजथुः न च कैश्चन।

Derivation.—वेपथु—वेप-अथुच्। लट् वेपते। लुङ् अवेपिष्ट। आसेदुः—आ-सद-लिट् उस। लट् सीदति। लुङ् असदत्। दवथु—दु-अथुच्। लट् दुनोति। लुङ् अदावीत्। वमथु—वम-अथुच्। लट वमति। लुङ् अवमीत्। भाजथु—भाज-अथुच। लट भाजते।

সেই রাক্ষসগণের মধ্যে কেহ কাঁপিতে ছিল, অন্যে মহৎ যন্ত্রণা প্রাপ্ত হইয়াছিল। অপরে রক্ত বমন করিতে লাগিল; কিন্তু কেহই শোভা পায় নাই।

Some got to trembling, while others to painful afflicting, Some to vomiting blo... but none attained to resplendence.

Q. Quote some words formed of अथुच् from your text. Ans. Quote the above extract. ४३।

44. Principal part :—अथ (अव्यम्) विमूर्द्धः (कर्त्तृ) रघुतनयम् (कर्म्म) उपाययौ। मृगयुम् दिशम् and पतत्त्रिराजम् (उपमानकर्म्म), विषभृत्, मृगः and उदन्यन् मृगः (उपमानकर्त्तृ)। दक्षिणेर्म्मा—Adj. to मृगः। दाहवतीम्—Adj. to दिशम्।

Prose order :—अथ दक्षिणेर्म्मा मृगः मृगयुमिव, उदन्यन् (मृगः) मरौ दाहवतीं दिशमिव, विषभृत् उग्रमुखं पतत्त्रिराजमिव, विमूर्द्धः रघुतनयम् उपाययौ।

Substance :—दक्षिणाङ्गे आहतो मृगः यथा आत्मविनाशाय व्याधमेव धावति, यथा वा पिपासितो मृगः दग्धां दिशं प्रति मरुदेशे द्रुतं प्रसरति, यथा वा

सर्पः कराजपदनं गरुड़ं स्वविनाशार्थं धावति तथा स त्रिमूर्द्धः रामं प्रति धावितः ।

Explanation in tika form :—अथ एतस्मिन् राक्षसविध्वंसनप्रस्तावे दक्षिणे अङ्गे ईर्मं व्याधघातव्रणं यस्य स दक्षिणेर्म्मा, व्याधेन प्रक्षितदक्षिणाङ्ग इत्यर्थः, "दक्षिणेर्म्मा कुरङ्गयोगे" इति पाणिनिः । "क्लीवेऽस्त्रियामीर्म्ममरु:" इत्यमरः । अथवा इर्म्मन्शब्दोऽपि अस्ति । मृगः, मृगं यातीति मृगयुः तम् व्याधं "व्याधो मृगवधाजीवी मृगयुर्लुब्धकोऽपि सः" इत्यमरः । तमेव लुब्धकम् मरणाय उपयाति तद्वत् । यथा वा उदकमिच्छतीति उदन्यन् "सुप आत्मनः" इति क्यच् । उदकस्योदन्भावः । उदकपानाभिलाषी मृगः मरौ निर्ज्जलदेशे दाहवतीं दावाग्नियुतां दिशमिव दिशम् यथा धावति इत्यर्थः । यथा विषभृत् विषधरः सर्पः उग्रमुखं भीषणमुखं पतत्त्रिराजं गरुड़म् उपयाति "राजाहः सखिभ्यष्टच्" इति समासान्तष्टच् । तद्वत् त्रिमूर्द्धः त्रिशिराः नाम राक्षसः "द्वित्रिभ्यां ष मूर्ध्नः" इति समासान्तः षः । (See sloka 41) रघुतनयम् रामम् उपाययौ उपागतः । यथा मृगादीनाम् मृगय्वादिकं प्रति धावनं विनाशाय एव भवति तथा तस्य रामाभिगमनं मरणाय अभूत् इति नमितार्थः । मालोपमालङ्कारः ।

न न र य

मृ॑ ग॑ यु॑ । मि॑ व॑ मृ॑ । गोऽर्थ॑ द । चि॑ णे॑ र्मा

न ज ज र ग

दि॑ श॑ मि॑ । व॑ दा ह॑ । व॑ तीं म॑ । रा यु॑ द । न्यन् ।

"अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रा" अतः पुष्पिताग्रा वृत्तम् ।

Change of V.—मृगयुरिव मृगेण दक्षिणेर्म्मणा दिक् दाहवती उदन्यता रघुतनयः उपययै त्रिमूर्द्धेन विषभृता उग्रमुखः पतत्त्रिराजः.... ।

Derivation.—मृगयु—मृग-या-कुः निपातः । उदन्यन्—(उदक-क्यच्) उदन्य-शतृ । उपाययौ—उप-आ-या-लिट् ण । विषभृत्—विष-भृ-क्विप् ।

যেরূপ ব্যাধ কর্তৃক দক্ষিণাঙ্গ বিদ্ধ মৃগ পুনর্ব্বার ব্যাধের সমীপেই

शितविशिखनिकृत्तकृत्तवक्त्रः
चितिभृदिव चितिकम्पकीर्णशृङ्गः।
भयमुपनिदधे स राक्षसाना-
मखिलकुलक्षयपूर्व्वलिङ्गतुल्यः॥ ४५ ॥

गमন করে, পিপাসাতুর মৃগ যেরূপ মরুভূমিতে দাবাগ্নিযুক্ত দিকে গমন করে এবং সর্প যেরূপ করালবদন গরুড়ের সমীপে গমন করে তদ্রূপ ত্রিশিরা রাক্ষস রামচন্দ্রের অভিমুখে গমন করিল।

Trimurdhan (one, with three heads) approached to Rama, as the snake does to Garuda the king of the birds, with his fierce mouth; as the deer wounded on the right side, to the hunters; as the thirsty antelope in a desert, to the quarter burning.

Q. Show the fitness of the similes. Ans. यथा मृगादीनां व्याधादिकं प्रति धावनं निश्चितविनाशाय भवति तथा त्रिमूर्द्धस्य रामं प्रति धावनं ध्रुवं मरणाय अभवत् इति उपमासार्थक्यम्। Q. Comment gram. on पतगिराजम् and उदयत्। Ans. See above. । ४४ ।

45. Principal part :—सः (कर्त्ता) चितिभृत् इव (उपमानकर्त्ता) राक्षसानां (सम्ब) भयम् (कर्म्म) उपनिदधे। Adj. to सः—शितविशिखनिकृत्तकृत्तवक्त्रः and अखिलकुलक्षयपूर्व्वलिङ्गतुल्यः। Adj. to चितिभृत्—चितिकम्पकीर्णशृङ्गः।

Prose order :—शितविशिखनिकृत्तकृत्तवक्त्रः अखिलकुलक्षयपूर्व्वलिङ्गः सः (त्रिमूर्द्धा) चितिकम्पकीर्णशृङ्गः चितिभृदिव राक्षसानां भयम् उपनिदधे।

Substance :—शाणितशरैश्च त्रिमूर्द्धस्य मस्तकानि छिन्नानि आसन्। यथा भूमौ पतनेन भग्नशृङ्गः पर्व्वतः यथा भयम् उत्पादयति तथा स छिन्नमस्तकः भूमौ पतन् राक्षसानां भयम् उदपादयत्। तेन च विज्ञापितं यत् राक्षसानां कुलक्षयः ह्रस्व।

Explanation in tika form :—श्रितैः तीक्ष्णैः विशिखैः बाणैः निकृत्तानि छिन्नानि कृत्तानि सर्वाणि वक्राणि त्रीणि मुखानि यस्य तथाभूतः, तथा अखिलस्य सर्वस्य कुलस्य चयः तस्य यत् पूर्वलिङ्गं आदिचिह्नं तेन तुल्यः स त्रिमूर्द्धः, क्षितिकम्पेन भूमिकम्पेन कीर्णानि छिन्नानि शृङ्गाणि यस्य तथा क्षितिभृत् पर्वतः इव पर्वतोऽपि अखिलकुलचयपूर्वलिङ्गतुल्यः। राक्षसानां भयम् उपनिदधे जनयामास। अनेन उपमानेन दीर्घदेहत्वं सूचितम्। अत्र पूर्णोपमालङ्कारः।

न न र य

श्रि तै वि। शि खै नि। कृ त्त कृ त्। स्न व क्त्रः।

न ज ज र ग

क्षि ति भृ। दि व क्षि। ति क म्पे। की र्ण शृ। ङ्गः

अयुजि नयुगरेफतो यकारो। युजि तु नजौ जरगाश्च पुष्पिताग्रा॥ अतः पुष्पवत् पुष्पिताग्रा वृत्तम्।

Change of V.—श्रितविशिखनिकृत्तकृत्स्नवक्त्रेण क्षितिभृता क्षितिकम्पकीर्णशृङ्गेण भयम् उपनिदधे तेन अखिलकुलचयपूर्वलिङ्गतुल्येन।

Derivation :—श्रित—श्रि-कर्मणि क्तः। लट् श्रयति। लुङ् अशिश्रियत्, अश्रासीत्। निकृत्त—नि-कृत् क्तः। लट् कृन्तति, लुङ् अकर्त्तीत। क्षितिभृत्—क्षिति-भृ क्विप्। बिभर्त्ति लट्, अभार्षीत्, अभृत लुङ्। वक्त्रम्—वक्ति अनेन इति वक्त्रम्। वच्धातोः ष्ट्रन्। वक्ति—लट् अवोचत् लुङ्। कृत्स्न—कृत-क्स्नः।

শাণিত বাণে তাহার সমস্ত মস্তক ছিন্ন হওয়াতে, ভূমিকম্পে ভগ্নশৃঙ্গ পর্ব্বতবৎ সমুদয় কুলক্ষয়ের প্রথম চিহ্নের স্থায় প্রতীয়মান হইয়া সে রাক্ষসদিগের মধ্যে ভয় সঞ্চার করিয়াছিল।

Trisira with all his heads cut off by sharp arrows looked like a mountain of which the peaks were shattered by earthquake and struck terror into the hearts of the demons like a "portend forboding the ruin of the whole race"

Q. Derive क्षिति and conjugate the root in लट् ।

Ans. क्षि निवासे इति तुदादिगणीयात् क्षिधातोः क्तिः । "इच्छेद्वा गच्छतो-र्थे क्षयतीत्यादिकं भवेत् । पृथिव्यां क्षियतीत्यादौ निवासार्थः प्रकीर्त्तितः । नाशं क्षिणोति लोकोऽसौ विनाशार्थः क्षिणुर्मतः ।" **Q. Explain the simile.** Ans. भूकम्पेन पतितस्य पर्व्वतस्य शृङ्गेषु भग्नेषु यथा स सवि-स्मयं लोकैः दृश्यते तथा छिन्नशिराः विमूर्द्धः भग्नशिराः पर्व्वत इव सुदीर्घः राक्ष-सानाम् विस्मयमादधानः तैः अदृश्यत इति स्पष्टार्थः । ४५ ।

The purport of the canto IV.—अथ सीतया लक्ष्मणेन च सार्द्धं वने भ्रमन् रामः विराधनाम्ना राक्षसेन आक्रान्तः । रामस्तं निहत्य शरभङ्गा-श्रमम् अगमत् । शरभङ्गस्तु तं दृष्ट्वा कृतार्थः सन् सुतीक्ष्णमुनेः आश्रमं प्रदर्श्य अग्नौ देहम् अत्याक्षीत् । ततो रामः ऋषीणाम् आश्रमान् परिभ्रमन् राक्षसकुलं निहतमकरोत् । अथैकदा मानवं रूपं धारयन्ती शूर्पणखा रामं सपत्नीकं दृष्ट्वा परिज्ञाय च तं लक्ष्मणं पतिं वृतवती । रामस्तु मे प्रभुः, स चातीव सुन्दरः; अतः तमेव गच्छ इति अभिहिता रामसकाशं पुनरुपगता राक्षसी रामेण पुनः लक्ष्मण-सकाशं प्रेषिता । लक्ष्मणस्तु तस्यां दण्डं विदधत् तस्या नासां चिच्छेद । राक्षसी अभ्युपगता तान् निहन्तुकामा खरदूषणयोः समीपं गता । इत्थं रामेण तयोः सह युद्धे त्रिमूर्द्धादयः सर्व्वे राक्षसाः हताः ।

पञ्चमः सर्गः ।

निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितो रणम् ।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ ॥ १ ॥

पञ्चानां पूरणः पञ्चमः "नान्तात् असंख्यादेर्मट्" । इति नकारान्तात् संख्याचिनः पञ्चन् शब्दात् पूरणार्थे मट् ।

I. Principal part: खरदूषणौ (कर्तृ) रणं परितः चेरतुः Adjectives to the subject:—निराकरिष्णू, वर्त्तिष्णू, वर्द्धिष्णू, उत्पतिष्णू and सहिष्णू ।

Prose order:—निराकरिष्णू, वर्त्तिष्णू, वर्द्धिष्णू, उत्पतिष्णू, सहिष्णू खरदूषणौ रणं परितः चेरतुः ।

Substance:—खरदूषणौ शत्रून् निराकर्तुं समर्थौ आस्ताम् । तौ प्रतियोद्धुः पुरतः नियतम् अतिष्ठताम् । मायया राक्षससंख्याम् अवर्द्धयताम् च विपक्षस्य अस्त्राघातं सहमानौ, आकाशोत्पतनशीलौ च तौ सर्वत्र रणभूमि विचेरतुः ।

Explanation in tika form:—निराकरिष्णू क्षिप्नू, शत्रु निराकरणशीलौ इत्यर्थः "निराकरिष्णुः क्षिप्नुः स्यात्" इत्यमरः । वर्त्तिष्णू वर्त्तनशीलौ प्रतियोद्धृसम्मुखे इति शेषः । न पलायनशीलौ इत्यर्थः । "वर्त्तिष्णुर्वर्त्तनः समौ" इत्यमरः । वर्द्धिष्णू मायया महाप्राणीहावनशीलौ "वर्द्धिष्णुस्तु वर्द्धनः" इत्यमरः उत्पतिष्णू आकाशे उत्पतनशीलौ "उत्पतिष्णुरुत्पतिता" इत्यमरः । सहिष्णू प्रतियोद्धृशस्त्रघातादिसहनशीलौ "सहिष्णुः सहनः क्षन्ता" इत्यमरः । सर्वत्र "अलंकृञ् निराकृञ् प्रजनोत्पचोत्पतोन्मद रुच्यपत्रप वृतु वृधु सह चर इष्णुच्" इति इष्णुच्प्रत्ययः । खरदूषणौ राक्षसाध्यक्षौ रणं परितः समन्तात् "अभितः परितः समया निकषा हा प्रतियोगेऽपि" इति परितः शब्दयोगे द्वितीया, चेर

तौ खड्गमुषलप्रासचक्रबाणगदाकरौ।
अकार्ष्टामायुधच्छायं रजःसन्तमसे रणे॥ २॥

भाती। चरतेः लिटि। इदं पद्यावकम्। अत्र च यथा "युक्तोऽचतुर्थेतौ ह्रेन पं गावन्तं प्रचक्ष्यते।"

Change of V.—निराकरिष्णुभ्यां वर्त्तिष्णुभ्यां वर्द्धिष्णुभ्याम् उत्पतिष्णुभ्यां सहिष्णुभ्यां खरदूषणाभ्यां चेरे।

Derivation.—निराकरिष्णु—निर् आ-कृ इष्णुच्। वर्त्तिष्णु—वृत्-इष्णुच्। वर्द्धिष्णु—वृध-इष्णुच्। उत्पतिष्णु—उत्-पत-इष्णुच्। सहिष्णु—सह-इष्णुच्। चेरतुः—चर-लिट्-अतुस्। चरति—लट्। अचारीत्—लुङ्।

খর ও দূষণ শক্র নিরাকরণ করিতে পটু ছিল। তাহারা প্রতিযোদ্ধার সম্মুখীন হইয়া যুদ্ধ করিতে লাগিল। মায়া দ্বারা আপনাদিগকে বর্দ্ধিত করিতে লাগিল। আকাশে উৎপতিত হইতে লাগিল ও প্রতিযোদ্ধার শস্ত্রাঘাত সহ্য করিয়া রণে বিচরণ করিতে লাগিল।

Khara and Dusana 'hovered about' the battle, capable as they were, of repelling, and resisting enemies, of enlarging their number by magical power, of flying up into the sky and of bearing up patiently against evils.

Q. Name some words that are formed of इष्णुच्। Ans.—(Quote the above stanza). ॥ १॥

2. Principal part :—तौ (कर्त्तृ) रणे (अधि) आयुधच्छायम् (कर्म) अकार्ष्टाम्। Adj. to तौ—खड्गमुषलप्रासचक्रबाणगदाकरौ। Adj. to रणे—रजःसन्तमसे।

Prose order :—खड्गमुषलप्रासचक्रबाणगदाकरौ तौ रजःसन्तमसे रणे आयुधच्छायम् अकार्ष्टाम्।

Substance.—नानास्त्रधरौ खरदूषणौ धूलिपटलेन जातान्धकारे रणस्थले अस्त्रकान्तिं विस्तारयामासतुः। अथवा आकाशे भ्रमतोः खरदूषणयोः अस्त्राणाम् छायया पृथ्वी परिव्याप्ता।

Explanation in tika form :—खड्गश्च असिः, मुषलश्च, प्रासश्च कुन्तः चक्रश्च बाणश्च इति खड्गमुषलप्रासचक्रबाणम् । द्वन्द्वैकवद्भावः । तेन सहिता गदा इति, शाकपार्थिवादित्वात् समासः । खड्गमुषलप्रासचक्रबाणगदा करे ययोरिति । "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" * इति करशब्दस्य परनिपातः । [समुदायस्य एकवद्भावेन "जातिरप्राणिनाम्" इति नपुंसकलिङ्गता, तेन बाणगदमिति स्यात्] तौ खरदूषणौ सम्यक् तमः सन्तमसं "अवसमन्धेभ्यस्तमसः" † इति अच् । रजसा धूलिना सन्तमसम् अस्मिन् इति रजःसन्तमसं तस्मिन्, रजसा कृतान्धकारे रणे रणभूमौ आयुधानाम् अस्त्राणाम् कान्तिः अनातपो वा इति आयुधच्छायम् "छायाबाहुल्ये" § इति नपुंसकत्वम् । अकार्ष्टाम् कृतवन्तौ, कृधातोः लुङि ताम् । (प्रथमपुरुषद्विवचने) आयुधकान्तिं विस्तारयामासतुः इत्यर्थः । "छाया सूर्य्यप्रिया कान्तिः प्रतिबिम्बम् अनातपः ।"

Change of V.—ताभ्यां......कराभ्यां अकारि...... ।

Derivation.—प्रास—प्र-अस्-अप् । अकार्ष्टाम्—कृ-लुङ् ताम् ।

छन्दः—इत्तम् पथ्यावक्त्रम् ।

যে রণভূমি ধূলিতে অন্ধকারাচ্ছন্ন, তাহাতে খর ও দূষণ, খড়্গ, মুষল, কুন্ত, চক্র, বাণ ও গদা ধারণ করিয়া অস্ত্রের চাক্‌চিক্যে সেই স্থান প্রতিফলিত করিয়াছিল । (অথবা অস্ত্রের ছায়ায় সেই স্থান আচ্ছন্ন করিয়াছিল ।)

Another instance of English explanation.—Those two, with sword, pestle, barbed missile, discus, arrow and club in hand

---

* Words terminating in क्त or of the 7th case ending are placed last after the words signifying weapons.

† अवतमसं, सन्तमसम्, अन्धतमसम् ।

§ छायान्तस्तत्पुरुषो नपुंसकं स्यात् पूर्व्वपदार्थबाहुल्ये इति नपुंसकत्वम् । The word छाया preceded by words of plural number, become of neuter Gender. Thus आयुधानां छाया आयुधछायम् । But आयुधस्य छाया आयुधछाया ।

अथ तीक्ष्णायसैर्बाणैरधिमर्म्म रघूत्तमौ ।
व्याधं व्याधममूढौ तौ यमसाच्चक्रतुर्द्विषौ ॥ ३ ॥

spread the lustre of their weapons in the field grown very dark by dust.

Here by the word छाया is meant the lustre and not shade. No object can cast a shade in darkness. That weapons might be self luminous, can be ascertained from the following "हिंसेषु दीप्तास्त्रधरः कुमारः" १, २४, भट्टिः । अपिच "अस्त्र ज्वालावलीढ़प्रतिबलजलधेरन्तरौर्व्वायमाणे" वेणीसंहारः । so the षष्ठी समास is not inapplicable here, छाया in "छायाबाहुल्ये" signifying both lustre and shade "छाया सूर्य्यप्रिया कान्तिः प्रतिबिम्बम् अनातपः" cf. रघुः— "छायामण्डललक्ष्येण तमदृश्या &c."

Q. Expound the Samas in खड्गमुषलप्रासचक्रबाणगदाकरौ ।

Ans.—खड्गश्च मुषलश्च प्रासश्च चक्रश्च बाणश्च एतेषां समाहारः खड्गमुषलप्रासचक्रबाणम् । "जातिः अप्राणिनाम्" इति एकवद्भावः । तैः सहिता गदा इति शाकपार्थिव* वत् समासः । सा करे ययोः तौ, बहुव्रीहिः । गदाशब्देन द्वन्द्वसमासे कृते चक्रबाणगदकरौ इत्येवं स्यात् "जातिः अप्राणिनाम्" इति एकवद्भावस्य अवश्यम्भावित्वात् । (see above) । २ ।

3. Principal part :—अथ रघूत्तमौ (कर्तृ) तौ द्विषौ (कर्म्म) यमसात् (विध) चक्रतुः । बाणैः—करणे । तीक्ष्णायसैः—Adj. to बाणैः । अधिमर्म्म व्याधं व्याधम्=indeclinables. अमूढौ=Adj. to रघूत्तमौ ।

Prose order—अथ अमूढौ रघूत्तमौ तीक्ष्णायसैः बाणैः अधिमर्म्म व्याधं व्याधं तौ द्विषौ यमसात् चक्रतुः ।

---

* By शाक is meant power or era. शाकप्रियः पार्थिवः शाकपार्थिवः a king fond of power or era. This is equivalent to मध्यपदलोपी समासः ।

हतबन्धुर्जगामासौ ततः सूर्पणखा वनात् ।

पारेसमुद्रं लङ्कायां वसन्तं रावणं पतिम् ॥ ४ ॥

Substance :—अथ रणपण्डितौ रामलक्ष्मणौ शाणितेन अस्त्रेण मर्म्म 'बारंबारम् विद्ध्वा खरं दूषणञ्च यमसदनं प्रेरयामासतुः ।

Explanation in tika form—अथ तयोर्विक्रमप्रकाशानन्तरम् अमूढ़ रणपण्डितौ रघूत्तमौ । किं वा खरदूषणौ अमूढ़ौ अस्त्रवर्षेऽपि असंभ्रान्तौ मर्म्म सावधानौ वा, रणपण्डितौ वा । रघुषु उत्तमौ राघवश्रेष्ठौ रामलक्ष्मणौ अयः लौहेन निर्म्मितम् आयसम् तीक्ष्णम् आयसं फलं येषामिति तथोक्तैः बाणैः मर्म्मसु इति अधिमर्म्म विभक्त्यर्थेऽव्ययीभावः । व्याधं व्याधं विद्ध्वा विद्ध्वा "आभीक्ष्ण्ये णमुल् च" इति आभीक्ष्ण्ये * णमुल् । तौ द्विषौ शत्रू खरदूषणौ "सत्सूद्विषे"त्यादिना क्विप् । यमसात् यमाधीनौ "तदधीनवचने" इति साति चक्रतुः कृतवन्तौ, निहतवन्तौ इत्यर्थः । वृत्तं पथ्यावक्त्रम् ।

Change of V.—रघूत्तमाभ्याम् अमूढ़ाभ्यां ......चक्राते ।

Derivation.—तीक्ष्ण—तिज् क्स्नः । आयस—अयस्-विकारे अण् व्याधम्—व्यध णमुल् । विध्यति लट् । यमसात्—यम-साति: । द्विष्-द्विष्—क्विप् ।

অনন্তর রণপণ্ডিত রাঘবশ্রেষ্ঠ রাম ও লক্ষ্মণ তীক্ষ্ণাগ্র বাণ দ্বারা শত্রুদ্বয়ের মর্ম্মে বার বার বিদ্ধ করিয়া তাহাদিগকে যমসন্নিকটে প্রেরণ করিলেন ।

These two best Raghus, "unconfounded", "made an offering" of their two enemies to Pluto, piercing them repeatedly and intensely in vital parts by arrows having sharp blades.

Q. Expound the Samas in अधिमर्म्म । Ans. See above. Q. 'Prase व्याधं व्याधम् Ans. अव्ययपदम् । Q. Show the Syntactical connection between रघूत्तमौ द्विषौ । Ans. The first is nominative, and the 2nd is objective to चक्रतुः । ३ ।

* In the sense of repitition.

4. Principal part.—ततः शूर्पणखा (कर्त्री) रावणं (कर्म०) पतिं (विं विष) जगाम। Adj. to शूर्पणखा—हतबन्धुः, असौ। वनात्—अपादाने पञ्चमी। Adj. to रावणम्—वसन्तम् लङ्कायाम्—अधिकरण।

Prose order :—ततः असौ शूर्पणखा हतबन्धुः (सती) वनात् पारेसमुद्रं लङ्कायां वसन्तं रावणं पतिं जगाम।

Substance :—अथ भ्रातृद्वये निहते शूर्पणखा वनं विहाय समुद्रपारे लङ्कायां वसन्तं रावणं शरणं भेजे।

Explanation in tika form :—ततः खरदूषणनिधनान्तरं असौ, शूर्पवत् नखा यस्या इति शूर्पणखा "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति ङीष् प्राप्ते, "नखमुखात् संज्ञायाम्" इति प्रतिषेधः। "अजाद्यतष्टाप्" इति टाप्। "पूर्वपदात् संज्ञायाम्" इति णत्वम्। (See IV. 32) हतौ व्यापादितौ बन्धू भ्रातरौ यस्याः तथाभूता सती वनात् दण्डकारण्यात् समुद्रस्य पारे इति पारेसमुद्रं "पारे मध्ये षष्ठ्या वा" इति अव्ययीभावः। समुद्रस्य पारे स्थितायां लङ्कायां वसन्तं रावणं पतिं रावणमनाथं शरणमिति यावत् जगाम। विश्रवसः अपत्यं पुमान् इति रावणः अण् प्रत्ययः अथवा रावयति जगत् विद्रावयति इति रावणः। "प्रति" इति पाठे रावणं प्रति रावणं लक्षीकृत्य जगाम। वृत्तं पथ्यावक्त्रम्।

Change of V.—हतबन्धुना जग्मे अमुया शूर्पणखया......वसन् रावणः पतिः।

छन्दः—पथ्यावक्त्रम् वृत्तम्।

Derivation.—जगाम—अगमत्-लुङ्। वसन्तम्—वस-शतृ द्वितीया। लुङि—अवात्सीत्। समुद्रः—सम्-उन्द्-रः। रावण—विश्रवस्-अण्। अथवा रावयति इति रावणः, रावि-ल्यु बन्धुः बन्ध-उः।

ভ্রাতৃদ্বয় হত হইলে শূর্পণখা বন হইতে প্রস্থান করিয়া সমুদ্রপারে লঙ্কাবাসী রাবণের শরণ লইল।

Then Surpanakha (one having nails like winnowing baskets) whose relatives were killed, went from the forest for protection, to Ravana residing in Lanka on the other side of the sea.

संप्राप्य राक्षससभं चक्रन्द क्रोधविह्वला।
नामग्राहमरोदीत् सा भ्रातरौ रावणान्तिके ॥ ५ ॥

Q. Account for the form of पारेसमुद्रम्। Ans. "पारे मध्ये षष्ठ्या वा"। (The words पारे & मध्ये compounded with the words of the 6th case are optionally placed first in their unchanged form.) इति अव्ययीभावः, पारे इत्यस्य च पूर्व्वनिपातः।

5. It consists of two sentences:— (1) सा राक्षससभं प्राप्य चक्रन्द। (2) सा (कर्त्री) भ्रातरौ (कर्म्म) अरोदीत्। Adj. to सा—क्रोधविह्वला। Incomplete verb:—संप्राप्य। Object to it is राक्षससभम्। नामग्राहम् (व्यम्)। रावणान्तिके—अधिकरणे।

Prose order :—सा राक्षससभं संप्राप्य चक्रन्द। क्रोधविह्वला (सती) भ्रातरौ नामग्राहं रावणान्तिके अरोदीत्।

Substance :—सा च राक्षसानां सभां गत्वा क्रन्दितवती। क्रुद्ध च सा रावणसमीपे भ्रात्रोः नाम उच्चार्य्य भृशं ररोद।

Explanation in tika form :—सा सूर्पणखा राक्षसानां सभा राक्षससभम् "सभाराजाऽमनुष्यपूर्व्वा" इति नपुंसकता। संप्राप्य ढौकित्वा चक्रन्द ररोद। क्रोधेन विह्वला व्याकुला सती भ्रातरौ खरदूषणौ नामग्राहं नाम गृहीत्वा "नाम्न्या दिशि ग्रहोः" इति णमुल्। अथवा हा खरदूषणेति नाम्नो ग्राहं ग्रहणम् यत्र ति तत् यथा स्यात् तथा। रावणस्य अन्तिके समीपे "सप्तम्यधिकरणे च" इति चकारात् दूरान्तिकार्थेभ्यः इति सप्तमी। अरोदीत् रुदितवती अश्रुमोचनमात्रे रुदिरकर्म्मकः, शब्दयुक्तक्रन्दने तु सकर्म्मकः, इति प्राञ्चः। पूर्व्वं क्रन्दनमुक्तम्, अत्र नामग्रहणमुक्तमिति भेदः। अथवा भ्रातरौ चक्रन्द आजुहाव इति।

Change of V.—चक्रन्दे। क्रोधविह्वलया तया......अरोदिषाताम्।

छन्दः—पथ्यावक्त्रम् वृत्तम्।

Derivation.—चक्रन्द—क्रन्द-लिट् अ। क्रन्दति—लट्; अक्रन्दीत्-लुङ्। नामग्राहम्—नाम-ग्रह-णमुल्। अरोदीत्—रुद-लङ्, लुङ् द। रोदि

दण्डकामध्यवात्तां यौ वीर रक्षःप्रकाण्डकौ।
नृभ्यां संख्येऽक्रूपातां तौ समत्यौ भूमिवर्द्धनौ ॥ ६ ॥

—रोदिति। लङ्—अरोदत्, अरोदीत्। लुङ्—अरुदत्, अरोदीत्। विह्वला—दि ह्वल-अच्।

সূর্পণখা রাক্ষসগণের সভায় উপনীত হইয়া অশ্রুপাত করিতে লাগিল এবং ক্রোধে মূর্চ্ছিতপ্রায় হইয়া ভ্রাতৃদ্বয়ের নাম করিয়া রাবণের নিকট রোদন করিতে লাগিল।

Paralysed as she was with rage, she cried out reaching the assem-bly of the demons, and bemoaned her two brothers before Ravana, uttering their names.

Q. Show that अरोदीत् has here been used in the transitive sense. Ans. See above. Q. Comment gram on राक्षससभम् and नामग्राहम् Ans. See above. ५।

6. Principal part :—नृभ्यां (अनुक्तकर्त्तृ) तौ (उक्तकर्म्म) संख्ये (अधि) अक्रूपाताम्। Adj. to the Object तौ—समत्यौ, भूमिवर्द्धनौ। Subordinate Sentence :—यौ दण्डकाम् अध्यवात्ताम्। Adj. to यौ—रक्षःप्रकाण्डकौ।

Prose order :—वीर यौ रक्षप्रकाण्डकौ दण्डकाम् अध्यवात्ताम्। समत्यौ भूमिवर्द्धनौ तौ नृभ्यां संख्ये अक्रूपाताम्।

Substance :—हे वीर, यौ अस्माकं भ्रातरौ दण्डकारण्यम् अध्युषितवन्तौ, तौ युद्धे मानवाभ्यां विनाशितौ धूलिपरिणतौ भवतः।

Explanation in tika form :—तयोः किं जातमिति रावणेन पृष्टाह दण्डकामिति। हे वीर सोपालम्भसम्बोधनमिदम्। यौ रक्षःप्रकाण्डकौ रक्षसां प्रकाण्डकौ इति तत्पुरुषः, अथवा रक्षसौ प्रकाण्डकौ इति कर्म्मधारयः। प्रशस्तौ राक्षसौ इत्यर्थः। "प्रशंसावचनैश्च" इति जातेः पूर्व्वनिपातः। ततः स्वार्थे कन् "स्वार्थिकाश्च प्रकृतितो लिङ्गवचनानि अतिवर्त्तन्ते" इति न्यायात् पुंस्त्वम्। अन्यथा प्रकाण्डशब्दस्य "प्रकाण्डमुद्घतल्लजौ" इति अमरेण नपुंसकत्वं

विहितम्। दृश्यते च गोप्रकाण्डम् इत्यादौ अजहल्लिङ्गता। वस्तुतस्तु पुंलिङ्गेऽपि प्रकाण्डशब्दोऽस्ति। "उद्घप्रकाण्डौ द्वौ प्रशंसायाम्" इति हेमचन्द्रः। दण्डकां दण्डकारण्यम्। अरण्ये दण्डकाशब्दः स्त्रीलिङ्गः। अध्यवात्ताम् अध्युषितवन्तौ। वस निवासे इत्यस्मात् लुङ्। सभृत्यौ सानुचरौ तौ खरदूषणौ नृभ्यां मनुष्याभ्याम्। संख्ये युद्धे, युद्धमित्यारभ्य "मृधमास्कन्दनं संख्य" मित्यमरः। भूमिं वर्द्धयत इति भूमिवर्द्धनौ शवौ भस्मीकृतशरीरस्य भूमौ लीयमानत्वात्। "शवस्तु क्षितिवर्द्धनः" इति त्रिकाण्डशेषः। "कृत्यल्युटो बहुलम्" इति कर्त्तरि ल्युट्। अकृषातां कृतौ, कृञ् कर्म्मणि लुङ्।

छन्दः—पथ्यावक्त्रम् वृत्तम्।

Allusion in दण्डका—दण्डेन राज्ञा अधिष्ठिता स्थली भार्गवशापात विलयमुपगता अरण्यानी समजायत इति पौराणिकी वार्त्ता।

Change of voice :—याभ्यां दण्डका अवासि। रक्षःप्रकाण्डकौ नरं अकार्षाम्।

Derivation :—अवात्ताम्—वस लुङ् ताम्। लट—वसति। लुङ—अवात्सीत्। अकृषाताम्—कृ-कर्म्मनि लुङ् ताम्। एकवचने अकारि। वर्द्धन—वृध-कर्त्तरि ल्यु।

হে বীর। যে প্রধান রাক্ষসদ্বয় দণ্ডক বনে বাস করিতেছিল মানবদ্বয় তাহাদিগকে ভৃত্যগণ সহিত যুদ্ধে বিনাশ করিয়া তাহাদের দেহ মৃত্তিকায় পরিণত করিয়া ক্ষিতির অংশ বর্দ্ধিত করিয়াছে।

O hero, those two eminent demons who used to reside in the forest of Dandaka have been with their attendants, made "accretions to the soil of the earth" by two men.

Q. decline the base of नृभ्यां, in all the cases. Ans :—ना नरौ नरः। नरम् नरौ नॄन्। ना नृभ्यां, नृ:, नृणाम् नृणाम्, नरि। **Q.** Show the propriety of the epithet वीर। Ans. वीरे त्वयि वर्त्तमाने ईदृशौ तयोर्दशा इति भण्यते। **Q.** Which of the two words दण्डकाम् & दण्डकान्

विग्रहस्तव शक्रेण बृहस्पतिपुरोधसा।
सार्द्धं कुमारसेनान्या शून्यश्चासीति को नयः॥ ७॥

orrect ? Ans. उभयमेव निर्दोषम्। तथाहि "कार्योध्यायाः पुनरुपगमो दण्डकायां वने वः।" इति उत्तरचरिते दण्डकाशब्दप्रयोगः। दण्डकान् दण्डकारण्यसन्निवेशान् इत्यर्थः। तथाहि रामायणम्—"पराक्रमात् जिगमिषुरेव दण्डकान्।" Q. Expound the Samas and account for the form रत्नःप्रकाण्डकौ। Ans. रत्नसां प्रकाण्डकौ इति तत्पुरुषः। अथवा प्रकाण्डशब्दस्य प्रशस्तार्थत्वात् प्रशस्ते रत्नसी इति अर्थे रत्नःप्रकाण्डकौ इति कर्मधारयसमासः। विशेष्यशब्दस्य तु पूर्व्वनिपातः। एवं यथा "प्रशंसावचनैश्च" [such words as मतल्लिका मचर्चिका प्रकाण्ड उद्ध and तल्लज expressive of superiority cause the genus to be placed first.]। ६।

7. It consists of 3 sentences :—(1) शक्रेण तव विग्रहः अभवत्। Adj. to शक्रेण—बृहस्पतिपुरोधसा and कुमारसेनान्या। (2) (त्वं) च शून्यः असि। (3) कः नयः (भवति)।

Prose order :—बृहस्पतिपुरोधसा कुमारसेनान्या शक्रेण सार्द्धं तव विग्रहः (आसीत्)। (इदानीं) शून्यः च असि। नयः कः।

Substance :—यस्य शक्रस्य मन्त्री बृहस्पतिः, सेनापतिश्च कार्त्तिकेयः तेन तव युद्धम् अभूत्। एतादृशस्य वीरस्य ते कथमिदानीं कार्य्याकार्य्यपरिचिन्तनं भवति। नीतिज्ञावत् नेदृशं पश्यामि।

Explanation in tika form :—बृहतां देवानां गुरुत्वात् पतिः बृहस्पतिः। "बृहस्पतिः सुराचार्य्यः" इत्यमरः। स पुरोधाः पुरोहितो यस्य तथोक्तेन। दृढमन्त्रवता इत्यर्थः। सेनां नयतीति सेनानीः। सत्सूद्विषेत्यादिना क्विप्। कुमारः कार्त्तिकेयः सेनानीः सेनापतिर्यस्य तेन। "सेनानीर्वाहिनीपतिः" इत्यमरः। मन्त्रवलेन उत्साहवलेन च समुपेतेन इत्यर्थः। शक्रेण इन्द्रेण सार्द्धं तव विग्रहः विरोधः "कलहविग्रहौ" इत्यमरः। आसीत् इति शेषः। इदानीं शून्यः कार्य्याकार्य्यविचाररहितः एवासि। युष्मदर्थमव्ययम्। तस्मात्

यद्यहं नाथ नायास्यं विनंसा हतबान्धवा ।
नाग्रास्यस्त्वमिदं सर्व्वं प्रमाद्यंश्चारदुर्व्वलः ॥ ८ ॥

कोऽयं नयः । नेयं नीतिः । भवतीति शेषः । नीतिस्तावदीदृशी यत् प्रबलं स्वबलमानयन् न निकृष्टात् बिभीयात्, तत् कथं रामात् बिभ्यत् तूष्णीं स्थितोऽसि इति सर्व्वमवदातम् । पथ्यावक्त्रम् वृत्तम् ।

Change of voice :—विग्रहेण यून्येन । केन नयेन । (भूयते)

Derivation :—विग्रह—वि ग्रह अच् । पुरोधस्—पुरस्-धा-असुन् । सेनानीः—सेना-नी-क्विप् । लुङ्—अनैषीत् । नय—नी-अप् । बृहस्पतिः—बृहत्-पति । "तद्बृहतोः करपत्योः चौरदेवयोः सुट्" इति स-आगमः ।

याहार मन्त्री बृहस्पति ও সেনাপতি কার্ত্তিক সেই ইন্দ্রের সহিত আপনার যুদ্ধ হইয়াছিল। এক্ষণে আপনি ইতিকর্ত্তব্যতা নিরূপণ করিতেছেন। একি নীতি ?

What state policy is this, that you being one who had a quarrel with Sakra whose minister is Brihaspati and the leader of whose army is Kartikeya, you remain neutral.

Q. Decline बृहत् and सेनानी । Ans :—बृहन् बृहन्तौ बृहन्तः । "वर्त्तमाने पृषत् बृहत् महत् जगत् शतृवच्च" । इति शतृप्रत्ययान्तवत् रूपम् । क्रमदीश्वरस्य स्पष्टार्थम् उक्तवान् 'बृहन्' इति । सेनानीः सेनान्यौ सेनान्यः । सेनान्यं &c. Q. Show the propriety of the epithets बृहस्पति पुरोधसा and कुमारसेनान्या । Ans:—प्रभोत्साहौ नाम यौ राजगुणौ ताभ्याम् उपेतेन शक्रेण इत्यर्थः । बृहस्पतिमन्त्रित्वात् शक्रस्य अतिशयिता प्रज्ञा ध्वनिता । कार्त्तिकेयसेनापतित्वात् उत्साहेन समधिकः द्योतितः । तथाहि "प्रभोत्साहावतः स्वामी यतेताधातुमात्मनि । तौ हि मूलमुदेष्यन्त्या जिगीषोरात्मसम्पदः ॥" माघः । २ ।

8. It consists of two sentences :—(1) यदि अहं न आयास्यम्, (2) त्वम् इदं न अग्रास्यः । Adj. to अहम्=विनसा, हतबान्धवा । Adj. to त्वम्=प्रमाद्यन्, चारदुर्व्वलः । नाथ—सम्बो ।

Prose order :—नाथ ! यदि विनसा हतबान्धवा अहं न आयास्यम्, प्रमाद्यन् चारदुर्ब्बलः त्वम् इदं सर्व्वं न अज्ञास्यः ।

Substance :—मम नासिका छिन्ना, विनाशिताश्च मम बान्धवाः । एवंभूताऽहम्, यदि प्रत्यावर्त्तितुम् न समर्था आसम् तदा न त्वं कदापि ज्ञातुमेतत् समर्थोऽभूः । चारहीनो राजा हि अतीव दुर्ब्बलः । अहो ते प्रमत्तता ।

Explanation of tika form :—हे नाथ विभो ! अत्र नाथपदेन आश्रितपालनत्वं द्योतितम् । विनसा, विनासिका इति शब्दस्य तृतीयान्तं पदम् । उपलक्षणे तृतीया । विगता नासिका इति विनासिका, कर्म्मधारयः । ततः इत्यम्भूतलक्षणायां तृतीयायाम् "पद्दन्नोमास" * इत्यादिना नस् आदेशः, इति भट्टोजिदीक्षितः । रभसमतेन नसाशब्दोऽस्ति । तथाहि "लपनं वदनं तुण्डम् आननम् नासिका नसा," इति । अतः विगता नसा यस्याः इति विनसा इत्यपि स्यात् । विनासा इति पाठान्तरे विगता नासा नासिका अस्या इति विनासा, बहुब्रीहिसमासः । हता विनाशिता बान्धवा भ्रात्रादयो यस्याः इति विनाशितभ्रातृका अहं न आयास्यम् आगमिष्यम् । आ-उपसर्गात् यातेः लृङ् । तदा प्रमाद्यन् विषयेषु अनवधानतां गच्छन् "लक्षणहेत्वोः क्रियायाः" इति शतृप्रत्ययः । कार्य्याकार्य्यज्ञानाय लोके चरतीति चरः । पचाद्यच् । चर एव चारः प्रज्ञादित्वात् स्वार्थे अण् । चारेण गूढ़पुरुषेण "चारश्च गूढ़पुरुषः" इत्यमरः । दूर्ब्बलः हीनः त्वम् इदं सर्व्वं भ्रातृवधं नासाच्छेदञ्च नाज्ञास्यः नैतत् सर्व्वं ते ज्ञातमभविष्यत्, जानातेः लृङ् । क्रियातिपत्तौ लृङ् † । चारो हि चक्षूराज्ञाम् ; "राजा चरैर्जगत् क्रत्स्नं प्राप्य यात्नोकसमातेः" इति ।

---

* "पद्दत्नस्मास्हृन्निश्असन्यूषन्दोषन्यकन्शकन्उदन्आसन्शस्प्रभृतिषु ।" पद् &c. respectively take place instead of पाद दन्त नासिका मास हृदय निशा असृज् यूष दोष् यकृत् शकृत् उदक and आस्य before the case-endings शस् &c.

† लृङ् takes place when the noncompletion of the action is to be understood.

करिष्यमाणं विज्ञेयं कार्य्यं किन्नु कृतं परैः।
अपकारि कृतेऽप्यज्ञो विजिगीषुर्न वा भवान्॥ ९॥

Change of voice :—यदि मया विनसया (अथवा, विनसा उपलक्षितया) हतबान्धवया नायास्यत नाज्ञास्यत त्वया प्रमाद्यता चारदुर्ब्बलेन।

Derivation :—बान्धव—बन्धु-अण्। नाथ=नाथ-अच्। प्रमाद्यन्—प्र-मद्-शतृ। माद्यति—लट्; अमदत् अमादीत् अमदीत् लुङ्।

আমার নাসিকা ছিন্ন হইল, ভ্রাতৃগণ নিহত হইল। আপনি এরূপ প্রমত্ত ও চারহীন যে আমি যদি না আসিতাম তাহা হইলে কিছুই জানিতেও পারিতেন না।

How neglectful and weak in point of emissaries you must be as you could not know all this, had I not come here noseless and with relatives killed.

Q. Show the propriety of नाथ। Ans. :—See above. Q. Explain the epithet चारदुर्ब्बलः। Ans :—"यस्मात् पश्यन्ति दूरस्थाः सर्व्वान् अर्थान् नराधिपाः। चारैण' तस्मात् उच्यन्ते राजानश्चारचक्षुषः॥" इति रामायणवचनात् चारहीनो राजा अन्धवत् अतीव दुर्ब्बलः इति भावः। "चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः" इति माघः। Q. write Grammatical notes on the formation of विनसा। Ans: विगता नासिका इति विनासिका, तया विनसा। तृतीयायाम् नासिकायाः नस्-आदेशः। इति भट्टोजिदीक्षितः। विगता नासिका यस्याः इति बहुव्रीहिसमासे यत् विनसा इति पदं भवति तत्तु संज्ञाविषयम् (signifying a name) "अच् नासिकायाः संज्ञायां नसं च अस्थूलात्।" असंज्ञाविषयेतु 'विग्रा' इति स्यात्। "वेः ग्रः वक्तव्यः" इति। अथवा विख्या। "ख्यश्च"। इति कात्यायनः। ८।

9. Consists of two sentences :—(1) भवद्भिः (उक्तं कर्तृ-पदम्) कार्य्यं (कर्म्म) विज्ञेयम्। Adj. to कार्य्यं करिष्यमाणम् and कृतम्। परैः—करिष्यमाणम् कृतम् इत्युभयोः अनुक्तं कर्त्तरि तृतीया। (2) भवान्

(कर्त्तृ) न वा विजिगीषुः (विधे) भवति। Adj. to भवान्—अज्ञः। अप-कारे—भावे। कृते—Adj. to अपकारे।

Prose order :—परैः करिष्यमाणं कार्य्यं विज्ञेयं, किन्नु कृतम्। भवान् अपकारे कृतेऽपि अज्ञः। भवान् विजिगीषुः नवा ?

Substance :—भविष्यति काले शत्रुः यत् आचरिष्यति प्रज्ञाचक्षुः नरेन्द्रः तत् पूर्व्वमेव जानाति। यत् तु शत्रुः आचरितवान् तत् तु अवश्यमेव जानाति। तव शत्रुस्तु यत् अनिष्टं कृतवान् तत् भवान् न जानाति। नैतत् जिगीषुलक्षणम्।

Explanation in taka form :—परैः अरिभिः "परः श्रेष्ठारिदूरान्योत्तरे क्लीवं तु केवल" इति मेदिनी। अपचिकीर्षया करिष्यमाणमपि कार्य्यं विज्ञेयं जिगीषुणा इति शेषः। किन्नु कृतं कृतमेव यत् तदवश्यमेव विज्ञेयमित्यर्थः। भवान् पुनः अपकारे अनिष्टे कृते अनुष्ठितेऽपि अज्ञः अविदितस्वरूपः, अतः भवान् विजिगीषुः जेतुमिच्छुः न वा नैव। वाशब्दः आक्षेपे प्रश्ने वा। अथवा वाशब्द एवार्थे, अवधारणार्थे इत्यर्थः। "वा स्यात् विकल्पोपमयोरेवार्थेऽपि समुच्चये" इत्यमरः। अलसः प्रमत्तो भवान् शत्रून् जेतुं नैव समर्थः। यतः स एव हि जिगीषुः यः अनलसः उत्साहसम्पन्नश्च। तथाहि कामन्दकः, "सम्पन्नस्तु प्रकृतिभिः महोत्साहः कृतश्रमः। जेतुम् एषणशीलश्च विजिगीषुरिति स्मृतः॥" अत्र च माघः। "उदेतुम् अत्यजन् नीहाम् राजसु द्वादशस्वपि। जिगीषुरेको दिनकृत् आदित्येष्विव कल्पते॥" छन्दः—पथ्यावक्त्रम्।

Change of V.—.........विजानीयात्। अज्ञेन विजिगीषुणा...... भवता (भूयते)

Derivation.—करिष्यमाणम्—कृ-स्यमान। विज्ञेयम्—वि ज्ञा-कर्म्मणि यत्। लट्—जानाति। लुङ्—अज्ञासीत्। अज्ञः—नञ्-ज्ञा-कः। विजिगीषुः—वि-(सनन्त) जि-उः। लट्—जयति। लुङ्—अजैषीत्। लिट्—जिगाय। भवान्—भा-डवतु।

শত্রু ভবিষ্যতে কি করিবে জিগীষু তাহা পূর্ব্বেই জানেন। শত্রু যাহা করিয়াছে তাহা যে জানিবেন ইহা বলা বাহুল্য। কিন্তু আপনার শত্রু অনিষ্ট করিয়াছে আপনি জানেন না। আপনি কিছুতেই জিগীষু হইতে পারেন না।

व्रतस्त्वं पार्श्वसमितैः खट्वारूढः प्रमादवान् ।
पानशौण्डः श्रियं नेता नात्यन्तीनत्वमुन्मनाः ॥ १० ॥

Any thing to be done in future by the enemies should be known beforehand; "to say nothing" of what is already done. Injury done, you remain ignorant of it. You can not positively be a supreme lord. (or, do you desire to conquer ?)

Q. Define विजिगीषु । Ans :—see above. Q. Show the construction of the above extract and give the meaning of वा । Show also the force of अपि there. Ans :—See above. Force :—जिगीषुः शत्रूणाम् आचरितं पूर्व्वमेव जानाति त्वन्तु परतोऽपि न जानासि इति अपिशब्देन गम्यते । ९ ।

10. Principal part :—(त्वम्) श्रियं (मुख्यकर्म) अत्यन्तीनत्वं (गौणकर्म) न नेता (विष) भवेः । Adj. to the subject त्वम्—व्रतः, खट्वारूढः, प्रमादवान् पानशौण्डः and उन्मनाः । पार्श्वसमितैः—'व्रत इत्यस्य अनुक्तकर्तृपदम् ।

Prose order :—पार्श्वसमितैः व्रतः खट्वारूढः प्रमादवान्, पानशौण्ड, उन्मनाः त्वं श्रियम् अत्यन्तीनत्वं न नेता (भवेः) ।

Substance :—यतस्त्वं भोजनासक्तैः अनुचरैः वेष्टितः, अलसः प्रमत्तः पानासक्तश्च अनवहितो भवसि अतः ते ऐश्वर्य्यं न वृद्धिं गमिष्यति ।

Explanation in tika form—पार्श्वसमितैः भोजनकाले एव सङ्गतैः न तु कार्य्ये, कार्य्यान्तरासमैरनुजीविभिः व्रतः वेष्टितः, न तु दक्षैर्मन्त्रिभिरित्यर्थः । "पार्श्वसमितादयश्च *" इति चेपे समासः । खट्वारूढः खट्वाम् आरूढः, द्वितीया समासः, † नित्यसमासोऽयम् । उत्पथप्रस्थितः । "खट्वा चेपे" इति द्वितीया-समासः । प्रमादवान् अनवधानतायुक्तः "प्रमादोऽनवधानता" इति कोषः । पार्श्वे

* पार्श्वसमित, कूपमण्डूक, नगरकाकः कर्णचुरचुरा &c. are compounded in sense of derogation.

† खट्वारूढ when नित्यसमास has the sense of चेप (derogation

मद्यपाने शौण्ड: प्रसक्त: "सप्तमी शौण्डै:" इति सप्तमी समास:। पानपटुरित्यर्थ:।. अतएव उन्मना उद्भ्रान्तचित्त: त्वम् श्रियं लक्ष्मीम् "सम्पत्ति: श्रीश्च लक्ष्मीश्च" इत्यमर:। न लोकेत्यादिना षष्ठीनिषेध:। अत्यन्तं गामिनीति अत्यन्तीना "अवार पारे ति," ख:। * तस्य भाव: अत्यन्तीनत्वं अत्यन्तगामित्वं न नेता भवे:, न प्रापयिष्यसि। नी धातो: शीलार्थे तृन्। यद्यपि महोदयं राज्यं प्राप्तवानसि तथापि न चिरकाल मित्यर्थ:। पथ्यावक्त्रम् वृत्तम्।

Change of voice :—वृतेन…खट्वारूढ़ेन प्रमादवता पानशौण्डेन श्रियं नेता…भूयेत। उन्मनसा।

Derivation :—वृत—वृ कर्म्मणि क्त। लट्-वृणोति, वृणुते। लुङ्—अवारीत्, अवरिष्ट अवरीष्ट अवृत। नेता—नी-तृन्।

যাহাদিগকে কেবল ভোজনের সময়ে পাওয়া যায় সেই সকল লোকে আপনি বেষ্টিত। আপনি কুপথে ধাবিত হইতেছেন। পদে পদে প্রমাদ করিতেছেন, মদ্যপানে আসক্ত হইয়াছেন, আপনি স্বীয় ঐশ্বর্য্য বৃদ্ধি করিতে পারিবেন না।

10. Surrounded by those who are fond of dinner, wayward neglectful, given to drink and inattentive as thou art, thou canst not bring prosperity to her highest pitch.

Q. Show the difference of meaning in खट्वारूढ: and खट्वाम् आरूढ:। Ans :—समासबलेन 'खट्वारूढ:' निन्दार्थं गमयति। अत: उत्पथप्रस्थित: इत्यर्थ: भवति। असमासे तु खट्वास्थित: इति गम्यते। न तत्र निन्दार्थ:। Q. Explain the samas in खट्वारूढ:। Ans :—निन्दा एव समासार्थ: न तु वाक्यार्थ:। खट्वारोहणं विमार्गप्रस्थानस्य उपलक्षणम्। सर्व्वएव अविनीता: खट्वारूढा इत्युच्यते। अत: नित्यसमास:, इति वामन:। १०।

---

and so by it is meant 'wayward'. When not a नित्यसमास, is meant one that lison a sofa.

* "अवार पार अत्यन्त अनुकामं गामी।" ख (ईन) takes place after अवार &c. in sense of getting to.

अध्वरेष्वग्निचित्वत्सु सोमसुत्वत आश्रमान्।
अत्तुं महेन्द्रियं भागमेति दुश्च्यवनोऽधुना॥ ११॥

11. Principal part :—अधुना (व्यम्) दुश्च्यवन: (कर्त्तृ) आश्रमान् (कर्म्म) ऐति। Subordinate Sentence:—भागम् अत्तुम्। अध्वरेषु अधिकरणे। अग्निचित्वत्सु—Adj. to अध्वरेषु। सोमसुत्वत:—Adj. to आश्रमान्।

Prose order :—अधुना दुश्च्यवन: अग्निचित्वत्सु अध्वरेषु महेन्द्रियं भागम् अत्तुं सोमसुत्वत: आश्रमान् ऐति।

Substance :—अहो कालविपर्य्यय:। य इन्द्र: पूर्व्वं भयात् सदा सत्रस्त इव यज्वभि: सम्भृतं हव्यम् आदातुम् न समर्थोऽभूत् स इदानीं त्वाम् उदासीनम् अवलोक्य निर्भीक: यागमेत्य स्वभागं गृह्णाति।

Explanation in tika form :—त्वय्येवम्भूते अधुना दुश्च्यवन: इन्द्र: "संक्रन्दनो दुश्च्यवनस्तुराषाण् मेघवाहन:" इति अमरे इन्द्रपर्य्याय: पठित:। अग्नि चितवन्तोऽग्निचित: आहिताग्नय: मुनय:। "चितवानग्निम् अग्निचित्" इत्यमर:। "अग्नौ चे:" इति अग्नि: इत्यस्मात् चि-धातो: क्विप्। ते सन्ति येषु ते अग्निचित्वन्त: तेषु अग्निचित्वत्सु अध्वरेषु यज्ञेषु "यज्ञ: सवोऽध्वरो याग:" इत्यमर:। महेन्द्रो देवता अस्येति महेन्द्रिय: तम्, "महेन्द्राद्घाणौ च" * इति घ:। महेन्द्र-देवतं भागमंशम् अत्तुं भक्षयितुं सोमं सुतवन्त: सोमसुत: "सोमे सुञ:" इति अतीते क्विप सोमलतानिपीड़नक्षमा: यजमाना:, ते सन्ति येषु ते इति सोमसुत्वन्त: "भम:" इति वतुप्। तान् आश्रमान् ऐति आगच्छति। पूर्व्वं स भागो राक्षसग्राह्य एवासीत् अधुना त्वयि उदासीने इन्द्रादय: स्वयं गृह्णन्ति, अहं किमधिकतरं दु:खमिति भाव:। अत्र कुमार:। "यज्वभि: संभृतं हव्यं विततेष्वध्वरेषु स:। जातवेदो मुखान्मायी मिषताम् आच्छिनत्ति न:।" इत्तं पथ्यावक्त्रम्।

Change of V.—आश्रमा: एयन्ते दुश्च्यवनेन।

---

* घ (इय) and अण् take place after महेन्द्र। By the letter च is also meant छ (ईय) thus महेन्द्रिय:, माहेन्द्र:, महेन्द्रीय:।

आमिक्षीयं दधि-क्षीरं पुरोडाश्यं तथौषधम् ।
हविर्हैयङ्गवीनञ्च नाप्युपघ्नन्ति राक्षसाः ॥ १२ ॥

Derivation.— अध्वर—अध्वन्-रा-क । अग्निचित्वत्सु—अग्निचित् (अग्नि-चि-क्विप्) मतुप् सप्तमी । सोमसुत्वतः—सोमसुत् (सोम-सु क्विप्) मतुप् द्वितीया । अत्तुम्-अद-तुम् । लट्-अत्ति, लुङ्-अघसत्; लिट्-जघास, आद । महेन्द्रियः—महेन्द्र-घः । इन्द्रः—इदि-रः । इन्दति लट्, ऐन्दीत्-लुङ् । इन्दाम्बभूव, इन्दाञ्चकार इन्दामास-लिट् ।

যজ্ঞে মহেন্দ্রকে যে যজ্ঞীয় ভাগ প্রদত্ত হয় তাহা ভক্ষণ করিবার নিমিত্ত ইন্দ্র এক্ষণে সোমসুৎ যজমানে পরিপূরিত আশ্রমে সাগ্নিক ব্রাহ্মণসনাথ যজ্ঞে আগমন করে।

11. Indra now comes to the hermitages full of the pressers of Soma in the Sacrifices served by the Brahmans who perpetually maintain sacred fire, to take the share allotted to the great lord of the Gods.

Q. Decline अग्निचित् and अग्निचित्वत्, again सोमसुत् and सोमसुत्वत् । Ans :—अग्निचित् भूभृत् शब्दवत् । तथा सोमसुत् अपि । त्वत् द्वयं धीमत्-शब्दवत् । Q. Give the derivative meaning and allusion in दुश्च्यवनः । Ans :— दुःखेन च्यवनं तनम् अस्य असौ । अथवा दुष्टः कोपात् निर्दयः च्यवनो मुनिः यस्य असौ दुश्च्यवनः । इन्द्रस्तु कदाचित् क्रुद्धेन च्यवनमुनिना स्वपदात् पातितोऽभूत् ।

12. Principal part :—राक्षसाः (कर्तृ) न उपघ्नन्ति । The rest are adjectives to उपघ्नन्ति ।

Prose order—राक्षसाः आमिक्षीयं दधिक्षीरं तथा पुरोडाश्यम् औषधं हविश्च हैयङ्गवीनं नापि उपघ्नन्ति ।

Substance :—राक्षसा इदानीम् एतादृक् उदासीनाः यत् यज्ञद्रोह-कार्यादपि विरताः । न ते इदानीं यज्ञेषु आवर्ज्जितम् दधिक्षीरादिकं भोक्तुम् उद्यता भवन्ति ।

Explanation in tika form :—राक्षसाः, आमिक्षा दध्ना सहितं शृतं पयः, "आमिक्षा साशृतोष्णे या क्षीरे स्याद्दधियोगतः" * इत्यमरः। तस्मै हितम् आमिक्षीयं "विभाषा हविरपूपादिभ्यः" † इति छः, पक्षे आमिक्ष्यम् इति। दधि च क्षीरञ्च दधिक्षीरम्। "विभाषा वृक्षेत्यादिना" व्यञ्जनत्वात् एकवद्भावः। ‡ पक्षे दधिक्षीरे। तथा पुरो दाश्यते इति पुरोडाशोऽन्नविकारः पिष्टकादिः। तस्मै हितं पुरोडाश्यम् अपूपादित्वात् यत्। ओषधिरेव औषधम् तण्डुलादि "ओषधेरजातौ" इति अण्, तण्डुलानामजातित्वात्। स्वार्थिकाश्च प्रकृतितो लिङ्गवचनानि अतिवर्त्तन्ते इति नपुंसकलिङ्गता। अथवा औषधमिति पदं पुरोडाश्यमित्यस्य विशेषणम्। हूयते इति हविः हव्यम्. औणादिक इस्। हैयङ्गवीनं सद्योजातं घृतम् "तत्तु हैयङ्गवीनं यत् ह्योगोदोहोद्भवं घृतम्" इत्यमरः। ह्योगोदोहस्य विकार इत्यर्थे "हैयङ्गवीनं संज्ञायाम्" इति निपातनात् खञ् हियङ्ग्वादेशश्च। एतानि न उपघ्नन्ति। अपि शब्दः चार्थे वर्त्तते। छन्दः—पथ्यावक्त्रम्।

Change of V.—उपहन्यन्ते राक्षसैः।

Derivation :—आमिक्षा—आ-मिष-सक्। आमिक्षीयं—आमिक्षा—छः। पुरोडाश्यम्—पुरोडाश्-यत्। औषधम्—ओषधि अण्। हैयङ्गवीनं—ह्योगोदोहः (हियङ्गुः)-खञ्। हविः—हु-इस्। उपघ्नन्ति—उप-हन-लट् अन्ति। लुङ्—अवधीत्।

---

* शृते आवर्त्तिते उष्णे क्षीरे दधियोगतः या विकृतिः सा आमिक्षा (छाना इति भाषा)।

† छ as well as यत् takes place after हविस् अपूप, तण्डुल ओदन सूप &c. in the sense of हित (suitable, fit.)

‡ "विभाषा वृक्ष मृग तृण धान्य व्यञ्जन पशु शकुनि, अश्ववडव पूर्व्वापर अधरोत्तराणाम्"। समाहार द्वन्द्व takes place among words signifying trees, deer, grass, paddy, condiment, beasts and birds. The Three other compound words अश्ववडव &c. are formed as well.

युवजानिर्धनुष्पाणिर्भूमिष्ठ: खविचारिण: ।
रामो यज्ञद्रुहो हन्ति कालकल्पशिलीमुख: ॥ १३ ॥

রাক্ষসগণ এক্ষণে ছানা হইতে প্রস্তুত সামগ্রী, দধি, দুগ্ধ, পিষ্টক অন্ন, হোমসামগ্রী ও সদ্যোজাত ঘৃত আর নষ্ট করে না।

12. Neither the demons damage the milk seasoned by whey curd, milk, cakes, corn (or the cakes prepared of corn) clarified butter and such prepared from yesterday's milk.

Q. Explain the samas in दधिचौरम् । can दधिपय: be similary formed? Ans: दधिचोरम् इत्यत्र, "विभाषा वृक्षमृग" इत्यादिना समाहारद्वन्द्व: । किन्तु दधिपयसी इति इतरेतरद्वन्द्व: । "न दधिपय आदीनि" इति समाहार प्रतिषेध: । Q. Derive ह्यैयङ्गीनम् । Ans: see above १२ ।

13. Principal part :—राम: यज्ञद्रुह: हन्ति । Adjectives to the subject राम:—युवजानि: धनुष्पाणि: भूमिष्ठ: and कालकल्पशिलीमुख: । Adj to the object यज्ञद्रुह:—खविचारिण: ।

Prose order :—युवजानि: धनुष्पाणि: कालकल्पशिलीमुख: भूमिष्ठ: राम: खविचारिण: यज्ञद्रुह: हन्ति ।

Substance :—युवत्या भार्य्यया समेत: राम: धनु: पाणौ गृहीत्वा मृत्युसदृशम् बाणमादाय भूमिस्थितोऽपि आकाशचारिण: राक्षसान् विनाशयति ।

Explanation in tika form :—इदानीं कार्य्यप्रदर्शनेन प्रोत्साहयितुमाह युवेत्यादि । युवति: यौवनवती जाया यस्य स: युवजानि: "जायाया निङ्" * इति बहुब्रीहौ निङादेश: । धनु: पाणौ यस्य तथोक्त: चापहस्त: इत्यर्थ: । "प्रहरणार्थेभ्य: परे निष्ठासप्तम्यौ भवत:" इति परनिपात: । ईषदून: काल:

* जायान्तस्य बहुब्रीहे: निङादेश: स्यात् । इति जायान्ते स्थितस्य आकारस्य निङ्, तत: जाय्‌न इति 'य'कारस्य च लोप: "लोपो व्योर्वलि" इति सूत्रबलात् । व and य elide when followed by वल् i. e. consonants except ह and य ।

मांसान्योष्ठावलोप्यानि साधनीयानि देवताः।
अश्नन्ति रामाद्रक्षांसि बिभ्यत्यश्नुवते दिशः॥ १४॥

कालकल्पः यमसदृशः मृत्युतुल्य इत्यर्थः। कल्पप् प्रत्ययः। शिली शल्यं मुखे येषामिति शिलीमुखाः वाणाः "अलिवाणौ शिलीमुखौ" इत्यमरः। कालकल्पाः शिलीमुखा यस्येति मृत्युतुल्यशरः इत्यर्थः। रामः भूमौ तिष्ठतीति भूमिष्ठः पृथिवीस्थोऽपि सन्, खे आकाशे विचरन्तीति खविचारिणः तान् आकाशचरणशीलानपि "सुप्यजातौ णिनिस्ताच्छील्ये" इति णिनिः। यज्ञाय द्रुह्यन्तीति यज्ञद्रुहः राक्षसान् "सत्सूद्विषे"त्यादिना क्विप्, हन्ति विनाशयति। पथ्यावक्त्रं वृत्तम्।

Change of V.—युवजानिना धनुष्पाणिना भूमिष्ठेन रामेण हन्यते कालकल्पशिलीमुखेन।

Derivation.—भूमिष्ठः—भूमि-स्था-कः। विचारिणः—वि-चर-णिनिः। यज्ञद्रुहः—यज्ञ-द्रुह-क्विप् द्वितीया। कालकल्प—काल-कल्पप्। रामः—रम-घञ्।

রামচন্দ্র যুবতি ভার্য্যা সমভিব্যাহারে লইয়া ধনুকহস্তে অবস্থান করিতেছে। তাহার বাণ মৃত্যুসদৃশ। সে ভূমিতে থাকিয়াই যজ্ঞবিঘাতক আকাশচারী রাক্ষসদিগকে বিনাশ করিতেছে।

With a young wife, bow in hand, and Standing on the earth, Rama kills the "obstructors" of Sacrifice flying in air; Rama, whose arrows resemble death (or a little less than death)

Q. Account for the form of युवजानि :—Ans :—See above. Q. Give the other meaning of हन्। Ans :—हन् to go. as उद्गतिः=उद्गमनम्।

14. It consists of two sentences :—(1) देवताः (कर्तृपदम्) मांसानि (कर्म) अश्नन्ति। Adj. to मांसानि—ओष्ठावलोप्यानि & साधनीयानि। (2) रक्षांसि (कर्तृ) दिशः (कर्म) अश्नुवते। Adj. to रक्षांसि—बिभ्यति। रामात्—भीत्यर्थे पञ्चमी।

Prose order :—देवताः भोष्ठावलोप्यानि खादनीयानि मांसानि अश्नन्ति। रक्षांसि (तु) रामात् बिभ्यति (सन्ति) दिशः अश्नुवते।

Substance :—इदानीं यज्ञेषु प्रदत्तानि सुकोमलानि मांसानि देवा एव खादन्ति, राक्षसास्तु रामभयेन दिक्षु पलायन्ते तेषां मांसभोजनसुखं तु दूरापास्तम्।

Explanation in tika form—इदानीं देवताः भोष्ठाभ्याम् अवलोप्यानि छेत्तुम् शक्यानि शक्यानि वा भोष्ठावलोप्यानि अतिकोमलानि इत्यर्थः। "कृत्यैः अधिकार्थवचने" * इति तृतीया समासः। खादनीयानि स्वर्गादेः खादनाय यज्ञाय हितानि, यद्वा सुरसतायाः खादनं घृतादि तेन संस्कृतानि। "तस्मै हितं"मिति छः। [खादनीयानीति पाठे सवनं स्नानं तद्योगात् स्नानकोऽपि तद्योच्यते। तत्र भवः सावनः यज्ञः, तस्मै हितानीति छः।] मांसानि अश्नन्ति भुञ्जते। न राक्षसा इति शेषः। रक्षांसि तु रामात्, "भीत्रार्थानां भयहेतुः" इति पञ्चमी। बिभ्यति भीतिमापद्यमानानि सन्ति। भीधातोः शतरि नपुंसके प्रथमा बहुवचनेषु रूपम्। दिशः दिगन्तराणि अश्नुवते व्याप्नुवन्ति, दिक्षु पलायन्ते इत्यर्थः। पूर्वं देवाः राक्षसभयात् दिशः समाश्रयन्ते स्म इदानीं तद्विपरीतमापतितम् इत्यहो तव मोहात् अस्माकम् दशाविपर्ययः इति भावः। पथ्यावक्त्रम् वृत्तम्।

Change of V.—देवताभिः...मांसानि अश्यन्ते। रक्षोभिः बिभ्यद्भिः... दिशः अश्यन्ते।

Derivation :—अवलोप्यानि—अव-लुप-ण्यत् द्वितीया। लट्—लुम्पति लुम्पते। लुङ्—अलुपत्, अलुप्त। खादनीयानि—खादन-छः। अश्नन्ति—अश-(क्र्यादिः) लट् अश्नन्ति, लुङ् आशीत्। बिभ्यति—भी-शतृ प्रथमा बहुवचनेषु। लट्—बिभेति। लुङ्—अभैषीत्। लिट्—बिभाय बिभयाञ्चकार &c. अश्नुवते—अश-(स्वादिः) लट् अश्नुते। लुङ्—आशिष्ट, आष्ट। लिट्—आनशे।

---

* अधिकार्थवचनम्=exaggeration. The nominatives or the instrumentals are compounded with those formed of कृत्यप्रत्यय in the sense of exaggeration, Thus काकपेया नदी।

कुरु बुद्धिं कुशाग्रीयामनुकामीनतां त्यज।
लक्ष्मीं परम्परीणां त्वं पुत्रपौत्रीणतां नय॥ १५॥

যজ্ঞে প্রদত্ত যে সকল মাংস এরূপ সুকোমল যে ওষ্ঠেও ছেদন করা যায়, এক্ষণে দেবগণ তাহা ভক্ষণ করিতেছে। কিন্তু রাক্ষসগণ রামের নিকটে ভীত হইয়া দিগন্তে পলায়ন করিতেছে।

The Gods eat the flesh so "tender as to be cut by the lips," and capable of bringing celestial bliss, while the demons take to different quarters, fearing from Rama.

Q. What does the distich signify about the present circumstances of the demons: Ans: पूर्व्वं राक्षसा एव प्रबला: आसन्, सर्व्वञ्च उपभोगद्रव्यं तेषाम् अधीनम् आसीत्। इदानीं तद्वैपरीत्यम् घटितम् इति उपन्यस्तम्। Q. conjugate अश् in लट्। Ans : (Quote the 2nd line of the distich, and again in कविरहस्य—"अश्नाति शुचिमाहारम् अश्नुते च परन्तप:" । १४ ।

15. It consists of three sentences:—(1) त्वम् (कर्त्तृ) बुद्धिम् (कर्म्म) कुरु। (2) त्वम् अनुकामीनतां त्यज। (3) त्वम् लक्ष्मीं (मुख्यं कर्म्म) पुत्रपौत्रीणतां (गौणं कर्म्म) नय। Adj. to बुद्धिम्—कुशाग्रीयाम्। Adj. to लक्ष्मीम्—परम्परीणाम्।

Prose order :—त्वं बुद्धिं कुशाग्रीयां कुरु। अनुकामीनतां त्यज। परम्परीणां लक्ष्मीं पुत्रपौत्रीणतां नय।

Substance :—तव बुद्धिम् तत्त्वावबोधे समर्थां कुरु। मा यथेच्छं चर। पुरुषक्रमात् आयातां राजलक्ष्मीं यथा ते पुत्रा: पौत्राश्च निरुपद्रवम् उपभोक्तुं समर्था: भवेयु: तथा कुरु।

Explanation in tika form :—त्वं बुद्धिं कुशाग्रीयां कुशाग्रमिव सूक्ष्मां कुरु। "कुशाग्राच्छ:" इति इवार्थे छ:। सूक्ष्मबुद्धिर्भूरित्यर्थ:। "कुशाग्रबुद्धे कुशली गुरुस्ते।" इति रघु:। कामस्य अभिलाषस्य पश्चात् इति अनुकामम्। ततः अनुकामं गामी इति अनुकामीन: तस्य भाव: तां यथेच्छाचरणमित्यर्थ: ?

सहायवन्त उद्युक्ता बहवो निपुणाश्च याम् ।
श्रियमाश्रासते लीलां तां हस्तेकृत्य मास्रसीः ॥ १६ ॥

"अवारपारात्यन्तानुकामङ्गामी" इति खः । त्यज । परांश्च परतरांश्चानुभवतीति परम्परीणा पुरुषक्रमादायाता, तथाभूतां लक्ष्मीं सम्पदं पुत्रपौत्रानुगामिनीम् कुरु इत्यर्थः । परम्परीणा पुत्रपौत्रीणा इति उभयत्र "परोवरपरम्परपुत्रपौत्रमनुभवति" इति खः । इदं राजसराज्यं न त्वयि एव निःशेषतां व्रजतु इत्यर्थः । पथ्यावक्त्रं वृत्तम् ।

Change of V.—क्रियतां बुद्धिः कुशाग्रीया, अनुकामीनता त्यज्यताम्, लक्ष्मीः परम्परीणा त्वया पुत्रपौत्रीणतां नीयताम् ।

Derivation.—कुशाग्रीय—कुशाग्र-छः । अनुकामीनता-(अनुकाम—खः) अनुकामीन-तल् । त्यज—त्यज-लोट् हि । लुङ् अत्याक्षीत् । परम्परीणा परम्पर-खः । पुत्रपौत्रीणता—पुत्रपौत्र-खः-तल् । नय—नी-लोट् हि । लुङ्—अनैषीत् ।

তোমার বুদ্ধি কুশাগ্রের ন্যায় সূক্ষ্ম কর। যথেচ্ছাচার ত্যাগ কর। পরম্পরাগত রাজলক্ষ্মী যাহাতে পুত্র পৌত্রে ভোগ করিতে পায় তাহাই কর।

Make thy intellect as sharp as the end of kusa grass ; give up following inolinations. Thy goddess of fortune inherited from thy forefathers, do thou lead to the knowledge of the sway exercised by thy sons and grandsons.

Q. Show the peculiarity of the above stanza

Ans :—This serves as an illustration of the aphorisms of Panini viz. "अवारपारात्यन्तानुकामंगामी" [अवारपारं गामी इति अवारपारीणः, अवारीणः, पारीणः पारावारीणः । अत्यन्तं गामी इति अत्यन्तीनः । अनुकामं गामी इति अनुकामीनः] and "परोवर परम्पर पुत्रपौत्रम् अनुभवति" [परांश्च अवरांश्च अनुभवति इति परोवरीणः । पुत्रपौत्रान् अनुभवति पुत्रपौत्रीणः । १५]

16. It consists of two sentences (1) बहवः (कर्तृ)

प्रियम् (कर्म) आशास्ते। (2) तां (कर्म) स्वीकृत्य (ल्यप्) मा स्म गोः।
Adj. to बह्वः—सहायवन्तः उद्युक्ताः निपुणाः। Adj to ताम्—लोलाम्।
याम्—Adj to प्रियम्।

Prose order :—सहायवन्तः उद्युक्ताः निपुणाश्च बह्वः यां प्रियम् आशासते लोलां तां स्वीकृत्य मा स्म गोः।

Substance :—येषां सहायाः सन्ति, येच उद्योगिनः कुशला वा, बहवस्ते त्वदधिगताम् लक्ष्मीम् आप्तुम् इच्छन्ति। चपलां लक्ष्मीं त्वदधिगतां विलोक्य विश्वासं मा कुरु, यत् सा तव सकाशे चिरमेव स्थास्यति इति।

Explanation in tika form :—सहायवन्तः प्रशस्तसहाययुक्ताः प्रशंसायां मतुप्, उद्युक्ताः उद्योगिनः उत्साहवन्तः इत्यर्थः। निपुणाः कुशलाः बह्वः यां त्वदीयां श्रियं सम्पदम् आशासते इच्छन्ति आङः "शासु इच्छायाम्" इति चुरादिकस्यात्मनेपदिनो रूपम्। "उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः" इति प्रसिद्धेः। लोलां चपलां तां लक्ष्मीं स्वीकृत्य स्वीकृत्य "नित्यं हस्तेपाणावुपयमने" * इति गतिसंज्ञायां गतिसमासे ल्यबादेशः। "समासेऽनञ्पूर्वे क्त्वो ल्यप्"। † इति पाणिनिः। मा गमः आश्वासं माकार्षीः। गम धातोः लुङि। माङ्योगे अडागमप्रतिषेधः। या सम्प्रतम् चपला तां गृहीत्वापि तत्स्थैर्ये विश्वासो नैव कर्तव्यः इति भावः। वृत्तं पथ्यावक्त्रम्।

Change of V.—सहायवद्भिः उद्युक्तैः बहुभिः निपुणैः या श्रीः आशास्यते, मा गम्यताम्।

Derivation.—सहायवन्तः— सहाय-मतुप्-प्रथमा। उद्युक्ताः —उ

---

* In गतिसमास, कृ is compounded with हस्ते and पाणौ the sense of उपयमन i. e. marriage or as some say in the sense of mere acceptance. So by स्वीकृत्य is meant, according to some, accepting.

† Instead of क्त्वा, ल्यप् takes place after roots in a समास except नञ् समास। Thus अकृत्वा।

लक्ष्मीः पुंयोगमाशंसुः कुलटेव कुतूहलात्।
अन्तिकेऽपि स्थिता पत्युश्छलेनान्यं निरीक्षते॥ १७॥

यज कर्त्तरि-क्तः। आयासते—आ-यास लट्-अन्ते। लट्-आयासते। अरी:—अर्-लुङ्स। लट्-अशिति। श्रीः—श्रि-क्विप्। लीला—लीङ्-अच्।

অনেক সহায়বান উদ্যোগী কার্য্যনিপুণ ব্যক্তি তোমার যে লক্ষ্মীর প্রয়াস করে সেই চঞ্চলস্বভাবা লক্ষ্মীকে হস্তগত ভাবিয়া নিশ্চিন্ত থাকিও না।

Many energetic "skilful" kings having allies, desire thy fortune. "unstable" as she is, finding her under your sway like a married woman, believe not in her.

In English explanation add to the above the following :—Here the word कुलस्त्रिया signifies that if the kingdom be as safe as a married woman, she should not yet be trusted for she is unstable and many a skilful lust after her.

Q. Show the significance of the epithets सहायवन्तः &c. Ans : ससहायाः उद्योगिनः कुशलाश्च जनाः लक्ष्मीवन्तो भवन्ति। "बहुसहायः कार्यान्तम् नादीयानपि गच्छति।" इति माघः। "उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः"। &c. Q. Show the propriety of लीला। Ans : लक्ष्म्याश्चाञ्चल्यात् सा लीलेति कथिता। "येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टम्।" इति रघुः। १६।

17. Principal part :—लक्ष्मीः (कर्त्तृपदम) कुलटा इव (उपमानपदं) अन्यं (कर्म्म) निरीक्षते। Adj. to लक्ष्मीः—आशंसुः, स्थिता। पत्युः—सम्ब। अन्तिके—अधि। छलेन—प्रकृत्यादि। कुतूहलात्—हेत्वर्थेऽपि पञ्चमी।

Prose order :—लक्ष्मीः कुलटेव पत्युः अन्तिके स्थितापि पुंयोगम् आशंसुः (सती) कुतूहलात् अन्यं छलेन निरीक्षते।

Substance.—व्यभिचारिणी इव लक्ष्मीः अन्यपुरुषयोगम् इच्छन्ती पत्युः समीपे स्थितापि कुतूहलं प्रदर्श्य छलेन अन्यं प्रति सानुरागां दृष्टिं निक्षिपति।

Explanation in tika form :—अन्यै: प्रार्थ्यमानापि लक्ष्मी: न मां परित्यजतीत्यत्र तस्या: चञ्चलत्वं दर्शयन्नाह लक्ष्मीरिति। पुंश्ली: कुलटा असतीव "पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी" इत्यमर:। पत्यु: राज्ञ:, नारीपक्षे स्वामिन: अन्तिके अदूरे स्थितापि "दूरान्तिकार्थै: षष्ठ्यन्यतरस्याम्" पुं-योगम् पुरुषसम्पर्कम् आशंसु: अभिलषन्ती सती कुतूहलात् कोऽस्य पुरुषान्तरेषु विशेष इति कौतुकात्। "कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलम्" इत्यमर:। कुतूहलं समाश्रित्य इति ल्यबलोपे पञ्चमी। अन्यं पुरुषं छलेन व्याजेन "प्रकृत्यादिभ्य: उपसंख्यानम्" इति तृतीया। निरीक्षते पश्यति केनापि छिद्रेण तत्समीपं गन्तुमिच्छति इत्यर्थ:; अलङ्कार:—श्रौती पूर्णोपमा। वृत्तं पथ्यावक्त्रम्।

Change of V.—लक्ष्म्या...आशंस्वा...कुलटयेव...स्थितया... अन्य: निरीक्ष्यते।

Derivation.—आशंसु:—आ-शंस्-उ:। कुतूहलम्—कुत्सितं तुलयति इति कु-तुल-अच्, निं। पति:—पा डति:। लक्ष्मी:—लक्षयति पश्यति नीतिमन्तम् इति लक्ष्मी:, लक्षे: ई प्रत्यय:। मश्च अन्तादेश:।

রাজলক্ষ্মী কুলটার ন্যায় কুতূহলাক্রান্ত হইয়া অপর পুরুষের সহিত মিলিতে অভিলাষ করিয়া স্বামির নিকটে থাকিয়াও অন্য পুরুষের প্রতি দৃষ্টিপাত করে, (অভিলাষ করে)।

Fortune, like a 'courtezan' desiring, from curiosity, contact with a male, looks under pretext to some other, though remaining by the side of her lord.

Q. What should be the form of मतुप् after लक्ष्मी। Show reason. Ans: लक्ष्मीवान् इति मतुपोवतुप्। "मादुपधायाश्च मतोर्वोऽयवादिभ्य:"। इति मोपधत्वात् वतुप्। Q. Show the force of अपि in अन्तिकेऽपि। Ans: पतिसमीपता नारी नान्यं पुरुषं अभ्यु मिच्छति, कुलटातु न स्वामिनं विगणयति इति अपिशब्देन सूच्यते। —Q. Parse छलेन and कुतूहलात्। Ans : See above. Q. De-

योषिद्वृन्दारिका तस्य दयिता हंसनादिनी।
दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला॥ १८॥

cline लक्ष्मी। Ans: लक्ष्मीः लक्ष्म्यौ &c. केचित् कृत्-ईकारात् ङीषम् इच्छन्ति, अतः नदीवत् रूपम्। "लक्ष्मीयम् इति मन्यते"। सम्बोधने लक्ष्मि लक्ष्मीः वा। "मातर्लक्ष्मि भजस्व कञ्चिदपरम्। "हे लक्ष्मीः स्यात् दरिद्राणाम्।" &c. धातुपारायणे। १७।

18. Principal part:—तस्य दयिता (कर्त्तृ) भवति। दूर्व्वाकाण्डम् (उपमान कर्त्तृ)। The rest are Adjectives to दयिता।

Prose order:—तस्य दयिता योषिद्वृन्दारिका, हंसनादिनी, दूर्व्वाकाण्डम् इव श्यामा, न्यग्रोधपरिमण्डला (भवति)।

Substance:—तस्य पत्नी स्त्रीरत्नम्, तथाहि सा मञ्जुभाषिणी कृशाङ्गी सुवर्णवर्णाभा चीणमध्या स्थूलनितम्बा इति।

Explanation in tika form—तस्य रामस्य दयिता प्रिया योषितामी वृन्दारिका चेति योषिद्वृन्दारिका योषिच्छ्रेष्ठा इत्यर्थः "वृन्दारकनागकुञ्जरैः पूज्यमानम्"* इति समासः।* तथा हंस इव नदितुं शीलमस्या इति हंसनादिनी 'कर्त्तर्य्युपमाने' † इति णिनिः। अथवा हंसनादिनीशब्दः पारिभाषिकोऽप्यस्ति, यथा "गत्या नितम्बिनी या तु हंसलीलानुगामिनी। मत्तकोकिलसंशब्दा सा प्रिया हंसनादिनी" इति। दूर्व्वाकाण्डमिव तत्तुल्या कृशाङ्गी इत्यर्थः। दूर्व्वाकाण्डवत् श्यामवर्णेति व्याख्यानं पुराणविरुद्धं तत्र गौरत्वकथनात्। श्यामा-

---

* The words वृन्दारक नाग & कुञ्जर are compounded in a तत्पुरुष समास when they but signify excellence.

† इन् takes place after roots preceded by words signifying objects of comparison to the agents. Thus, या हंस इव नदति इति हंसनादिनी। इन् does not take place when the object and not the nominative is compared. Thus गरुडं पर्व्वतमिव पश्यति इति पर्व्वतदर्शी is incorrect.

नास्यं पश्यति यस्तस्या निंस्ते दन्तच्छदं न वा ।
संशृणोति न चोक्तानि मिथ्यासौ विहितेन्द्रियः ॥ १८ ॥

लक्षणमाह "शीते सुखोष्णसर्व्वाङ्गी ग्रीष्मे तु सुखशीतला । तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कथ्यते ॥" श्यामा वा अप्रसूता इति केचित् "अप्रसूताङ्गनायाञ्च श्यामा सोमलतौषधी" इति विश्वः । तथा न्यग्रोधपरिमण्डला, तल्लक्षणमाह "स्तनौ सुकठिनौ यस्या नितम्बे च विशालता । मध्ये क्षीणा भवेत् या सा न्यग्रोधपरिमण्डला ॥" अथवा "प्रसारितभुजस्येह मध्यभागद्वयान्तरम् । उच्छ्रायेण समं यस्या न्यग्रोधपरिमण्डला" इति अग्निपुराणे । केचित्तु दूर्व्वाकाण्डमिव न्यग्रोधपरिमण्डला, न्यग् रुणद्धीति न्यग्रोधं अधःप्रसृतं परितोमण्डलं नितम्बमण्डलरूपं यस्याः । दूर्व्वाकाण्डमपि अधः प्रसरति नोपरिष्टादित्याहुः । अन्ये तु न्यग्रोधस्य वटस्येव परिमण्डलं परिणाहो नितम्बभागे यस्याः इति । एवंभूता सा भवति इति शेषः । पथ्यावक्त्रम् वृत्तम् ।

Change of voice :—योषिद्वृन्दारिकया दयितया हंसवादिन्या दूर्व्वाकाण्डेव श्यामा न्यग्रोधपरिमण्डलया भूयते ।

Derivation :—योषित्—युष्-इतिः । हंस—हन्-स,च । "भवेत वर्णागमात् हंसः" इति निपातने वर्णागमः । श्यामा—श्यै-मन् । मण्डल—मडि-कलच् । दयिता—दय-क्त ।

তাহার হংসনাদিনী পত্নী স্ত্রীদিগের মধ্যে রত্নস্বরূপা। সে দূর্ব্বাকাণ্ডের ন্যায় কৃশাঙ্গী। সেই শ্যামার নিতম্বদেশ স্থূল ও মধ্যদেশ ক্ষীণ।

His beloved wife is the best of all (loving) females, her voice resembling that of a swan, with texture of golden hue, slender at the waist and bearing resemblance to a stalk of grass

Q. Give the meaning of वृन्दारक । Name some of the words used in the same sense. Ans : The original meaning is देव । Here means श्रेष्ठ । See above. **Q. Define हंसवादिनी and न्यग्रोधपरिमण्डला ।** Ans : See above. १८ ।

19. It consists of 4 sentences:—(1) असौ (कर्त्तृ) मिथ्या (क्रि') विजितेन्द्रियः (विधे) भवति । (2) यः (कर्त्तृ) तस्याः (सम्ब) आस्यम् (कर्म) न पश्यति । (3) यः (उक्तं कर्त्तृ) दन्तच्छदं (कर्म) न निंक्ते । (4) यः (कर्त्तृ उक्तम्) उक्तानि (कर्म) न संशृणोति ।

Prose order :—यः तस्याः आस्यं न पश्यति, दन्तच्छदं वा न निंक्ते, उक्तानि च न संशृणोति, असौ मिथ्या विजितेन्द्रियः ।

Substance :—यो हि जनः तस्याः वदनं न पश्यति, न च तस्याः वचनम् आकर्णयति, तस्य चक्षुरादीनि इन्द्रियाणि विधिना वृथा प्रदत्तानि ।

Explanation in tika form—यो जनः तस्य रामदयितायाः आस्यं मुखं "वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्" इत्यमरः । न पश्यति नाव-लोकयति । दन्ताश्छाद्यन्ते अनेन इति दन्तच्छदः ओष्ठः "ओष्ठाधरौ तु रदन-च्छदौ" इत्यमरः । तं वा न निंक्ते चुम्बति । णिंस चुम्बने इति अदादिगणी-यस्य णिंस धातोः लट् । तस्याः उक्तानि मधुरभाषितानि, भावे क्तः । न सं-शृणोति सम्यक् आकर्णयति । "अर्त्तिश्रु दृशिभ्यः" इति आत्मनेपदम् अकर्मका-दित्यधिकारात् ।* असौ पुरुषः मिथ्या वृथा विजितानि जितानि इन्द्रियाणि चक्षुरादीनि यस्य तथोक्तः । विधात्रा तस्य वृथैव इन्द्रियाणि विजितानि इत्यर्थः । इन्द्रः आत्मा, "इन्द्रः शचीपतावन्तरात्मन्यादित्ययोगयोः" । तस्य इदम् इति इन्द्रि-यम्, चक्षुरादि । तेषाम् आत्मधर्मत्वात् इन्द्रियत्वम् इति ज्ञेयम् । अत्र तु इन्द्रेण ईश्वरेण दत्तम् इति इन्द्रियम् इत्येव अर्थः संगच्छते । इन्द्रियवैयर्थ्य-हेतुप्रदर्शनात् काव्यलिङ्गमलङ्कारः । वृत्तं पथ्यावक्त्रम् ।

---

* "समो गम्यृच्छिभ्याम्" । गम् ऋच्छ after सम् take आत्मनेपद when intransitive.] Taking सम् from this aphorism apply the following, "अर्त्तिश्रुदृशिभ्यश्च इति वक्तव्यम्" । According to कात्यायन the roots ऋ, श्रु, and दृश after सम् take also आत्मने-पद when intransitive. In the above sloka however संश्रु is used in the transitive sense and therefore takes परस्मैपद ।

सारोऽसाविन्द्रियार्थानां यस्यासौ तस्य नन्दथुः ।
तस्यै कान्तान्तरैः सार्द्धं मन्येऽहं धिङ्निमज्जथुम् ॥ २०

Change of V.—दृश्यते येन निंस्यते दन्तच्छदः, संश्रूयन्ते ···अनेन ·विहितेन्द्रियेण भूयते ।

Derivation :—आस्यम्—अस्-ण्यत् । निंस्ते—निंस-लट् ते । लुङ—अनिंसिष्ट । लिट्-निनिंसे । इन्द्रियम्—इन्द्र-घ (इय) । विहित—वि-धा-क्त अधात् लुङ् ।

যে ব্যক্তি তাহার বদন নিরীক্ষণ করিতে পারে না, তাহার বাক্য শুনিতে পায় না, তাহার চক্ষু কর্ণাদি ইন্দ্রিয় বৃথা প্রদত্ত হইয়াছে ।

He who does not see her face, nor kisses her lips, nor ag... hears her utterances, has been endowed with senses to no purpose.

Q. Account for परस्मैपद in संश्रृणोति। Ans : see the footnote. Q. Parse मिथ्या । Ans: अव्ययम् । भवति इति क्रियाया विशेषणम् । Q. Give the derivative appropriate meaning of इन्द्रिय here. Ans:—see above., १८ ।

20. (1) अहम् (कर्त्तृ) इति (उक्तं कर्म्म) मन्ये । (2) असौ (कर्त्तृ) इन्द्रियार्थानां (सम्ब) सारः (वि, विध) भवति (उह्यम्) (3) असौ यस्य अस्ति (उह्यम्) (4) तस्य नन्दथुः भवति (उह्यम्) (5) तस्यै (अपि) कान्तान्तरैः (सार्द्धे योगे तृतीया) मज्जथुं (धिक्योगे द्वितीया) इति (इति मन्ये) इति पूर्व्वेण अन्वयः ।

Prose order :—असौ इन्द्रियार्थानां सारः, यस्य असौ तस्य नन्दथुः तस्यै कान्तान्तरैः सार्द्धं निमज्जथुम् धिक् इति अहं मन्ये ।

Substance :—असौ सीता भोग्यवस्तूनाम् सारतुल्या । यस्य सा पत्नी तस्य महान् आनन्दः । अन्याभिः स्त्रीभिरपराभिः सह शयनं जुगुप्सितम् इति मे प्रतिभाति ।

Explanation in tika form :—असौ सीतैव इन्द्रियस्य अर्थाः विषयाः स्रक्चन्दनवनितादयः तेषां मध्ये सारः श्रेष्ठांशतुल्या । श्रेष्ठा इत्यर्थे सीर

न तं पश्यामि यस्यासौ भवेन्नोद्वेजया मतेः।
त्रैलोक्येनापि विन्दस्वं तां क्रीत्वा सुकृती भव ॥ २१ ॥

इति स्यात्। "सारो बले स्थिरांशे च न्याय्ये क्लीवं वरे त्रिषु" इत्यमरः। "यतश्च निर्द्धारणम्" इति निर्द्धारणे षष्ठी। स्रक्चन्दनवनितादीनां सर्व्वेषामेव भोग्यवस्तुत्वं एकजातीयत्वम्, अतः एकजातीयेभ्यः पृथक्करणरूपं निर्द्धारणम्। "न निर्द्धारणे" इति न समासः। यस्य पुरुषस्य असौ सीता विद्यते तस्यैव नन्दथुः आनन्दः नन्द धातोः अथुच्। तस्य शय्यायां कान्तान्तरैः अन्याः कान्ताः कान्तान्तराणि तैः सार्द्धं अन्यस्त्रीभिः सह निमज्जथुं शयनं धिक् "उभसर्व्वतसोः कार्य्या धिगुपर्य्यादिषु त्रिषु" इति धिग्योगे द्वितीया। इति अहं मन्ये अवधारयामि। तथा सार्द्धं शयनं शोभनमित्यर्थादुक्तं भवति। पथ्यावक्त्रम् वृत्तम्।

Change of voice :—सारेण अमुया भूयते...यस्य अमुया (भूयते) तस्य नन्दथुना (भूयते)...मया मन्यते।

Derivation :—नन्दथुः—नन्द-अथुच्। लट्-नन्दति। लुङ्-अनन्दीत्। निमज्जथुम्—नि-मस्ज-अथुच्। लट्-मज्जति। लुङ्-अमाङ्क्षीत्। लिट्-ममज्ज, ममज्जिथ ममङ्क्थ।

সীতা ভোগ্য বস্তুর মধ্যে সারসদৃশ। সে যাহার, তাহার অত্যন্ত আনন্দ। শয্যায় অন্য কান্তার সহিত শয়ন ধিক্কারজনক বলিয়া বোধ হয়।

She is the pith as it were, amongst all the objects of senses. There is joy for him to whom she belongs. Fie on a bed with a female other than herself.

Q. Expound the Samas in कान्तान्तरैः and name it. Ans : अन्याः कान्ताः कान्तान्तराणि तैः। मयूरव्यंसकादिसमासः।

Q. give the meaning of सारः। Ans : See above। २०।

21. It consists of several sentences (1) अहं (कर्त्तृ) तम् (कर्म्म) न पश्यामि। (2) असौ (कर्त्तृ) यस्य मतेः (सम्ब) उद्वेजया

(विष) न भवति । (3) तां (कर्म) क्रीत्वा (ल्यप्) विन्दः (विष) त्वम् सुकृती (विष) भव । त्रैलोक्येन—करणेन ।

Prose order—असौ यस्य मतेः उद्वेजया न तं न पश्यामि । त्वं त्रैलोक्येनापि तां क्रीत्वा विन्दः त्वं सुकृती भव ।

Substance :—नास्ति कश्चित् तादृशः पुरुषः यस्य मानसं न सा विमोहयति । यदि तां लब्धुं ते त्रैलोक्यमपि विनाशं गच्छेत् तदपि श्लोकनीयम्, तां लब्ध्वा सुखी भव ।

Explanation in tika form :—असौ सीता यस्य मतेः चेतसः "कर्तृकर्मणोः कृति" इति कृद्योगे कर्मणि षष्ठी । उद्वेजया उत्कम्पिका चित्तक्षोभजनयित्री इत्यर्थः । "अनुपसर्गाल्लिम्पविन्द" * त्यादिना शः । न भवेत् तं जनं न पश्यामि, अतः त्रयश्चैते लोकाश्चेति त्रिलोका ततः स्वार्थे ष्यञ् । अथवा त्रयाणां लोकानां समाहारः इति त्रिलोकी त्रिगुसमासः, त्रिलोकी एव त्रैलोक्यम् स्वार्थे ष्यञ् । तेन त्रैलोक्येन त्रिभुवनविनिमयेनापि तां क्रीत्वा लब्ध्वा विन्दः लाभवान् सन्, अनुपसर्गाल्लिम्पविन्देत्यादिना पूर्ववत् शः प्रत्ययः । "लाभे विन्दति विन्दते † इति विद् धातोः अत्र लाभार्थत्वम् । त्वं सुकृती भव पण्डितो भव पाण्डित्यमस्य त्रैलोक्यनाशेनापि स्त्रीरत्नं लब्धमिति । "कृतम् अनेन इति कृती कुशलः इष्टादिभ्यः इन्, सु कृती इति सुकृती । इतं पथ्यावक्त्रम् ।

Change of V.—स न दृश्यते यस्यामुया भूयेत उद्वेजयया मते... विन्देन त्वया सुकृतिना भूयताम् ।

Derivation.—उद्वेजया—उत्-एजि-शः । त्रैलोक्य—त्रिलोक-ष्यञ् ।

---

* "अनुपसर्गात् लिम्प विन्द धारि पारि वेदि उद्वेजि चेति साति साहिभ्यश्च" । The affix श takes place after these not following prefixes. Thus : लिम्पः विन्दः धारयः पारयः वेदयः उद्वेजयः &c,

† "वेत्ति वेद विद ज्ञाने विन्ते विद विचारणे । विद्यते विद सत्तायां लाभे विन्दति विन्दते ॥"

नैवेन्द्राणी न रुद्राणी न मनावी न रोहिणी।
वरुणानी न चाग्नायी तस्याः सीमन्तिनी समा॥ २२॥

विन्द—विद-श:। लट्—विन्दति, विन्दते। क्रीता—क्री-क्ताच्। लट क्रीणाति, क्रीणीते। लुङ्—अक्रैषीत्, अक्रेष्ट। लिट्-चिक्रिये, चिक्राय।

এমন লোক দেখিনা যাহার চিত্ত সে চঞ্চল না করে। ত্রৈলোক্য দিয়া তাহাকে ক্রয় পূর্ব্বক লাভবান্ হইয়া আপনার পাণ্ডিত্য প্রদর্শন করুন।

I do not find any one to whose mind she is not a perturber. Being a gainer in purchasing her by the three worlds, mayest thou be blessed.

Q. Account for the formation of उद्वेजय and विन्द: and the 6th case in मते:। Ans : See above. Q. Expound the samas in त्रैलोक्यम्। Ans : See above। २१

22. (काचित्) सीमन्तिनी तस्याः समा न भवति। The rest are Nominatives to भवति।

Prose order :—इन्द्राणी न, रुद्राणी न, मनावी न, रोहिणी न, वरुणानी न, अग्नायी च न ; (काचित्) सीमन्तिनी तस्याः समा न भवति।

Substance :—सीतायाः समा न शची, नच पार्व्वती, नैव शतरूपा नवा रोहिणी-नच वरुणानी, नहि अग्निपत्नी, न कथमपि अपरा नारी इति।

Explanation in tika form :—अन्या अपि स्त्रियः समीति पैदाह, नैवेत्यादि। इन्द्राणी इन्द्रस्य पत्नी शची न, "इन्द्र वरुण भव शर्व्व रुद्र मृड हिम अरण्य यव यवन मातुल-आचार्य्याणामानुक्" इति ङीप् आनुगागमश्च। रुद्राणी रुद्रभार्य्या पार्व्वती न समा, मनावी मनोः पत्नी शतरूपा च न समा। "मनोरौ वा" इति औकारः ङीप् च। पक्षे ऐकारः अतः मनायी। तथा रोहिणी चन्द्रभार्य्या, रोहित इत्यस्मात् "वर्णात् अनुदात्तात्" * इत्यादिना ङीप्, तकारस्य

* After a word expressive of colour ending in a gravely accented vowel and having the letter त as its

च नकारः । न समा इत्यर्थः । तथा वरुणानी वरुणपत्नी च न समा इति शेषः । ङीष्, आनुगागमश्च । अग्नायी अग्निभार्य्या स्वाहा देवी न समा इति शेषः । "वृषाकपि अग्नि कुसित कुसिदानामुदात्तः" * इति ङीप् ऐकारादेशश्च । सीमन्तः "सीमन्तः कथ्यते स्त्रीणां केशमध्ये च पद्धतिः" इति हलायुधः, विद्यते यस्या इति सीमन्तिनी स्त्री "स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः" इत्यमरः । तस्याः रामदयितायाः समा तुल्या न "तुल्यार्थैरतुलोपमाभ्याम् तृतीया अन्यतरस्याम्" इति षष्ठी । पक्षे तृतीया । सर्व्वत्र नञ्सम्बन्धात् इह नञ्सम्बन्ध उपपद्यते । केचित् सीमन्तिनी प्रशस्तसीमन्तवती इति इन्द्राण्यादिविशेषणम् इत्याहुः । 'वरुणानी न नाग्नायी' इति पाठान्तरे नद्वयप्रयोगेन प्रक्रमभङ्गदोषो निरस्यते । वृत्तं पथ्यावक्त्रम् ।

Change of V.—इन्द्राण्या, रुद्राण्या, मनाय्या, रोहिण्या, वरुणान्या, अग्नाय्या...सीमन्तिन्या समया (भूयते) ।

Derivation.—इन्द्रः—इदि-रः । रुद्रः—रुद्र रक् । "सोऽरोदीत् यत् अरोदीत् तत् रुद्रस्य रुद्रत्वम् ।" इति श्रुतिः । मनुः—मन्-उः । स्त्रियां मनावी मनायी इति पदद्वयम् । रोहिणी—रोहित-ङीप्, तकारस्य नकारादेशः । वरुण—वृ-उनन् । अग्निः—अङ्ग-निः ।

না ইন্দ্রপত্নী শচী, না পার্ব্বতী, না মনুপত্নী, না রোহিণী, না বরুণপত্নী, না স্বাহা দেবী, কোন নারীই তাহার তুল্য নহে।

No female not even the wife of Indra, or of Rudra, or of Manu, not even Rohini, neither the wife of Varuna, nor of Agni, is equal to her.

---

penultimate letter (उपधा), the word not being a subordinate in a compound, the feminine affix is optionally ङीप् and न is substituted in the room of त । [Bal.] Thus from रोहित (red) are रोहिता and रोहिणी । Her colour being supposed to be red. २२ ।

* वृषाकपायी, अग्नायी, कुसितायी, कुसिदायी ।

प्रत्यूचे राक्षसेन्द्रस्तामाश्वसिहि बिभेषि किम् ।
त्यज नक्तञ्चरि क्षोभं वाचाटे रावणो ह्यहम् ॥ २३ ॥

Q. Give the feminine forms of इन्द्र, रुद्र, मनु, वरुण, अग्नि, and justify the forms. Ans : See above. Q. Give the derivative meaning of सौमित्रिणी, and account for the 6th case in तस्याः। Ans : See above.

23. It is a compound sentence consisting of 5 sentences (see below). २३ ।

Prose order :—(1) राक्षसेन्द्रः तां प्रत्यूचे । (2) आश्वसिहि (3) किं बिभेषि (4) हे नक्तञ्चरि ! क्षोभं त्यज, (5) हे वाचाटे ! अहं हि रावणः ।

. Substance :—रक्षोनाथः तां सूर्पणखां प्रत्युत्तरमाह, आश्वस्ता भव, मा बिभीहि अयि निशाचरि मनःक्षोभं विमुञ्च, कुत्सितभाषिणि किं न स्मरसि यदहं नाम्ना रावण इति ।

Explanation in tika form :—राक्षसेन्द्रः रावणः तां सूर्पणखां प्रत्यूचे प्रतिवचनमुक्तवान् । आश्वसिहि त्वं खेदं त्यज, अस्यर्थं भीतिं मा निमाङ्क्षीः । किं बिभेषि तापसकात् इति शेषः । नक्तमिति अव्ययम्, नक्तं रात्रौ चरति इति तत्सम्बोधने नक्तञ्चरि अयि राक्षसि ["चरेटः" इति टः] क्षोभं दुःखं मन्युं रोषं वा त्यज । अयि वाचाटे वाचालि बहुनिन्द्यभाषणशीले इति यावत्, "स्याज्जल्पाकस्तु वाचालो वाचाटो, बहुगर्ह्यवाक्" इत्यमरः] "वाचआलाटचौ बहुभाषिणि"* इति आटच् प्रत्ययः । अहं हि रावणः । अनेन आत्मोत्कर्षं ज्ञापयति [विश्रवसः अपत्यं पुमान् इति रावणः, विश्रवसो रवणादेशः । यद्वा सर्वभूतानि रावयति विद्रावयतीति रावणः । अथवा रवते हिनस्ति इति रवणं, तत्शीलमस्येति रावणः हिंसकत्वात् ।] एतेन अहं चराचराणाम् भीषणोऽस्मि इति च सूचितम् । वृत्तं पथ्यावक्त्रं नाम ।

---

* "कुत्सिते" इति वक्तव्यम् । यः कुत्सितं बहुभाषते स वाचाटः वाचालः वा । यस्तु सम्यक् बहु भाषते स वाग्मी ।

मामुपास्त दिदृक्षावान् याष्टीकव्याहतो हरिः ।
आम्नालाभीमुखो दूरात् काक्केणानादरेङ्गितः ॥ २४

Change of V.—प्रत्यूचे राक्षसेन्द्रेण सा, आश्वस्यताम्, भीयते किम्, त्यज्यतां...क्षोभः,...मया रावणेन भूयते ।

Derivation :—प्रत्यूचे—प्रति-ब्रू-लिट् ए । आश्वसिहि—आ-श्वस-लोट् हि । लुङ्-आश्वसीत् । बिभेषि—भी लट् सि । लट् बिभेति, बिभितः बिभीतः, बिभ्यति । लुङ्-अभैषीत् । त्यज—त्यज्-लोट् हि । लुङ्—अत्याक्षीत् । नक्तञ्चरि—नक्तम्-चर-टः, ङीप्, सम्बोधने । वाचाटा—वाच्-आटच् ।

রাক্ষসপতি প্রত্যুত্তর দানে কহিলেন, আশ্বস্ত হও, কি ভয় ? হে নিশাচরি ক্ষোভ ত্যাগ কর । বাচালে ! আমি রাবণ ।

The lord of the demons said to her in reply. Thou night-ranger, console thyself ; why dost thou fear ? Give up thy regrets. O thou revilef, (know) for certain, I am Ravana.

Q. Distinguish between वाचाट and वाग्मी ; show the fitness of the forms. Ans : Fitness.—अत्र वाचाटपदेन सा वृथा मन्दभाषिणी इति भण्यते । Q. Show the significance of रावणः । Ans : रावयति विद्रावयति जगत् इति रावणः । अनेन तस्य जगद्रावणत्वं भणितम् । तथाहि रामायणम्—"यस्मात् लोकत्रयं चैतत् रावितं भयमागतम् । तस्मात् त्वं रावणो नाम नाम्ना वीरो भविष्यसि ।" अथवा अहम् अधिकबलशाली जगद्विजयी खलु रावणः, न त्वं क्वचित् विक्रमेण अतिशयितुम् अर्हसि इति भावः । २३ ।

24. Principal part :—हरिः (कर्तृ) माम् (कर्म) उपास्त । Adj. to हरिः—दिदृक्षावान्, याष्टीकव्याहतः, आम्नालाभीमुखः and ईङ्गितः । दूरात् क्रियाविशेषणम् । काक्केण करणेन । अथवा मया इति अध्यपदस्य विशेषणम् ।

Prose order :—याष्टीकव्याहतो दिदृक्षावान् आम्नालाभीमुखः, दूरात् काक्केण अनादरेङ्गितः हरिः माम् उपास्त ।

Substance :—इन्द्र एव स्वयं मया अवज्ञातः मम द्वारपालेन व्याहतो-ऽपि च मां द्रष्टुमिच्छुः मदाज्ञां पालयितुकामश्च मां सिषेवे ।

Explanation in tika form :—यष्टिः प्रहरणमेषामिति याष्टीकाः द्वारि नियुक्ता यष्टिप्रहरणकपुरुषाः ["शक्तियष्ट्योरीकक्"] इति ईकक् । तैः वेत्रपाणिभिर्व्याहतोऽपसारितोऽपि दिदृक्षावान् द्रष्टुमिच्छावान् आज्ञालाभाय मदाज्ञालाभनिमित्तम् उन्मुखः उत्सुकः आज्ञालाभोत्सुकः इति पाठे आज्ञा-लाभेन आज्ञालाभे वा उत्सुकः इति तृतीयासमासः सप्तमीसमासो वा । "प्रसितोत्सुकाभ्यां तृतीया च" इति सूत्रबलात् । दूरात् समीपागमनायोग्यत्वात्, "दूरान्तिकार्थेभ्यो द्वितीया च" * इति चकारात्, दूरात् इत्यत्र पञ्चमी । कुत्-सितम् अक्षि काक्षं कुदृष्टिः तेन इन्द्रियसामान्यवाचिनोऽक्षशब्दस्यात्र प्रकरणात् चक्षुरेव इति ज्ञेयम् । ["का पथ्यक्षयोः" इति कुशब्दस्य कादेशः तत्पुरुषे अथवा कुत्सितम् अक्षि यस्येति तेन बहुव्रीहौ "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति षच् प्रत्ययः । काक्षेण मया इत्यर्थः । ईषदक्षं काक्षम् इति भरतस्य: । तदा कटाक्ष तात्पर्य्यम्] अनादरेण अवज्ञया ईक्षितः अवलोकितः हरिरिन्द्रः ["यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु" इत्यमरः] माम् उपास्त सेवितवान् आत्मनेपदि रूपम् । वृत्तं पथ्यावक्त्रम् ।

Change of V.—अहं उपासे दिदृक्षाविता याष्टीकव्याहतेन हरिणा आज्ञालाभोन्मुखेन...अनादरेक्षितेन ।

Derivation.—उपास्त—उप-आस-लङ् त । लृङ्-आसिष्ट, लिट्-आसाञ्चक्रे । दिदृक्षावान्—(दृश+सन्+अः) दिदृक्षा—मतुप् । याष्टीक—यष्टि-ईकक् । व्याहत वि-आ-हन- कर्म्मणि क्तः ।

ইন্দ্র আমা কর্তৃক অবজ্ঞাপূর্ব্বক অবলোকিত হইয়া ও আমার দ্বারপাল কর্তৃক অপসারিত হইয়াও আমার দর্শনপ্রয়াসী হইয়া দূরে

* Words signifying distance or closeness if not adjectives have the 2nd 3rd & 5th case endings. Thus ग्रामस्य दूरं दूरेण दूरात् वा वनम् । Adj. दूरः पन्थाः ।

विरुग्णोदग्रधाराग्रः कुलिशो मम वक्षसि ।
अभिन्नं शतधात्मानं मन्यते बलिनं बली ॥२५ ॥

অবস্থান পূর্ব্বক আমার আজ্ঞা লাভের নিমিত্ত উৎসুক চিত্তে আমার উপাসনা করিয়াছিল ।

Indra, with a desire to have a sight and "looking up for my commands" though seen from a distance "slightingly with scornful" eyes, and repulsed by the porter the cane-bearer, waited upon me.

Q. Parse दूरात् । Ans : दूरम् दूरेण दूरात् इति प्रातिपदिकार्थमात्रे भवति । अतः अधिकरणविवक्षा, अत्यन्तसंयोगी वा । अथवा क्रियाविशेषणम् । अव्ययमिति केचित् । २४ ।

25. Principal part :—कुलिशः (कर्त्तृ) आत्मानं (कर्म्म) बलिनं (कर्म्मविशेषणम्) मन्यते । Adj· to कुलिशः—विरुग्णोदग्रधाराग्रः । अभिन्नम्—Adj. to आत्मानम् । शतधा=Adverb.

Prose order :—बली विरुग्णोदग्रधाराग्रः कुलिशः मम वक्षसि शतधा अभिन्नं आत्मानं बलिनं मन्यते ।

Substance :—मद्वक्षसि निपतितं वज्रम् कुण्ठितमेव आसीत् । तथापि वज्रं यदा अपश्यत् यथा न तत् सञ्चूर्णितमभूत् तदा तत् वज्रम् आत्मानं ससारं मन्यतेस्म ।

Explanation in tika form :—बलमस्यास्तीति बली बलवान् इत्यर्थः । मम वक्षसि प्रक्षिप्तः इति शेषः । विरुग्णानि भग्नानि उदग्राणि महान्ति धाराग्राणि यस्य स कुलिशः वज्रः मम ["ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः" इत्यमरः] मम वक्षसि पतितः विनष्टतीक्ष्णधारश्च शतधा शतप्रकारं प्रकारे धाच् प्रत्ययः, अभिन्नम् अच्छिन्नम् आत्मानं स्वं बलिनं सारवन्तं मन्यते । अहो सारवान् अहं यत् दृढ़ रावणवक्षसि पतितोऽपि न शतधा भग्नोऽस्मि इति स्वस्य सारवत्ताम् अनुभवति इत्यर्थः । असुरसमूहविदारणादपि इदमेव तस्याधिकमुत्कर्षस्थानमिति गम्यते । तस्य देवतारूपत्वात् बलम् आत्मज्ञानञ्च विद्यते

हृत्वा लङ्काद्रुमालानमहमैरावतं गजम्।
बन्धनेऽनुपयोगित्वान्नतं तृणवदत्यजम्॥ २६॥

इत्यपि ज्ञेयम्। अथवा उत्प्रेक्षालङ्कारः। वज्रेणापि यस्य हृदयं न व्यथितं स्थिते तस्मिन् किं बिभेषि इति वस्तुध्वनिः। वृत्तं पथ्यावक्त्रम्।

Change of voice :—धाराग्रेण कुलिशेन अभिन्नः आत्मा मन्यते बली बलिना।

Derivation :—विरुग्ण—वि-रुज-कर्त्तरि क्तः। लट्-रुजति। लुङ्-अरौक्षीत्। अभिन्न—न-भिद्-कर्म्मणि क्तः। लट्-भिनत्ति, भिन्ते; लुङ्-अभिदत्, अभैत्सीत्, अभित्त। मन्यते-मन-लट्। लुङ्-अमंस्त। बली—बल-इन्। कुलिशः—कुलिनः पर्व्वतान् श्यति नाशयति इति कुलिशः। कुलिन्-शो-कः। श्यति-लट्। वक्षस्—वह्-असुन्। आत्मन्—अत-मनिन्।

বজ্র রাবণবক্ষে পতিত হওয়াতে ইহার তীক্ষ্ণধার ভগ্ন হইয়া গেল কিন্তু উহা নিজে শতধা চূর্ণ হইল না। তাহা দেখিয়া বলবান্ বজ্র আপনাকে সসার বলিয়া মনে করিল।

The powerful thunderbolt feels itself strong finding itself not broken to a hundred pieces as it fell on my chest and got its sharp edges blunted.

Q. Give the derivative meaning of कुलिशः। Ans : See above. Q. Show the significance of विरुग्णोदग्रधारायः। Ans : "अकुण्ठमकिन्त्वपि सारवत्तया" वज्रं दशाननवक्षसि पतितम् कुण्ठितस्य सत् तद्वक्षसः सारवत्त्वं द्योतयति। २५।

26. Principal part :—अहं (कर्त्तृ) ऐरावतं (गजम् इत्यनेन एकविभक्ति) गजम् (कर्म्म) अत्यजम्। Adj. to गजम्—लङ्काद्रुमालानम् and नतम्। बन्धने—विषये। अनुपयोगित्वात्—हेतौ। तृणवत्—अव्ययम्, क्रियाविशेषणम्। हृत्वा—व्यम्।

Prose order.:—अहम् ऐरावतं गजं लङ्काद्रुमालानं हृत्वा बन्धने अनुपयोगित्वात् नतं (तं) तृणवत् अत्यजम्।

Substance :—अहम् ऐरावतं नाम गजं लङ्काश्रिते द्रुमे बद्ध्वा विनतं प्रेक्ष्य तृणाय मन्यमानः तमहं परित्यक्तवान् ।

Explanation in tika form :—अहम्, इरा आपः सन्ति अस्मिन्निति इरावान् समुद्रः तत्र जातः ऐरावतः तम् ऐरावतं गजं इन्द्रस्य हस्तिनम् । आलीयते अस्मिन् इति आलानम्, अधिकरणे ल्युट् । ईकारस्य च आकारः । लङ्काद्रुमः लङ्कास्थितोवृक्षः एव आलानं बन्धनस्तम्भः यस्य तथाभूतम् ["आलानं बन्धनस्तम्भे" इत्यमरः ।] कृत्वा बन्धने अनुपयोगित्वात् स्वयमेव वशीभूतत्वात् अनुपादेयत्वाद्वा । नतं नम्रं तं तृणवत् तृणमिव मत्वा तृणाय मन्यमानः अत्यजम् त्यक्तवान् । द्रुमे आबद्धो यदा सः अतीव विनतोऽभवत् तदाहं तम् असारमवलोक्य नायं मम हस्तिवत् सारवान् इति विविच्य तृणवत् अत्यजम् इत्यर्थः । [अथवा न तम् इति पदच्छेदः तं गजं तृणवत् तृणेन तुल्यं तृणवत्, "तेन तुल्यं क्रिया चेद् वतिः" * इति वतिः न अत्यजम् अपितु अत्यजमेव इति केचित्, अत्र ऐरावतबन्धनेन महेन्द्रविजयः अभिहितः । अतः पर्य्यायोक्तमलङ्कार लक्षणं यथा "पर्य्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते ।" †

Change of V.—लङ्काद्रुमालानः मया ऐरावतः गजः नतः अत्यज्यत ।

Derivation.—द्रुम—द्रु-म । आलान—आ-ली-अधिकरणे ल्युट् ऐरावतम्—इरावत्-अण् द्वितीया । अत्यजम्—त्यजि रूपम् । लुङ् अत्याक्षीत् । तृणवत्—तृण-वतिः ।

আমি ঐরাবত হস্তীকে লঙ্কাস্থিত বৃক্ষে বন্ধন করিয়া বিনত দেখিয়া বন্ধনের উপযুক্ত নহে ভাবিয়া তৃণবৎ ত্যাগ করিলাম।

Rendering a tree of Lanka the tying post to the elephant Aira-

* वतिः (वत्) takes place in the sense of resemblance when there is but a verb.

† The figure of speech पर्य्यायोक्त is when the intended object is told not by what expresses but by what suggests.

आहोपुरुषिकां पश्य मम सद्रत्नकान्तिभिः ।
ध्वस्तान्धकारेऽपि पुरे पूर्णेन्दोः सन्निधिः सदा ॥ २७ ॥

lata which was humble, I dismissed it slightingly like grass, not being worth the binding.

Q. Show the grammatical relation of तृणवत् ।

Ans : तृणवत् इति पदम् अव्ययम् इत्यनेन अन्वितम् । क्रियया एव वति-प्रत्ययान्तस्य अन्वयो भवेत् । अतः तृणवता अनेन इत्येवं न स्यात् । २६ ।

27. It consists of two sentences :—(1) त्वं (उक्त कर्तृ) मम (सम्ब) आहोपुरुषिकाम् (कर्म) पश्य । (2) मम (सम्ब) पुरे (अधि) पूर्णेन्दोः (सम्ब) सन्निधिः (कर्तृ) अस्ति । Adj. to पुरे—ध्वस्तान्धकारे । सद्रत्नकान्तिभिः—ध्वस्त इति क्रियायाः अनुक्ते कर्तरि-तृतीया ।

Prose order :—मम आहोपुरुषिकां पश्य, सद्रत्नकान्तिभिः ध्वस्तान्धकारेऽपि पुरे सदा पूर्णेन्दोः सन्निधिः ।

Substance :—पश्य मे दर्पोद्दीपकम् सामर्थ्यम् । मणिकिरणैः तिरोहितेऽपि अन्धकारे चन्द्रः समुपागत्य पूर्णावयव एव मां सदा उपास्ते ।

Explanation in tika form :—मम आहोपुरुषिकां, अहो अहं पुरुषः महिमान्वित इत्यर्थः, इति अहोपुरुषः, सुप्सुपासमासः । तस्य भावः आहोपुरुषिका "आहोपुरुषिका दर्पाद्या स्यात् सम्भावनात्मनि" इत्यमरः । मनोज्ञादित्वात् वुञ् । * यद्वा अहमेव पुरुषो यत्रेति सम्भावनायामाहोपुरुषिका । निपातः । कार्य्यसिद्धावपि ततसाधने दृत्तिः तां पश्य अवलोकय । सन्ति उत्तमानि रत्नानि तेषां कान्तिभिः प्रभाभिः ध्वस्तः नाशितः अन्धकारो यत्र तथाभूते पुरे "पुरं शरीरे नगरे गृहे पाटलिपुत्रयोः" इति हेमः ।

* "द्वन्द्व मनोज्ञादिभ्यश्च" । वुञ् (अक) takes place after words signifying a couple of objects or मनोज्ञ &c. such as मनोज्ञ, प्रियरूप, अभिरूप, कल्प, मेधाविन् &c. Thus प्रियोपाध्यायिका, मनोज्ञकम् ।

ध्वस्तरत्नद्युतीयोगो रत्नोभ्यो कारदो दिवि ।
पूतश्कतायोमभ्येति सत्रप: किन्न गोत्रभित् ॥ २८ ॥

मम नगरे सदा पूर्णेन्दी: पूर्णचन्द्रस्य सन्निधि: सामीप्यं वर्त्तते । न पुन: तेन क्षत्यं, रत्नप्रभाभिरेव तत्कृत्यस्य कृतत्वात् । प्रयोजनाभावेऽपि भीत्या पूर्णचन्द्रो ऽस्तिष्ठति ; देवैरपि भीत्या नासौ पीयते । चन्द्रप्रभाणि च रत्नानि मम सन्तीति सूचितम् । उदात्तालङ्कार: । "उदात्तं वस्तुन: सम्पत्" इति लक्षणम् । समुच्चयालङ्कारश्च ।* वृत्तं पथ्यावक्त्रम् ।

Change of V.—आहोपुरुषिका दृश्यतां सन्निधिना (भूयते) ।

Derivation :—आहोपुरुषिका—अहंपुरुष-वुञ् । ध्वस्त—ध्वन्स-कर्त्तरि क्त: । अध्वसत्, अध्वंसिष्ट—लुङ् । पुरुष:—पुरि-देहे शेते, इति शी-ड:, र्नि । इन्दु:—उनत्ति भुवं क्लिन्नां करोति इति इन्दु: । उन्द्-उ: ।

আমার ক্ষমতা দেখ। নানা সু"র রত্নের আলোকে আমার পুরে অন্ধকার বিনষ্ট হইলেও পূর্ণচন্দ্রের সর্ব্বদা আবির্ভাব রহিয়াছে।

Behold my pride, there is always in my city the presence of the full moon, though its darkness is expelled by the lustre of the brilliant jewels.

Q. Give the meaning of आहोपुरुषिका Ans : कार्य्यसिद्धौ अपि तत्साधने दृप्ति: । (See above) c. f "निजभुजबलाहोपुरुषिकाम्" भर्तृहरि: । Q. show the significance of पूर्णेन्दी: । Ans : (See above). Q. Give the derivative meaning of रत्नम् । what do you understand by कन्यारत्न । Ans : रमते अत्र इति रत्नम् । रम् धातो: न:, तान्तादेशश्च । कन्यारत्नमित्यत्र रत्नं श्रेष्ठवाचित्वम् । तथाहि "जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते ।"

(I) * उदात्तम् a figure of speech which describes sup-erabundance of prosperity. (2) समुच्चय a figure of speech consisting in joining together two or more things connec-ted in idea with reference to some common action.

28. Principal part :—गोत्रभित् (कर्तृ) पुतक्रतायीं (कर्म) किं न (त्वम्") अभ्येति। Adj. to गोत्रभित्—हृतरत्नः, च्युतोद्योगः, करदः, and त्रपः। रक्षोभ्यः—सम्प्रदानम्। दिवि—अधि।

• Prose order—हृतरत्नः (अतएव) च्युतोद्योगः रक्षोभ्यः करदः गोत्र-भित् दिवि त्रपः (सन्) पुतक्रतायीं न अभ्येति किम्।

Substance :—इन्द्रः रक्षोभिः रत्नानि अपहृतानि विलोक्य उद्योगं विहाय दत्त्वा च तेभ्यः करं तथा ह्रियम् अनुभवति यथा निजपत्नीसकाशेऽपि आनत-शिराः वर्त्तते, चिन्तयति च यथा सा आत्मानं कापुरुषपत्नीं मन्यते इति।

Explanation in tika form :—हृतम् अपहृतं रत्नम् ऐरावतादिकं यस्य स तथोक्तः अतएव च्युतः गलितः उद्योगः उद्यमः यस्य तथाभूतः, तथा दिवि स्वर्गेऽपि रक्षोभ्यः राक्षसेभ्यः, करो राजग्राह्यं वित्तम् "बलिहस्तांशवः कराः" इत्यमरः। तं ददातीति करदः "आतश्चोपसर्गे" इति कः। राजग्राह्यं वित्तं यच्छन्नित्यर्थः। गोत्रभित् इन्द्रः। गां त्रायन्ते इति गोत्राः, गोत्रान् पर्व्वतान् भिन-त्तीति गोत्रभित्, पर्व्वतपक्षशातनः, "सत्-सू-द्विष-द्रुह-दुह-युज-विद-भिद-छिद-जि-नी-राजामुपसर्गेऽपि क्विप्" इति क्विप्। अनेन रावणस्य बलीयस्त्वं सूचितम्। त्रपः सलज्जः सन् पुतक्रतोरिन्द्रस्य पत्नी पुतक्रतायी शची ["पुतक्रतोः ऐ च" इति पुतक्रतुः इत्यस्मात् स्त्रियां ङीपि 'ऐ' आदेशः।] स्वभार्य्यामपि नाभ्येति नाभिगच्छति किम्? अपितु वनितासकाशेऽपि ह्रियम् अनुभवति इत्यर्थः।

Change of voice:—हृतरत्नेन च्युतोद्योगेन...करदेन पुतक्रतायी नाभीयते त्रपेण...गोत्रभिदा।

Derivation.—रत्न—रम्-न:। करदः—कर-दा-कः। पुतक्रतायी—पुतक्रतु-ङीप्। गोत्रभित्—गोत्र-भिद-क्विप्। त्रपा—त्रप्-अङ्। त्रपते-लट्, त्रपिष्ट अद्यतन लुङ्।

ইন্দ্রের রত্ন অপহৃত হইয়াছে। সে উদ্যোগশূন্য হইয়া পড়িয়াছে, স্বর্গে অবস্থান করিয়াও সে রাক্ষসদিগকে কর দিতেছে। সে কি নিজ পত্নীর নিকটেও সলজ্জভাবে গমন করে না?

Does not Indra the piercer of mountains feel ashamed to approach

अतुल्यमहसा सार्द्धं रामेण मम विग्रहः ।
त्रपाकरस्तथाप्येष यतिष्ये तद्विनिग्रहे ॥ २९ ॥

(even) his wife ? Indra, who is robbed of his jewels, has left off all his energies and pays, although in heaven, tributes to the demons ?

Q. Show the grammatical connecion of रक्षोभ्य। Ans: "क्रियान्वयि कारकम्"। अतः रक्षोभ्यः इति सम्प्रदानत्वे कारकत्वात् दानक्रियया सह अन्वयः। Q. Give the feminine form of पूतक्रतु। Ans: See above; see also V. 22. Q. show the significance of गोत्रभिद्। Ans: यो वज्रेण पर्व्वतानामपि पक्षान् अच्छैत्सीत् स इदानीं मया बद्धम् आनीतः इति सूचितम्।

29. Consists of two sentences:—(I) रामेण (सार्द्धं योगे त) सार्द्धम् (अव्य) मम (सम्ब) विग्रहः (कर्तृ) त्रपाकरः (विण) (भवति)। अतुल्यमहसा—Adj. to रामेण। (2) तथापि (अव्य) एषः (अहम् इत्यस्य विण) अहम् (कर्तृ) यतिष्ये। तद्विनिग्रहे—विषये सप्तमी।

Prose order :—अतुल्यमहसा रामेण सार्द्धं मम विग्रहः त्रपाकरः तथापि तद्विनिग्रहे एषः (अहं) यतिष्ये।

Substance :—यस्य रामस्य तेजसः तुला नास्ति तेनापि सह मम कलहः ह्रियम् उत्पादयति। तथापि तस्य यथा निग्रहः स्यात् तथा करिष्ये।

Explanation in tika form :—यद्यपि अतुल्यम् असदृशं महः तेजो यस्य तेन असदृशबलेन इत्यर्थः। "महस्तूत्सवतेजसोः" इत्यमरः। रामेण सार्द्धं सह मम विग्रहः कलहः त्रपाकरः लज्जावहः"। त्रपा इत्यस्मात् कृधातोः टः। "ह्रीर्लज्जाऽपत्रपा व्रीडा मन्दाक्षम् मन्दके त्रपा" इति रत्नकोषः। तथापि तस्य विनिग्रहे विविधनिग्रहे विषये [विषये सप्तमी, निमित्तार्थेऽपि सप्तमी चोक्ताधारादित्यन्ये] एषोऽहं यतिष्ये यत्नं करिष्यामि। "वर्त्तमान सामीप्ये वर्त्तमानवद्वा" इति विकल्पेन लटो विधानात् लृट्। वृत्तं पथ्यावक्त्रम्।

उत्पत्य खं दशग्रीवो मनोयायी शितास्त्रभृत् ।
समुद्रसविधावासं मारीचं प्रति चक्रमे ॥ ३० ॥

Change V.—विग्रहेण त्रपाकरेण भूयते । एतेन (मया) यतिष्यते ।

অসদৃশবলশালী রামচন্দ্রেরও সহিত আমার যুদ্ধ করা লজ্জাকর। তথাপি এই আমি তাহার নিগ্রহ বিষয়ে সচেষ্ট হইতেছি।

My quarrel with Rama, though to his prowess there is no parallel, brings in shame, I shall however exert towards defeating him.

Q. Parse विग्रह: । Ans : विग्रह: त्रपाकरो भवति । इति अध्य- 'भवति' क्रियाया: कर्तृपदम् । क्रियाभावे कारकाभावात्, यत: "क्रियान्वयि कारकम्" । Q. give the different meanings of महस् and decline it in the 2d. case. Ans "महस्तूत्सवतेजसो:" इत्यमर: । द्वितीयायां रूपं यथा, मह: महसी महांसि । २९ ।

30. Principal part :—दशग्रीव: (कर्तृ) मारीचं (प्रतियोगे द्वि) प्रति (कर्मप्रवचनीयम्) चक्रमे । Adj. to दशग्रीव:—मनोयायी and शितास्त्रभृत् । Adj. to मारीचम्—समुद्रसविधावासम् । Incomplete verb :—उत्पत्य (ल्यप्) । खम्—object to उत्पत्य ।

Prose order :—मनोयायी शितास्त्रभृत् दशग्रीव: खम् उत्पत्य समुद्रसविधावासं मारीचं प्रति चक्रमे ।

Substance :—मनोजवो दशानन: तीक्ष्णास्त्रं धारयन् आकाशपथेन, समुद्रसमीपे वसन्तं मारीचं प्रति चलित: ।

Explanation in tika form :—मनोवत् वायु यातुं शीलमस्येति मनोयायी "कर्त्तर्युपमाने" इति णिनि: । शितम् तीक्ष्णम् अस्त्रं बिभर्त्तीति शितास्त्रभृत् गृहीततीक्ष्णचन्द्रहास: [सत्सूद्विषेत्यादिना क्विप्] दश ग्रीवा यस्येति दशकन्धरो रावण: इति उक्ता खम् आकाशम् । "खमिन्द्रिये पुरे सर्वे ग्रामविन्दौ विहायसि । संवेदने देवलोके शर्म्मण्यपि नपुंसकम्" इति मेदिनी । उत्पत्य समुद्रस्य सविधे समीपे आवासो वसति: यस्य तं सागरान्तिकवर्त्तिनम् इत्यर्थ: । ["सदेशाभ्यास सविध समर्य्याद सवेशवत्" इत्यमर:] मारीचं प्रति

सम्पत्य तत्सनीडेऽसौ तं वृत्तान्तमशिश्रवत्।
समुनाथ श्रुतार्थेन तेनागादि दशानन: ॥ २१ ॥

मारिचं लक्षीकृत्य इत्यर्थ:।] ["लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्य्यनव:" * इति प्रते: कर्म्मप्रवचनीयसंज्ञा, तद्योगे च "कर्म्मप्रवचनीययुक्ते द्वितीया" इति द्वितीया। चक्रमे गत: अत्र मारीच: तत्र जगाम इति भाव ["अनुपसर्गाद्वा" इति क्रम् धातो: उपसर्गहीनत्वात् आत्मनेपदम् वैकल्पिकम् चिन्त्यम्। वृत्तं पथ्यावक्त्रम्।

Change of voice :—दशग्रीवेण मनोयायिना श्रितास्त्रभृता प्रतिचक्रमे।

Derivation :—उत्पत्य—उत्-पत-ल्यप्। लुङ्—अपप्तत्। मनोयायी मनस्-या-णिनि:। श्रित—श्रो-कर्म्मणि क्त:। लट्- श्रयति, लुङ्-अश्रात्, अश्रासीत्, लिट—अश्री। चक्रमे—क्रम्-लिट् ए। लट्-क्राम्यति, क्रामति (पाणिनि:) क्रामति क्रम्यति (वोपदेव:)। लुङ्—अक्रमीत्। समुद्र—सम् उन्द र। अस्त्र—अस्-ष्ट्रन् असति-लट्, आस्यत्-लुङ्।

রাবণ শাণিতাস্ত্র ধারণ করিয়া আকাশে উড্ডীন হইয়া মনের ন্যায় দ্রুত গতিতে সমুদ্রপ্রান্তস্থিত মারীচের নিকট গমন করিল।

The ten headed Ravana flying up to the sky, quick as thought, holding sharp weapons, went to Maricha who had his residence by the side of the sea.

Q. Parse प्रति। Ans: प्रति इति कर्म्मप्रवचनीयम्। Q. If प्रति be conjoined with चक्रमे what should be the form of मारीचम्। Ans: धातुना प्रते: योगे तस्य उपसर्गत्वम्। तथाश्रिते 'मारीचम्' इत्यत्र गत्यर्थकर्मयोगे द्वितीया स्यात्। Q. Give the different meanings of स्व। Ans : See above. २०।

31. Principal part :—(1) असौ (कर्त्तृ) वृत्तान्तम् (गौण-

---

*प्रति परि and अनु become कर्म्मप्रवचनीय when they indicate (1) distinctive mark ; (2) being so circumstanced ; (3) share ; and (4) pervasion.

कर्त्तृ) मारीचम् (उक्तं मुख्यं कर्म्म) अशिश्रवत्। तम्—Adj. to वृत्तान्तम्। अथवा 'तम् मारीचम्' इति तम् इति मुख्यं कर्म्म। (2) अथ (अयम्) तेन (अनुक्त कर्त्तृ) दशाननः (उक्त कर्म्म) अगादि। त्रस्नुना and श्रुतार्थेन—Adj. to तेन।

Prose order—असौ तत्सनीडे सम्पत्य तं वृत्तान्तम् अशिश्रवत् अथ श्रुतार्थेन त्रस्नुना तेन दशाननः अगादि।

Substance:—रावणः मारीचसमीपम् आगत्य शूर्पणखागतं सर्व्वं कथितवान्। अथ सर्व्वम् उपश्रुत्य भीतो मारीचः दशाननम् उवाच।

Explanation in tika form:—असौ दशाननः तस्य मारीचस्य सनीडे तत्सनीडे तत्समीपे ["समीपे निकटासन्न सन्निकृष्ट सनीडवत्" इत्यमरः] सम्पत्य गत्वा मारीचम् इति उक्तं मुख्यं कर्म्म। 'तम्' वृत्तान्तमित्यस्य विशेषणम्। अथवा तम् मारीचम् इति तम् इति पदं मुख्यं कर्म्म। वृत्तान्तं शूर्पणखा-कथितं अशिश्रवत् श्रावितवान् [शृणोतेः ण्यन्तस्य लुङि रूपम्] अथ श्रुतः अर्थः येन तथोक्तेन अवगतवृत्तान्तेन त्रस्नुना भीतेन ["त्रसि गृधि धृषि क्षिपेः क्नुः" इति क्नुः] तेन दशाननः दश दशसंख्यकानि आननानि वदनानि यस्य सः अगादि उक्तः। गद भाषे इत्यस्य कर्म्मणि लुङ्। वृत्तं पथ्यावक्त्रम्। "युजोः चतुर्थतो जेन पथ्यावक्त्रम् निगद्यते।"

Change of V.—अमुना (मारीचः) तं वृत्तान्तम् अश्रावि। त्रस्नुः श्रुतार्थः स दशाननमगादीत्।

Derivation.— अशिश्रवत्—श्रु-णिच-लुङ् द। त्रस्नु—त्रस—क्नुः। त्रस्यति लट्, अत्रसत् लुङ्। अगादि—गद-कर्म्मणि लुङ् त। अगादीत् अगदीत् परस्मैपदे।

দশানন মারীচের নিকটে উপস্থিত হইয়া তাহাকে সেই বৃত্তান্ত বর্ণন করিল। সে সমস্ত শ্রবণ করিয়া ভীত হইয়া দশাননকে কহিতে লাগিল।

Having 'arrived' near him, he informed him the event. The ten-headed Ravan was addressed by him (Maricha), frightened as the latter was when he heard it.

अनर्थंतृस्व रघुव्याघ्रात् तस्मात् त्वं राक्षसेश्वर ।
यो रणे दुरुपस्थानो-हस्तरोधं दधद्धनुः ॥ ३२ ॥

Q. Point out with reason the direct (मुख्य) and the indirect (गौण) object of अशिश्रवत् । •Ans. "गति बुद्धि भोजनार्थक इत्यादिना" बुद्ध्यर्थक शृणोतेः अण्यन्तावस्थायां यः कर्त्ता स णिचि कर्मत्वं लभते । 'मारीचः अशृणोत्, दशाननः मारीचं श्रावयामास' इति मारीचः शृणोतेः मुख्यकर्मत्वं लभते । वस्तुतः श्रावणक्रियायाः साक्षात् अन्वयित्वं मारीचेन सहैवास्ति, श्रवणक्रियायास्तु इत्यादि इति विभाव्यम् । ३१ ।

32. Principal sentence :—राक्षसेश्वर ! (vocative) रघुव्याघ्रात् (अपादान) त्वं (कर्तृ) अनर्थंतृस्व । Adjective to रघुव्याघ्रात्—तस्मात् । Sub. Sentence—यः रणे दुरुपस्थानः भवति । Adj. to यः—दधत् । हस्तरोधं (adv.) । धनुः—object to दधत् ।

Prose order :—राक्षसेश्वर ! हस्तरोधं धनुः दधत् यः रणे दुरुपस्थान (भवति) तस्मात् रघुव्याघ्रात् त्वं अनर्थंतृस्व ।

Substance :—रघुवंशीयानाम् श्रेष्ठात् रामात् अनर्हितो भव । मुष्टिपीडं धनुः धारयन्तं रामम् उपमर्पितुं न कश्चित् समर्थ एव ।

Explanation in tika form :—हे राक्षसेश्वर रक्षःपते रावण ! हस्तेन रुद्ध्वा इति हस्तरोधं, तृतीयान्ते उपपदे "सप्तम्याञ्चोपपीडरुधकर्षः" * इति णमुल् । हस्तेन सुदृढं धारणं यथा स्यात् तथा इत्यर्थः । केचित्तु हस्तं रुद्ध्वा इति आहुः, तेन च हस्तस्य अन्यकर्मनिवृत्तिः गम्यते । अन्ये च, हस्तं रुणद्धि कार्य्यान्तराद्व्यावर्त्तयतीति कर्म्मण्युपपदे अण्, धनुर्विशेषणं च इत्याहुः । धनुः चापं दधत् धारयन् । धा-धातोः शतृप्रत्यये "नाभ्यस्तात् शतुर्नुम्" इति नुमागमप्रतिषेधः । यः रामः रणे संग्रामे दुरुपस्थानः दुःखेन उपस्थीयते,उपगम्य

* णमुल् takes place after the roots उपपीड़, रुध् and कर्ष preceded by words of the 3rd case as well as of the 7th case. Thus हस्तेन रुद्ध्वा इति हस्तरोधम् ।

इति दुरुपस्थान:, युच् प्रत्यय:, उपसर्गयोगात् सकर्म्मकत्वम्। मनुभि: समीप-गमनमेवाशक्यं किं पुनर्युद्धमिति भाव:। तस्मात् रघुव्याघ्रात् रघुश्रेष्ठात्। तस्मात् राघवेन्द्रात् रामात्, "अन्तर्धौ येन अदर्शनमिच्छति" † इति पञ्चमी। अन्तर्हितस्त्व व्यवहितो भव, स यथा न पश्यति तथा कुरु इत्यर्थ:। वृत्तं पथ्यावक्त्रम्।

Change of V.—अन्तर्धीयतां त्वया येन दुरुपस्थानेन (भूयते)... दधता।

Derivation.—अन्तर्धत्स्व—अन्तर् धा-लोट् स्व। लुङ्—अधात्, अधित। दुरुपस्थान:—दुर्-उप-स्था-कर्म्मणि (युच्) अन:। अस्थात्—लुङ्। हस्तरोधं—हस्त-रुध्-णमुल्। धनु:—धन-उस्। दधत्—धा-शतृ, नुमागमप्रति-षेध:।

হে রাক্ষসাধিপতে! যে রামচন্দ্র সর্ব্বদা হস্তে ধনুঃ ধারণ করিয়া থাকাতে শত্রুগণ যুদ্ধে তাঁহার সম্মুখীন হইতে পারে না সেই রঘুব্যাঘ্র রামচন্দ্র হইতে দূরে অবস্থান করুন।

O lord of the demons 'disappear' from the best of the Raghus, who holding his bow to the fixity of his arm, is hardly to be with-stood in a battle-field.

Q. Explain the Samas in रघुव्याघ्रात्। Ans: रघु: व्याघ्र इव इति उपमितसमास: न कथमपि भवितुमर्हति। रघोरपत्यानि पुमांस: इति रघव: इति बहुवचनसिद्धे:। नैच रघुषु व्याघ्र इव इति अयमङ्गलक्षत-समासकरणं समीचीनम्? [see इषुमति रघुसिंहे I. 26.] तत्र सप्तमी-प्रयोगात्। अत्र तु सप्तमीसमास एव उचित:। रघुषु व्याघ्र: इति रघुव्याघ्र:। व्याघ्रपदं श्रेष्ठार्थे व्यवहृतम्, रघुश्रेष्ठ इत्यर्थ:। तथाहि अमरसिंह:। "स्युरुत्तर पदे व्याघ्रपुङ्गवर्षभकुञ्जरा:। सिंहशार्दूलनागाद्या: पुंसि श्रेष्ठार्थवाचका:।"

Q. Account for पञ्चमी in रघुव्याघ्रात्। Ans: see above.

Q. Comment grammatically on दुरुपस्थान: and अन्तर्धौ

---

† When one wishes to hide himself from another the latter is said to be अपादान।

भवन्तं कार्त्तवीर्य्यो यो हीनसन्धिमचीकरत् ।
जिगाय तस्य हन्तारं स रामं सार्व्वलौकिकम् ॥ ३३ ॥

धम् । Ans :—See above. Q. Which of the two words दधत् and दधन्, is correct ? Ans :—The first is correct, धा belongs to ह्वादि class and so gets it reduplicated. नम् is not applied to such roots in शतृ as are reduplicated. "नाभ्यस्तात् शतुः नुम्" । ३२ ।

33. Principal part :—सः (कर्तृ) रामं (कर्म) जिगाय। Adj. to रामम्—हन्तारं and सार्व्वलौकिकम् । Sub. sentence:—यः कार्त्तवीर्य्यः (कर्तृपदम्) भवन्तं (कर्म) हीनसन्धिं (विण) अचीकरत् ।

Prose order :—यः कार्त्तवीर्य्यः भवन्तं हीनसन्धिम् अचीकरत् तस्य हन्तारं सार्व्वलौकिकम् रामं (परशुरामम्) सः जिगाय ।

Substance :—यः कार्त्तवीर्य्यः त्वाम् ज्यावन्धेन प्रबद्धं कृत्वा शिथिल-ग्रन्थिम् अकरोत् परशुरामः तं निजघान । दाशरथीरामस्तु तं लोकविख्यातं परशुरामं जितवान् इति ।

Explanation in tika form—यः कृतवीर्य्यस्य अपत्यमिति कार्त्त-वीर्य्यः सहस्रबाहुः हैहयपतिः अर्ज्जुनः, भवन्तं त्वां हीनसन्धिम्, हीनाः विश्लिष्टाः सन्धयः देहसन्धिस्थानानि यस्य तादृशमिति विशेषणपदम् । अकारयत् चकार स्वार्थे णिच् । अथवा, हीनसन्धिमिति गौणं कर्मपदम् । तथात्वे हीनेन दुर्ब्बलेन सह यः सन्धिः तं हीनसन्धिम् अचीकरत्, तेन त्वमाभिर्जित्य त्वं सन्धिना हीनतां प्रापितः इत्यर्थः । यद्वा हीनेन सह सन्धिं सन्धानं मिलनं कारयामास । यद्भयात् भवता हीनजनोऽपि आश्रितः कारितः इत्यर्थः । यद्वा सन्धिः मिलनं एकत्रा-वस्थानम् इत्यर्थः, कारागृहे अपराधिभिः सार्द्धं वसतिम् अकारयदित्यर्थः । कृञो णिचि लुङ् । "हृक्रोरन्यतरस्याम्" इति कृञः पाक्षिकी द्विकर्मकता । पक्षे भवता हीनसन्धिम् अचीकरत् । तस्य कार्त्तवीर्य्यस्य हन्तारं, तेन हि तस्याग्निहोत्रधेनु-मपहृत्य गच्छतः कार्त्तवीर्य्यस्य बाहुसहस्रं परशुना छिन्नम् । "कर्तृकर्मणोः कृति" इति कर्मणि षष्ठी । सर्व्वलोकेषु विदितं सार्व्वलौकिकम् सकलक्षत्रियनाशे

सर्व्वलोकविदितं "लोकसर्व्वलोकात् ठञ्" इति ठञ्। सार्व्वलौकिक इति प्रच-मानपाठे दाशरथिरामविशेषणं। तं रामं परशुरामः जिगाय जितवान्। रामः इति पाठे स रामः दाशरथापत्यम् इति ज्ञेयम्।

Allusions :—(1) दत्तात्रेयात् लब्धवरं युद्धे सहस्रहस्तं कृतवीर्य्यपुत्रं हैहयपतिं कदाचित् जलक्रीड़ासक्तमासाद्य दशाननः आक्रान्तवान्। स तु रावणं पराजित्य ज्याबन्धेन निबध्य कारागृहे च चिरं स्थापितवान्। (2) अथ दिग्विजयेन गच्छता कार्त्तवीर्य्येः बलदर्पितः ब्राह्मणान् अवमन्यमानः कदाचित् परशुरामाश्रमात् कामधेनुम् अपहरन् परशुरामेण निहतोऽभूत्। (3) हरधनु-र्भङ्गानन्तरं जनकालयात् अयोध्यां प्रति प्रत्यागच्छतः ससीतस्य रामस्य पुरः परशुरामः उपस्थाय तं संग्रामाय आहूतवान् स्वयं पराजितश्च समभवत् इति।

Change of V.—भवान् कार्त्तवीर्य्येण येन हीनसन्धिम् अकारि जिग्ये तस्य हन्ता तेन रामः सार्व्वलौकिकः।

Derivation :—सन्धि—सम्-धा-कि:। अचीकरत्—कृ-णिच् लुङ्द। जिगाय—जि-लिट्—अ। लुङ्—अजैषीत्। हन्तारम्—हन्-तृच्। सार्व्व-लौकिकम् –सर्व्वलोक ठञ्।

যে কার্ত্তবীর্য্যার্জ্জুন জ্যাবন্ধনে আপনার গাত্রবন্ধন শিথিল করিয়াছিল সেই হৈহয়পতি কার্ত্তবীর্য্যার্জ্জুনের বিনাশক জগদ্বিখ্যাত পরশুরামকে রাম পরাভব করিয়াছেন।

He defeated ParasuRam who is so celebrated in all the world, and who killed Kartabirja, one who loosed thy joints or compelled thee to accept ignoble peace, or to dwell with the inferiors.

Q. Mention what the above alludes to. Ans : See above. Q. Explain हीनसन्धिम् अचीकरत्। Ans : (1) हीनसन्धिम् इत्यस्य विशेषणत्वे, हीनाः सन्धयः यस्य तादृशम्, ज्याबन्धेन विश्लिष्ट-देहसन्धिम् इत्यर्थः। इत्येवमर्थं अचीकरत् इति स्वार्थे णिजन्तस्य कृधातोः रूपम्। (2) हीनसन्धिम् इत्यस्य विशेष्यत्वे अस्य गौणकर्म्मत्वम्। तथाहि हृधातोः कृधातोश्च अणिजन्तावस्थायाम् यः कर्त्ता णिजन्तावस्थायां तस्य वैकल्पिकेन

यमास्यदृश्वरी तस्य ताड़का वेत्ति विक्रमम् ।
शूरम्मन्यो रणाद्याहं निरस्तः सिंहनर्द्दिना ॥ ३४ ॥

कर्म्मत्वं । "इक्रोरन्यतरस्याम्" । अतः, 'भवन्तम् अचीकरत्, इत्यत्र 'भवन्तं' मुख्यं कर्म्म, हीनसम्भिम्' इति गौणं कर्म्म । तथात्वे, हीनैः हीनजनैः सम्भिः मिलन तम् अचीकरत् कारयामास । कारागारे आवद्धः भवान् चौरादिभिः सह तवास इत्यर्थः । See above. Q. Show the construction and change the voice. Ans : See above. ६३ ।

34. Principal part :—(1) ताड़का तस्य विक्रमं वेत्ति । Adj to ताड़का—यमास्यदृश्वरी । (2) अहं रणात् (तेन) निरस्तः । Adj. to अहं—शूरम्मन्यः । Adj. to तेन—सिंहनर्द्दिना ।

Prose order :—यमास्यदृश्वरी ताड़का तस्य विक्रमं वेत्ति । शूरम्मन्य अहञ्च सिंहनर्द्दिना (तेन) रणात् निरस्तः ।

Substance :—माता मे ताड़का रामेण विनाशिता अवेदयत् कीदृक रामस्य प्रताप इति । अहमपि साक्षी तद्विक्रमस्य, यतः अहम् आत्मानं वीर जानन्नपि तेन रणात् ताड़ितोऽभूवम् ।

Explanation in tika form—अस्यन्ते वर्णा येन, अस्यते ग्रासो वा अस्मिन् तत् आस्यम् । ण्यत् । "मुखं मुखान्तरालं च इयमास्यमितीरितम्' शाश्वतः । यमस्य आस्यं मुखं दृश्वरी दृष्टवती रामशरताड़िता यममुखं दृष्टवती मृता इति यावत् । दृशे. क्वनिप् । ङीपि, "वनोरच" । इति वनो नकारस्य रत्वम् । ताड़का मम माता, तस्य रामस्य विक्रमं, पराक्रमं वेत्ति, जानाति "वर्त्तमानसामीप्ये" इति भूते लट् । शूरम् आत्मानं मन्यमानः शूरम्मन्य वीराभिमानी 'आत्ममाने खश्च" * इति खश् । अहञ्च, सिंह इव नर्द्दति ध्वन तीति तेन सिंहनर्दिना "कर्त्तर्य्युपमाने" इति णिनिः । तेन रामेण रणात् रणभूमे

---

* मन् (to think), when the thought refers to one's own self, takes खश् and also णिन् । Thus पण्डितम् आत्मानं मन्यते इति पण्डितम्मन्यः अथवा पण्डितमानी ।

न त्वं तेनान्वभाविष्ठा नान्वभावि त्वयाप्यसौ ।
अनुभूतो मया चासौ तेन चान्वभविष्यहम् ॥ ३५ ॥

मत्सकाशात् निरस्तः बहिष्कृतः, तस्य विक्रमं वेद्मि इति शेषः । रामस्य सिंहनादेन त्वद्विधोऽहं जानामि कीदृशस्तस्य प्रताप इति भावः । वृत्तं पथ्यावक्त्रम् ।

Change of V.—यमास्यदृश्वर्या ताडकया विक्रमः विद्यते, शूरम्मन्यं मां निरस्तवान् (स) सिंहनर्दी ।

Derivation.—आस्य—अस्-ण्यत् । दृश्वरी—दृश्-क्वनिप्-ङीप् । शूरम्मन्यः—शूर-मन्-खश् । निरस्तः—निर्-अस्-कर्म्मणि क्तः । लुङ्—आस्यत् । सिंहनर्दिना—सिंह नर्द- णिनिः ।

তাড়কা রামশরে কালের করালকবলে পতিত হইয়া রামের পরাক্রম অবগত হইয়াছেন; আমি বীরাভিমানী হইলেও রামচন্দ্র সিংহনাদ করিয়া আমাকে রণস্থল হইতে দূরীকৃত করিয়াছেন ।

Taraka who witnessed the face of death, knew his prowess. I too who had the conviction of being a hero, when driven by Rama roaring like a lion, know his prowese.

Q. Give the feminine form of दृश्वन्, and the meaning of शूरम्मन्यः । Ans : See above. Q. Account for वेद्मि being used in the present tense, conjugate it in लट् । Ans : See above. See P. 37. ११ ।

35. It consists of 4 Sentences : —(1) तेन (अनुक्त कर्त्तृ) त्वम् (उक्त कर्म्म) न अन्वभाविष्ठाः । (2) त्वया (अनुक्त कर्त्तृ) असौ (उक्त कर्म्म) अन्वभावि । (3) मया (अनुक्त कर्त्तृ) असौ (उक्त कर्म्म) अनुभूतः । (4) तेन (अनुक्त कर्त्तृ) अहं (उक्त कर्म्म) अन्वभविषि ।

Prose order :—तेन त्वं न अन्वभाविष्ठाः, त्वयापि असौ न अन्वभावि । मया च असौ अनुभूतः, तेन च अहम् अन्वभविषि ।

Substance :—नहि स तव प्रतापम् अनुभूतवान् ; नापि त्वं तस्य प्रतापम् । अहमेव तम् अज्ञासिषम् ; स च मे प्रतापाभिज्ञः इति ।

अध्यक् शस्त्रभृतां रामो न्यश्वस्तं प्राप्य मद्विधाः ।
स कन्याशुल्कमभनक् मिथिलायां मखे धनुः॥ ३६ ॥

Explanation in tika form :—त्वद्वचने को यद्दः मम नामाएव सूरीभविष्यति इत्याशङ्कायामाह तेनेति। तेन रामेण त्वं न अन्वभाविष्ठा, न अनुभूतः, अतः कथं त्वत्तोऽस्य भयं स्यात् इति भावः। अनुपूर्व्वो भूधातुः सकर्म्मकः, तस्मात् कर्म्मणि यास्। त्वयापि असौ न अन्वभावि न अनुभूतः, तेन तव तत्रावज्ञा येनैवमुच्यते, परन्तु तत्रावज्ञा न युक्ता। मया च मया पुनः, चकारश्च अन्वाचयार्थः*। असौ रामः अनुभूतः, तथापि तत्त्वज्ञेन मया ज्ञात इत्यर्थः। अतः मद्वचनं गृहाण, मया असौ जेतुं न शक्य इति भावः। तेन रामेण च अहम् अन्वभविषि अनुभूतः तेन सह योद्धुम् अक्षम इति। अतो मद्गमनं अपराजितस्य मम दर्शनेन अस्यावज्ञाप्रसङ्गात् इति। वृत्तं पथ्यावक्त्रम्।

Change of V.—स त्वां न अन्वभूत् त्वं अमुं न अन्वभूः। अनुभूतवान् अहम् असुम्। स माम् अन्वभूत्।

Derivation :—अन्वभाविष्ठाः—अनु-भू-कर्म्मणि लुङ् थास्। पक्षे अन्वभविष्ठाः। अन्वभावि—अनु-भू-कर्म्मणि लुङ् तन्। अनुभूतः—अनु-भू-कर्म्मणि क्तः। अन्वभविषि—अनु-भू-कर्म्मणि लुङ् इ, पक्षे अन्वभाविषि।

রাম আপনাকে অবগত নহেন, আপনিও রামচন্দ্রের পরাক্রম বিদিত নহেন (তজ্জন্যই) এরূপ কহিতেছেন। কিন্তু আমি তাঁহার পরাক্রম অনুভব করিয়াছি, তিনিও আমার বলের বিষয় সম্যক্ বিদিত হইয়াছেন।

Thy power has not been felt by him, nor his by thee. His power has been felt by me, and mine by him (or——Thou hast not been known by him &c. &c.)

36. It consists of three sentences : (1) रामः (कर्त्ता) शस्त्रभृताम् (निर्द्धारे) अध्यक् (विधे) भवति। (2) मद्विधाः (कर्त्ता ...

* अन्वाचय=Joining a subordinate fact with a principal one.

कर्तृ) तं (प्राप्य इत्यस्य कर्म) प्राप्य (ल्यप्) न्यञ्च: (विश) भवाम:। (3)
स: (कर्तृ) धनु: (कर्म) अभनक्। मिथिलायाम् (अधि) मखे (अधि)।
कन्याशुल्कम्—Adj. to धनु:।

Prose order :—राम: शस्त्रभृतां अध्यङ् भवति। तं प्राप्य मद्विधा:
न्यञ्च: भवाम:। (यत:) स मिथिलायां मखे कन्याशुल्कं धनु: अभनक्।

Substance.—रामो हि शस्त्रानपुणानां श्रेष्ठ:। वयं तत्सकाशे क्षुद्रा
एव। स: मिथिलायाम् यज्ञचैवं शैवं धनुरपि बभञ्ज।

Explanation in tika form :—राम: भवतीत्यस्य कर्तृपदम्।
शस्त्रभृतां धानुष्काणां मध्ये, निर्द्धारे षष्ठी। अध्यङ् आधिक्येण पूजित:, यद्वा
अध्यङ् अधिक: श्रेष्ठ इति यावत्। अधिपूर्व्व: अञ्चति: आधिक्ये वर्त्तते,
तस्मात् क्विप्। तं तादृशं वीरं प्राप्य मद्विधा मादृशा: पुरुषा:, न्यञ्चन्ति अधो
गच्छन्तीति न्यञ्च: हीना इत्यर्थ:। भवाम: इति शेष:। निपूर्व्वकात् अञ्च् धातो:
क्विप्। कुत इत्याह, यत: स राम: मिथिलायां जनकराज्ये मखे यज्ञे "यज्ञ:
सवोऽध्वरो याग: सप्ततन्तुर्मख: क्रतु:" इत्यमर:। कन्याशुल्कं कन्यार्थं शुल्कं
पणं, वरात् अर्थग्रहणस्वरूपं "शुल्कं घट्टादि*देये स्यात् वरात् अर्थग्रहेऽस्त्रियाम्"
इति मेदिनी। धनु:, तद्धि "यो रौद्रं धनुरारोपितगुणं करोति तस्मै कन्या दीयते"
इति मूल्यीकृत्य स्थापितम्। अभनक् भग्नवान्। भञ्ज्धातुः लङ्। इत्तं पथ्यावक्त्रम्।

Change of V.—अधीचा रामेण (भूयते) न्यग्भि: मद्विधै: (भूयते)
तेन...अभज्यत ;

Derivation —अध्यङ्—अधि-अञ्च-क्विप्। शस्त्रभृताम्—शस्त्र-भृ-
क्विप् षष्ठी। न्यञ्च:—नि-अञ्च-क्विप्। अभनक्—भञ्ज-लङ् द।

রাম অস্ত্রধারী বীরপুরুষগণের মধ্যে শ্রেষ্ঠ। তাঁহার সমীপে মৎ
দৃশ ব্যক্তিগণ হীন। তিনি মিথিলা নগরে যজ্ঞে কন্যাশুল্ক ধনুক
ভঙ্গ করিয়াছেন।

Rama is the best of those who hold weapons. Persons like myself are inferior when "encountering" him. He broke in the sacrifice in Mithila, the bow set up as a price for the bride.

* Toll or other duty payable at ferries.

संविन्तः सहयुध्वानौ तच्छक्तिं खरदूषणौ।
यज्वानश्च सुत्वानो यानगोपीत् मखेषु सः॥ ३७॥

Q. Decline अध्यच् and न्यच्। Ans: अध्यङ् अध्यञ्चौ; अधीचः; अधीचा अध्यग्भ्याम् &c. न्यङ् न्यञ्चौ न्यञ्चः न्यञ्चम् न्यञ्चौ नीचः, नीचा न्यग्भ्याम् &c. ३६।

37. Principal part :—(1) खरदूषणौ (कर्त्तृ) तच्छक्तिं (कर्म) संविन्तः। Adjective to खरदूषणौ—सहयुध्वानौ। (2) यज्वानः (कर्त्तृ) संविदन्ति। सुत्वानः adj. to यज्वानः। (3) यान् (कर्म) सः (कर्त्तृ). अगोपीत्। मखेषु अधिकरणे।

Prose order :—सहयुध्वानौ खरदूषणौ तच्छक्तिं संविन्तः। सुत्वानः यज्वानश्च, यान् मखेषु स अगोपीत् (तेऽपि संविदन्ति)।

Substance :—खरदूषणौ रामेण युद्धं कृतवन्तौ, अतः तौ खलु ज्ञातवन्तौ कीदृशी रामस्य शक्तिरिति। याज्ञिका अपि तेन रक्षिताः जानन्ति रामस्य वीर्य्यम्।

Explanation in tika form :—न केवलमहं रामशक्तिमवैमि, किन्तु खरदूषणावपि ज्ञातवन्तौ इत्याह संविन्त इति। तेन सह युद्धवन्तौ सहयुध्वानौ "सहे च" इति युधेः क्वनिप्। खरदूषणौ तस्य रामस्य शक्तिं बलं संविन्तः ज्ञातवन्तौ। वर्त्तमानसामीप्ये इति भूते लट्, "विदि प्रच्छिस्वरतीनाम् उपसंख्यानम्" इति आत्मनेपदम् तत्र अकर्म्मकादिति अनुवर्त्तते। सुत्वभिः सहिताः सुत्वानः सोमयाजिसहिताः यज्वानः विधिनेष्टवन्तः आहिताग्नयश्च इति यावत्। "सुयजो र्ङ्वनिप्" इति सुनोतेर्भूते ङ्वनिप् "सुत्वाभिषवे कृते" इत्यमरः। संविदन्तीति वचन विपरिणामेन योज्यम्। तेषां ज्ञाने हेतुमाह, यान् यज्वनः मखेषु यज्ञेषु सः अगोपीत् अरक्षीत्, तेषां यज्ञे राक्षसहननात् तेऽपि जानन्तीत्यर्थः। काव्यलिङ्गमलङ्कारः। वृत्तं पथ्यावक्त्रम्।

Change of V :—संविद्यते सहयुध्वभिः तच्छक्तिः खरदूषणाभ्याम्। यज्वभिः सुत्वभिश्च ये अगोपिषत तेन।

Derivation :—संविन्तः—सम्-विद लट् तस्। सहयुध्वानौ—सह-युध

सुखजातः सुरापीतो नृजग्धो माल्यधारयः।
अधिलङ्कं स्त्रियो दीव्य मारब्धा बलिविग्रहम्॥ ३८॥

क्विप्। लट्-सुनोति, सुनुते, लुङ्—असावीत्, असाविष्ट, असोष्ट। अगोपीत्—गुपि लुङ् द; पक्षे अगोपायीत्, अगोप्सीत्। लट्-गोपायति, लिट्—गोपायाञ्चकार, &c जुगोप।

খর ও দূষণ তাঁহার সহিত যুদ্ধ করিয়া তাঁহার শক্তি সম্যক্রূপে বিদিত হইয়াছে, সোমযাজী যাজ্ঞিকগণ, তাঁহাদিগকে যজ্ঞে রক্ষা করাতে তদীয় শক্তি অবগত হইয়াছেন।

Khara and Dusana who fought with Rama, as well as the priests and the pressers of Soma whom he protected in the Sacrifice, know his vigour.

. Q. Show the peculiarity of the sloka. Ans: अनेन "सुयजोर्ङ्वनिप्" इति सूत्रस्य उदाहरणं प्रदर्शितं। Q. Decline यज्वन् सुत्वन् and युध्वन्। Ans: यज्वा यज्वानौ यज्वानः यज्वनः यज्वना यज्वभ्याम् &c. सुत्वा सुत्वानौ सुत्वानः; सुत्वनः सुत्वना सुत्वभ्याम् &c. युध्वा युध्वानौ युध्वानः युध्वानम् युध्वनः, युध्वना युध्वभ्याम् &c। ३७।

38. Principal sentences: (1) अधिलङ्कं (अव्यं अधि) स्त्रियः (कर्म्मपदम्) दीव्य। (त्वमिति कर्त्तृपदमूह्यम्)। (2,) मा (त्वम्) बलिविग्रहम् (कर्म्मपदम्) आरब्धाः। Adj to त्वम्—सुखजातः, सुरापीतः नृजग्धः माल्यधारयः।

Prose order:—सुखजातः सुरापीतः, नृजग्धः माल्यधारयः (त्वम्) अधिलङ्कं स्त्रियः दीव्य; बलिविग्रहं मारब्धाः।

Substance:—सुखवेष्टितः त्वम् सुरां पीत्वा, मानुषान् भक्षयित्वा, पुष्पमालां धारयित्वा लङ्कायामेव रमणीभिः सार्द्धं क्रीड तावत्, मा कुरु कलहं बलिना समम्।

Explanation in tika form:—जातं सुखम् अस्येति सुखजातः, सुखी सुस्थानः, तथा पीता सुरा येन सुरापीतः पीतमदिरः इत्यर्थः। जग्धो

तं भीतङ्कारमाक्रुश्य रावणः प्रत्यभाषत।
यातयामं विजितवान् स रामं यदि किन्नतः॥ ३८॥

भक्षितो वा मनुष्यो येन स नृजग्धः [सर्व्वत्र "वाहिताग्न्यादिषु" इति परनिपातः। अतः, जातसुखः पीतसुरः जग्धनृकः इत्येतानि अपि पदानि भवन्ति।' माल्यं स्रजं धारयतीति माल्यधारयः, स्रग्वी, धारिधातोः शः।* (त्वमिति कर्तृपद-मूहनीयम्) लङ्कायामिति अधिलङ्कम् विभक्त्यर्थेऽव्ययीभावः। स्त्रियो दीव्य स्त्रीभिः क्रीड़। "दिवः कर्म्म च"। इति 'स्त्रियः' इत्यस्य क्रीड़ार्थ दिव् धातोः वैकल्पिक कर्म्मत्वम्। पक्षे करणत्वम्। तथाले स्त्रीभिः दिव्य इत्येवं स्यात्। बलिना रामेण सह विग्रहं युद्धं मारभ्याः माकार्षीः। आङ् रभेः लुङि मध्यमपुरुषैक-वचने। अथवा मा रभ्याः इति आङ् वर्ज्जितात् रभ् धातोः लुङि। मायोगे अड़ागम प्रतिषेधः। त्वम् इति कर्तृपदम् ऊह्यम्। उक्तं पथ्यावक्त्रम्।

Change of V.—सुखजातेन सुरापीतेन, नृजग्धेन माल्यधारयेण... स्त्रियः दीव्यन्ताम् आरब्धि मा बलिविग्रहः।

Derivation.—जग्धः—अद्-क्त। माल्यधारयः—माल्य-धृ-णिच्-शः। दीव्य—दिव्-लोट हि। लुङ्-अदेवीत्। आरभ्याः—आ-रभ-लुङ्-थास्।

আপনি লঙ্কানগরীতে বিবিধ সুখ উপভোগ, সুরাপান, মনুষ্য ভক্ষণ ও মাল্যধারণ করিয়া স্ত্রীগণের সহিত আমোদ প্রমোদে রত হউন; বলবান্ রামচন্দ্রের সহিত কদাচ যুদ্ধে প্রবৃত্ত হইবেন না।

Being in enjoyment of pleasures", drinking wine, swallowing up men, and wearing garlands, do thou dally with women, Do not commence a quarrel with the strong.

Q. Parse अधिलङ्कम्। Ans: अव्ययपदम्। अधिकरणे सप्तमी।
Q. Explain the samas in सुखजातः &c. Ans: बहुब्रीहि-समासः। "वाहिताग्न्यादिषु" इति जातशब्दस्य परनिपातः वैकल्पिकः। ३८।

39. (1) रावणः (कर्तृ) तम् (कर्म्म) प्रत्यभाषत। आक्रुश्य—ल्यप्।

* "अनुपसर्गात् लिम्प विन्द धारि पारि वेदि उदेजि चेति साति साहि-भ्यश्च"। श takes place after लिम्प &c. not preceded by उपसर्ग।

भीतङ्कारम्—व्यम्। (2) यदि (व्यम्) सः (कर्त्तृ) रामं (कर्म्म) विजितवान्। (3°) ततः (व्यम्) किं (कर्त्तृ, 'भूतम्' इति क्रियापदमूह्यम्)। यातयामम् Adj. to रामम्।

Prose order :—रावणः भीतङ्कारम् आक्रुश्य तं प्रत्यभाषत। स यातयामं रामं यदि विजितवान् ततः किम्?

Substance :—रावणः तं विनिन्द्य प्राह अहो कापुरुषोऽसि, यदेवं भीतिं प्रकाशयसि। परशुरामस्तु वृद्ध एव, तं यदि कश्चित् जेतुं शक्नुयात् नैतत् प्रमाणम् यत् स सर्व्वविजयी इति।

Explanation in tika form :—'रामः परशुरामं जिगाय' इत्यत्र प्रत्युत्तरमाह त्वमिति। रावणः, भीतम् कृत्वा उच्चार्य्य इति भीतङ्कारं, त्वं भीतोऽसि इति कथयित्वा इत्यर्थः। "कर्म्मण्याक्रोशे कृञः खमुञ्" * इति भीत इत्यस्मात् उच्चारणार्थं कृधातोः आक्रोशे खमुञ्। आक्रुश्य निर्भर्त्स्य तं मारीचं प्रत्यभाषत प्रत्यूचे। अथवा तम् आक्रुश्य प्रत्यभाषत; तम् किम्भूतं? 'भीतं भययुक्तं', पुनः किम्भूतं? कारं, यो रणे दुरवस्थान इत्यादिर्विज्ञापयितारम्। कृ विज्ञाने इत्यस्मात् णिजन्तात् घञ्। किं प्रत्यभाषत इत्याह; स राघवः यातयामं वृद्धं "यातयामस्तु जीर्णे स्यात् परित्यक्तोज्झितेऽपि च" इति विश्वः। रामं परशुरामं यदि विजितवान् ततः किं? किं भूतम्। तेन किम् उपपद्यते इत्यर्थः। वृद्धजयेन नहि वीर्य्यं ज्ञायते इति भावः। इन्द्रं पथ्यावक्त्रम्।

Change of V.—स रावणेन प्रत्यभाष्यत। यातयामः विजितः तेन रामः।

Derivation :—भीतङ्कारम्—भीत-कृ-खमुञ्। आक्रुश्य—आ-क्रुश-ल्यप्। लट्—क्रोशति, लुङ्—अक्रुक्षत्। प्रत्यभाषत—प्रति-भाष-लङ् त। विजितवान्—वि-जि-क्तवत्। लुङ्—व्यजैष्ट (निरुपसर्गस्य जेः लुङि-अजैषीत्; लिट्—जिगाय जिग्ये)

---

* In the sense of reviling खमुञ् takes place after कृ which means uttering, preceded by its object. (आक्रोश=reviling.)

अघानि ताड़का तेन लज्जाभयविभूषणा।
स्त्रीजने यदि तच्छ्लाघ्यं धिक् लोकं क्षुद्रमानसम्॥४०

रावण তাহাকে ভৎসনা করিয়া কহিল, তুই ভীরু। রাঘব বৃদ্ধ পরশুরামকে পরাজয় করিয়াছে বটে কিন্তু তাহাতে কি পৌরুষ।

Pronouncing him to be a coward, Ravana said in reply. What if he conquered Parasu Rama who had grown stale.

Q. Who is referred to here by रामम्। Ans: See above Q. Comment gram. on भीतंकारम् and parse it. Ans: (1) For gram. notes, see above footnote. (2) Parsing—अव्ययपदम्। क्रियाविशेषणम्। ३८।

40. Principal Sentences:—(1) तेन (कर्त्तृ) ताड़का (कर्म) अघानि। Adj. to ताड़का—लज्जाभयविभूषणा (2) स्त्रीजने (विषयाधिकरणम्) यदि (अं) तत् (कर्त्तृ अथवा श्लाघ्यमित्यस्य उक्तं कर्म)। श्लाघ्यं (विध) भवेत् (जन्य क्रियापदम्)। (3) लोकम् (धिक्-योगे द्वितीया) धिक् (अं, कर्त्तृ) अस्तु (जन्य क्रियापदम्)। Adj. to लोकम्—क्षुद्रमानसम्।

Prose order:—तेन लज्जाभयविभूषणा ताड़का अघानि। स्त्रीजने तत्, यदि श्लाघ्यं, तदा क्षुद्रमानसं लोकं धिक्।

Substance:—नार्यो हि लज्जाभयविमुग्धा भवन्ति। नारीं पराजित्य यदि कश्चित् श्लाघ्यते, तदा पृथ्वीयं क्षुद्रलोकैः पूर्णा, तादृशांश्च धिक्।

Explanation in tika form:—यमास्यहृश्वरीभव प्रत्युत्तरेणाह अघानीति। तेन रामेण लज्जा त्रपा भयञ्च भङ्गा विभूषणम् अलङ्कारो यस्याः स स्वभावतः एव लज्जाशीला भीरुश्च इत्यर्थः। स्त्रीत्वात् शौर्य्यहीना इति भावः ताड़का अघानि व्यापादिता। हन्तेः कर्म्मणि लुङ्। पञ्चे अवधि। स्त्रीजनमपि तत् हननं यदि श्लाघ्यं श्लाघनीयम् लोकैरिपि शेषः। अथवा भवेत् इति क्रियापदम् जन्यम् तथात्वे 'तत्' इति कर्त्तृपदम्। तदा क्षुद्राणि मानसानि चित्तानि यस्मिन् स तं हीनचित्तैः पूरितं लोकं भुवनं धिक्। *लोकस्तु भुवने

यद्गेहेनर्द्दिनमसौ शरैर्भीरुमभाययत् ।
कुलक्ष्मयच्छ्रीके रामो भवन्तं पौरुषं न तत् ॥ ४१ ॥

जने" इति कोषः । "उभसर्व्वतसोः कार्य्या धिक्उपर्य्यादिषु त्रिषु" इति धिक्-योगे द्वितीया । धिक् इत्यस्य, अस्तु इति क्रियापदेन अन्वयः । "स्त्रीजनेऽनेन तत् श्लाघ्यं यदि धिक् क्षुद्रमानसम्" इति पाठे, अनेन रामेण तत् यदि श्लाघ्यम्, तदा क्षुद्रमानसं तं रामं धिक् इत्येवान्वयः कर्त्तव्यः । इदं पथ्यावक्त्रम् ।

Change of V.—स ताड़काम् अवधीत् लज्जाभयविभूषणाम् । ...तत् श्लाघेत (लोकः) ।

Derivation :—अघानि—हन-लुङ् त कर्म्मणि । लज्जा—लस्ज-अङ् । श्लाघ्यम्—श्लाघ कर्म्मणि ण्यत् । भयम्—भी-अच् । स्त्री—स्त्यै-ड्रट् । टित्वात् ङीप् ।

राम স্বভাবতঃ লজ্জাশীলা ও ভীরুস্বভাবা তাড়কাকে বধ করিয়াছেন, কিন্তু এই নিন্দনীয় স্ত্রীজনবধব্যাপার যে জগতে প্রশংসিত হয় হীনচেতালোকপূর্ণ সে জগতের ধিক্। (অথবা যদি কেহ শ্লাঘা করে তবে সেই হীনচেতা লোকের ধিক্).

Taraka who had for her ornament modesty and timidity was killed by him. If such an act against a woman be laudable, fie to the world full of the narrowminded.

Q. Explain the propriety of लज्जाभयविभूषणा । Ans : यथा स्त्रीणां भूषणम् अतीव प्रियम् । यथा च न तत् ताभिः कथमपि परित्यज्यते, तथा तासां लज्जाभये । ताभ्यां वियुक्तमात्मानं न सा कथमपि इयेष, अतएव सा लज्जाभयाभ्याम् अभिभूता पराजयं लेभे इत्यर्थः । ४० ।

41. Principal part :—इति यत् (अभवत्), तत् (कर्तृ) न पौरुषम् ('तत्' इत्यनेन समानकर्तृत्वम्) भवति । (2) रामः (कर्त्तृ) भवन्तम् (कर्म्म) शरैः (करणैः) Adj. to भवन्तम्—गेहेनर्द्दिनम् and भीरुम् । Adj. to रामः—असौ ।

Prose order :—असौ रामः कुब्रह्मयज्ञके गेहेनर्दिनं भीरुं भवन्तं शरैः अभाययत् यत् तत् पौरुषं न ।

Substance :—निकृष्टब्राह्मणैरनुष्ठिते कुत्सिते यज्ञे रामशरात् यदि भवान् भीतिम् आप्तवान् न तत्र पौरुषं गम्यते । ननु भवान् स्वगृहे एव शूरत्वं ख्यापयति ।

Explanation in tika form :—असौ रामः कुत्सिता ब्रह्माणः कुब्रह्माः "कुमहद्भ्याम् अन्यतरस्याम्" इति समासान्तष्टच् । तेषां कुत्सितो यज्ञः कुब्रह्मयज्ञकः तस्मिन् । कुत्सायां कन् । अतएव प्रयोजनाभावात् तत्र समदा राक्षसा न गच्छन्ति इति सूच्यते । गेहे स्वगृहे एव नर्दतीति गेहेनर्दी तं स्वगृह एव शूरमित्यर्थः । "पात्रे समितादयश्च" इति क्षेपे समासः । भीरुं भयशीलं भवन्तं शरैः बाणैः अभाययत् भायितवान् [यतः शरेभ्य एवात्र भयं विवक्षितं न तु प्रयोजकात् कर्त्तुः अतएव युगात्मनेपदे न भवतः] * इति यत् तत् पौरुषं पुरुषकारः न । युवादित्वात् अण् । भीरुं त्वां रामो यत् भाययामास न तेन तस्य पौरुषं प्रकटितम् इति भावः । वृत्तं पथ्यावक्त्रम् ।

Change of V.—गेहेनर्दी असुनाः..भीरुः अभाय्यत... रामेण भवान् ; तेन पौरुषेण न (भूयते)

Derivation.—गेहेनर्दिनम्—गेहे-नर्द-णिनि: (३या । भीरु—भी-रुः । अभाययत्—भी-णिच्-लङ् द । लुङ्—अबीभयत् । ब्रह्मन्—बृंह-मनिन् । पौरुषम्—पुरुष-अण् ।

তুমি কেবলমাত্র স্বগৃহে শূর। তুমি ভীরু। তোমাকে রাম কুৎসিত ব্রাহ্মণগণ কর্ত্তৃক অনুষ্ঠিত যজ্ঞে শর দ্বারা যে ভীত করিয়াছে তাহাতে কিছুমাত্র পৌরুষ নাই।

---

* The causative form of भी is either भीषि or भायि । It is भीषि when the fear comes directly from the thing that causes fear, but if it frightens by some instrument then the form is भायि । Here Rama frightened him by means of arrows and so is अभाययत् here.

चिरकालोषितं जीर्णं कीटनिष्कुषितं धनुः।
किं चित्रं यदि रामेण भग्नं क्षत्रियकान्तिके ॥ ४२ ॥

It signifies no prowess that Rama frightened thee in the lowly sacrifice performed by the inferior Brahmans, a coward as thou art, vaunting at home.

Q. Distinguish between भीषयते and भाययति। Ans : यदा प्रयोजकात् भयम् आगच्छति तदा षुक् आत्मनेपदञ्च भवति, यदा तु प्रयोजककर्त्ता द्रव्यान्तरेण भयं जनयति तदा भाययति इत्येवं भवति। अत्र शरैः भीतिं जनयति अतः अभाययत् इत्येवं सिद्धम्। Q. Write gram. notes on गेहेनर्द्दी। Ans : See above. ४१।

42. Principal part :—(1) रामेण (अनुक्तकर्त्तृ) यदि क्षत्रियकान्तिके (दूरान्तिकार्थे सप्तमी) धनुः (उक्तं कर्म) भग्नम्। Adj. to धनुः-चिरकालोषितं जीर्णं and कीटनिष्कुषितम्। (2) तत्र (अव्ययम्) किं (कर्त्तृ) चित्रं (क्रिया) भवति।

Prose order :—यदि रामेण क्षत्रियकान्तिके चिरकालोषितं धनुः भग्नं; तत्र किं चित्रम्?

Substance :—निकृष्टक्षत्रियाणां पुरतः रामः धनुः बभञ्ज, नैतत् चित्रम्। यतः तदेव धनुः बहुकालं स्थितं जीर्णं कीटदष्टञ्च भग्नप्रायम् आसीत्।

Explanation in tika form :—"अध्यङ्क् शस्त्रभृतां रामः" इत्यात्र अत्युत्तरेणाह चिरकालेति। यदि रामेण, कुत्सिताः क्षत्रियाः क्षत्रियकाः कुत्सायां कन्। तेषां जनकादीनां क्षत्रियकाणां अन्तिके समीपे। ["सप्तम्यधिकरणे च" इति सूत्रे चकारात् दूरान्तिकार्थेभ्योऽपि सप्तमी भवति।] चिरकालम् उषितं चिरकालं व्याप्य स्थितम् इत्यर्थः। "अत्यन्तसंयोगे च" इति द्वितीया समासः। अतएव जीर्णं तथा कीटैः घुणैः निष्कुषितम् अन्तःखादितम् धनुः हरधनुः भग्नम्। तदपि किं चित्रम् नैवाश्चर्य्यमित्यर्थः। ईदृग्धनुर्भङ्गाच्चैव क्षत्रियाणां कुत्सा। "चित्रं खे तिलकेऽद्भुते। आलेख्ये कर्बुरे" इति हैमः। वृत्तं पथ्यावक्त्रम्।

वनतापसके वीरौ विपक्षे गलितादरौ
किं चित्रं यदि सावज्ञौ मम्नतुः खरदूषणौ ॥ ४३ ॥

Change of V.—रामः...धनुः...भग्नवान् (तेन) चित्रं न मूयते ।

Derivation.—उषित —वस-कर्मणि क्तः । जीर्ण—जॄ-क्तः । लट्-जीर्यति लुङ् अजरत्, अजारीत् । निष्कुषितम्—निर्:कुष-कर्मणि क्तः । लट्—कुष्णाति लुङ्-अकोषीत् । धनुष्—धन-उष् । भग्नम्—भन्ज-कर्मणि क्तः । लट्—भनक्ति, लुङ् अभाङ्क्षीत् ।

যদ্যপি রাম নিন্দিত ক্ষত্রিয়গণের সমীপে বহুকালের জীর্ণ কীট-দষ্ট ধনুক ভঙ্গ করিয়া থাকেন তাহাতে আশ্চর্য্যের বিষয় কিছুই নাই!

No wonder if before so many inferior Kshetriyas Rama has broken the bow that outlined a long time, was worn out, and was eaten up by worms.

Q. Show the significance of क्षत्रियक । Ans : कीट निष्कुषितधनुर्भञ्जनात् ये रामं बहुमन्यन्तेस्म ते क्षत्रियापसदाः इति सूच्यते । Q. Explain the samas in चिरकालोषितम् । Ans : चिरकालम् उषितम् इति "अत्यन्तसंयोगे च", इति द्वितीया समासः । (word in the second case signifying pervasion of time and place are compounded in a तत्पुरुषसमास ।) ४२ ।

43. Principal part :—(1) यदि खरदूषणौ (कर्तृ) मम्नतुः । (2) तत् (कर्तृ) किं चित्रम् (विध) भवति । Adj. to खरदूषणौ—गलितादरौ वीरौ and सावज्ञौ । Adj. to विपक्षे—वनतापसके । विपक्षे—विषयाधिकरणे, गलित इत्यनेन अन्वयः ।

Prose order :—वनतापसके विपक्षे गलितादरौ, वीरौ, सावज्ञौ खरदूषणौ यदि मम्नतुः (तदपि) किं चित्रम् ।

Substance :—क्षुद्रतापसः अयं किं नः करिष्यति इति औदासीन्यं प्रकटयन्तौ एव वीरौ खरदूषणौ रामेण निहतौ । अतः तयोः निधनम् न मे विस्मयमावहति ।

त्वञ्च भीरुः सुदुर्ब्बुद्धे नित्यञ्च रणकाम्यसि ।
गुणांश्चाप्रज्ञ पेऽस्माकं स्तौषि शत्रूंश्च नः सदा ॥ ४४ ॥

Explanation in tika form :—'संवित्तः सहयुध्यानौ' इत्यादव् अत्युत्तरमाह वनतापसेति । यदि वने वनस्य वा कुत्सितः तापसः वनतापसकः, कुत्सायां कन् । तस्मिन्, विपक्षे इत्यनेन एकविभक्ति, विपक्षे शत्रौ । विषये सप्तमी । किमयं करिष्यतीति मत्वा गलितः हतः आदरः आस्था ययोस्तौ गलितादरौ हतादरौ वीरौ शूरावपि अवज्ञया सह वर्त्तमानौ तुल्ययोगे बहुव्रीहिः । सावज्ञौ विपक्षादराभावात् युद्धेऽपि सावहेलौ खरदूषणौ यदि ममतुः युद्धे हतौ चेत्, तदपि किं चित्रं नैवाश्चर्य्यमित्यर्थः । खरदूषणयोः निधनमे न तयोः निर्वीर्य्यत्वं कारणम् किन्तु तयोः उदासीनत्वम् इति भावः । काव्यलिङ्गमलङ्कारः । वृत्तं पथ्यावक्त्रम् ।

Change of voice :—वीराभ्यां गलितादराभ्यां सावज्ञाभ्यां खरदूषणाभ्यां मम्रे...

Derivation :—तापसक—(तपस्-अण्) तापस,—कुत्सायां कन् । वीर—अज-रक् । ममतुः—मृ-लिट् । लट्—म्रियते ; लुङ्-अमृत ।

খর ও দূষণ বীর হইলেও বনবাসী তপস্বী বলিয়া শত্রুর প্রতি আস্থা না করিয়া অসাবধান ভাবে যুদ্ধ করাতে যদি হত হইয়া থাকে তাহাতেই বা আশ্চর্য্যের বিষয় কি ?

What wonder is it if the two heroes Khara and Dusana who lost all importance to an antagonist the low ascetic of a forest and have died 'disdainfully.'

Q. Parse विपक्षे । Ans : विषयाधिकरणे सप्तमी 'गलितः' इति क्रियया अन्वितत्वम् । यतः क्रियाभावात् न कारकं स्यात्, "क्रियान्वयि कारकम् ।" ४३ ।

44. It consists of 4 simple sentences below.

Prose order :—(हे) सुदुर्बुद्धे (1) त्वञ्च भीरुः (भवसि) नित्यं च

शौर्यंच्छेयमतोऽहं त्वां करोमि चितिवर्द्धनम्।
करिष्यामि वा कृत्यं विजिष्णुर्वनौकसौ॥ ४५॥

(त्वम्) रणकाम्यसि। (3) अस्माकं गुणान् अपह्नुषे। (4) सदा नः शत्रून् च स्तौषि।

Substance :—रे मूढ़! त्वं भीरुः तथापि आत्मनः भीरुत्वं अन्तर्धातुम् सततं रणमिच्छसि। अस्मत्सदृशानां वीराणाम् गुणान् तिरोधत्से, शत्रुगुणांश्च ख्यापयसि इति।

Explanation in tika form :—अतिशयेन दुष्टा बुद्धिर्यस्येति तत्सम्बोधने, मूढ़मते! त्वञ्च भीरुः भयशीलः भवसीति शेषः। "भियः क्रुक्लुकनौ" इति क्रुः। नित्यञ्च "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया। रणकाम्यसि च आत्मनः रणमिच्छसि च "काम्यच्च" इति आत्मेच्छायां काम्यच्। त्वं भीरुरपि आत्मनः भीरुत्वं तिरोधातुं सततं युद्धे प्रवर्त्तसे पराजयञ्च लभसे इत्यर्थः। तथा अस्माकं सतोऽपि गुणान् अपह्नुषे शौर्य्यादीन् अपनयसि। तथा सदा नः अस्माकं शत्रून् स्तौषि प्रशंससि। शत्रुणा पराजितत्वम् आत्मनः निर्वीर्य्यत्वम् अपलपितुम्, कथयसि यदसौ शत्रुरस्माभिरपि दुर्जय इति भावः। इतं पद्यार्थकम्।

Change of voice :—त्वया भीरुणा (भूयते) ...रणकाम्यसे... गुणा अपह्नूयन्ते ? शत्रवः स्तूयन्ते।

Derivation.—भीरुः—भी-क्रुः। रणकाम्यसि-रणकाम्य (रण-काम्यच्) लट् सि। अपह्नुषे—अप-ह्नु- लट्-से। लट्-ह्नुते (अदादिः)। स्तौषि—स्तु-लट्-सि, पक्षे स्तवीषि। लुङ्—अस्तावीत्, अस्तौषीत्।

রে মূঢ়মতে! তুই স্বভাবতঃ ভীরু; অথচ সর্ব্বদা যুদ্ধকামনা করিস্। তুই সর্ব্বদা আমাদিগের গুণের অপলাপ করিস্ ও শত্রুগণের যশোগান করিয়া থাকিস্।

'O thou the evil minded one, thou art timid, and yet often desirest a fight. Hidest our merits, and praisest that of our enemies.

Q. Is there any single substitude for आत्मनः रणम् इच्छति ? Ans : रणकाम्यति is the single substitude. It is a nominal verb (see above.) ४४।

45. Principal Sentence :—(1) अत: अहं (कर्त्ता) त्वां (उद्देश्य कर्म्म) चितिवर्द्धनं (विधेय कर्म्म) करोमि । Adj. to त्वां—शीर्षच्छेद्यम् । (2) वा त्वाम् (मुख्य कर्म्म) कृत्यं (गौणकर्म्म) कारयिष्यामि । Adj. to अहम्—विजिघृक्षुः । वनौकसौ—object to

Prose order :—अत: अहम् शीर्षच्छेद्यं त्वां चितिवर्द्धनं करोमि ; वा वनौकसौ विजिघृक्षुः (अहं) (त्वाम्) कृत्यं कारयिष्यामि ।

Substance :—अधाहं त्वाम् इदानीमेव निहत्य मृत्तिकायां परिणतं करिष्ये । अथवा नाधुना त्वां हनिष्यामि । यथाहंस्य तव जीवितेन यथेच्छं निर्द्दयं व्यवहरन् शत्रुविग्रहे तदेव उपायभूतं करिष्यामि इति ।

Explanation in tika form :—अत: कारणात् अस्मद्गुणापवादात् शत्रुस्तवनाच्च शीर्षच्छेदं शिरश्छेदम् नित्यमर्हति इति शीर्षच्छेद्य: तम् । "शीर्षच्छेदात् यत् च" इति अर्हार्थे यत् प्रत्यय:, शिरस् शब्दस्य शीर्षादेश: निपातित: । इति भट्टोजिदीचित: । अथवा शीर्षच्छेद्यं, शीर्षं छेद्यं यस्येति वा विग्रह: । "उत्तमाङ्गं शिर: शीर्षं मूर्द्धा ना मस्तकोऽस्त्रियाम्" इत्यमर: । छिदेर्ण्यत् । त्वां चितिं वर्द्धयते इति चितिवर्द्धन: मृत: तम्, मृत शरीरस्य भूमौ लीयमानत्वात् । "कृत्यल्युटो बहुलम्" इति कर्त्तरि ल्युट् । करोमि शिरश्छित्वा व्यापादयामि इत्यर्थ: । वर्त्तमानसामीप्ये लट् । अथवा वनमेव ओक: वासस्थानं ययो: तौ वनौकसौ वनवासिनौ रामलक्ष्मणौ विजिघृक्षुः विग्रहीतुं योधयितुम् अभिभवितुमिति यावत्, ईच्छुरहं त्वां कृत्यं करणीयं कारयिष्यामि "हृक्रोरन्यतरस्याम्" इति कृधातो: पाक्षिकी विकर्मकता । पक्षे 'त्वया' कृत्यं कारयिष्यामि इति । यथाहंस्य भवत: जीवनं मया यथेच्छं व्यवहर्त्तव्यम्, अतस्तव प्राणै: उपायभूतै: तथाहं करिष्ये यथा शत्रुनिग्रह: स्यात् इति भाव: । ञ्चत्तं पथ्यावक्त्रम् ।

Change of V :—शीर्षच्छेद्य: मया त्वं क्रियसे चितिवर्द्धन:, कारयिष्यसे त्वं कृत्यं विजिघृक्षुणा ।

Derivation :—शीर्षच्छेद्यम्—शीर्षच्छेद-यत् । चितिवर्द्धनं—चिति-वृध-ल्युट् (कर्त्तरि) । कृत्यम्—कृ-क्यप् । विजिघृक्षुः—वि-ग्रह+सन् उ: ।

অতএব আমি তোর মস্তকচ্ছেদ করিয়া বিনাশ করিব অথবা]

तमुद्यतनिस्रातासिं प्रत्युवाच जिजीविषुः।
मारीचोऽनुनयंस्त्रासादभ्यमित्रो भवामि"ते ॥ ४६ ॥

বনবাসীদ্বয়ের সহিত যুদ্ধ সময় তোর দ্বারা কার্য্য সম্পাদন করাইয়া লইব।

Deserve as thou dost decapitation, I shall make thee an 'increment' on the soil of earth. Or desirous of fighting the two dwellers of the forest I shall make thee perform some deed.

Q. Which of the two words viz. वनौकसौ विजिहृषुः, and वनौकसां विजिहृषुः is correct. Ans : The first is correct The aphorism न लोकाव्यय निष्ठा खलर्थतृनाम्" debars the 6th case-ending. Q. Account for the present tense in करोमि। Ans : See above. ४५।

Principal senterces :—(1) मारीचः (कर्त्तृ) तं (कर्म) त्रासात् (हेतौः ल्यब्लोपे वा) प्रत्युवाच। (2) ते (सम्ब) अभ्यमित्रा (विध) (अहं) भवामि। Adj. to तम्—उद्यतनिस्रातासिम्। Adj. to मारीचः—जिजीविषुः and अनुनयन्।

Prose order—मारीचः जिजीविषुः (सन्) त्रासात् अनुनयन् उद्यत-निस्रातासिं तं प्रत्युवाच (अहं) ते अभ्यमित्री (विध) भवामि।

Substance :--खड्गम् उद्यम्य एवं कथयतः • दशाननात् आत्मानं रक्षितु माह मारीचः, यथा ते शत्रोः अभिमुखम् गच्छामीति।

Explanation in tika form :—मारीचः जिजीविषुः जीवितुमिच्छुः सन् त्रासात् भयहेतोः अनुनयन् अनुकूलयन्, उद्यतः उत्थापितः निस्रातः तीक्ष्णः पक्षे निस्त्रिंशः, असिर्येन तम्। "वाहिताग्न्यादिषु" इत्यनेन "निस्रातासुद्यतः" इति पाक्षिकं पदान्तरम्। एतेन त्रासहेतुरुक्तः। तं रावणं प्रत्युवाच वचन-मुक्तवान्। अहं ते तव अमित्रस्य अभिमुखं अभ्यमित्रं, आभिमुख्ये अव्ययीभावः। तत् अलंगामीति अभ्यमित्रः शत्वभिमुखगामी भवामि "अभ्यमित्राच्छ च" *

* छ takes place after अभ्यमित्र in the sense of going

हरामि रामसौमित्री मृगो भूत्वा मृगद्युती ।
उद्योगमभ्यमित्रीणो यथेष्टं त्वञ्च सन्तनु ॥ ४७ ॥

इति चकारात् यत् प्रत्ययः । पक्षे अभ्यमित्रीयः अभ्यमित्रीणश्च । इदं पद्यावकम् ।

• Change of V :—मारीचेन जिजीविषुणा अनुनयता उद्यतनिस्त्रिंशाभिः न प्रत्यूचे । (मया) अभ्यमित्रेण भूयते ।

Derivations : उद्यत—उत्-यम कर्मणि क्तः । निस्त्रिंश—निस्-त्रिंश पक्षे—निस्त्रिंश । लट्—यति, लङ्-अयात्, अयासीत् । जिजीविषुः—जीव-सन्-उः । अनुनयन्—अनु नी-शतृ १मा । अभ्यमित्रः—अभ्यमित्र-यत् ।

মারীচ জীবন ধারণ করিতে অভিলাষী হইয়া ভীতিপ্রযুক্ত তদীয় যথার্থ উদ্যত, তীক্ষ্ণাসি, রাবণকে অনুনয়পূর্ব্বক প্রত্যুত্তর করিল, আমি আপনার শত্রুর সম্মুখীন হইব ।

• 'I shall be ready against your enemy', said Maricha supplicating, for fear, Ravana with his sharp sword raised up, desirous as the former was to have his life spared.

Q. Decline मित्र and अमित्र in the 1st case, and justify the genders. Ans : मित्रं मित्रे मित्राणि । अमित्रः अमित्रौ अमित्राः । मियति स्निह्यति इति मित्रम् । मिदधातोः क्त्रन् । "वाच्याः" इति वाच्यत्वेन मित्रम् इत्यस्य नपुंसकत्वेन । 'अमित्रः इत्यत्र तु न नञ्समासः, तथात्वे 'अमित्रम् इत्येवं स्यात्, अतः "अमेर्द्विषति चित्" इति अमधातोः इत्रच् प्रत्ययेन सिद्धम् इति हरदत्तः ।* Q. Give the derivative meaning of अमित्रः । Ans : (The same as above). ४६ ।

47. Principal Sentences :—(1) (अहं) मृगः (अहम् इत्यनेन एकविभक्तिः) भूत्वा (त्वम्) रामसौमित्री (कर्म) हरामि । Adj. to

---

well. The indeclinable च indicates that यत् and ख (ईन) are as well used. Thus, अभ्यमित्रीयः, अभ्यमित्र्यः, अभ्यमित्रीणः ।
(See the next sloka)

रामसौमित्री—मृगयुवौ। (2) त्वम् (कर्त्ता) उद्योगं (कर्म्म) सन्तनु। Adj. to उद्योगम्—यथेष्टम्। Adj. to त्वम्—अभ्यमित्रीणः।

Prose order :—(अहं) मृगो भूत्वा मृगयुवौ रामसौमित्री हरामि। अभ्यमित्रीणः त्वञ्च यथेष्टम् उद्योगं सन्तनु।

Substance.—अहं तावत् मृगरूपेण रामलक्ष्मणौ विलोभ्य दूरं नयामि। त्वमपि अवसरे अस्मिन् शत्रुं प्रति प्रतिकूलमाचरितुम् उद्योगी भव इति।

Explanation in tika form :—अहं मृगो भूत्वा मायया स्वयं हरिणरूपं धृत्वा, मृगैः दीव्यतः इति मृगयुवौ मृग इत्यस्मात् दिव धातोः क्विपि मृगयूः इति सिद्धम्। मृगयारसिकौ इत्यर्थः। "मृगयुतौ" इति पाठे 'यु अभिगमने', मृगान् यौति अभिगच्छतीति क्विप्प्रत्ययान्तस्य मृगयुत् शब्दस्य द्वितीयाद्विवचनरूपम्। रामसौमित्री रामलक्ष्मणौ अल्पाचतरत्वात् पूजितत्वात् च रामशब्दस्य पूर्ब्बनिपातः। हरामि अन्यत्र नयामि। भविष्यत्सामीप्यात् लट्। मृगयाभिरतौ एनौ मायामृगेण अन्यत्र नयामि इत्यर्थः। अमित्रम् अभिमुखम् अभ्यमित्रम्, आभिमुख्येऽव्ययीभावः। अभ्यमित्रम् अलङ्गामीति अभ्यमित्रीणः शत्रुभिमुखगामी। "अभ्यमित्राच्छ च" इति चकारात् खः (ईनः)। त्वञ्च यथेष्टं यथारुचि उद्योगम् आरम्भम् सन्तनु आरभस्व। तनोते र्लोटि।

Change of V.—श्रीयेते...मृगेण...उद्योगः अभ्यमित्रीणेन यथष्टः त्वया सन्तन्यताम् (सन्तायताम् वा)।

Derivation.—हरामि—हृ-लट्। लुङ्—अहार्षीत् अहृत। मृगयुवौ—मृग-दिव्-क्विप्। अभ्यमित्रीणः—अभ्यमित्र-ख। सन्तनु—सम्-तन्-लोट् हि। लुङ्—अतनीत्, अतानीत्, अतत, अतनिष्ट।

আমি মৃগ হইয়া মৃগয়ারসিক রামলক্ষ্মণকে হরণ করিব। আপনি শত্রুর বিরুদ্ধে গমন করিতে বিশেষ পটু। আপনিও আপনার যেরূপ অভিলাষ, সেইরূপ কার্য্য অনুষ্ঠান করুন।

Becoming a deer I shall 'decoy' Rama and Laksmana the son of Sumitra, who are fond of sporting, and you with a view to act against your enemy may under take any thing you like.

ततश्चित्रीयमाणोऽसौ हैमरत्नमयो मृगः।
यथासुखीनः सीतायाः पुप्लुवे बहु लोभयन् ॥ ४८ ॥

Q. Account for राम being placed first in the Samas. Ans: "अल्पाच्तरम्" "अभ्यर्हितञ्च" इति रामशब्दस्य अल्पाच्तरत्वात् अभ्यर्हितत्वाच्च (पूजितत्वात्) पूर्वनिपातः। Q. Write grammatical notes on the formation of अभ्यमित्रीणः। Ans: See above. ४७।

48. Principal part:—ततः (अव्य) असौ (कर्त्तृ) मृगः (असौ इत्यनेन एकविभक्ति) सन् पुप्लुवे। adj. to मृगः—हैमरत्नमयः। Adj. to असौ—चित्रीयमाणः, यथासुखीनः and लोभयन्। सीतायाः (सम्ब) अग्रतः इत्यनेन अन्वयः। बहु—Adv.

Prose order:—ततः असौ हैमरत्नमयः मृगः (सन्) चित्रीयमाणः, सीतायाः (अग्रतः) यथासुखीनः इव बहु लोभयन् पुप्लुवे।

Substance:—ततोऽसौ मारीचः सुवर्णादिनिर्म्मित इव मृगः सन् सर्व्वेषां विस्मयम् उत्पादयन् सीतायाः पुरतः स्वच्छः सुकर इव प्रतीयमानः दर्शनात् विमोहयन् विचचार।

Explanation in tika form:—ततः वचनानन्तरम् असौ मारीचः हेम च रत्नञ्च हेमरत्नं, तयोर्विकारः हैमरत्नमयः सुवर्णरत्नमयः मृगः सन् मायया इति शेषः। "मयड् वैतयोः भाषायामभक्ष्याच्छादनयोः" * इति विकारे मयट्। चित्रं कुर्व्वन् चित्रीयमाणः विस्मितिं कुर्व्वन्, हैमरत्नमयत्वादिति भावः। आश्चर्य्यात् चित्रङ् इत्यस्मात् क्यचि शानच्। ङकारात् आत्मनेपदम्। ** सीतायाः

---

* The affix मयट् optionally takes place in modern Sanskrit in the sense of 'transformation' or 'a part' after words not signifying food or cloth. Thus अश्ममयम्। The other form आश्मनम्।

** "नमो वरिव चित्रङः क्यच्"। क्यच् comes after नमस् वरिवस् and चित्र to signify action. The letter ङ् in चित्रङ् is

तेनादुद्रूषयद्रामं मृगीव मृगलोचना।
मैथिली विपुलोरस्कं प्रावुवूर्षुर्मृगाजिनम् ॥ ४८ ॥

.भरत:। यथामुखीन: प्रतिबिम्बाश्रय: आदर्श इति यावत्। इव, प्रतिबिम्बाश्रय: मुकुर इव भूत्वा इत्यर्थ:। इवशब्दलोप: द्रष्टव्य:। यथामुखीनशब्दस्य निष्पत्तिर्यथा, मुखस्य सदृशं यथामुखं, यथामुखं दर्पणादिस्थप्रतिबिम्बं, निपातनात् सादृश्येऽव्ययीभाव:। दृश्यते अत्र (असौ वा इति केचित्) इति दर्शन:। मृगस्य रत्नमयत्वेन स्वच्छतया यथामुखं दृश्यतेऽत्र इति यथामुखीन: "यथामुखसम्मुखस्य "दर्शन: ख:" * इति ख:। यथामुखीनशब्दोऽभिमुखमात्रेऽपि वर्त्तते, सीताभिमुख: भूत्वा इत्यर्थ:, इति भरत:। बहु लोभयन् मुहु: अग्रे भ्रमति स्म । वृत्तं पथ्यावक्त्रम्।

Change of V.—चित्रीयमाणेन अमुना हेमरत्नमयेन मृगेण यथामुखीनेन...लोभयता।

Derivation.—चित्रीयमाण:—(चित्र-क्यच्) चित्रीय-शानच्। यथामुखीन:—यथामुख-ख:। पुप्रुवे—प्रु-लिट् ए। लट् प्रवते, लुङ्—अप्रोष्ट। लोभयन्—लुभ्-णिच्-शतृ।

অনন্তর মারীচ সুবর্ণময় মৃগের রূপ ধারণ করত বিস্মিত করিয়া লোভ উৎপাদন পূর্ব্বক সীতার সম্মুখে ভ্রমণ করিতে লাগিল।

The golden deer set with gems frisked about before the eyes of Sita, exciting wonder, and producing great desire in her.

Q. Give the etymological meaning of यथामुखीन: and चित्रीयमाण: Ans: See above. ४८।

49. Principal part:—मैथिली (प्रयोजककर्त्री) मृगेण (कर्त्रा)

---

significant of आत्मनेपद। क & च eliding (इत्) there remains य। Thus नमस्यति वरिवस्यति चित्रीयते।

* ख (ईन) comes after यथामुख and सम्मुख in signifying in what is seen the similar face or all faces.

रामम् (कर्म·) अदुद्यूषयत् । Adj. to मैथिली—मृगलोचना and प्रावुवूर्षुः । Adj. to मृगेण—तेन । मृगाजिनं—object to प्रावुवूर्षुः । Adj. to रामम्—विपुलोरस्कम् ।

Prose order :—मृगलोचना मैथिली मृगाजिनं प्रावुवूर्षुः तेन मृगेण विपुलोरस्कं रामम् अदुद्यूषयत् ।

Substance :—अथ हरिणनयना सीता मृगचर्म्म परिधातुम् रामस्य मानसं हरिणक्रीड़ासक्तं कर्त्तुम् इयेष ।

Explanation in tika form :—मृगस्य लोचने, मृगलोचने, ते इव लोचने अस्याः सा मृगलोचना हरिणनयना, "सप्तम्युपमानपूर्व्वस्य च उत्तरपदलोपः" इति उत्तरपदलोपो बहुव्रीहिः । मैथिली मृगस्य अजिनं चर्म्म "अजिनं चर्म्म कृत्तिः स्त्री" इत्यमरः । प्रावुवूर्षुः प्रावरीतुं परिधातुमिच्छुः सती, प्र-आङ् इत्येताभ्यां परात् वृङ्धातोः सन्नन्तात् उः प्रत्ययः । तेन मृगेण हरिणेन "दिवः कर्म्म च" इति चकारात् करणसंज्ञा । विपुलं विस्तीर्णम् उरः वक्षःस्थलं यस्य तथोक्तः विपुलोरस्कः तम् विशालवक्षःस्थलम् "उरः प्रभृतिभ्यः कप्" । इति कप् । रामम् [अदुद्यूषयत् इत्यस्य अणिकर्त्तुः कर्म्मत्वम् ।] अदुद्यूषयत् क्रीड़ितुमिच्छामकारयत् । मृगेण क्रीड़ितुमिच्छ रामेति प्रयुक्तवती इत्यर्थः । दिवेः सन्नन्तात् ण्यन्तात् लङि रूपम् । वृत्तं पथ्यावक्त्रम् ।

Change of V :—अदुद्यूष्यत रामः मृगलोचनया मैथिल्या विपुलोरस्कः प्रावुवूर्ष्वा ।

Derivation :—अदुद्यूषयत्—(दिव्-सन्) दुद्यूष-णिच् लङ् त । मैथिली—मिथिला-अपत्यार्थे अण्-ईप् । प्रावुवूर्षुः—प्र-आ-वृ-सन्-उः । अजिनम्—अज-इनच् ।

হরিণনয়না মিথিলতনয়া সীতা মৃগচর্ম্ম পরিধানাভিলাষে বিশালবক্ষা রামচন্দ্রকে উক্ত মৃগের সহিত মৃগয়াক্রীড়ায় আসক্ত করিতে উদ্যত হইলেন ।

Sita the daughter of the king of Mithila, wishing to put on the skin of the deer, caused in broad-chested Rama the desire of 'sporting with it.

योगक्षेमकरं कृत्वा सीतायाः लक्ष्मणं ततः ।
मृगस्यानुपदी रामो जगाम गजविक्रमः ॥ ५० ॥

Q. Account for the 2nd case in रामम् and the 3rd case in मृगेण । Ans : गति बुद्ध्यादिना अकर्मकधातोः अणि, अन्तावस्थायां यः कर्ता तस्य णिचि कर्मत्वम् । इति रामम् इत्यस्य कर्मत्वम् । अतः "दिवः कर्म च" इति यत् दिव् धातोः वैकल्पेन सकर्मकत्वं विवक्षितं तदत्र न । अतः अत्र मृगेण इति करणत्वमस्ति न तु कर्मत्वम्, दिवधातोरत्र अकर्मकत्वविधानात् । Q. Give the derivative allusion in मैथिली । Ans : ऋषिषु अनार्य्यम् आचरतः तैश्च निहतस्य राज्ञो निमे देहमन्थनात् उत्पन्नतया जनकः मिथिलाख्याम् अवाप । तथाहि "अराजकभयं नृणां मन्यमानाः महर्षयः देहं ममन्थुः स्म निमेः सन्तानः समजायत । मथनात् मिथिलो जातः मिथिला येन निर्म्मिता । जन्मना जनकः सोऽभूत् वैदेहस्तु विदेहजः ।" इत्यादि । ४९ ।

50. Principal part :—ततः रामः (कर्त्तृपदम्) जगाम । Adj. to रामः—अनुपदी and गजविक्रमः । Incomplete verb—कृत्वा । लक्ष्मणम्—object to कृत्वा । योगक्षेमकरम् adj. to लक्ष्मणम् ।

Prose order :—ततः गजविक्रमः रामः लक्ष्मणं सीतायाः योगक्षेमकरं कृत्वा मृगस्य अनुपदी जगाम ।

Substance :—अथ करीव विक्रमान्वितः रामः सीतायाः संरक्षणे लक्ष्मणं विनियुज्य मृगान्वेषी ययौ ।

Explanation in tika form :—ततो दुयूतानन्तरं गजस्य विक्रमः गजविक्रमः, स इव विक्रमो यस्य स गजविक्रमः हस्तिपराक्रमः गजराजगामी वा, "सप्तम्युपमानपूर्व्वस्य च उत्तरपदलोपः" इति उत्तरपदलोपः समासः । रामः लक्ष्मणं सीतायाः स्वपत्न्याः, योगः फलपुष्पादेरलब्धस्य साधनम् "योगोऽपूर्व्वार्थसंप्राप्तौ" इति मेदिनी । क्षेमः शरीरादेर्लब्धस्य पालनं "क्षेमोऽस्त्री लब्धरक्षणे" इति मेदिनी । तौ करोतीति योगक्षेमकरः तम् स्थितिपालनहेतुभूतं कृत्वा विधाय, "कृञो हेतु ताच्छील्यानुलोम्येषु" इति हेतौ टः प्रत्ययः । मृगस्य

स्थायं स्थायं क्वचिद्यान्तं क्रान्त्वा क्रान्त्वा स्थितं क्वचित्।
वीक्षमाणो मृगं रामश्चित्रद्युतिं विसिस्मिये ॥ ५१ ॥

अनुपदं यातीति अनुपदी अन्वेष्टा सन् "अनुपद्यन्वेष्टा" इति निपातनात् इन्। जगाम ययौ। मृगान्वेषी प्रस्थित इत्यर्थः। इतं पथ्यानकम्।

Change V.—अनुपदिना रामेण जग्मे गजविक्रमेण।

Derivation :—योग—युज-घञ्। लट्—युनक्ति, युङ्क्ते। लुङ्—अयुजत्, अयौक्षीत्, अयुक्त। अनुपदी—अनुपद-इन्, निपातः। जगाम—गमेर्लिट्। लुङ्—अगमत्।

অনন্তর রামচন্দ্র লক্ষ্মণকে সীতার প্রয়োজন সাধনে ও শরীর রক্ষা কার্য্যে নিযুক্ত করিয়া মৃগের অন্বেষণার্থ গমন করিলেন।

Afterwards enjoining Laksmana to protect Sīta's, person and supply her wants Rama in 'elephants' strides went in search after the deer.

Q. Explain योगक्षेमकरम्। Ans : See above. Q. Show the significance of गजविक्रमः। Ans : पदक्षेपेण धरातलम् प्रकम्पयन् इत्यर्थः। अथवा यथा गजः मान्यगतिं सहते तथा मृगस्य द्रुतगमनम् असहमान इत्यर्थः।

51. Principal part :—रामः (कर्त्तृ) विसिस्मिये। Adj. to रामः—वीक्षमाणः। मृगम्—वीक्षमाणः इत्यस्य कर्मपदम्। Adj. to मृगम्—यान्तम् and स्थितम्। स्थायं स्थायं—adv. क्रान्त्वा क्रान्त्वा—incomplete vrbs. क्वचित् (adv.)

Prose order—क्वचित् स्थायं स्थायं यान्तं, (तथा) क्वचित् क्रान्त्वा क्रान्त्वा स्थितं चित्रद्युतिं मृगं वीक्षमाणः रामः विसिस्मिये।

Substance :—मृगः क्वचित् स्थित्वा चलितः क्वचित् वा वारं वारम् उत्प्लुत्य स्थितः। इत्यमद्भुतमाचरन्तं मृगमवलोक्य रामः विस्मयम् गतः।

Explanation in tika form :—क्वचित् प्रदेशे स्थायं स्थायं स्थित्वा स्थित्वा यान्तं गच्छन्तं, तथा क्वचित् प्रदेशे क्रान्त्वा क्रान्त्वा उत्प्लुत्य उत्प्लुत्य

चिरं क्लमित्वा मर्म्माविद्रामो विलुभितप्लवम् ।
शब्दायमानमध्यात्सीत् भयदं क्षणदाचरम् ॥ ५२ ॥

क्लितम् "आभीक्ष्ण्ये णमुल् च" [आभीक्ष्ण्ये पौनःपुन्ये द्योत्ये णमुल् स्यात् क्त्वा च] इति पूर्व्ववत् णमुल् ; परत्र क्त्वा । एवं चिरात् श्रान्ता क्लान्तिः शरीरचेष्टा यस्य तथाभूतम् । "कालेस्थायर्थयोः चिरम्" इत्यमरः, "तिलकादिस्थयोः पुंसि कर्म्मरातयोरपि" इति च मेदिनी । मृगं वीक्षमाणः पश्यन् रामः विसिष्मिये विस्मितः । नैतत् चेष्टादिकं मृगेषु सम्भवति इति विस्मयापन्नोऽभूत् इत्यर्थः ।

Change of V.—रामेण वीक्षमाणेन विसिष्मिये ।

Derivation.—स्थायम्—स्था-णमुल् । लुङ्—अस्थात् । क्रान्त्वा—क्रम्-क्त्वा । पक्षे क्रमित्वा । लट्-क्रामति क्राम्यति, क्रम्यति । लुङ्-अक्रमीत् । वीक्षमाणः—वि ईक्ष-शानच् । लट्—ईक्षते ; लुङ्—ऐक्षिष्ट ; लिट्—ईक्षाञ्चक्रे । विसिष्मिये—वि-स्मि-लिट् ए । लट्-स्मयते । लुङ् अस्मेष्ट । मृग—मृग-कर्म्मणि कः ।

কোথাও বা স্থির থাকিয়া হঠাৎ চলিতে লাগিল, কোথাও বা লাফাইতে লাফাইতে হঠাৎ স্থির হইল। এইরূপ বিচিত্রগতি মৃগ অবলোকন করিয়া রামচন্দ্র বিস্মিত হইলেন।

Rama wondered looking at the stag with its amazing actions, the latter sometimes suddenly running after it had stopped repeatedly, and again suddenly stopping after it had run long.

Q. Account for शानच् in वीक्षमाणः । Ans "लक्षणहेत्वोः क्रियायाः" क्रियायाः परिचायके हेतौ च अर्थे वर्त्तमानात् धातोः लटः शतृशानचौ स्तः । हेतुः फलं कारणञ्च । अत्र वीक्षणं विस्मयं प्रति हेतुः, अतः क्रियाहेतौ आत्मनेपदिनः ईक्ष धातोः शानच् ।

52. Principal part :—रामः (कर्त्तृ) क्षणदाचरं (कर्म्म) अध्यासीत् । Adj. to रामः—मर्म्मावित् । Adj. to क्षणदाचरम्—विलुभितप्लवम्, शब्दायमानं and भयदम् । चिरम्—अत्यन्तसंयोगे । क्लमित्वा incomplete verb (क्लम्) ।

Prose order :—मर्म्माविद् रामः चिरं क्लिशित्वा विलुभितप्लवं शब्दाय-मानं भयदं क्षणदाचरम् अव्यात्सीत् ।

Substance :—मर्म्मवेधनपटुः रामः आयासम् अवाप्य पश्चात् भीषणं तं राक्षसं विव्याध । राक्षसश्च गर्ज्जनमकरोत् ।

Explanation in tika form :—मर्म्माणि विध्यति इति मर्म्माविद् सन्धिस्थानवेधनशीलः, "नहिवृती"त्यादिना* क्विपि परे पूर्व्वपदस्य दीर्घत्वम् । अथवा मर्म्मज्ञः, तत्र वेत्तेः रूपम् । रामः चिरं कालम्, अत्यन्तसंयोगे द्वितीया । क्लिशित्वा महान्तं कालम् आयस्य श्रान्तो भूत्वा इत्यर्थः । विलुभितः व्याकुलितः प्लवः गमनं यस्य तथाभूतं मर्म्मताड़नात् व्याकुलगतिम् । "लुभो विमोहने" (विमोहनं व्याकुलीकरणम्) तस्मात् क्ते इट् । तथा शब्दायमानं शब्दं कुर्व्वाणं "शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे" इति क्यङ् । भयदं भयङ्करं मृगस्य शब्दक्रियाया वा विशेषणम् । क्षणम् उत्सवं निर्व्यापारस्थितिं † वा ददातीति क्षणदा रात्रिः तत्र चरतीति टः । क्षणदाचरं निशाचरं अव्यात्सीत् विद्धवान् । व्यधे लुङि ।

Change of V.—मर्म्माविधा रामेण विलुभितप्लवः शब्दायमानः अव्याधि भयदः क्षणदाचरः ।

Derivation :—क्लिशित्वा—क्लिश-क्त्वाच्-पक्षे क्लिष्ट्वा । लट्—क्लिश्नाति लुङ्—अक्लेशीत्, अक्लिशत् । विलुभित—वि-लुभ (तुदादिः) क्तः । लट्—लुभति । अव्यात्सीत्—व्यध-लुङि । लट्—विध्यति । भयदम्—भय-दा-कः । क्षणदाचरम्—क्षणदा-चर टः ।

মর্ম্মবেধনে সুনিপুণ রামচন্দ্র বহুক্ষণ ক্লেশ স্বীকার করিয়া ব্যাকুল-গতি শব্দায়মান ভীষণ নিশাচরকে বিদ্ধ করিলেন ।

Rama who was expert in piercing vitalparts, struck, after long trouble, the fearful roaring night-ranger of anxious gait.

---

* "नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ" क्विबन्तेषु एषु परेषु पूर्व्व-पदस्य दीर्घः । यथा उपानह्, नीवृत्, प्रावृष्, मर्म्माविध्, नीरुच्, ऋतीषह्, परीतत् ।

† "क्षणमुत्सवनिर्व्यापारस्थितिकालविशेषेषु" इति अमरः" प्रकृतार्था । क्षणं निष्पन्दमित्यर्थः ।

श्रुत्वा विस्फूर्जथुप्रख्यं निनादं परिदेविनी।
मत्वा कष्टश्रितं रामं सौमित्रिं गन्तुमैजिहत्॥ ५३॥

Q. Distinguish between विलुभित and विलुब्ध। Ans: "लुभो विमोहने"। व्याकुलीकरणं लुभधातोः इट् स्यात् न तु गार्द्धे (greediness) गार्द्धे न लुब्धः। Q. Decline the base of मर्म्मावित्। Ans: व्यध् धातोः क्विपि मर्म्माविध् इति शब्दः स्यात्। रूपं यथा, मर्म्मावित् मर्म्माविधौ मर्म्माविधः इत्यादि। विद्धातोः क्विपि मर्म्माविद् इति शब्दः। तस्य रूपं यथा, मर्म्मावित् मर्म्माविदौ मर्म्माविदः &c. ५२।

53. Principal part:—मैथिली (कर्त्री) सौमित्रिं (कर्म्म) गन्तुम् (व्यम्) ऐजिहत्। Adj. to मैथिली—परिदेविनी। श्रुत्वा and मत्वा are incomplete verbs. निनादं object to श्रुत्वा। विस्फूर्जथुप्रख्यं Adj. to निनादम्। रामम् obj. to मत्वा। कष्टश्रितम्—Adj. to रामम्।

Prose order:—विस्फूर्जथुप्रख्यं निनादं श्रुत्वा रामं कष्टश्रितं मत्वा परिदेविनी (मैथिली) सौमित्रिं गन्तुम् ऐजिहत्।

Substance:—वज्रनिनादसदृशं शब्दम् आकर्ण्य सीता विलपन्ती अतर्कयत् यथा रामो विपन्न इति, अतः सा लक्ष्मणं गमनाय अनुरुरोध।

Explanation in tika form—विस्फूर्जथुः वज्रनिर्घोषः "स्फूर्जथुर्वज्रनिर्घोषः" इत्यमरः। तेन प्रख्या सादृश्यं यस्येति विस्फूर्जथुप्रख्यः; वज्रनिर्घोषसदृशः तथाभूतम्। ["ट्वितोऽथुच्" * इति अथुच् प्रत्ययः] निनादं शब्दं "नौ गद नद पठ स्वनः" इति अप् प्रत्ययस्य विकल्पविधानात् पक्षे घञ्।** श्रुत्वा आकर्ण्य कष्टं श्रितं कष्टश्रितं विपदापन्नमित्यर्थः। "द्वितीया श्रितातीत-

---

* Roots having टु before them for the purpose of elision, will have अथुच् for an affix. Thus टु वेपृ कम्पने being in गण we can form वेपथु। Again टु ओ स्फूर्ज वज्रनिर्घोषे, and so is स्फूर्जथुः।

** निगदः निगादः, निनदः निनादः, निपठः निपाठः, निस्वनः निस्वानः

एष प्रारुविजाभीदनादी भ्राता विरौति ते।
भ्रातेयं कुरु सौमित्रे भयात् त्रायस्व राघवम् ॥ ५४ ॥

आदिना द्वितीयासमासः। रामं मत्वा दुःख। परिदेविनी परिदेवनशीला विलपन्ती इति यावत्। मैथिली सौमित्रिं लक्ष्मणं "बाह्वादिभ्यश्च" † इति अपत्यार्थे इञ्। गन्तुं ऐजिहत् चेष्टाम् अकारयत्। अथ वनस्य दुतं भ्रातरं विपन्नः परित्रायस्व इत्यादि कथनेन लक्ष्मणं गमनोद्यतं चकार इत्यर्थः। ईहिधातोः णिचि लुङि।

Change of V.—परिदेविन्या मैथिल्या ऐहि।

Derivation :—विस्फूर्जथु—वि-स्फुर्ज-अथुच्। स्फूर्जति अस्फूर्जीत्। प्रख्या—प्र ख्या-भावे अ। निनाद—नि-नद-घञ्, पक्षे निनदः (अप्)। परिदेविनी—परि-देव-घिनुण् स्त्री ईप्। ऐजिहत्—ईह-णिच् लुङ् त।

বজ্রনির্ঘোষ সদৃশ সেই ধ্বনি শ্রবণ পূর্ব্বক সীতা, রাম বিপদাপন্ন হইয়াছেন এইরূপ বিবেচনা করিয়া বিলাপ করিতে করিতে লক্ষ্মণকে তদীয় সাহায্যার্থ গমনোদ্যত করিতে সচেষ্ট হইলেন।

Hearing the sound like thunder bolt and so thinking Rama was in trouble, Sita lamented and persuaded Laksmana the son of Sumitra to follow.

Q. Explain the significance of सौमित्रिम्। Ans: सुमित्रायाः प्रयोगात् तस्य विमातृतनयत्वं ध्वनितम्। अतः रामपरित्राणे तस्य औदासीन्यं विवक्षितम्। Q. Expound the Samas in वज्रविस्तम्। Ans: See above. ५१।

54. Principal sentence :—(1) ते (सम्ब) भ्राता (कर्तृ) विरौति। Adj. to भ्राता—प्रारुविजाभीदनादी। (2) (त्वम्) भ्रातेयम् (कर्म) कुरु। (3) राघवं (कर्म) भयात् (अपादाने) त्रायस्व। सौमित्रे—सम्बोधने।

† The patronymic affix इञ् takes place after बाहु धृता वर्षीका सुमित्रा &c।

Prose order :—सौमित्रे ! प्रावृषिजाम्भोदनादी एष ते भ्राता विरौति, ज्ञातेयं कुरु, राघवं भयात् त्रायस्व।

Substance :—वत्स लक्ष्मण भ्राता ते वर्षामेघ इव रावं करोति, साहाय्यं कृत्वा आत्मीयतां विधेहि भ्रातरं त्रायस्व विपन्नः इति।

Explanation in tika form—भोः सौमित्रे लक्ष्मण ! प्रावृषि जातः प्रावृषिजः सप्तम्यां जनेः डः। "प्रावृट्शरत्कालदिवां जे:"* इति सप्तम्याः अलुक्। स चासौ अम्भोदः मेघश्चेति विशेषणसमासः। तद्वत् नदतीति "कर्त्तर्य्युपमाने" इति णिनिः। वर्षाकालीनमेघगम्भीरध्वनिः इत्यर्थः। "स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः" इत्यमरः। एष ते भ्राता रामः विरौति शब्दायते। तत् ज्ञातेयं ज्ञातिकर्म्म ज्ञातिभावं वा कुरु आचर। विपदापन्नस्य तस्य सहायतां कृत्वा आत्मीयकर्म्म कुरु इति भावः। "कपिज्ञात्योर्ढक्" ** इति ढक् प्रत्ययः। तथाहि राघवं रामं भयात् त्रायस्व रक्ष।

Change of voice :—एतेन प्रावृषिजाम्भोदनादिना भ्रात्रा विरूयते। क्रियताम्। राघवः त्वया त्रायताम्।

Derivation :—प्रावृषिज—प्रावृष्-जन ड:। अम्भोद—अम्भस्-दा-क। विरौति—वि-रु-लट् ति। पक्षे रवीति। लुङ् अरावीत्। ज्ञातेयम्—ज्ञाति-ढक्। त्रायस्व—त्रै-लोट् स्व।

এই তোমার ভ্রাতা বর্ষামেঘনিনাদে চীৎকার করিতেছেন। সৌমিত্রে! তুমি আত্মীয়ের কার্য্য কর। রাঘবকে বিপদ হইতে রক্ষা কর।

This your brother cries roaring as cloud in rains. Do thou, O son of Sumitra, the duty of 'a kinsman'; save Bama the descendant of Raghu from the danger.

---

* There is no elision of the 7th case in प्रावृष्, शरद्, काल, and दिव् preceded by the word ज in a samas. Thus प्रावृषिजः, शरदिजः, कालेजः, and दिविजः।

** कापेयम्।

राममंघुषितं नैतन्मृगस्यैव विवञ्चिषोः।

रामस्वनितसङ्काशः स्वान इत्यवदत् स ताम्॥ ५५॥

Q. Show the gram. Relation of प्रावृषि। Ans : अधि-करणस्य कारकत्वात् क्रियया एव अस्य अन्वयित्वम्, यतः "क्रियान्वयि कारकम्।" अतः 'नादी' इत्यनेन अस्य अन्वयः। Q, Correct वर्षायाम्। Ans : "अप् सुमनस् समा सिकता वर्षाणाम् बहुत्वञ्च" इति बहुवचन विधानात् 'वर्षासु' इत्येवं स्यात्। ५४।

55. Principal sentence :—सः (कर्त्तृ) ताम् (गौणं कर्म) इति (मुख्यं कर्म) अवदत्। Sub-sentence (1) एतत् (कर्त्तृ) राम-संघुषितं (एतत् इत्यनेन एकविभक्ति) न (भवति)। (2) मृगस्यैव स्वानः (भवति)। Adj. to मृगस्य—विवञ्चिषोः। Adj, to स्वानः—रामस्वनित-सङ्काशः।

Prose order :—एतत् राममंघुषितं न ; (एषः) विवञ्चिषोः मृगस्यैव रामस्वनितसङ्काशः स्वानः (भवति) इति स ताम् अवदत्।

Substance :—योऽयं शब्दः श्रूयते नायं रामस्य, किन्तु मृगस्यैव। स यत् रामस्वनम् अनुकुर्वाणः एवं रौति। यतः स मायामृगः अस्मान् वञ्चयितु-कामः।

Explanation in tika form :—एतत् रामस्य संघुषितं राममंघुषितं रामशब्दितं न भवति। घुषिरव विशब्दने अर्थात् शब्देन प्रकटीकृताभिप्राये प्रयुक्तः अन्यथा संघुष्टमित्येवं स्यात्। किन्त्वित्याह। एव विवञ्चिषोः वञ्चयितुमिच्छोः [वञ्च वञ्चने इति चौरादिकस्य सन्नन्तस्य रूपम्। केचित् "वञ्च गतौ भौवादिकः तस्य अनेकार्थत्वात् प्रलम्भनेऽपि वर्त्तते इत्याहुः ।" इति वञ्च-धातोः सनि उःप्रत्ययः। मृगस्य जन्तोः, रामस्य स्वनितं शब्दितं तेन तुल्यः रामस्वनित-सङ्काशः, नित्यसमासः। रामशब्द तुल्यः इत्यर्थः। "स्युरुत्तरपदे त्वमी। निभ संकाश नीकाश प्रतीकाशोपमादयः" इत्यमरः। स्वानः ध्वनिः भवतीति शेषः। 'स्वान निर्घोष निर्ह्राद नाद निस्वान निस्वनाः' इत्यमरः। इति वाक्यं स लक्ष्मणः ताम् सीताम् अवदत् कथयामास।

आप्यानस्कन्धकण्ठांसं कृषितं ससितुं रणे ।
प्रोर्णुवन्तं दिशो बाणैः काकुत्स्थं भीरु कः क्षमः ॥ ५६

Change of V :—एतेन रामसंघुषितेन (भूयते) रामस्वनितसंकाशेन स्वानेन (भूयते) इति तेन सा औच्यत ।

Derivation :—संघुषितं—सं-घुष-भावे क्तः । लट्—घोषति, लुङ्—अघोषीत्, अघुषत् । विवक्षिषीः—वि-वच-सनन्त-उः । स्वनित—स्वन्-भावे क्तः । अवदत्—वद-लङ् द । लुङ्—अवादीत् ।

लक्ष्मण सीतার বাক্যে প্রত্যুত্তর দিয়া কহিলেন, ইহা রামের শব্দ নহে, ইহা বঞ্চনাকারী মৃগের রামসদৃশ শব্দ ।

This is not the voice of Rama, spake he to her, but one that resembles his and belongs to a stag that wishes to impose upon.

Q. Parse इति । Ans : अवदत् इत्यस्य मुख्यं कर्म । Q. Distinguish between संघुषित and संघुष्ट । Ans : See above. Q. Parse स्वानः । Ans : भवति इति ऊह्यक्रियापदस्य कर्तृपदम् । रामस्वनितसङ्काश इति विशेषण-प्रयोगात् नात्र अभिधेय मात्रे प्रथमा, इति केचित् । ५५

56. Principal part :—भीरु ! (सम्बो) कः (कर्तृ) रणे (अधिकरणे) काकुत्स्थं (सहितुम् इत्यस्य कर्मपदम्) सहितुं (व्यं) क्षमः (Adj. to कः) (भवति) । Adj. to काकुत्स्थम्—आप्यानस्कन्धकण्ठांसम्, प्रोर्णुवन्तम् and कृषितम् । दिशः—object to प्रोर्णुवन्तम् । बाणैः—करणे ।

Prose order :—हे भीरु, आप्यानस्कन्धकण्ठांसं, बाणैः दिशः प्रोर्णुवन्तं रणे कृषितं काकुत्स्थं कः सहितुं क्षमः (भवति) ।

Substance :—अयि भीरु मा कारि भयम् । रामोऽतीव बलवान् । स यदा क्रुद्धः सन् बाणैः दिशः छादयति तदा नहि कश्चित् तमतिक्रमितुं क्षमः ।

Explanation in tika form :—भीरु भयशीले ["भियः क्रुक्लुकनौ"

इति क्तः ।] स्कन्धः बाहुशिरसः पश्चिमोभागः, कण्ठः गलः, तथा अंसः बाहुशिरः तेषां समाहारः स्कन्धकण्ठांसं, प्राण्यङ्गत्वादेकवद्भावः । आप्यानं स्थूलं स्कन्धकण्ठांसं यस्येति तथाभूतम् । अनेन देहदार्ढ्येन तस्य दुर्द्धर्षत्वं प्रकटितम् । तथा बाणैः शरैः दिशः प्रोर्णुवन्तं सर्व्वाः दिशः आच्छादयन्तं रणे कुपितं क्रुद्धं ककुत्स्थस्य तन्नाम्नः पुरञ्जयाभिधेयस्य ऐक्ष्वाकस्य गोत्रापत्यम्, काकुत्स्थः "शिवादिभ्योऽण्" इति अण् प्रत्ययः । तं रामं सहितुं तस्य पराक्रमं सोढुं कोजनः क्षमः शक्तः । न कोऽपि इत्यर्थः । काव्यलिङ्गमलङ्कारः । इत्थं पथ्यावक्त्रम् ।

Change of V.—केन क्षमेण (भूयते) ।

Derivation :—आप्यान—आ-प्याय क्तः । अथवा आ-प्यै क्तः । लट्—प्यायते ; लुङ् अप्यायि, अप्यायिष्ट, अप्यास्त, अप्यायिषाताम्, अप्यासाताम् । लिट्-पिप्ये । कुपितं—कुप-कर्त्तरि क्तः । लट्—कुप्यति । प्रोर्णुवन्तं—प्र ऊर्णु-शतृ । लट्—ऊर्णोति, ऊर्णौति । लुङ्—और्णवीत्, और्णुवीत् और्णावीत् । लिट्—ऊर्णुनाव । भीरु—भी-क्रुः, स्त्रीत्वात् ऊः । सम्बोधने । क्षमः—क्षम-पचाद्यच् ।

রামচন্দ্রের স্কন্ধ, কণ্ঠ ও অংস বিশাল ; যুদ্ধে কুপিত হইয়া যৎকালে শর দ্বারা চতুর্দ্দিক আচ্ছন্ন করেন তৎকালে কোন্ ব্যক্তি তাঁহার পরাক্রম সহ্য করিতে পারে ?

Who can, O timid one, stand in battle the enraged Rama with his shoulders, neck and the top of arms broad, covering all quarters with arrows.

Q. Write grammatical notes on the formation of आप्यान । Ans : "आङोऽन्धूधसोः" [आङः परस्य प्यायः पो स्यात् अन्धूधसोः अन्धौ (कूपे) ऊधसि (गवादेः स्तने) वाच्ये] इति वचनात् पीभावः न भवति । Q. Is there any allusion in the word ककुत्स्थः । Ans : पुरञ्जयो नाम कश्चित् नरपतिः सूर्य्यवंशीयः महादेवमूर्त्तिधरः वृषरूपिणम् महेन्द्रम् ककुदि आरुह्य दानवान् निजघान । अतोऽस्य ककुत्स्थसंज्ञा इति । Q. Show the significance of आप्यानस्कन्धकण्ठांसम् । Ans : See above. Q. Show the propriety

देहं विभ्रप्सुरस्त्राग्नौ मृगः प्राणैर्दिदेविषन् ।
ज्याघुष्टकठिनाङ्गुष्ठं राममायात् मुमूर्षया ॥ ५७ ॥

of काकुत्स्थम् । Ans : स्वयं वीरस्य वीरवंशजातस्य च रामस्य कृते कुतः शर इत्यादि सूच्यते । ५६

57. Principal part :—मृगः (कर्त्ता) मुमूर्षया (हेतौ) रामम् (कर्म्म) आयात् । Adj. to मृगः—विभप्सुः and दिदेविषन् । अस्त्राग्नौ (अधि) देहं (कर्म्म) connected with विभप्सुः । प्राणैः—करणैः । Adj. to रामम्—ज्याघुष्टकठिनाङ्गुष्ठम् ।

Prose order :—अस्त्राग्नौ देहं विभप्सुः प्राणैः दिदेविषन् मृगः मुमूर्षया ज्याघुष्टकठिनाङ्गुष्ठं रामम् आयात् ।

Substance :—क्रीड़ावस्तुषु इव प्राणेषु निर्म्ममः मारीचः पतङ्गवत् वह्निमुखं विविक्षुः अस्त्रप्रयोगे अतीव सुनिपुणं रामम् प्राप ।

Explanation in tika form :—अस्त्रमेव अग्निः रूपकसमासः । तस्मिन् अस्त्रानले इत्यर्थः देहं स्वकीयं शरीरं विभप्सुः भ्रष्टुमिच्छुः,सन्नन्तस्य भ्रस्ज-धातोः "सनाशंस भिक्ष उः"*इति उः । मरणोन्मुखः पतङ्गः यथा अग्नौ स्वदेहं विसृज्य म्रियते तथा कर्त्तुम् इत्यर्थः । तथा प्राणैः दिदेविषन् क्रीड़ितुमिच्छन्, क्रीड़ाद्रव्येषु इव प्राणेषु हेलया समाचरन् इत्यर्थः । "दिवः कर्म्म च" इति प्राणैरित्यत्र करणसंज्ञा । मृगः मुमूर्षया मर्त्तुमिच्छया सन्नन्तात् मृधातोः अः, ज्यया धनुर्गुणेन घुष्टौ निष्पिष्टौ, (निपातनात् निष्पेषार्थोऽपि गम्यते, गुणनिर्घर्ष अङ्गुष्ठकाठिन्यं युज्यते, विशब्दने तु घुषितम् इति स्यात्)। अतएव कठिनौ अङ्गुष्ठौ यस्येति तथाभूतं रामम् आयात् आगच्छत् । घुष्ट इति पद प्रसिद्धार्थत्वे चेत् तदा, ज्यया घुष्टः शब्दितः सुप्रसिद्धः, कठिनाङ्गुष्ठो यस्य तादृशम् । धनुषि सततकरामर्षात् तस्मिन् अतीव निपुणमित्यर्थः । इत्संपथ्यावहम्,

* The affix उ comes after the roots that have taken the affix सन्, and the roots, viz. आ-शन्स and भिक्ष in the sense of agents having such a habit or nature (तत्शीलार्थे)। Thus (सन्) चिकीर्षुः, । आशंसुः, भिक्षुः ।

ब्रुवन् भीषयमाणं तं रामं विस्मापयेत कः ।
मासं भैषीस्त्वयाद्यैव कृतार्थो दृश्यते पतिः ॥ ५८ ॥

Change of V.—विभ्रश्चा मृगैण दिदेविषता···कठिनाङ्गुष्ठः रामः आयायव ।

Derivation.—विभ्रक्षुः—भ्रस्ज-सनन्त-उ: । लट् भ्रज्जति, भृज्जते । लुङ्—अभार्क्षीत्, अभ्राक्षीत्, अभर्ट्, अभ्रष्ट । दिदेविषन्—दिव-सनन्त शतृ । ज्या—ज्या-क्विप् । लट् जिनाति । घृष्ट—घृष कर्म्म क्तः । पक्षे-घुषितः । लट्—घर्षति । लुङ्—अघर्षत्, अघर्षीत् । आयात्—आ-या-लङ् । लुङ्—आयासीत् । मुमूर्षया—मृ-(सनन्त)-अ स्त्रीलिङ्गात् ।

নিজ প্রাণের সহিত ক্রীড়া করিবার মানসে ও অস্ত্রাগ্নিতে নিজ দেহ আহুতি দিবার অভিপ্রায়ে, মারীচ, জ্যাঘর্ষণে কঠিনাঙ্গুলি রামচন্দ্রের নিকট উপস্থিত হইল ।

The stag desirous of frying as it were his body in the fire of weapons, and wishing to play with his life like a toy came with a desire of death to Rama whose thumb was rendered hard by the rubbing of bow strings.

Q, Can you, with all propriety, use उपमितसमास in अस्त्राग्नौ ? Ans : अस्त्रमेव अग्निः अस्त्राग्निः इति रूपकसमासः । अस्त्रम् अग्निरिव इति उपमितसमासेन अस्त्रस्य मुख्यार्थत्वम् । अस्त्रे तु न देहो भृज्यते अपि तु अग्नौ एव । अतः रूपकसमासेन अग्नेरेव मुख्यार्थतया तत्र भर्जनक्रिया सङ्गच्छते । Q. Show the distinction between घृष्ट and घृषित । Ans : See the sloka 55, ५५ ।

58. Principal sentence :—(1) कः (कर्त्तृ) रामं (कर्म्म) विस्मापयेत । Adj. to रामम्—भीषयमाणम्, and तम् । ब्रुवन्—भीषयमाणम् इत्यस्य कर्म्म । (2) मास्म (अस्म) भैषीः (त्वम्) । (3) त्वया (अनुक्त-कर्त्तृ) अद्य एव (अयम्) पतिः (उक्त कर्म्म) दृश्यते । Adj. to पतिः,-कृतार्थः ।

Prose order :—ब्रुवन् भीषयमाणं तं रामं कः विस्मापयेत । मास्म भैषीः (त्वम्) ; त्वया अद्यैव कृतार्थः पतिः दृश्यते ।

Substance :—रामं पुरतो वीक्ष्य एव भवती विस्मेति। नास्ति कश्चित् यस्मिन् भयतः समुपस्थिते रामः भीतिम् आपद्यते, अतः मा भैषीः भर्ता ते सत्वरम् उपस्थितो भविता।

Explanation in tika form :—भवत्सु विपक्षान् भीषयमाणं भीतान् कुर्व्वाणं "भियो हेतुभये षुक्"* इति षुक् "भीस्म्योः हेतुभये" ** इति आत्मनेपदम्। णिचि 'भीषि' धातोः प्रयोगात्, "अस्त्रं विनापि दर्शनप्रदानमात्रेणैव भवत्सु भीतिम् उत्पादयन्तम्" इत्यर्थो गम्यते। तं रामं को जनः विस्मापयेत, निमन्त्रणे नियोगे वा लिङ्, पूर्व्ववदात्मनेपदम्। "नित्यं स्मयतेः"† इति प्रयोजकात् कर्त्तुः विस्मये स्वयं समुपागते स्मि-धातोः आदेशः। आकारान्तत्वात् णिचि पुगागमः। स्मि धातोः णिचि आपिकरणात्, "नास्ति तादृशः कश्चित् पुरुषः यस्य दर्शनमात्रेणैव रामस्य चेतसि विस्मयः उत्पद्यते" इत्यर्थो गम्यते। अतः मास्म भैषीः न त्वं बिभीहि। "स्मोत्तरे लङ् च" इति चकारात् लुङ्। त्वया अद्यैव अधुनैव कृतार्थः कृतकृत्यः हतमगसनाथः इति यावत्। पतिः भर्त्ता द्रक्ष्यते। सत्वरं ते पतिः पूर्णमनोरथः प्रत्यागमिष्यति अतः ते भयकारणं नास्ति इत्यर्थः। वृत्तं पथ्यावक्त्रम्।"

Change of V.—भीषयमाणः स रामः केन विस्माप्येत। मास्म भायि। त्वं कृतार्थं पतिं द्रक्ष्यसि।

---

* "भियो हेतुभये षुक्"। हेतु=One who frightens. षुक्(ष)comes after the causative भी where but the agent causes fright directly and not by an instrument. So the causative भी becomes भीषि in the above sense. Thus व्याघ्रः भीषयते, but, बालकः कृत्रिमसर्पेण भाययति।

** In the above sense i. e. when the agent causes fear or amazement directly, भी and स्मि take आत्मनेपद।

† In the above sense स्मि becomes स्मा, and so with णिच् becomes स्मापि like स्थापि ज्ञापि दापि (the causative forms of स्था ज्ञा दा &c.) see the questions below.

यायास्त्वमिति कामो मे गन्तुमुत्सहसे न च।
इच्छुः कामयितुं त्वं मामित्यसौ जगदे तया॥ ५९॥

Derivation :—सत्—सद्-क्त:। भीषयमाणं—भी-णिच् कर्मणि शानच् (षुगागमः)। विस्मापयेत—वि-स्मि-णिच्-विधिलिङ् ईत। भैषी:—भी-लुङ् स, माङ्योगे अडागमप्रतिषेधः। द्रक्ष्यते—दृश्-कर्मणि लृट् स्यते।

शत्रুদিগের ভয়োৎপাদয়িতা সেই রামকে কোন্ ব্যক্তি পরাভব করিতে পারে? অতএব আপনি বৃথা ভয় করিবেন না। আপনি সত্বর স্বীয় পতিকে পূর্ণমনোরথ হইয়া প্রত্যাগমন করিতে দেখিবেন।

Who can surprise Rama who frightens his enemies simply by his presence. You will presently find your husband successful.

Q. Show the propriety of the gram. form of भीषयमाणम् and विस्मापयेत। Ans : भीधातोः णिचि 'षुक्'-विधानात् 'स्मिधातोः णिचि 'आ'करणात् च तथा उभयोः आत्मनेपदप्रयोगात् इदं गम्यते, यथा उभयोः कर्तारौ स्वयं दर्शनप्रदानेनैव भयं विस्मयञ्च उत्पादयतः। तयोः उपस्थित्या एव भयं विस्मयञ्च सत्सु स्वयम् आविर्भवति इत्यर्थः। Q. Give the peculiar meaning of भीषयमाणम् and विस्मापयेत। Ans: (Look into the explanation above.)५८।

59. Principal Sentences :—इति (मुख्यकर्म) असौ (गौण कर्म) तया (अनुक्त कर्तृपदम्) जगदे। Subordinate sentences (1) त्वं (कर्तृ) यायाः। (2) इति (अयम्) मे कामः (कर्तृ) (भवति)। (3) न च गन्तुम् उत्सहसे (त्वम्)। (4) त्वम् (कर्तृ) कामयितुम् (अयम्) इच्छुः (विधेय) (असि)। माम्—Obj. to कामयितुम्।

Prose order :—त्वं यायाः इति मे कामः, न च गन्तुमुत्सहसे (त्वम्), त्वं मां कामयितुम् इच्छुः (असि) इति तया असौ जगदे।

Substance :—त्वं गच्छ तावत् इत्यहम् इच्छामि। त्वन्तु वाञ्छसि न तत्र गन्तुम्। अतोऽहं तर्कयामि त्वं मां लब्धुम् इच्छसि, इत्यब्रवीत् लक्ष्मणम् सीता।

Explanation in tika form :—त्वं यायाः गच्छेः याधातोः विधिलिङि। रामान्वेषणाय इति शेषः। "कामप्रवेदनेऽकच्चिति" ["स्वाभिप्रायाविष्करणे गम्यमाने लिङ् स्यात्तु कच्चिति] इति लिङ्। इति मे मम कामः इच्छा। "इच्छा मनोभवौ कामौ" इत्यमरः। न च गन्तुम् उत्सहसे यतसे, विपन्नस्य तस्य साहाय्यार्थं गमने पराङ्मुखः भवसि इत्यर्थः। "शकधृषे"त्यादिना* सहयोगे तुमुन्। तस्मात् नूनं त्वं मां कामयितुमिच्छुः मया सह रन्तुकामः इत्यर्थः। "विन्दुरिच्छु"रिति इष् धातोः उ-प्रत्ययः निपातितः। इति एवं तया सीतया असौ लक्ष्मणः जगदे कथितः। कर्म्मणि लिट्। इत्थं पर्य्यायक्रमम्।

Change of V :—यायेत तया कामेन भूयते...उत्सह्यते (त्वया) इच्छुना त्वया (भूयते)। असुं जगाद सा।

Derivation.—यायाः—या-विधिलिङ् यास्। कामः—काम-कर्म्मणि घञ्। उत्सहसे—उत्-सह-लट् से। लुङ्—असहिष्ट,असहिषाताम् असहिषत। लुट्—सहिता, सोढा। इच्छुः—इष उः (निपातनम्)। कामयितुं—कम-तुमुन्। लट्—कामयते, लुङ्—अचीकमत, अचकमत। लिट्—कामयाञ्चक्रे चकमे। जगदे—गद-कर्म्मणि लिट् ए। लुङ् (कर्त्तरि) अगदीत्, अगादीत्।

সীতা লক্ষ্মণকে কহিলেন, তুমি রামের সাহায্য করিতে গমন কর এই আমার অভিলাষ, কিন্তু তুমি যাইতেছ না। অতএব আমার বোধ হয় যে তুমি আমাকে গ্রহণ করিতে অভিলাষী।

It is my earnest desire that you should go (to help), but you would not move; you wish to make me submit to your desire; thus was he addressed by her.

Q. conjugate the root of काम in लट्। Ans : कामयते कामयेते कामयन्ते &c.। Q, Account for the insertion of तुमुन् in गन्तुम्। Ans : See the foot note. Q. Account for विधिलिङ् in यायाः। Ans : "इच्छार्थेषु लिङ्लोटौ"। इति 'कामः' इति इच्छार्थे उपपदे 'यायाः' इत्यत्र लिङ्। पक्षे 'याहि' इति लोट्। Q. Account for तुमुन् in कामयितुम् इच्छुः। Ans : "समानकर्त्तृकेषु

* "शक धृष ज्ञा ग्ला घट रभ लभ क्रम सह-अर्ह-अस्त्यर्थेषु तुमुन्।" तुमुन् comes after the roots followed by the above ones.

मृषोद्यं प्रवदन्तीं तां सत्यवद्यो रघूत्तमः।
निरगात् मत्ृहस्तं त्वं यास्यसीति शपन् वशी ॥ ६० ॥

तुमुन्" [इच्छार्थेषु धातुषु समानकर्तृकेषु उपपदेषु धातोः तुमुन् स्यात्] इति इच्छयोगे तुमुन्। ५९।

60. Principal sentence :—रघूत्तमः (कर्तृ) निरगात्। Adj. to रघूत्तमः—सत्यवद्यः, वशी, and शपन्। ताम्—object to शपन्। Adj. to ताम्—प्रवदन्तीम्। मृषोद्यम्—Obj. to प्रवदन्तीम्। Subordinate sen-tence:— त्वं (कर्तृ) मत्ृहस्तं (कर्म) यास्यसि।

Prose order :—वशी सत्यवद्यः रघूत्तमः मृषोद्यं प्रवदन्तीं तां, 'त्वं मत्ृहस्तं यास्यसि' इति शपन् निरगात्।

Substance :—प्रस्थानात् पूर्व्वम् एवं मिथ्या प्रलपन्तीं सीतां लक्ष्मणः शशाप, यथा त्वं मत्ृहस्ते पतिष्यसि इति। तस्य शापवचनं च सत्यमेवासीत्।

Explanation in tika form :—वशः इन्द्रियसंयमः सोऽस्यास्तीति वशी जितेन्द्रियः अतएव सत्यं वदतीति सत्यवद्यः अवितथवादी 'कृत्यल्युटो बहुलम्' इति वदेः कर्त्तरि यत्। यद्वा "वदः सुपि क्यप् च" इति 'च'कारात् भावे यत्। ततः सत्यं वद्यं विद्यतेऽस्येति अर्श आदित्वादच्। अथवा वदनं कथनं वत्, सत्यस्य वदि कथने साधुः इति यः। रघुषु उत्तमः रघूत्तमः रघुश्रेष्ठः लक्ष्मणः मृषोद्यम् 'इच्छः कामयितुं त्वं माम्" इति मिथ्यावादं, प्रवदन्तीं कथयन्तीं, राजसूयेत्यादिना मृषोपपदात् वदेः निपातनात् कर्म्मणि नित्यं क्यप्। तां सीतां, त्वं मत्ृहस्तं यास्यसि विपद्वशं गमिष्यसीति शपन् शापं प्रयच्छन् निरगात् निर्गतः, तस्मात् उटजादिति शेषः। इणः लुङ्।

Change of voice :—प्रवदन्ती सा सत्यवद्येन रघूत्तमेन निरगायि शपता वशिना, मत्ृहस्तः यास्यते इति।

Derivation :—मृषोद्यम्—मृषा-वद-कर्म्मणि-क्यप्। सत्यवद्यः—सत्य-वद-कर्त्तरि यत्। वद्यः—वद-भावे यत्। निरगात्—निर्-इ-लुङ् द। शपन्—शप-शतृ। लट् शपति, लुङ्—अशापसीत्। वशी-वश-इन्।

সত্যবাদী জিতেন্দ্রিয় রাঘবেন্দ্র মিথ্যাবাদিনী সীতাকে আপনি

गते तस्मिन् जलमुचिः शुष्यदन् रावणः शिखी।
जत्रपूकोऽचमालावान् धारयी मृदलावुनः॥ ६१॥

শত্রুহস্তে পতিত হইবেন এই অভিশাপ প্রদান পূর্ব্বক পর্ণকুটীর হইতে নির্গত হইলেন।

Imprecating the false accusing Sita, that thou shalt fall into the hands of thy enemies, the truthful Laksmana the best of Raghus, the lord of his passions, went away.

Q. Show the significance of सत्यवद्यः and वशी। Ans: यतः स जितेन्द्रियः अतः तस्याः तादृक् मिथ्यावचनं लक्ष्मणे कदाचित् न प्रयोक्तुम् युज्यते इति गम्यते। सत्यवद्यः इति विशेषणेन तत्प्रदत्तः शापः फलित आसीत् इति गम्यते। Q. Account for the formation of सत्यवद्यम्। Ans: सत्यवद्यः इति पदं लक्ष्मणः इति कर्त्तृपदस्य विशेषणम्, कर्त्तुः विशेषणात् अत्र कर्त्तरि यत्। वाक्यम् यथा—सत्यं वदति यः स सत्यवद्यः। "कृत्यल्युटो बहुलम्" इति बहुल ग्रहणात् कर्त्तरि वाच्येऽपि यत् प्रत्ययः। अथवा—"वदः सुपि क्यप् च" इति चकारात् भाववाच्ये यत्, अतः सत्यवद्यम् इति विशेष्यपदम्। ततः सत्यवद्यं विद्यते अस्य असौ सत्यवद्यः, अर्श आदिभ्यः अच्। अथवा (See above.) ६०।

61. Principal sentence:—तस्मिन् (भावे सप्तमी) गते (विण) रावणः (कर्त्तृ) सीताम् (कर्म्म) ऊचे (Sl. 64)। Adjectives to रावणः—जलमुचिः, शुष्यदन्, शिखी, जत्रपूकः, अक्षमालावान् and धारयः। मृदलावुनः—विवक्षया षष्ठी, Gram connected with धारयः।

Prose order:—तस्मिन् गते (सति) जलमुचिः शुष्यदन् शिखी जत्रपूकः अक्षमालावान् मृदलावुनः धारयः रावणः (सीतामूचे इति चतुर्थश्लोकेनान्वयः)।

Substance:—अथ प्रस्थिते लक्ष्मणे, कृतस्नानः विशुष्कदन्तः शिखाधरः holding a lock of hair on the crown of this head) रावणः मृत्पूर्णम् अलाबु, अक्षमालां च धारयन्, जपन् मन्त्रम् तत्र समागतः।

Explanation in tika form :—तस्मिन् वयसि गते आश्रमात् निष्क्रान्ते सति, भावे सप्तमी। रावणः समागत्य सीताम् ऊचे इति चतुर्थ श्लोकेन अन्वयः। कीदृशः ? जलेन शुचिः स्नातत्वात् जलशुचिः कृतस्नानः। शुद्धा निर्मला दन्ता यस्येति शुद्धदत्, तस्य प्रथमैकवचने। "अग्रान्तशुद्ध शुभ्रवृषवराहेभ्यश्च"* इति दन्तस्य दत्रादेशः। शिखा अस्यास्तीति शिखी शिखायुक्तः परिव्राजक इत्यर्थः। "शिखामालासंज्ञादिभ्यः इनिः।" इति इनिः। "शिखीत्वग्नौ द्रुमे केतुग्रहे शरे चूडार्थम्मि बलीवर्दे मयूरे कुक्कुटे हये" इति हेम:। पापाशयत्वात् गर्हितं जपतीति जञ्जपूकः "जप जभ दह दश भञ्ज पशाञ्च" इति धात्वर्थगर्हायां ** यङ्। "यज-जपदशां यङः" इति ऊकः। अक्षमालावान् अक्षसूत्र युक्तः "अक्षो ज्ञातार्थ-शकट व्यवहारेषु पाशके। रुद्राक्षेन्द्राक्षयोः सर्पे बिभीतकतरावपि; चक्रे कर्षे पुमान्" इति मेदिनी। मत्वर्थे मतुप्। अलाबुस्तुम्बीफलं "तुम्ब्यलाबुरुभे समे" इत्यमरः। "अलाबुस्तुम्बकः प्रोक्तः" इति चन्द्रः। तस्य विकारः फलमिति "ओरञ्"† "फले लुक्"‡ इति तस्य लोपः नपुंसकं ह्रस्वत्वञ्च। मृत् तीर्थ-मृत्तिका, साच अलाबुच, तयोः समाहारः। यद्वा मृत्पूर्णम् अलाबु इति मध्यपद-लोपी समासः। तस्य "कर्तृकर्मणोः कृति" इति कृद्योगे कर्म्मणि षष्ठी। धारय-तीति धारयः दधानः अनुपसर्गात्दिति शः। * धारयन् इत्यर्थः। वृषं पूर्ववत्।

---

* In a बहुव्रीहि समास, दत् is the optional substitute for दन्त, after शुद्ध, शुभ्र, वृष, वराह, and such words as end in अग्र। Thus कुड्मलाग्रदत् कुड्मलाग्रदन्त, शुद्धदत् शुद्धदन्त, शुभ्रदत् शुभ्रदन्त, वृषदत् वृषदन्त, वराहदत् वराहदन्त। 'च' indicates other words not seen in the above aphorism. Thus अहिदत् अहिदन्त।

** धात्वर्थगर्हा—when the root indicates censure.

† अञ् (अ) comes after words ending in उ, in the sense of transition or a part.

‡ Affixes in the sense of transition (विकार) elide when they signify a fruit.

* अनुपसर्गात् लिम्प-विन्द-धारि पारि वेदि उदेजि चेति साति साहि-

कमण्डलुकपालेन शिरसा च मृजावता।
संवस्त्र्य लाक्षिके वस्त्रे मात्राः संभाण्ड्य दण्डवान् ॥६२

Change of voice:—अक्षसूत्रिणा शुद्धदता रावणेन शिखिना जटापूकेन, अक्षमालावता धारयेण...... (सीता ऊचे)।

Derivation:—शुचिः-शुच-इन् (औणादिकः) शिखी-शिखा-इन्। जटापूकः-जप (यङन्त) ऊ, क। धारय-धृ-णिच्-शः। अलाबु—नञ्-लम्ब-उः।

लक्ष्मণ গমন করিলে পর, কৃতস্নান, শুক্লদন্ত শিখাবান্ অক্ষমালা-বান্ ও তীর্থমৃত্তিকাপূর্ণ অলাবুধারী রাবণ জপ করিতে করিতে (সমাগত হইয়া সীতাকে কহিল)।

After he had been away Ravan came and addressed Sita, Ravana who was clean by bathing had his teeth cleansed held a lock of hairs on the top of his crown, went on counting beads, had a wreath of rudraksa, and held a bowl of gourd, filled with sacred earth.

Q. Parse तस्मिन् and गते। Ans: तस्मिन् इति भावे सप्तमी। 'गते' इति तस्मिन् इत्यस्य विशेषणपदम्। गोयीचन्द्रमतेतु 'गते' इत्यत्र भावे सप्तमी। 'तस्मिन्' इति तस्य विशेष्यपदेऽपि सप्तमी। उक्तञ्च तेन "यस्य वा लक्ष्यते भावो भावेनैवान्यकर्तृकः सप्तमी विहिता तत्र तद्विशिष्टपदेऽपि च।" (विशिष्टपदं—विशेष्यपदम्) Q. Account for the formation of शुद्धदन्, शिखी। Ans: See above. ६२।

62. It is an adjective sentence:—Adj. to धारयः—उपलक्षितः (उक्तम्), and दण्डवान्। कमण्डलुकपालेन and शिरसा—उपलक्षणे तृतीया। मृजावता Adj. to शिरसा। Incomplete verbs: संवस्त्र्य and संभाण्ड्य। वस्त्रे object to संवस्त्र्य। मात्राः object to संभाण्ड्य। लाक्षिके-Adj to वस्त्रे।

Prose order ;—(पुनः किम्भूतः) कमण्डलुकपालेन मृजावता शिरसा

भव्य°। श (अ) comes after the above roots not preceded by prefixes.

(उपलक्षितः) दण्डवान् लाक्षिके वस्त्रे संवस्त्र्य मात्राः संभाण्ड्य च (समागम्य सीताम् ऊचे इति अन्वयः)।

Substance :—परिच्छदान् राशीकुर्वन् दण्डधारी रावणः लाक्षारञ्जितं वस्त्रयुगलं धारयन् समुपागम्य सीताम् वचनमब्रवीत्। तदानीं कमण्डलुकपालधरः सः मृद्भस्मेन परिष्कृतमस्तकः इति।

Explanation in tika form—पुनः किम्भूतः, कमण्डलुः कुण्डी जलपात्रं "मस्त्री कमण्डलुः कुण्डी" इत्यमरः। कपालं घटादिखण्डं भिक्षापात्रं "कपालं तु शिरोऽस्थि स्यात् घटादेः शकले व्रजे" इति कोषः। तयोः द्वन्द्वः, "जातिरप्राणिनाम्"* इति एकवद्भावश्च। तेन उपलक्षितः। केचित्तु कं जलं पालयतीति कपालः, कमण्डलुश्चासौ कपालश्चेति कर्मधारयः, विशेषणस्य च परनिपातः। तेन उपलक्षितः। परिव्राजको हि दक्षिणकरे सजलं पात्रं धारयति इति शेषम्। तथा, मृजावता मार्जनायुक्तेन निर्मलेन शिरसा च उपलक्षितः। इत्थम्भूतलक्षणे तृतीया। दण्डवान् गृहीतदण्डः, संसर्गे मतुप् **। रावणः लाक्षया रक्ते † लाक्षिके "लाक्षारोचनात् ठक्" इति ठक् (इक) प्रत्ययः। वस्त्रे वस्त्रयुगले, संवस्त्र्य [वस्त्रं समाच्छादयति संवस्त्रयति, "वस्त्रात् समाच्छादने" अर्थात् समाच्छादनार्थे वस्त्र इत्यस्मात् णिचि वस्त्रि इति नामधातुः स्यात्, तस्मात् ल्यप्] परिधाय, मात्राः परिच्छदादीः "मात्रा कर्णविभूषणे। अक्षरावयवे वृत्ते मानेऽल्पे च परिच्छदे" इति विश्वः। संभाण्ड्य समाचित्य युगपदङ-

---

* कमण्डलुः जलपात्रम्; कपालं भिक्षापात्रम् so both of them being in the class (जाति) of पात्र which is not an animal (अप्राणी) समाहार द्वन्द्व takes place.

** "भूम निन्दा प्रशंसासु नित्ययोगेऽतिशायने संसर्गेऽस्ति विवक्षायाम् भवन्ति मतुबादयः।" भूम्नि गोमान्; निन्दायाम् पापी; प्रशंसायाम्—दुग्धवती गौः (प्रशस्तदुग्धवती इत्यर्थः); नित्ययोगे—क्षीरी वृक्षः; अतिशायने—सुकेशिनी; संसर्गे—दण्डवान् &c.

† रक्त=Coloured.

अधीयन्नात्मविद्विद्यां धारयन् मस्करिव्रतम्।
वदन् बह्वङ्गुलिस्फोटं भ्रूक्षेपञ्च विलोकयन्॥ ६३॥

स्वार्थं रावणीकृत्य सीतासूपे इति शेषः। "आक्षात् समाचये"‡ इति णिङ् स्यात्। ङकारात् आत्मनेपदम्। इदं पद्यावकम्।

Change of voice :—दण्डवता (उपलक्षितेन) sl 64.

Derivation.—कपाल—कपि-कालम्। मृजावता—मृजा (मृज-क:) मतुप्। संवस्त्र—सं-वस्त्रि (नामधातुः)-ल्यप्। लाक्षिके—लाक्षा-ठक्, सप्तमी। संभाण्ड्य—संभाण्डि (नामधातुः)-ल्यप्। दण्डवान्-दण्ड-मतुप्।

তাঁহার হস্তে কমণ্ডলু, ভিক্ষাপাত্র ও দণ্ড; শিরোদেশ সুসংমৃষ্ট, এবং লাক্ষারঞ্জিত বস্ত্র পরিধান। তিনি পরিচ্ছদাদি একত্রে বন্ধন পূর্ব্বক ধারণ করিয়াছিলেন।

Holding a water pot and a beggar's bowl, with his head clean, wearing a pair of garment dyed with lac, packing up all his effects and holding a stick.

Q. Expound the Samas कमण्डलुकपालिन। and parse it as well as शिरसा। Ans :—See above. Q. Give the grammatical meaning of संवस्त्र, लाक्षिके and संभाण्ड्य Ans : See above. Q. Explain the application of मतुप् (वतुप्) in दण्डवान्। Ans : "भूम निन्दे" त्यादिना संसर्गे मतुप्। ६१।

63. It is also an adjective sentence :—Adj. to रावणः— अधीयन्, धारयन्, वदन् and विलोकयन्। आत्मविद्विद्याम्—objective to अधीयन्। मस्करिव्रतम्—objective to धारयन्। बह्वङ्गुलिस्फोटम् and भ्रूक्षेपम्, adverbs respectively to वदन् and विलोकयन्।

Prose order :—आत्मविद्विद्याम् अधीयन्, मस्करिव्रतं धारयन् बह्वङ्गुलिस्फोटं वदन् भ्रूक्षेपञ्च विलोकयन् (सः सीतामूपे इत्यन्वयः)।

‡ णिङ् takes place after आक्ष in the sense of collecting together. ङ् is significant of आत्मनेपद।

Substance :—तदानीं रावणः योगिनां विद्याम् उपनिषदम् पठन्निव, परिव्राजकव्रतम् आचरन्, अङ्गुलिं स्फोटयित्वा हस्तसंज्ञया मितं भाषमाणश्च, सः भ्रुवम् उत्क्षिप्य ऋजुभावेन ताम् अपश्यत्।

Explanation in tika form :—पुनः किम्भूतः? आत्मविदां योगिनां विद्यामुपनिषदं अधीयन् अनायासेनैव पठन् "इङ्धार्य्योः शत्रकृच्छ्रिणि" * इति अकृच्छ्रिणि कर्त्तरि शतृ प्रत्ययः। पुनः किम्भूतः? 'मा कुरुत कर्म्माणि शान्तिर्वः श्रेयसी' इत्येवं घोषयन्ति ये ते मस्करिणः परिव्राजकाः "मस्कर मस्करिणौ वेणुपरिव्राजकयोः" इति सुट् इनिश्च निपात्यते। ** तेषां व्रतं कृच्छ्रं धारयन्। आयासं विनैव आचरन् इति शतृप्रत्ययस्य अर्थः। पुनः किम्भूतः, अङ्गुलिस्फोटम् अङ्गुलिं स्फोटयित्वा बहु वदन्, मितभाषितया बहु हस्तसंज्ञयैव वदतीति भावः। "स्वाङ्गेऽध्रुवे" [अध्रुवे स्वाङ्गे द्वितीयान्ते धातोः णमुल्] इति णमुल्, यद्वा बहुः अङ्गुलेः स्फोटो यत्र वदनक्रियायाम्। तथा भ्रूक्षेपं भ्रुवम् उत्क्षिप्य विलोकयन्, पश्यन् ऋजुतया कटाक्षाद्यभावः इत्याशयः। पूर्व्ववत् णमुल्। यद्वा भ्रुवोः क्षेपो यत्र विलोकनक्रियायाम्, इति बहुव्रीहिसमासः। एवम्भूतः रावणः सीताम् ऊचे इत्यन्वयः। वृत्तं पथ्यावक्त्रम्।

Change of V :—अधीयता, धारयता, वदता...विलोकयता see 64.

Derivations :—अधीयन्—अधि-इङ् अकृच्छ्रार्थे शतृ। कृच्छ्रार्थे तु अधीते। आत्मविद्—आत्म-विद-क्विप्। धारयत्—धारि-शतृ। अङ्गुलिस्फोटं—अङ्गुलि-स्फुट-णमुल्। भ्रूक्षेपम्—भ्रू-क्षिप-णमुल्। विलोकयन्—वि-लोक (चुरादिः) शतृ।

তিনি উপনিষদ্ পাঠ করিতেছিলেন। পরিব্রাজক ব্রত অবলম্বন পূর্ব্বক, অঙ্গুলি স্ফোটনে (তুড়ি দিয়া) বহু মনোভাব ব্যক্ত করিয়া সরল ভাবে সীতাকে অবলোকন করিয়াছিলেন।

---

*शतृ comes after इङ् (इ) and धारि to signify ease. Thus अधीयन् signifies to read with ease. धारयन् to hold with ease.

** मस्कर and मस्करिन् are erregularly formed of मकर to signify वेणु and परिव्राजक।

सन्दिदर्शयिषुः साम निजुक्षुः अपाटताम् ।
चंक्रमावान् समागत्य सीतामूचे सुखा भव ॥ ६४ ॥

Reciting the Upanisads, wearing the garb of a mendicant, speaking most by the help of snapping fingers and casting his glance to the contraction of his eye brows.

Q. Give the gram. meaning of अधीयन् and धारयन् । Ans : आयासं विना पठन् इति अत्र शतृप्रत्ययस्य अर्थः । आयासाध्ययने तु अधीते इति लट् स्यात् । एवं धारयन् । Q. Derive अङ्गुलिस्फोटम् and भ्रूक्षेपम् । Ans : See above. ६३ ।

64. Principal part :—(रावणः) समागत्य (त्यप्) सीताम् (कर्म) ऊचे । Adj. to रावणः—सन्दिदर्शयिषुः, निजुक्षुः and चंक्रमावान् । साम—object to सन्दिदर्शयिषुः । अपाटताम् object to निजुक्षुः । Sub sentence —त्वम् (कर्तृ उह्यम्) सुखा (विधे) भव ।

Prose order—साम सन्दिदर्शयिषुः, अपाटतां निजुक्षुः, चंक्रमावान् (रावणः) समागत्य, सुखा भव (इति) सीताम् ऊचे ।

Substance :—अथ सान्त्वं प्रदर्शयितुकामः रावणभावच गोपयितुमिच्छुः रावणः अपविनस्थानत्यागात् कुटिलगतिः सन् सीताम् अभ्युपेत्य प्रोवाच ।

Explanation in tika form :—पुनः किम्भूतः ? साम सान्त्वं सन्दिदर्शयिषुः सन्दर्शयितुमिच्छुः इमेयं नस्य सममनं रूपम् । अपाटतां अपायान् अटन्ति ये ते अपाटाः तेषां भावः ताम् निजाचरणं रावणभावम् इति यावत् । निजुक्षुः निह्नोतुमिच्छुः । केचित् साम सन्दिदर्शयिषुः अङ्गुलिस्फोटं वहुं वदन्, तथा अपाटतां निजुक्षुः मस्करिव्रतं धारयन् इति अन्वयं कुर्व्वन्ति । पुनः किम्भूतः ? कुटिलं क्रमणं चंक्रमा, "नित्यम् कौटिल्ये गतौ" * इति क्रम् धातोः

---

* यङ् after the roots, signifying motion, is used in the sense of crookedness.

यङि कुटिलगतत्वम् । क्रमे: यङो लुक् । "अ: प्रत्ययात्" इति अकार: । सा अस्यास्तीति ,चङ्क्रमावान् कुटिलगतियुक्त: अमेध्यादिस्थलपरिजिहीर्षया, किंवा कौटिल्यम् । एवम्भूत: रावण: समागत्य सुखा भव अनुकूलाचरणेन आनन्दय इत्यर्थ: । यदहं प्रार्थये तत्र प्रतिकूला न भवेति भाव: । इति सीताम् ऊचे उक्तवान् । "सुखप्रियादानुलोम्ये" इति आनुलोम्ये अर्थात् अनुकूलाचरणे अर्थे कृभ्वस्तियोगे डाच् । यद्वा सुखा भवेति पदद्वयं सुखं विद्यते यस्या इति अर्श आदित्वाद: । तत: स्त्रीत्वाट्टाप् । इत्थं पद्यावकाम् ।

Change V.—सन्दिदर्शयिषुणा, निजुह्नुषुणा चंक्रमावता (रावणेन) सीता ऊचे ।

Derivation :—सन्दिदर्शयिषु:—सन्-दृश-णिच्-सनन्त-उ: । निजुह्नुषु:—नि-ह्नु, सनन्त उ: । सामन्—सो मनिन् । चंक्रमावान्—क्रम-यङ लुक-अ:-स्त्रीत्वात् टाप् चंक्रमा-मतुप् । ऊचे—वच लिट् ए । लुङ्—अवोचत्, अवोचत । सुखाभव—सुख डाच्-भू लोट् हि ।

সাম প্রদর্শনেচ্ছু হইয়া ও রাক্ষসভাব গোপন করিতে অভিলাষী হইয়া কুটিলগতিতে তথায় উপস্থিত হইলেন ও সীতাকে কহিলেন, আমার প্রতি অনুকূলতা প্রদর্শন কর।

Desirous of exhibiting charity, and concealing his being a Rakshasa, walking in a crooked way, he said to Sita : 'be thou friendly to me'.

Q. Is there any Samas in सुखाभव ? Ans : डाच् प्रत्ययात् अत्र गतिसमास: । **Q. Give the meaning of सुखाभव either conjointly or separately. Ans** : सुखाभव इति गतिसमासे, अनुकूलाचरणेन,आनन्दय इत्यर्थ: । सुखा भव इति विसमासे "सुखिनी भव" इत्यर्थ: । **Q. Give the peculiar meaning of यङ् in** चङ्क्रमा । **Ans** : क्रिया समभिव्याहारे अर्थात् पौन:पुन्ये भृशार्थे च (**Intensity and repetition**) यङ् प्रयुज्यते । अत्र तु 'क्रम्'धातो: गत्यर्थतया "नित्यम् कौटिल्यं गतौ । " इति क्रम धातो: कुटिलगतित्वम् गम्यते । ६४ ।

सायन्तनीं तिथिप्रण्यः पङ्कजानां दिवातनीम्।
कान्तिं कान्त्या सदातन्या ह्रेपयन्ती शुचिस्मिता॥ ६५॥
का त्वमेकाकिनी भीरु निरन्वयजने वने।
क्षुध्यन्तोऽप्यघसन् व्यालास्त्वामपालां कथं न वा॥ ६६॥

65, 66. Principal sentence :—(1) भीरु (सम्बोधनं) वने (अधि) का (विण्) त्वम् (कर्तृ) (भवसि)। Adjective to त्वम्,—ह्रेपयन्ती शुचिस्मिता and एकाकिनी। object to ह्रेपयन्ती—कान्तिम्। Adj to कान्तिम्—सायन्तनीं and दिवातनीम्। तिथिप्रण्यः (सम्ब), पङ्कजानां (सम्ब), Adj. to कान्त्या—सदातन्या। Adj. to वने—निरन्वयजने। (2) व्यालाः (कर्तृ) त्वां (कर्म) कथं वा (व्यम्) अघसन्। Adj. to व्यालाः—क्षुध्यन्तः। Adj. to त्वाम्—अपालाम्।

Prose order :—भीरु! निरन्वयजने वने तिथिप्रण्यः सायन्तनीं (तथा) पङ्कजानां दिवातनीं कान्तिं सदातन्या (स्वकीयया) कान्त्या ह्रेपयन्ती शुचिस्मिता एकाकिनी का त्वम्? क्षुध्यन्तोऽपि व्यालाः अपालां त्वाम् कथं वा न अघसन्।

Substance :—अयि, त्वम् नारीसहजां भीतिम् आपद्यमाना, कथम् एकाकिनी निर्जनेऽस्मिन् वने वर्त्तसे। अहो ते रूपम्! निशि चन्द्रस्य या शोभा दिवा च पद्मानां या कान्तिः सापि तव पुरतः निन्दिता इव लक्ष्यते। चित्रञ्चैतत् यत् हिंस्रजन्तवः क्षुत्क्षामा अपि न त्वां व्यापादयन्ति।

Explanation in tika form—भीरु! भयशीले! इति सम्बोधनं भयप्रकृतित्वात् स्त्रीणाम्। "भीरु भीरुक भीलुका" इत्यमरः। निरन्वया निरनुगमा निःसम्बन्धा जना यत्र तस्मिन् निरन्वयजने लोकसमागमशून्ये अस्मिन् वने, पञ्चदशतिथीः प्रणयति प्रवर्त्तयतीति तिथिप्रणीः चन्द्रः, तस्य ह्रासवृद्धिभ्यामेव ज्योतिःशास्त्रे तिथिनिरूपणात्। "तिथिप्रणीर्दर्शविपन्निशामणिश्शिनेत्रचूडामणि-रविनेत्रभूः" * इति कोषः। नी धातोः क्विप्। तस्य तिथिप्रण्यः (अवर्णोऽस्त्वत्

---

* तिथिप्रणीः, दर्शविपत् (दर्श=अमावस्या, the day of new

कम्) चन्द्रमस:, सायं दिवावसानं तत्र भवां सायन्तनीं सन्ध्याकालीनां "सायंचिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च" इति ष्युल् प्रत्यय: तुट् च (तन), तथा पङ्कजानां पद्मानां दिवातनीं दिवाभवां, पूर्व्ववत् अव्ययात् ष्युल् । कान्तिं शोभां "शोभा कान्ति: द्युतिश्छवि: "इत्यमर: । सदातन्या सर्व्वकालस्थितया चन्द्रपद्मयोस्तु प्रभा न सदा तिष्ठतीति लज्जाहेतुरिति सूचितम् । कान्त्या स्वकीयया प्रभया ह्रेपयन्ती लज्जयन्ती, तथा मधुरं स्मितं हास: यस्या: सा मधुरहासिनी "स्मितन्त्वीषद्दर्शने हासे" इति वैजयन्ती । एकाकिनी असहाया "एकादाकिनिच असहाये"** इति आकिनिच् । का त्वं देवी, मानुषी अन्या वा ? क्षुध्यन्त: बुभुक्षमाणा अपि, अपि शब्देन बुभुक्षाणां नास्ति किमपि अभक्ष्यमिति सूचितम् । व्याला: हिंस्रा व्याघ्रादय: "भेदलिङ्ग: † शठे व्याल: पुंसि श्वापदसर्पयो:" इत्यमर: । अविद्यमान: पालो यस्या इति अपालां पालकारहितां त्वां कथं वा न अघसन् न भक्षितवन्त: । अदे: लुङि घस्लादेश: । इत्तं पथ्यावक्त्रम् । श्लोकद्वयेन अत्र युग्मकम् । "द्वाभ्यान्तु युग्मकं प्रोक्तम् ।"

Change of V.—ह्रेपयन्त्या मधुरस्मितया कया त्वया (भूयते) एकाकिन्या । क्षुध्यद्भि: व्यालै: अघासिषता: त्वम् अपाला...

Derivation.—सायंतनी—सायम्-ष्युल्-तुडागम:-ङीप् । तिथिप्रणय:—तिथि-प्र-नी-क्विप् षष्ठी । दिवातनीम्—दिवा-ष्युल्-ङीप् । ह्रेपयन्ती—ह्री-णिच्-शतृ-ङीप् । एकाकिनी—एक-आकिनिच्, स्त्रीत्वादीप् । भीरु—भी-क्रु: स्त्रीत्वादूङ् । सम्बोधने । क्षुध्यन्त:—क्षुध-शतृ । लट्-क्षुध्यति लुङ्-अक्षुधत् । अघसन्—अद्-लुङ्-अन् । लिट्—जघास, आद &c जघसिथ, आदिथ &c. अपालाम्—नञ् पाल (चुरादि:) अच् ।

---

moon ; विपद्=trouble) ; निशामणि:, निशेशचूडामणि:, अत्रिनेत्रभू: are synonyms of the word moon.

** आकिनिच् (आकिन्), कन् and elision take place after एक to signify solitariness. एकाकिन्, एकक, एक ।

† Distinguished by gender.

हृदयङ्गममूर्त्तिस्त्वं सुभगम्भावुकं वनम् ।
कुर्व्वाणा भीममप्येतद्वदाख्यैः केन हेतुना ॥ ६७ ॥

অয়ি ভয়শীলে! আপনি মধুরহাস্যে চন্দ্রমার সায়ংকালীন ও পদ্মের দিবাভাগের শোভাকে লজ্জা প্রদান করিয়া এই জনসমাগমশূন্য বনে একাকিনী বাস করিতেছেন। আপনি কে? ক্ষুধিত শ্বাপদগণ আপনাকে রক্ষকরহিত দেখিয়াও কি জন্য ভক্ষণ করে নাই!

Thou timid! who art thou, sweet smiled, alone in this lonely forest? Thou puttest to shame, by thy 'ever-abiding' beauty, the evening loneliness of the author of the lunar days, and the brightness of the lotuses during day. What is it that the beasts of prey though hungry, have not devoured thee wanting a guide?

Q. Decline the base of तिथिप्रण्य: । Ans :—ग्रयणीशब्दवत् रूपम् । यथा तिथिप्रणी: तिथिप्रण्यौ तिथिप्रण्य:,—प्रण्यम्,—प्रण्यौ—प्रणय:,—प्रण्या—प्रणीभ्याम् इत्यादि । Q. Distinguish between स्मित and हसित । Ans :—ईषत् 'विकासि नयनम् स्मितं स्यात् स्पन्दिताधरम् । किञ्चिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः ।" दर्पणः । Q. Show the propriety of सदातनी । Ans : See above. Q. Conjugate the root of जिह्रपयन्ती as causative and original in लट् । and account for the causative form Ans : जिह्रेति जिह्रीत: जिह्रियति &c. for causative form "अर्त्ति ह्री व्ली-री क्नूयी क्ष्मायी-आताम् पुक् णौ ।" इति पुगागमात् ह्रेपि इति सिद्धम् । Q. Show the force of अपि in भुञ्जन्तोऽपि । Ans : See above. ६५ ६६ ।

67. Principal sentence :—(1) त्वम् (कर्त्तृ) एतत् (कर्म) केन (विश) हेतुना (हेतौ ट) अध्यै: । (2) वद (त्वम्) । Adj. to त्वं—हृदयङ्गममूर्त्ति:, कुर्व्वाणा । वनं—कुर्व्वाणा इत्यस्य कर्मपदम् । Adj. to वनम्—सुभगम्भावुकं, भीमम् ।

Prose order :—हृदयङ्गममूर्त्तिः, भीममपि वनं सुभगम्भावुकं कुर्व्वाणा त्वं केन हेतुना एतत् अर्थ्यः वद।

Substance :—दर्शनप्रदानेन मानसम् अपहरन्ती, अप्रियमप्येतत् वनम् भैस्माकं प्रियं करोषि भीषणमेतत् अरण्यं कथं प्राप्तासि तत् कथमर्हसि।

Explanation in tika form :—लावण्यात् हृदयं गच्छतीति हृदयङ्गमा मनोहारिणी। "गमश्च" इति सूत्रेण उपपदे गम् धातोः खच्। सा च मूर्त्तिराकृतिर्यस्याः सा हृदयङ्गममूर्त्तिः। तथा भीमं भयानकमपि "दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्" इत्यमरः। अत्र अपि शब्देन भीषणत्वम् अविगमय्य इति सूच्यते। वनं सुभगम्भावुकं सर्व्वस्यैव पूर्व्वम् अप्रियं पश्चात् तु प्रियं कुर्व्वाणा विदधाना "कर्त्तरि भुवः खिष्णुच् खुकञौ"* इति खुकञ्। त्वं केन हेतुना, सर्व्वनाम्नः हेतु शब्दस्य च प्रयोगे, हेतौ द्योत्ये तृतीया, पक्षे षष्ठी। कथम् एतत् वनम् अर्थ्यः अभिगतासि। अभिपूर्व्वादिणो लङि मध्यमपुरुषैकवचने। इति वद कथय मानुषीयते किमपि कारणं येन भयावहमेतत् वनम् त्वम् आगमनेन मनोहारि कृतवती इति भावः। इदं पद्यावलम्।

Change of V.—मूर्त्त्या त्वया कुर्व्वाणया अर्थ्यत उच्यताम्।

Derivation :—हृदयङ्गम—हृदय-गम-खच्। मूर्त्ति—मूर्छ-क्तिः। सुभगम्भावुकम्—सुभग-भू-खुकञ्। कुर्व्वाणा—कृ-शानच्। अर्थ्यः—अभि इण-लङ् स। लुङ्—अमात्।

তোমার আকৃতি অতিশয় মনোরম। যে বন সকলের অপ্রিয় তাহাকে তোমার আগমন প্রিয় করিয়া তুলিয়াছে। এই ভীষণ বনে কি কারণে উপস্থিত হইয়াছ?

Having a form, that wins hearts, tell me, for what reason didst thou come to this forest, rendering it though fierce, charming.

---

* Instead of च्वि, there take place खिष्णुच् (इष्णु) and खुकञ् (उक) after भू, in the active voice, in the general sense of च्वि (अभूततद्भावार्थे); भू being preceded by आढ्य, सुभग, स्थूल, पलित &c. Thus सुभगम्भविष्णु, सुभगम्भावुकम्।

सुकृतं प्रियकारी त्वं कं रहस्युपतिष्ठसे ।
पुण्यकृच्चाटुकारस्ते किङ्करः सुरतेषु कः ॥ ६८ ॥

Q. Give the meaning of सुभ[illegible]कम् । Ans : See above. Q. Comment grammatically on हेतुना । Ans. "षष्ठी हेतुप्रयोगे" इति हेतुशब्दप्रयोगे षष्ठी विधीयते । तत् कथमत्र तृतीया इत्यत आह, "सर्व्वनाम्नः तृतीया च" सर्व्वनाम्नः हेतुशब्दस्य च प्रयोगे हितौ च द्योत्ये तृतीया स्यात्, षष्ठी च । अतः कस्य हेतोः इत्यपि स्यात् । Q. Derive मूर्त्ति । Ans : See above. Q. What part of the verb is अभ्यैः । Ans :— अभि इत्यस्मात् अदादिगणीय इण धातुः । ६७ ।

68. Principal sentence :— (1) त्वं (कर्त्तृ) कं (कर्म) रहसि (अधिकरणम्) उपतिष्ठसे । सुकृतं – Adj. to कं । प्रियकारी-Adj. to त्वम् । (2) कः (कर्त्तृ) सुरतेषु (विषयाधिकरणम्) ते (सम्बन्धे षष्ठी). किङ्करः (विधेयविशेषणम्) । Adj. to कः—पुण्यकृत् and चाटुकारः ।

Prose order :—त्वं प्रियकारी (सती) कं सुकृतं रहसि उपतिष्ठसे । पुण्यकृत् कः ते सुरतेषु चाटुकारः किङ्करः (भवति)

Substance.—कोऽसौ पुण्यवान् येन सह त्वम् अनुकूलम् आचरन्ती रहसि मिलितुं वाञ्छसि, यश्च क्रीड़ासु तव आज्ञां पालयन् किङ्करः भवितुम् इच्छति ।

Explanation in tika form :—त्वं, प्रियम् अनुकूलं करोतीति प्रियकारी अनुकूलवर्त्तिनी सती "क्षेमप्रियमद्रेऽण् च *" इति अण् पक्षे प्रियकरी, स्त्रियाम् ङीप् । कं, शोभनं कृतवान् इति सुकृत् तं सुकृतं पुण्यकारिणं पुरुषं "सुकर्म्मपापमन्त्रपुण्येषु कृञः" इति अतीते क्विप् । रहसि विजने उपतिष्ठसे सङ्गच्छसि उपश्लिष्यसि इत्यर्थः । "उपाद्देवपूजा सङ्गतिकरण मित्रकरण पथिष्विति वाच्यम्" इति सङ्गतकरणे (मिलने) उपात् स्थाधातोः आत्मनेपदम् । पुण्यकृत् कृतपुण्यः । पूर्व्ववत् क्विप् । कः ते तव सुरतेषु शोभनरतेषु । नपुंसके

---

* अण् and खच् take place after कृ preceded by क्षेम, प्रिय and मद्र । Thus क्षेमङ्करः, क्षेमकारः । मद्र—कर्म, मद्रकं ।

परिपश्चुदधेकुपमा द्युलोकाच दुर्लभम् ।
भावत्कं रूपवत्स्वेतदस्मास्वधि सुजीवितम् ॥ ६९ ॥

भावे क्तः । चाटुकारः प्रियवाक्यकारो किङ्करः दासः भवतीति शेषः । त्रिषा लिङ्गादिना अन्वयः । अनेन उभयरविरासाता । इत्थं पञ्चावकतम् ।

Change of V.—त्वया प्रियकार्या कः सुकृत् उपस्थीयते । पुण्यकृता चाटुकारेण किङ्करेण केन (भूयते)।

Derivation.—सुकृतम्—सु-कृ-क्विप । प्रियकारी—प्रिय कृ-णच् स्त्रीत्वा-टीप् । पुण्यकृत्—पुण्य-कृ-क्विप् । चाटुकारः—चाटु-कृ-अण् । किङ्करः—किम्-कृ-टः । सुरत—सु-रम-भावे क्तः ।

আপনি অনুকূল হইয়া কোন পুণ্যবান্ ব্যক্তির সহিত নির্জনে সঙ্গত হয়েন ও কোন ভাগ্যবান ব্যক্তিই বা সুরতক্রীড়ায় আপনার আদেশবর্ত্তী কিঙ্কর ?

Who is that blessed one, whom thou dost meet in secret, doing him an act of grace ? Who is that lucky being that ministering to dalliances' flatters thee.

Q. In what tense is used क्विप् in पुण्यकृत् । Ans : भूत अतीते क्विप्, अतः पुण्यं करोति करिष्यति वा इत्यत्र न क्विप् । Q. Account for आत्मनेपद in उपतिष्ठते । Ans : See above. Q. Show the fitness of किङ्करः । Ans : किम् कुत्सितं करोति इति किङ्करः । यस्तु क्रीड़ासक्तः रागाद्रक् विमुग्धः यत् आज्ञप्तः कुत्सितमपि आचरितुम् न कदर्थ्यत् पराङ्मुखः भवेत् इति गम्यार्थः । ६८ ।

69. See prose-order and qustions below.

Prose order :—उदधेः पारिपार्श्वे, या द्युलोकाच दुर्लभम् एतत् भावत्कं रूपं इष्टवत्सु अस्मासु अधि सुजीवितम् ।

Substance :—धन्याः वयं यत् तव रूपं दृष्टवन्तः । यथाहि ते वपुः सागरभुवम् आनाकच दुर्लभं दुर्लभम् इति ।

Explanation in tika form :—परीति । उदधेः परि परि उदधिं

वर्ज्जयित्वा "परेर्वर्ज्जने" इति वर्ज्जनार्थे द्विर्वचनम्। चतुरुदधिमेखलायां पृथिव्यां दुर्लभम् इत्यर्थः। समुद्रे लक्ष्म्या उत्पत्तिः, तत्रैव तत्सदृशी नान्यत्र इति भावः। "अपपरिवहिरञ्चवः पञ्चम्याः" इति वैकल्पिकसमासत्वात् समासाभावपक्षे "पञ्चम्यपाङ्परिभिः" इति उदधेरित्यत्र पञ्चमी। आ धुलोकात् स्वर्गलोकपर्य्यन्तम् पदद्वयञ्चैतत्। "आङ्मर्य्यादाभिविध्योः" इति समासस्य विभाषितत्वात् पूर्व्ववत् पञ्चमी। दुर्लभं दुष्प्रापम् एतत्, भवत्या इदं भावत्कं भवदीयं "भवतष्ठक्छसौ" इयि ठक्। रूपं सौन्दर्य्यं दृष्टवतसु अस्मासु अधि सुजीवितं अस्मद्विषये आधिक्येन सुजीवितं। यद्वा अधी सुजीवितमिति अधी शब्दार्थे अधिशब्दो वर्त्तते। तथात्वे अस्मासु इत्यत्र विषये सप्तमी। अथवा "अधिरीश्वरे" इति स्वाम्यर्थेनाधिना च योगे सप्तमी, अस्मत्स्वामिकं सुजीवितमित्यर्थः। त्वामपश्यतान् तन्नास्तीति भावः।

Change of V.—No change—as सुजीवितम् is a nominative absolute.

Derivation :—उदधि—उदक-धा-कि:। दुर्लभम्—दुर्-लभ-कर्म्मणि खल्। भावत्कम्-भवती-ठक्।

সমুদ্র ব্যতিরিক্ত স্বর্গ পর্য্যন্ত সর্ব্বত্র আপনার রূপের সাদৃশ্য নাই। আপনার রূপ প্রত্যক্ষ করিয়া জীবন ধন্য হইল।

How commendable is our blessed life to have seen thy beauty nowhere else to be found as far as the celestial regions excepting the sea.

Q. Parse परि and account for the double form. Ans: "अपपरीवर्ज्जने" इति वर्ज्जनार्थे परि इत्यस्य कर्म्मप्रवचनीयसंज्ञा। Q. "परेर्वर्ज्जने" इति वर्ज्जनार्थे 'परि' इत्यस्य च द्वित्वम्। What do you uuderstand by the term कर्म्मप्रवचनीयसंज्ञा। Ans: कर्म क्रियां प्रोक्तवन्त इति कर्म्मप्रवचनीयाः। संप्रति क्रियां न कथयन्ति नापि द्योतयन्ति अथोक्तं हरिणा—"क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः। नापि क्रियापदापेक्षी सम्बन्धस्य तु भेदकः" इति। Q. Account for

प्रपीतमधुका भृङ्गैः सुदिवेवारविन्दिनी।
सत्परिमललक्ष्मीका नापुंस्कासीति मे मतिः॥ ७० ॥

the case affix in उदधेः, द्युलोकात् and अवाम्। Ans: See above, Q. Can you compound the two words परि and उदधि? Ans; पर्युदधि इति वैकल्पिक अव्ययीभावसमासः स्यात्। ६९

70. Principal part:—इति मे मतिः (भवति)। Sub sentence—अरविन्दिनी (उपमानकर्तृपदम्) इव (त्वं) त्वं न असि। Adj. to त्वम्—सत्परिमललक्ष्मीका and अपुंस्का। Adj. to अरविन्दिनी—प्रपीत मधुका &c. सुदिवा—अव्ययम्। भृङ्गैः—प्रपीत इत्यस्य अनुक्तकर्तृपदम्।

Prose order:—भृङ्गैः प्रपीतमधुका सुदिवा अरविन्दिनी इव सत्परिमललक्ष्मीका त्वं न अपुंस्कासि इति मे मतिः।

Substance:—मेघादिनिर्मुक्ते दिवसे सुशोभिता, मधुकरैः उपभुक्ता च पद्मिनी सौगन्ध्यं वितनोति धारयति च शोभां, तथा त्वमपि। अतएव मन्ये इह त्वं कदापि पतिहीना न।

Explanation in tika form:—प्रपीतेति। भृङ्गैः मधुकरैः प्रपीतं आपीतं मधु पुष्परसः, "मधु मद्ये पुष्परसे क्षौद्रेऽपि" इत्यमरः, यस्याः सा। "शेषाद्विभाषा" इति कप्। तथा शोभनं नीहारादिरहितं दिवा दिनं यस्याः सा सुदिवा "सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरश्र-एणीपद-अजपद-प्रोष्ठपदाः" इति निपातनात् समासान्तः अच् प्रत्ययः। अथवा शोभने दिवसे इति सुदिवा पदम् सप्तम्यन्तम् अव्ययम्। अरविन्दिनी पद्मिनीव, परिमलस्य लक्ष्मी सौरभ्यस्य। "विमर्द्दोत्थे परिमलो गन्धे जनमनोहरे" इति कोषः। पद्मिनी-पक्षे सुगन्धस्य। लक्ष्मीः सम्पत्, शोभा। परिमललक्ष्मीः यस्यास्तादृशी, "उरः प्रभृतिभ्यः कप्। त्वं, न विद्यते पुमान् यस्याः सा अपुंस्का, अविद्यमानभर्तृका। पूर्ववत् कप्। नासीति मे मतिः इति मे निश्चयः। अभिलाषो वा। भवतीति शेषः। इत्थंभूता त्वं ईदृशी नारी न कुत्रापि पतिहीना स्यात् इति भावः। अयं पथ्यात्मकम्।

मिथ्यैव श्रीः श्रियम्मन्या श्रीमन्मन्यो मृषा हरिः।
साक्षात्कृत्याभिमन्येऽहं त्वां हरन्तीं श्रियं श्रियः॥ ७१॥

Change of voice:—प्रपीतमधुकया सुदिवया अरविन्दिन्या इव सत्परिमललक्ष्मीकया अपुंस्कया न भूयते त्वया, इति मे मत्या भूयते।

Derivation:—प्रपीत—प्र, पा कर्मणि क्तः। लुङ्—अपात्। अरविन्दिनी—अरविन्द-इन्, स्त्रीत्वादीप्। परिमल—परि-मल-कल। लक्ष्मी—लक्ष (चुरादिः) ईप्रत्ययः मुडागमश्च। अपुंस्का—न-पुमस्-कप्।

আপনি সুনির্ম্মল দিবসে ভৃঙ্গ কর্ত্তৃক প্রপীতমধু পদ্মিনীর ন্যায় পরিমল বিশিষ্টা। আপনি ভর্ত্তৃবিরহিতা নহেন, ইহা আমার প্রতীতি হইতেছে।

Looking more beautiful after coetion, like the collection of lotuses during a bright day, their honey having been drunk up by the black bees, thou art not, methinks, without a man.

Q. Give the meaning of सत्परिमललक्ष्मीकां। Ans: सती वर्त्तमाना परिमललक्ष्मीः अनुलिप्तगन्धसम्पत्तिः यस्याः सा। अथवा परिमलश्च लक्ष्मीः शोभा च परिमललक्ष्म्यौ, ते यस्याः सा, सौगन्धकान्तियुक्ता इत्यर्थः। अथवा परिमलः सम्भोगः, "सम्भोगः स्यात् परिमले।" इति वैजयन्ती। यथा किराते "अथ परिमलजामवाप्य लक्ष्मीम्।" सम्भोगात् स्त्रियः शोभमं इति मल्लिनाथः। सम्भोगजनिता लक्ष्मीः परिमललक्ष्मीः, सा विद्यते अस्याः इति। Q. Give the meaning of मति। Ans: See above. Q. Parse सुदिवा। Ans: अरविन्दिनी इत्यस्य विशेषणम्। अथवा सप्तम्यन्तमव्ययम्। अधिकरणे सप्तमी। Q. For which gram. peculiarity is the sloka intended? Ans: It contains illustrations of कप्। as in मधुका, लक्ष्मीका, अपुंस्का। ७०

71. Principal part:—त्वां साक्षात्कृत्य अहम् अभिमन्ये। Adjunct of त्वाम्—श्रियः (सम्बन्ध पदम्) श्रियं (कर्म) हरन्तीम्। Sub

sentences (1) श्रीः (कर्त्री) भवति। Adj. to श्रीः—प्रियम्मन्या। (2) हरिः (कर्त्ता) भवति। Adj. to हरि—श्रीमन्मन्यः।

Prose order :—श्रियः श्रियं हरन्तीं त्वां साक्षात्कृत्य अहम् (एवम्) अभिमन्ये, श्रीः मिथ्या एव प्रियम्मन्या, (तथा) हरिः मुधा श्रीमन्मन्यः।

Substance :—लक्ष्मीः चिन्तयति यथा तस्याः एव श्रीः विद्यते नान्यस्याः। त्वं लक्ष्मीम् देहकान्त्या अतिक्रम्य वर्त्तसे अतः तस्याः तादृक् आत्माभिमानित्वं मिथ्या एव। हरिश्च चिन्तयति यथा स श्रियः स्वामी। तच्च मिथ्या। यतः त्वम् एव पतिः श्रीपतिः इति।

Explanation in tika form :—मिथ्येति। श्रियः लक्ष्म्याः श्रियं रूपसम्पदं "सम्पत्तिः श्रीश्च लक्ष्मीश्च" इति कोषः।' हरन्तीम् अभिभवन्तीं देहकान्त्या लक्ष्मीमपि अतिक्रम्य वर्त्तमानाम् इत्यर्थः। त्वां साक्षात्-कृत्य प्रत्यक्षीकृत्य, 'साक्षात् इत्यनेन करोतेः गति समासे, "समासे अनञ् पूर्व्वे क्त्वो ल्यप्" इति 'क्त्वा' इत्यस्य ल्यप आदेशः। अहम् अभिमन्ये विवेचयामि, यत् श्रीः लक्ष्मीः मिथ्यैव प्रियम्मन्या, अहमेव श्रीः नान्या इति मन्यमाना "आत्ममाने खश्च" इति खश्। वस्तुतस्तु त्वमेव श्रीः तदीयश्रीमाहरणात्। तथा हरिः विष्णुः मुधा वृथा श्रीमन्मन्यः आत्मानं श्रीमन्तं मन्यमानः, पूर्व्ववत् खश्। यस्यैव त्वं स एव श्रीमान् इत्यर्थः। यतस्तु लक्ष्म्याः लक्ष्मीत्वम् अपहरसि, अतः त्वमेव श्रीः, तव स्वामी च श्रीमान् इति भावः। इत्तं पथ्यावक्त्रम्।

Change of voice :—श्रिया प्रियम्मन्यया (भूयते); श्रीमन्मन्येन हरिणा (भूयते) अभिमन्यते मया।

Derivation :—श्रीः—श्रि क्विप्। प्रियम्मन्या-श्री-मन्-खश्। श्रीमन्मन्यः—श्रीमत्-मन्-खश्। हरिः—हृ-इः। साक्षात्कृत्य—साक्षात्-कृ-ल्यप्। अभिमन्ये—अभि मन्-लट् ए। हरन्तीम्—हृ-शतृ-स्त्रीत्वात् ङीप्। मुधा—अव्ययम्, अहत।

লক্ষ্মীর রূপ আপনি হরণ করিয়াছেন দেখিয়া আমার বিবেচনা হয় যে লক্ষ্মী বৃথা আপনাকে রূপশালিনী বলিয়া গর্ব্ব করেন। হরি বৃথা আপনাকে লক্ষ্মীবান্ বিবেচনা করেন।

मोदकण्ठिष्यतात्यर्थं त्वामैक्षिष्यत चेत् स्मरः ।
खेलायन्ननिशं नापि सजूःकृत्य रतिं वसेत् ॥ ७२ ॥

Looking to thee who hast robbed Lakṣmi of her grace, I think that Laksmi does in vain deem herself the paragon of beauty, and Vishnu does think to no purpose that he has Laksmi with him.

Q. Account for ल्यप् in साचात्कृत्य Ans : See above. Q. Derive श्रीः । Ans : श्रिधातोः क्विप् । Q. Comment gram. On श्रियम्मन्या and श्रीमन्मन्यः । Ans : See above. Q. Give the derivative meaning of हरिः, and its synonyms. Ans : हरति मानसम् इति हरिः । हृधातोः इः । "यमानिलेन्द्रचन्द्रार्क-विष्णु सिंहांशु वाजिषु शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ।" । इत्यमरः । ७१

72. Principal Sentences :—(1) स्मरः (कर्त्तृपदम्) अत्यर्थं (क्रि विण) न उदकण्ठिष्यत । Subordinate to (1) त्वाम् (कर्म्मपदम्) चेत् (त्वं) ऐक्षिष्यत । (2) रतिं सजूःकृत्य नापि वसेत (स्मरः) । Adj.to स्मर—खेलायन् । अनिशम्—कालम् इति ऊह्यपदस्य विशेषणम् । (कालाध्व इति व्याप्तौ द्वितीया)

Prose order :—स्मरः चेत् त्वाम् ऐक्षिष्यत (तदा) अत्यर्थं न उदकण्ठिष्यत । रतिं सजूःकृत्य अनिशं खेलायन् नापि वसेत् ।

Substance :—रतिं प्रति भृशम् आसक्तोऽपि कन्दर्पः त्वां पश्यन् तस्याः ध्रुवं विरक्तः स्यात्, तथा तया सह सन्ततं क्रीडन्न च तव दर्शनात् परं तां निश्चितं परित्यजेत् इति ।

Explanation in tika form :—स्मरभार्य्या० रतिः सापि रूपेण निकृष्टेति प्रदर्शयन्नाह मोदेत्यादि । स्मरः कामः चेत् यदि त्वाम् ऐक्षिष्यत यदि त्वं दृष्टा अभविष्यत् तदा अत्यर्थं न उदकण्ठिष्यत रतिं प्रति भृशम् उत्कण्ठितो नाभविष्यत । उभयत्र "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" [हेतुहेतुमद्भावादि लिङ्-निमित्तं, तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम्*] इति

* Where there is a reason such as the relation of cause and effect, for affixing विधिलिङ्, there let लृङ् be

क्रियातिपत्तौ लृङ्। तथा रतिं स्वभार्य्यां सहाय्यीकृत्यम्, सहायार्थे वर्त्तते। सज्जूःकृत्य सहायीकृत्य, अनिशं नास्ति निशा चेष्टाविघातः यस्मिन् स अनिशः कालः तम् व्याप्य निरन्तरमित्यर्थः। खेलायन् क्रीड़न्, खेला विलासे इति खेला इत्यस्मात् कण्ड्वादित्वात् यक्। नापि वसेत् अपितु तां परित्यजेदेव। यदि त्वां पश्येत् इति हेतुपदमत्र बोध्यम्, हेतुहेतुमद्भावदर्शनात्। 'हेतुहेतुमतो-र्लिङ्' † इति लिङ्। त्वं खलु देहकान्त्या रतिमपि अतिक्रम्य वर्त्तसे इति भावः। उपमानात् उपमेयस्य आधिक्ये व्यतिरेकालङ्कारः। तथोक्तम्, "आधिक्यम् उपमेयस्य उपमानात् न्यूनताथवा व्यतिरेकः।" वृत्तं पथ्यावक्त्रम्।

Change of V :—त्वं ऐक्षिष्यथाः स्मरेण। खेलायता। उष्येत।

Derivation.—उदकण्ठिष्यत—उत्-कण्ठ-(कठिङ् आध्याने) लृङ्-स्यत। लट् उत्कण्ठते। ऐक्षिष्यत—ईक्ष-लृङ् स्यत। स्मरः—स्मृ-अप्। खेलायन् (खेला-यक) खेलाय शतृ। सज्जूःकृत्य—सजूस्-कृ-ल्यप्। वसेत्—वस-लिङ् यात्, लृङ्—अवत्स्यत्।

রতিপতি স্মর যদ্যপি আপনাকে নয়নগোচর করিতেন তাহা হইলে কখনই রতির নিমিত্ত উৎকণ্ঠিত হইতেন না, অথবা রতির সহিত নিরন্তর ক্রীড়া করতঃ একত্রে বাস করিতেন না।

If Cupid had seen thee, he would not have been envious for Rati, nor would he live sporting with her, day and night.

Q. **What is the samas in** सज्जूःकृत्य। Ans : "ऊर्य्यादि च्वि डाचश्च" ** इति सजुस्शब्दस्य ऊर्य्यादिपाठे गतिसंज्ञत्वात् अत्र गति-

---

affixed when the noncompletion of the action is to be understood.

† When condition and consequent are spoken of लिङ् may optionally be the affix.

** Let the term गति be applied to such words as ऊरी सजुस and the like, and those that end with च्वि and those that end with डाच। Thus : ऊरीकृत्य, सजूःकृत्य। च्वि—शुक्लीकृत्य। डाच,—पटपटाकृत्य।

वल्गूयन्तीं विलोक्य त्वां स्त्री न मन्तूयतीह का ।
कान्तिं नाभिमनायेत को वा स्थाणुसमोऽपि ते ॥ ७३ ॥

समास: । Q. Account for ल्यप् in सञ्:क्रम्य । Ans : नञ् मति-समासात् "समासे ऽनञ् पूर्वे क्त्वो ल्यप्" इति ल्यप् । Q. Explain the application of ल्ङ् in उदक्षिप्यत । Ans : See above. ७१ ।

73. Principal sentences :—(1) इह (व्यं) का (विष) स्त्री (कर्तृपदम्) न मन्तूयति । विलोक्य—incomplete verb. वल्गूयन्तीम्—Adj. to त्वाम् (कर्म) (2) क: (कर्तृ) वा (व्यं) ते (सम्बन्ध-पदम) कान्तिं (कर्म) न अभिमनायेत । Adj. to क:—स्थाणुसम: ।

Prose order :—इह का स्त्री वल्गूयन्तीं त्वां विलोक्य न मन्तूयति । को वा स्थाणुसमोऽपि ते कान्तिं न अभिमनायेत ।

Substance :—अस्मिन् जगति का नारी विद्यते या त्वाम् सुशोभितम् अवलोक्य न असूयति । कश्च स पुरुष: य: काष्ठवत् नीरसोऽपि, अथवा महादेव-सदृश: जितेन्द्रियोऽपि तव रूपं विलोक्य प्रीतमना: न भवेत् इति ।

Explanation in tika form:—इह जगति का स्त्री वल्गूयन्ती शोभामाधुर्ययुक्ता, वल्गु पूजामाधुर्ययो: इति वल्गुधातो: कण्ड्वादित्वात यक् । त्वां विलोक्य न मन्तूयति न ईर्ष्यति, स्वपतिवैराग्यशङ्कया सर्व्वैव कुप्यतीत्यर्थ: । मन्तु अपराधे रोषे वा इति मन्तुधातो: कण्ड्वादित्वात् यक् । को वा स्थाणुसमोऽपि महादेववत् जितेन्द्रियोऽपि काष्ठवत् नीरसोऽपि वा, "स्थाणु: शाखादिभि: शून्ये हरे शर्व्वे स्थिरेऽपि च" इति मेदिनी: । तव कान्तिं विलोक्य न अभिमनायेत पूर्व्वम् अदृष्टत्वात् अनभिमना: सन् अभिमना: प्रीतमना: भवेत् । अभिमनसो भृशादित्वात् क्यङ् सलोपश्च । असम्भावने लिङ् : प्रश्न पद्यार्थकम् ।

Change of V.—कया स्त्रिया मन्तूयते । कान्ति: न अभिमनायित केन वा स्थाणुसमेन ।

Derivation :—वल्गूयन्ती—(वल्गु-यक्) वल्गूय शतृ-उगितश्चेति ङीप् । स्त्री—स्त्यै-ड्रट्-ङीप् । अभिमनायेत—(अभिमनस्-क्यङ्) अभिमनाय लिङ् ईत । स्थाणु—स्था-नु: ।

दुःखायते जनः सर्व्वः स एवैकः सुखायते।
यस्योत्सुकायमाना त्वं न प्रतीपायसेऽन्तिके॥ ৭৪॥

আপনি পরম শোভাশালিনী, আপনাকে দর্শন করিয়া এই জগতে কোন স্ত্রী ঈর্ষা না করে? কোন ব্যক্তি কাষ্ঠবৎ নীরস (মহাদেব সদৃশ জিতেন্দ্রিয়) হইয়াও আপনার অপরূপ সৌন্দর্য্য দেখিয়া প্রীত না হয়।

Seeing thee brightening in beauties what woman here does not 'rave' with jealousy? What man, be he as insensible as a piece of dry wood, would not have a heart to appreciate thy beauty.

Q. Explain the force of अपि in स्थाणुसमोऽपि। Ans: शुष्ककाष्ठ इव नीरसः जनः सरसतामापादयितुम् अक्षमः, स च तथाभूतः एव शोभाशालिनीं त्वामनुभवति इति अपि शब्देन गम्यते। Q. To what class of verbs do the roots of वल्गयन्ती, & मन्तूयति belong? Ans: The roots वल्गु and मन्तु belong to कण्ड्वादि। Q. Name some roots that are used as nouns also. Ans: It is कण्ड्वादि। द्विधा हि कण्ड्वादयः, धातवः प्रातिपदिकानि च। ৭৩।

74. Principal sentence:—(1) जनः (कर्त्तृ) दुःखायते। Adj. to जनः—सर्व्वः। (2) सः (कर्त्तृ) सुखायते। एकः—Adj. to सः। Sub sentence to (2) यस्य (सम्ब) अन्तिके (अधिकरणम्) त्वं (कर्त्तृ) न प्रतीपायसे। Adj. to त्वम्—उत्सुकायमाना।

Prose order:—यस्य अन्तिके त्वम् उत्सुकायमाना (सती) न प्रतीपायसे स एव एकः सुखायते; (अन्यः) सर्व्वः जनः दुःखायते।

Substance:—स एव एकः सुखी भवति यस्मिन् त्वम् आसक्ता सती सततम् अनुकूला। अपरे तु सर्व्वे दुःखं परमम् अनुभवन्ति इति।

Explanation in tika form:—यस्य अन्तिके समीपे त्वम् उत्सुकायमाना उत्कायमाना उत्सुका सती इति यावत्, न प्रतीपायसे न प्रतिकूलवर्त्तिनी भवसि, स एव एकः जनः इह जगति सुखायते सुखमनुभवति अन्यः

कः पण्डितायमानस्त्वामादायामिषसन्निभाम् ।
त्रस्यन् वैरायमाणेभ्यः शून्यमन्ववसद्वनम् ॥ ७५ ॥

सर्व्वः जनः दुःखायते दुःखं वेदयते । यस्मिन् अनुकूलताम् आचरसि, स एव सुखी, अन्यथा दुःखी इत्यर्थः । उत्सुकप्रतीपशब्दाभ्यां भृशादित्वात् क्यङ् । केचित् प्रतीपशब्दात् "कर्त्तुः क्यङ् सलोपश्च" इति आचारे क्यङ् इत्याहुः । सुखदुःखाभ्यां तु "सुखादिभ्यः कर्त्तृवेदनायाम्" * इति क्यङ् । केचित् सुखदुःखयोस्तदात्वेऽपि वर्त्तमानात् असुखः सुखः भवति, अदुःखः दुःखः भवतीत्यर्थे च्वि, क्यङ् च इति आहुः । वृत्तं पथ्यावक्त्रम् ।

Change of V.—दुःखाय्यते अनेन सर्व्वेण तेन एकेन सुखाय्यते । उत्सुकायमानया त्वया प्रतीपाय्यते ।

Derivation :—दुःखायते—(दुःख-क्यङ्) लट् ते । उत्सुकायमाना—(उत्सुक क्यङ्) उत्सुकाय-शानच् । प्रतीपायसि—(प्रतीप-क्यङ्) प्रतीपाय, लट् सि ।

যাহার জন্য তুমি উৎসুক হইয়া তাহার নিকটে প্রতিকূলতা আচরণ কর না সেই সুখী । অন্য ব্যক্তি দুঃখী ।

He alone feels happy for whom art thou anxious and dost not oppose his will when near. The rest are miserable.

Q. Account for the formation of सुखायते and दुःखायते । Ans : See above. Q. why is सर्व्व used in the singular number ? Ans : बहुत्वबोधकः सर्व्वशब्दः बहुवचनेषु इव एकवचनेऽपि प्रयुज्यते इति एकवचनत्वम् । अत्र तु विशेष्यपदस्य एकवचनतया तद्विशेषणस्यापि एकवचनत्वम् । ७४ ।

75.. Principal part :—कः (कर्त्तृ) वनम् (कर्म्म) अन्ववसत् । Adj. to कः—पण्डितायमानः and त्रसन् । वैरायमाणेभ्यः—भीवांयांना

* In forming nominal verbs, क्यङ (य) comes after सुख and दुःख, if happiness or sorrow be intended to be felt by the agent.

भयहेतुः इति पञ्चमी। त्वाम्—आदाय इत्यस्य कर्म्म। Adj. to त्वाम्—आमिष-सन्निभाम्। Adj.to वनम्—शून्यम्।

Prose order :—पण्डितायमानः कः वैरायमाणेभ्यः त्रसन् आमिष-सन्निभां त्वाम् आदाय शून्यं वनम् अन्ववसत्।

Substance :—त्वामरण्यमानीय तव पतिः अतीव दूरदर्शित्वं प्रकटित-वान इति मे प्रतिभाति। त्वं सर्व्वेषां चित्तम् आकर्षन्ती तस्य मनसि भयं जनितवती यथा बहवः त्वत्कृते वैरायितारः इति।

Explanation in tika form :—अपण्डितः सन् कथमपि पण्डितः भवन् पण्डितायमानः "भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः"* इति क्यङ्। कः जनः वैरायमाणेभ्यः वैरं कुर्व्वाणेभ्यः त्रसन् बिभ्यत् शत्रुभयाभावे एवं कर्त्तुमनुचित-मिति भावः। "शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे"** इति क्यङ्। "भीत्रा-र्थानां भयहेतुः" इति वैरायमाणेभ्यः इत्यत्र पञ्चमी। आमिषेण लोभ्यद्रव्येण तु सदृशीं आमिषतुल्यां (नित्यसमासः) लोभ्यद्रव्यतुल्यां "आमिषं पलले लोभ्ये सम्भोगोत्करयोरपि" इति विश्वः। त्वाम् आदाय गृहीत्वा शून्यं विजनं वनं अन्व-वसत् अधिष्ठितः। "उपान्वध्याङ् वसः" इति अधिकरणस्य कर्म्मसंज्ञा। भिया लोकदृष्टिं परिहाय अरण्यं समाश्रित्य त्वया सह वसति इत्यर्थः। उपमालङ्कारः। वृत्तं पथ्यावक्त्रम्।

Change of V.—केन पण्डितायमानेन त्रसता अन्वोष्यत।

Derivation.—पण्डितायमानः—पण्डितः-क्यङ्-शानच्। आमिष—अम-टिषच् "अमेर्दीर्घश्च" इति दीर्घः। त्रसन्—त्रस्-शतृ। वैरायमाणेभ्यः—(वैर क्यङ्) वैराय-शानच्। अन्ववसत्—अनु-वस-लङ् द। लुङ् अवात्सीत्।

* भृश &c signifying what had not previous existence take क्यङ् (य and आत्मनेपद) in the sense of being so. The consonant at the end elide (लोप). Thus: अपण्डितः पण्डितो भवति पण्डितायते। असुमनाः (सुमनस्-शब्द) सुमनाः भवति सुमनायते।

** क्यङ् comes after शब्द वैर कलह अभ्र कण्व and मेघ in the sense of 'causing'. Thus वैरं करोति वैरायते।

भीजायमाना तस्यार्घं प्रणीय जनकात्मजा ।
उवाच दग्रमूर्द्धानं सादरा गद्गदं वच: ॥ ७६ ॥

তুমি আমিষবৎ লোভনীয়। কোন ব্যক্তি বহুদর্শিতা প্রদর্শন করিয়া, লোকে শত্রুতাচরণ করিবে এই ভয়ে তোমাকে নির্জ্জন বনে আনিয়া বাস করিতেছে ?

Who is he that acting wisely has taken his abode in this lonely orest taking thee, that art as covetable as an article of food, 'feating adverse persons'.

Q, Account for the case affix in वैरायमाणेभ्य: । Ans : See above. Q. Give some synonyms of आमिष । Ans : "भिष सग्राम नीवाम प्रतीकाशोपमादय:" । Q. Conjugate स in लङ and लट first person. Ans : अवासीत् अवसीत् । लट् "वसन्ति अवयो यस्मात् वसन्ति परदारगा: ।" इति कविरहस्यम् । Q. Conjugate दा with the prefix आ in लट् । Ans : आदत्ते आददाते आददते &c । "आङोदोऽनास्यविहरणे" इति आत्मनेपदम् । Q Show the significance of युग्मम् । Ans : श्लोकद्वयं परित्राय अवस्थितमित्यर्थ: । अन्यथा श्लोकद्वया वैरसम्यव: इति । ७५ ।

76. Principal sentence :—जनकात्मजा (कर्त्री) दग्रपूर्द्धानं गौण कर्म) वच: (मुख्य कर्म) उवाच । Adj. to जनकात्मजा—भीजायमाना and सादरा । Adj. to वच:—गद्गदम् । प्रणीय—incomplete verb. अर्घ्यम्—प्रणीय इत्यस्य कर्म । तस्य—शेष विवक्षा ।

Prose order :—भीजायमाना जनकात्मजा सादरा (सती) तस्य अर्घ्यं प्रणीय दग्रमूर्द्धानं गद्गदं वच: उवाच ।

Substance :—अथ सीता ईषत् लज्जाशीला इव आचरन्ती रावणाय अर्घ्यं दत्वा सादरम् अस्फुटं वचनमब्रवीत् ।

Explanation in tika form :—किञ्चित्लज्जापरित्यागात् भीजाकिनीव आचरन्ती भीजायमाना तेजस्विनी "कर्त्तु: क्यङ् सलोपश्च" इति क्यङ् ।

“धीजसीऽपस्रसी नित्यम्” इति सञ्जीव: स्थित:। जनकात्मजा जानकी सीता सादरा परिव्राजकबुद्ध्या आदरवती सती तस्य कपटपरिव्राजकस्य अर्घ: पूजा “मूल्ये पूजाविधावर्घः” इत्यमरः। अर्घाय इदम् इति अर्घ्यं, यत्प्रत्ययः। अविज्ञातजनसमीपे वर्त्तमाना तत्पूजार्थञ्च यतमाना सा तेजस्विनीव निर्भीका अलज्जत इति धीजायमाना-पदस्यार्थः। “षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि” इत्यमरः। पूजार्थजलादिकं प्रणीय दत्त्वा, तस्येति सम्प्रदानस्य सम्बन्धविवक्षायां षष्ठी, अथवा तस्य अर्घ्यं प्रणीय तस्य समीपे अर्घ्यं स्थापयित्वा इत्यर्थः। दश मूर्द्धान: यस्य तथाभूतं दशमूर्द्धानं रावणं गद्गदं अस्पष्टं अन्तर्भिया वा सम्यगनभिव्यक्तं वच: वक्ष्यमाणम् उवाच।

Change of V —धीजायमानया.., जनकात्मजया ऊचे दशमूर्द्धा सादरया।

Derivation :—धीजायमाना—धीजस-क्यङ्-शानच्। अर्घ्यं—अर्घ-यत्। (अर्घ:—अर्ह-घञ्, न्यङ्क्वादित्वात् कुत्वम्।) गद्गदम्—गद-(अव्ययम्) गद क:। गद्गद:-अच 'अर्श आदिभ्य:'; विशेषणतया क्लीवत्वम्। वचस्—वच-असुन्। उवाच—वच-लिट् ण। लुङ्—अवोचत्।

তেজস্বিনী জনকাত্মজা আদরপূর্ব্বক রাবণকে অর্ঘ্য প্রদান করিয়া গদ্গদ বাক্য কহিলেন।

Becoming a little bold the daughter of Janaka addressed with respect, to the ten headed Ravana, the faltering speech, having made to him at first, respectful offering.

Q. Explain the etymology of गद्गदम्। Ans: गद इत्यव्ययम्। गद गदति कथयति य: स: गद्गद: शब्द: स: अस्यास्तीति गद्गदम् वचनम्। अर्श आदिभ्य: अच्। Q. show the fitness of धीजायमाना। Ans.: See above. Q. Show the change of meaning of नी with different prefixes. Ans: नी-नयति। आ-नी, आनयति। प्र-नी प्रणयति। उप-नी उपनयति। अनु-नी, अनुनयति। वि-नी, विनयति and so on. Q, Give the

महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम ।
पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम् ॥ ७७ ॥

derivative meaning of जनक। *Ans* : "अयना जनकः सोऽभूत्" "पुरीजनन सामर्थ्यात् जनकः स च कथ्यते"। ७६।

77. Principal part :—ऐक्ष्वाके (वंशे इत्यस्य विशेषणम्) वंशे (अधि) दाशरथिः (उद्देश्य कर्तृ) मम (सम्ब) भर्त्ता (विधेय कर्तृ) (भवति)। Adj: to दाशरथिः—महाकुलीनः प्रियङ्करः and क्षेमकारः। पितुः—सम्ब; प्रियङ्करः इत्यनेन सम्बन्धः। तपस्विनाम्—सम्ब; क्षेमकारः इत्यनेन सम्बन्ध.।

Prose order :—पितुः प्रियङ्करः तपस्विनाञ्च क्षेमकारः महाकुलीनः ऐक्ष्वाके वंशे दाशरथिः मम भर्त्ता (भवति)।

Substance :—इक्ष्वाकुवंशे जातः दशरथतनयः मम स्वामी। स खलु महाकुलोत्पन्नः, पितुः वचनकृत्, तापसानाञ्च उपकारं विदधत् अत्र वसति।

Explanation in tika form :—यदुक्तन्तेन कं रहस्युपतिष्ठसे इति अस्य प्रतिवचनम् कथयन्ती आह महाकुलीनं इति। पितुः जनकस्य प्रियं करोतीति प्रियङ्करः आज्ञापालनेन तदनुकूलकारो इत्यर्थः। तथा तपस्विनां तपश्चरणशीलानां क्षेमकारः कुशलकर्त्ता "क्षेमप्रियमद्रेऽण् च" इति अण्। चकारात् खश्। महाकुलस्य अपत्यम् इति महाकुलीनः "महाकुलादञ् खञौ"* इति खः। महाकुले जातः महाकुलीन इति वा वाक्यम्। किमादित्यवंशसम्भव. उत सोमवंशसम्भवः इत्याह, ऐक्ष्वाके वंशे इक्ष्वाकुनाम. कश्चित् सूर्य्यवंशसम्भवः राजा तदीये वंशे "दाण्डिनायने" त्यादिना अन्त्यलोपः। अन्ये तत्र सन्तीत्याह दाशरथिः दशरथस्य अपत्यं यः स मम भर्त्ता भवतीति शेषः। "अतः इञ्" इति इञ्।

Change of V:—महाकुलीनेन दाशरथिना प्रियङ्करेण भर्त्रा (श्रूयते) क्षेमकारेण।

---

* अञ् & खञ् optionally with ख take place after महाकुल as patronymic affixes. अञ्-माहाकुलः; खञ्-माहाकुलीनः; खः महाकुलीनः।

निहन्ता वैरकाराणां सतां बहुकरः सदा ।
पारश्वधिकरामस्य मन्योरन्तकरो रणे ॥ ७८ ॥

Derivation :—महाकुलीनः—महाकुल-खञ् । ऐक्ष्वाकि—इक्ष्वाकु-शब्दात् तस्येदमिति अण्, (or see above) निपातनात् सिद्धम् । दाशरथिः—दशरथ-इञ् । प्रियङ्करः—प्रिय-कृ-खच् । क्षेमकारः—क्षेम-कृ-अण्, तपस्विनाम्—तपस्-विनिः (प्रशस्तार्थे) ।

পিতার প্রিয়ানুষ্ঠাতা ও তপস্বীদিগের ক্ষেমকারক আমার স্বামী ইক্ষ্বাকুবংশীয় পরমকুলীন। তিনি মহারাজ দশরথের পুত্র।

My husband high born in the family of Ikswaku, is the son of Dasaratha. He has performed his father's 'pleasure' and has done good to the ascetics.

Q. Show the fitness of the adjectives to दाशरथिः ।
Ans : महाकुलीनः, प्रियङ्करः, क्षेमकारश्च इति विशेषणत्रयेण, रामः न केवलं महावंशसम्भूतः अपितु सर्वथोचितदयादाक्षिण्यगुणवान् इति गम्यते । क्षेमङ्कर इति पदेन दाक्षिण्यम्, क्षेमकार इत्यनेन च दया तस्य सम्यक् प्रदर्शिता ।
Q. Derive the above adjectives. Ans : (Look into the explanation.) ७७ ।

78. It contains only some adjectives to दाशरथिः, as निहन्ता, बहुकरः and अन्तकरः । वैरकाराणाम्, सताम् & मन्योः—शेषे षष्ठी, Grammatically connected with निहन्ता, बहुकरः & अन्तकरः respectively. पारश्वधिकरामस्य—शेषे षष्ठी, Gram. connected with मन्योः । सदा—अव्ययम् । रणे—अधिकरणे ।

Prose order :—वैरकाराणां निहन्ता, सदा सतां बहुकरः, रणे पारश्वधिकरामस्य मन्योः अन्तकरः ।

Substance :—रामः शत्रूणां विनाशकः । साधवः तेन बहु उपकृताः । संग्रामे स परशुराममपि जिगाय ।

Explanation in tika form :—चतुर्भिः श्लोकैः दाशरथिं विशि-

नष्टि, निहन्तीति,। वैरकाराणां शत्रूणां वैर इत्यस्मात् कृधातोः अण्। न तु टः। 'ट' प्रत्ययविधानेन वैरकरः इत्येवं स्यात्; "न शब्द श्लोक कलह गाथा वैर चाटु सूत्र मन्त्र पदेषु" इति ट प्रत्ययप्रतिषेधः। कर्म्मणि शेषत्वे षष्ठी। निहन्ता विनाशकः। कर्त्तरि तृच् प्रत्ययः। सतां धर्म्मे स्थितानां साधूनां सदा सर्व्वदा। बहूनि कार्य्याणि करोतीति बहुकरः। "दिवा विभेति" टः। तथा रणे युद्धे परश्वधः "परशुश्च परश्वधः" इत्यमरः। स प्रहरणमस्य इति पारश्वधिकः "परश्वधात् ठञ् च" इति ठञ्। तथाभूतस्य रामस्य परशुरामस्य शक्तेः सामर्थ्यस्य अन्तकरः विनाशयिता, अन्तङ्करोतीति पूर्व्ववत् टः। यस्य हि प्रतापं शत्रवः सन्तः विदन्ति, साधवश्च उपकारलाभात् परितुष्टाः गुणान् ख्यापयन्ति, यश्च परशुधारिणः जामदग्न्यस्य विजेता, लोकविख्यातं तं दाशरथिं कथं न जानासि इत्यर्थः। इत्यपथ्यावक्त्रम्।

Change of V.—निहन्ता बहुकरेण अन्तकरेण See sl. 77.

Derivation.—निहन्ता—नि हन-तृच्। वैरकाराणां—वैर-कृ-अण्। बहुकरः—बहु-कृ टः। पारश्वधिक—परश्वध ठञ्। अन्तकरः—अन्त-कृ-टः।

তিনি শত্রুগণের নিধনকারী; সর্ব্বদা সাধুদিগের বহু উপকার করেন এবং তিনি যুদ্ধে পরশুরামের শক্তির পরাভব করিয়াছেন।

He is the slayer of the enemies. He always does great services to the righteous. He, in a battle, is the destroyer of the valour of Rama whose proper weapon is the axe.

Q. Show the grammatical relation of रणे। Ans: अधिकरणकारकम्। "क्रियान्वयि कारकम्।" इति क्रियया एव कारकस्य अन्वयित्वात्, अन्तकरः इत्यत्र करोतिरित्यनेन अन्वयः। Q. Account for षष्ठी in वैरकाराणाम्। Ans: निहन्ता इत्यत्र तृच् विधानात्, कर्म्मणि षष्ठी। "न लोकाव्यय निष्ठा खलर्थ तृनाम्" इति तृन् विधाने षष्ठीप्रतिषेधोऽस्ति, निहन्ता इत्यत्र तु न तृन्, किन्तु तृच् एव। अतः "कर्त्तृकर्म्मणोः कृति" इति तृच् योगात् कर्म्मणि षष्ठी। Q. Account for अण् and ट in वैरकारः बहुकर and अन्तकरः, and give their femin.

अध्वरेष्विष्टिनां पाता पूर्त्ती कर्म्मसु सर्व्वदा ।
पितुर्नियोगाद्राजत्वं हित्वा योऽभ्यागमद्वनम् ॥ ७९ ॥

ine forms. Ans : (See above). Feminine forms:—टकारितः प्रत्ययात् अकन्ताश्च "टिड्ढाणञ्" इत्यादिना सर्व्वत्र ङीप् । अतः वैरकारी, वप्रकरी, अन्नकरी । ७८।

79. The principal sentence स मम भर्त्ता भवति । (Sl. 77) । The subordinate sentence:—यः (कर्त्तृ) वनं (कर्म्म) अभ्यागमत् । Adj. to यः—पाता and पूर्त्ती । अध्वरेषु—कर्म्मणि सप्तमी । इष्टिनाम्—कर्म्मणि षष्ठी । कर्म्मसु— । कर्म्मणि ७मी । सर्व्वदा-व्ययम् । पितुः—सम्ब ; नियोगात—हेतौ पञ्चमी । Incomplete verb—हित्वा (व्यम्) ; राजत्वम्—Object to हित्वा ।

Prose order :—पुनः किम्भूतः? अध्वरेषु इष्टिनां पाता, सर्व्वदा कर्म्मसु पूर्त्ती, यः पितुः नियोगात राजत्वं हित्वा वनम् अभ्यागमत् (स मे भर्त्ता) ।

Substance :—ये नाम यज्ञं कुर्व्वन्ति, तान् यः रक्षति, यश्च श्राद्धादिकर्म्मणा तर्पयति पितृलोकान्, यः पुनः ईदृशः पितृपरायणः यत् तदाज्ञया वनमिदमाजगाम स एव दाशरथिः मे स्वामी ।

Explanation in tika form—इष्टमेभिरिति इष्टिनः यज्वानः "इष्टादिभ्यश्च" इति इनिः । अध्वरेषु यज्ञेषु "क्तस्य इन्विषयस्य कर्म्मण्युपसंख्यानम्"*इति कर्म्मणि सप्तमी । इष्टिनां यज्वनां पाता रक्षिता ।" पाधातोः तृच् । "कर्त्तृकर्म्मणोः कृति" इति कर्म्मणि षष्ठी । सर्व्वदा कर्म्मसु श्राद्धादिकार्य्येषु । पूर्त्तवत् • सप्तमी । पूर्त्तमनेनेति पूर्त्ती तृप्तिप्रदः । पूर्त्तवत् इनिः । यद्वा अध्वरकर्म्मणां विषये सप्तमी । यश्च पितुः नियोगात् आज्ञया राजत्वं राज्यं हित्वा

---

* The object of the verbs formed of क्त with इन् affixed after them, receives the seventh case affix. Thus, व्याकरणम् अधीतम्, व्याकरणे अधीती । अध्वरः इष्टः, अध्वरे इष्टी । कर्म्म पूर्त्तम्, कर्म्मणि पूर्त्ती ।

पतत्त्रिक्रोडजुष्टानि रक्षांसि भयदे वने।
यस्य बाणनिकृत्तानि श्वेभीभूतानि शेरते॥ ८०॥

त्यक्त्वा वनम् अभ्यागमत् आगतवान् न च अयोग्यत्वादिति भावः। स मे भर्त्ता इति पूर्व्वश्लोकेन अन्वयः। न केवलम् अर्थीनां पितॄणाञ्च प्रियकृत् अपि तु पितृवाक्यपालनात् देवानामपि आनन्दवर्द्धनः मे भर्त्ता इति भावः।" पितरि प्रीतिमापन्ने प्रीयन्ते सर्व्वदेवताः" इति मनुस्मरणात्। इत्तं पथ्यावक्त्रम्।

Change of V.—पाता, पूर्त्तिना येन अभ्यागामि।

Derivation :—अध्वर—अध्वन्-रा-कः। इष्टिनां—(यज+भावे क्तः) इष्टम्—कर्त्तरि-इनिः। पाता—पा-तृच्। लट् पाति (अदादिः) लुङ्—अपासीत्। पूर्त्ती—(पृ-भावे क्त)-इनिः। अभ्यागमत्—अभि-आ-गम-लुङ् द।

তিনি যজ্ঞে যজ্ঞাদিগকে রক্ষা করেন এবং সর্ব্বদা শ্রাদ্ধাদি কর্ম্ম দ্বারা পিতৃলোক পরিতুষ্ট করেন। তিনি পিতৃ আজ্ঞা পরিপালনোদ্দেশে রাজ্যত্যাগ করিয়া বনে আগমন করিয়াছেন।

He, in a sacrifice, is the protector of those who offer oblations; is always an accomplisher of ceremonies; has, by the order of his father, come to the forest leaving his kingdom.

Q. Account for the case affix in अध्वरेषु and कर्म्मसु। Ans. See above. Q. Derive अर्थीतिन्, and पूर्त्तिन्। Ans: See above. Q. Give the भावार्थ of the sloka. Ans: See above. Q. Account for षष्ठी in इष्टिनाम्। Ans: पाता इत्यत्र तृच् विधानात् "कर्त्तृकर्म्मणोः कृति" इति कर्म्मणि-षष्ठी। ७९।

80. Principal part :—रक्षांसि (कर्त्तृ) वने (अधि) शेरते। Adj. to रक्षांसि—पतत्त्रिक्रोडजुष्टानि, बाणनिकृत्तानि and श्वेभीभूतानि। Adj. to वने—भयदे।

Prose order :—यस्य बाणनिकृत्तानि रक्षांसि भयदे वने पतत्त्रिक्रोडजुष्टानि श्वेभीभूतानि (सन्ति) शेरते। (स मे भर्त्ता)।

Substance :—दृढ़योऽसौ वीरः यत् राक्षसाः तद्बाणेन निहताः पंक्तिशः निपतिताः सन्ति। पक्षिणः शृगालाश्च तेषां मांसम् खादन्ति।

Explanation in tika form :—वैरस्य वैरायमाणेभ्य इति वाक्यं तस्य वाणो नास्तीति प्रदर्शयन् आह पतत्त्रीति। यस्य रामस्य बाणैः शरैः निकृत्तानि छिन्नानि रक्षांसि राक्षसाः भयदे भयं ददातीति भयदे, दारुणे, कान्तारे, भयङ्करे वने, पतत्त्रिभिः पक्षैः ... यानि तानि पतत्त्राणि पक्षाः, ... कः: तानि सन्ति एषां ते पतत्त्रिणः, इनिप्रत्ययः। तैः पतत्त्रिभिः ... ...शृगालैः जुष्टानि सेवितानि परिवृतानि इत्यर्थः, श्रेणीशः ... श्रेणीभूतानि "श्रेण्यादयः कृतादिभिः" * इति प्रादिसमासः। ... सन्तीत्यर्थः। स मे भर्त्ता इति अन्वयः।

Change of V.—जुष्टैः रक्षोभिः निकृत्तैः...श्रेणीभूतैः श...।

Derivation :—पतत्त्रि—(पतत्-त्रे-क) पतत्त्र इन्। ... जुष्ट—जुष-कर्म्मणि क्तः। जुषते लट्, अजोषिष्ट-लुङ्। ... रक्ष-असुन्। भयदे—भय दा-कः। निकृत्तानि—नि-कृत्-कर्म्मणि क्तः। लट्—कृन्तति, लुङ्—अकर्त्तीत्। श्रेणीभूतानि—श्रेणि-भूत-च्वि। ... अन्ति। लुङ्—अशयिष्ट।

राक्षसगण याहार बाणे छिन्नदेह हइया शकुनि शृगाल ... परिवेष्टित हइया भयङ्कर अरण्ये सारि सारि पड़िया आछे।

Cut off to pieces by whose arrows, the demons lie ... the frightful forest surrounded by birds and jackals.

Q. Is बाणनिकृत्तानि properly compounded. A. यद्बाणनिकृत्तानि इति समासवाक्यम् उचितमेव। सापेक्षत्वेऽपि ... नात्र समासदोषः। Q. Show the gram. relation of ... Ans : बाणपदेन यस्य अन्वयः न तु 'बाण-निकृत्तानि' इति समस्तपदेन; तथापि गमकत्वात् समस्तत्वम्। Q. Decline the base क्रोष्टु। Ans : क्रोष्टा, क्रोष्टारौ, क्रोष्टारः, क्रोष्टारम्, क्रोष्टारौ क्रोष्टून्; ...

* कृतादिः—कृत, मित, मत &c.

दीव्यमानं शितान् बाणानस्यमानं महागदाः।
निघ्नानं शात्रवान् राम कथं त्वं नावगच्छसि ॥ ८१ ॥

क्रोष्टुना, क्रोष्टुभ्याम्, क्रोष्टुभिः ; क्रोष्ट्रे क्रोष्टवे, क्रोष्टुभ्यां, क्रोष्टुभ्यः ; क्रोष्टुः क्रोष्टोः, क्रोष्टुभ्यां, क्रोष्टुभ्यः ; क्रोष्टुः क्रोष्टोः, क्रोष्ट्रोः क्रोष्ट्वोः, क्रोष्टूनाम् ; क्रोष्टरि क्रोष्टौ &c. ८०।

81. Principal part :—त्वं (कर्त्तृ) रामं (कर्म्म) कथं न (अव्य) अवगच्छसि। Adjuncts of रामम्—शितान् बाणान्, दीव्यमानं, महागदाः अस्यमानं and शात्रवान् निघ्नानं। बाणान् महागदाः शात्रवान् being objects to अस्यमानम् दीव्यमानम् and निघ्नानम् respectively.

Prose order :—शितान् बाणान् दीव्यमानं महागदाः अस्यमानं शात्रवान् निघ्नानं रामं त्वं कथं न अवगच्छसि।

Substance :—कथं न जानासि रामम्। स खलु सततं निशितैः बाणैः क्रीड़ति। महतीः गदाः सर्व्वदा हेलया निक्षिपति शत्रूंश्च विनाशयति।

Explanation in tika form :—शितान् तीक्ष्णान् शरान् दीव्यमानं तीक्ष्णैः शरैः क्रीड़ाशीलं जिगीषाशीलं वा। दिव्यजिगीषेच्छापक्षयुतो क्रीड़ाशयोः। धातूनामनेकार्थत्वात् क्षेप्तुं शक्तम् तच्छीलं वा इति अयमर्थः। "ताच्छील्यवयोवचनशक्तिषु चानश्" * इति चानश्। तथा महतीः गदाः अस्यमानं क्षेप्तुं शक्तं छत्रधारणयोग्ये वयसि वर्त्तमानं वा। पूर्व्ववत् चानश्। तथा शात्रवान् शत्रून्। प्रज्ञादित्वात् स्वार्थे अण्। निघ्नानं निहन्तुं शक्तम्। पूर्व्ववत् चानश्। ईदृशं रामं मम भर्त्तारं त्वं कथं न अवगच्छसि न जानासि।

* ताच्छील्यं तत्स्वभावता, वयः यौवनादि, शक्तिः सामर्थ्यम्। चानश् takes place to denote (1) particular inclination (2) age, and (3) ability. So दीव्यमानम् is used in the first sense, अस्यमानम् in the second sense and निघ्नानम् in the last sense. How cleverly is the sloka composed to illustrate the aphorism !

भ्रातरि व्यस्य यातो मां मृगाविन्मृगयामसौ ।
एषितुं प्रेषितो यातो मया तस्यानुजो वनम् ॥ ८२ ॥

सर्वलोकविदितो हि स रामः इति भावः । पञ्चानां श्लोकानाम् एकत्र समाश्लेषात् कुलकम् । तथाहि "द्वाभ्यान्तु युग्मकं प्रोक्तं त्रिभिः श्लोकैः विशेषकम् । कलापकं चतुर्भिः स्यात् तदूर्द्धं कुलकं मतम् ॥"

Change V.—दीव्यमानः . अस्यमानः...निघ्नानः रामः त्वया अवगम्यते ।

Derivation :—दीव्यमानम्—(दिव कर्त्तरि-शानच् । शित—शी-क्तः । लट् श्यति, लङ् अश्यात्, अशासीत् । अस्यमानं—अस (दिवादि) शानच्, लङ्—आस्यत् । निघ्नानं—नि-हन-शानच् । भ्रातर—अप-स्वार्थे अच् । अवगच्छसि—अव-गम-लट् । लङ्—अ-ागमत् ।

যে রামচন্দ্র নিশিত বাণের সহিত ক্রীড়া করেন, যিনি বৃহৎ গদা নিক্ষেপ করেন, যিনি শত্রুকুল নিহত করিতে সমর্থ হইয়াছেন, তাঁহাকে কি নিমিত্ত অবগত নহ ?

How is it thou knowest not Rama, one that sports with sharpened arrows, 'hurls' many a great clubs and kills a good number of enemies.

Q. Show the peculiarity of the sloka. Ans : शानच्-प्रत्ययस्य उदाहरणानि यथाक्रमं प्रदिष्टानि । See the foot note (above). Q. Show the change of meaning of गम् with the change of prefixes. Ans : गम् गतौ ; आ-गम आगमने ; अप-गम अपगमने ; सम्-गम् सङ्गतौ ; &c. ८१ ।

82. Principal sentence :—(1) असौ (कर्त्तृ) मृगयां (कर्म्म) यातः । Adj. to असौ—मृगाविन् । Incomplete verb:—व्यस्य । object to व्यस्य,—माम् । भ्रातरि—अधिकरणे, gram. connected with व्यस्य । (2) तस्य (सम्ब) अनुजः (कर्त्तृ) एषितुं (व्यं) वनं (कर्म्म) यातः । Adj. to अनुजः—प्रेषितः । मया 'प्रेषित' इत्यस्य अनुक्ते कर्त्तरि तृतीया ।

Prose order :—मृगाविन् असौ मां भ्रातरि न्यस्य मृगयां यातः । तस्य अनुजः मया एषितुं प्रेषितः (सन्) वनं यातः ।

Substance :—मृगयापटुः रामः तत्कनिष्ठं लक्ष्मणं मत्परिरक्षणे नियुज्य, मृगयार्थं प्रस्थितः । असौ क्वेदानीं वर्त्तते इति ज्ञातुम् अहं पुनः लक्ष्मणं प्रेषितवती ।

Explanation in tika form—यद्येवं क्वासौ इत्याह भ्रातरीति । मृगं विध्यतीति मृगाविन् 'क्विप् च' इति क्विप । "नहि वृति वृषि व्यधि रुचि सहि तनिषु क्वौ"* इति पूर्व्वपदस्य दीर्घः । असौ भर्त्ता मां भ्रातरि न्यस्य अर्पयित्वा मृगयाम् आखेटकं यातः । क्वासौ भ्रातेति चेदाह । तस्य अनुजः कनिष्ठः मत्परिरक्षणे नियुक्तः लक्ष्मणः मया प्रेषितः प्रस्थापितः सन् एषितुं ज्ञातुं राममिति शेषः, वनं यातः गतः । मृगयां गतः रामः क्वेदानीं वर्त्तते इति ज्ञातुं प्रेषितो लक्ष्मणः वनं प्रविष्टः इत्यर्थः । इत्थं पद्यार्थक्रमः ।

Change of V.—याता...मृगाविधा मृगया असुना...प्रेषितेन यातम् अनुजेन ।

Derivation.—न्यस्य—नि-अस (दिवादिः) ल्यप् । लुङ्—आस्थत् मृगाविन्—मृग-व्यध-क्विप् । मृगया—मृग-णिच् (स्वार्थे) शी-यक् च निपातनात्; स्त्रीत्वात् टाप् । अथवा मृग-यत् । एषितुं—इष-तुम् । प्रेषित—प्र-इष-णिच्-कर्म्मणि क्तः; अनुजः—अनु-जन्-डः ।

তিনি মৃগয়াশীল। ভ্রাতৃহস্তে আমাকে অর্পণ করিয়া মৃগের অনুসরণে গমন করিয়াছেন। তাঁহার ভ্রাতা অন্বেষণার্থ আমা কর্তৃক প্রেরিত হইয়া বনে গমন করিয়াছেন।

Leaving me to the care of his brother he has gone a-hunting, being himself a hunter of games. He, the younger one has gone into the forest directed as he was by me to 'see after' Rama.

---

* The word preceding the verbs नहि वृति वृषि &c. with क्विप &c as affixes, get their last vowel long. Thus उपानत् नी-वृत्, मृगाविन् &c.

अथायस्यन् कषायाक्षः स्फुरत्स्वेदकणोल्बणः।
सन्दर्शितान्तराकूतस्तामवादीद्दशाननः॥ ८३ ॥

Q. Explain the formation of अगाविध। Ans: See above. Q. Show the proper use of असौ here? Ans: रामस्य दूरगतत्वात् अदसशब्दः प्रयुक्तः। तथाहि—"इदमस्तु सन्निकृष्टं समीपवर्त्ति चैतदो रूपम् अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्" विप्रकृष्टम्=दूरवर्त्ति। ८२।

83. Principal part :—अथ (अव्ययम्) दशाननः (कर्त्ता) ताम् (कर्म) अवादीत्। Adj. to दशाननः—आयस्यन्, कषायाक्षः स्फुरत्स्वेदकणोल्बणः and सन्दर्शितान्तराकूतः।

Prose order :—अथ आयस्यन् कषायाक्षः स्फुरत्स्वेदकणोल्बणः सन्दर्शितान्तराकूतः दशाननः ताम् अवादीत्।

Substance.—अथ क्रोधेन शरीरं प्रकम्पयन् चक्षुषी लोहिते कृत्वा घर्म्माक्तकलेवरः दशाननः आकारैः स्वहृतं भावं प्रकाशयन् सीताम् अवोचत्।

Explanation in tika form :—अथ जानकीवाक्यानन्तरम् आयस्यन् तद्वाक्यैः क्रोधवशात् शरीरं खेदयन्, भ्रुकुट्यादिकं बद्धा क्रोधेन कषाये रक्ते अक्षिणी यस्य स कषायाक्षः क्रोधारुणनेत्रः "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति समासान्तषच् प्रत्ययः। तथा स्फुरैः स्रुतैः स्यन्दमानैः कर्त्तरि क्तः। स्वेदकणैः घर्म्मबिन्दुभिः उल्बणः स्फुटः व्याप्तः इति यावत्। "स्फुटं प्रव्यक्तमुल्बणम्" इत्यमरः। तथा सन्दर्शितं प्रकटीकृतम् आन्तरं अन्तर्गतम् आकूतम् अभिप्रायो येन एवंविध आकारैव स्वहृतम् अभिप्रायं शंसन् इत्यर्थः। दश आननानि यस्येति दशाननः दशमुखः रावणः तां सीताम् अवादीत् उक्तवान्। वदेर्लुङ्। वृत्तं अध्यावक्त्रम्।

Change of voice :—आयस्यता कषायाक्षेण स्फुरत्स्वेदकणोल्बणेन सन्दर्शितान्तराकूतेन सा अवादि दशाननेन।

Derivation.—आयस्यन्—आ-यस (दिवादिः) शतृ। अक्षि—अक्ष्

क्षते कानिष्ठिनेयस्य ज्यैष्ठिनेयं विवासितम्।
को नग्नमुषितप्रख्यं बहु मन्येत राघवम्॥ ८४॥

र्मि:। स्रव—स्रु कर्त्तरि क्त:। लट—स्रवते, लुङ्—असुस्रवत, असृद्दिष्ट, असवत। अवादीत्—वद-लुङ् द। लिट्—उवाद।

অনন্তর দশানন ক্রোধে আরক্তনেত্র ও বক্রভ্রূকুটী হইল। তাহার গাত্র হইতে ঘর্ম্মবিন্দু নিঃসৃত হইতে লাগিল। এইরূপে আন্তরিক ভাব প্রকাশ পূর্ব্বক সে সীতাকে কহিতে লাগিল।

Then the Ten-headed one, convulsing through rage, with eyes growing red, covered over with particles of sweat and thus betraying 'his inmost' thoughts, spoke to her.

Q. Give the derivative meaning of उलूप:। Ans: उद्गीयते चक्षुषा ग्रियते सम्बध्यते इति उलुप: उ त् पूर्व्वात् लीङ् धातो: वन. प्रत्यय: निपातित:। इति राय:। ८३।

84. Principal part :—क: (कर्त्ता) राघवं (कर्म्म) बहु (क्रियाविशेषणम्) मन्येत। Adj to राघवम् :—विवासितम्; ज्यैष्ठिनेयं and नग्नमुषितप्रख्यम्। कानिष्ठिनेयस्य (सम्बन्धपदम्)। क्षते (व्यम्)।

Prose order :—ज्यैष्ठिनेयम् (अपि) कानिष्ठिनेयस्य क्षते विवासितं नग्नमुषितप्रख्यं राघवं क: बहु मन्येत?

Substance :—राघव: ज्येष्ठोऽपि यदा कनिष्ठपुत्रकृते पित्रा° वनं विवासित: तदासौ ध्रुवं दुष्ट:, स: कथमपि अन्येषाम् अभिमतो भवितुं नार्हति।

Explanation in tika form :—ज्येष्ठाया अपत्यम् ज्यैष्ठिनेय: तं "स्त्रीभ्यो ढक्" इति ढक् "कल्याण्यादीनामिनङ् च" इति इनङादेश:। तथोक्तमपि, कनिष्ठाया: कैकेय्या: सुतस्य कानिष्ठिनेयस्य भरतस्य पूर्व्ववत्** ढक्, इनङादेशश्च। क्षते निमित्ते विवासितं पित्रा परित्यक्तं राज्यात् वहिष्कृतम् अतएव आदौ मुषित: निराकृत: पश्चात् नग्न: दिगम्बरीकृत: इति नग्नमुषित: "पूर्व्वकाले*त्यादिना स्नातानुलिप्तादिवत् समासे राजदन्तादित्वात्** परनिपात:।

* "पूर्व्वकाल-एक सर्व्व-जरत् पुराण-नव-केवला: समानाधिकरणेन। "When"

मनल्पं नग्नमुषितप्रख्यम् राघवं कः बहु मन्येत श्लाघेत न कोऽपीत्यर्थः । यस्तु पुत्र-वत्सलेन पित्रा वनं निर्व्वासितः सः खलु निःसंशयम् दीनो इति भावः । इत्थं पद्यावक्तृम् ।

Change of V.—ज्यैष्ठिनेयः विवासितः केन नग्नमुषितप्रख्यः...राघवः मन्येत ।

Derivation:—कानिष्ठिनेय—कनिष्ठा ढक्, इनङादेशः । ज्यैष्ठिनेय—ज्येष्ठा-ढक्, इनङादेशः । विवासित—वि-वस-णिच्-कर्म्मणि क्तः । नग्न—नज-क्तः । नजते—लट्, अनजिष्ट—लुङ् ।

मुषित—मुष-कर्म्मणि क्तः । लट् मुष्णाति । राघवम्—रघु-अपत्यार्थे अण् ।

জ্যেষ্ঠা মহিষীর পুত্র হইয়াও কনিষ্ঠা মহিষীর পুত্রের নিমিত্ত যিনি পিতা কর্তৃক বিবাসিত হইয়াছেন, সেই মুষিত ও বস্ত্রহীন ব্যক্তি সদৃশ রাঘবকে কোন ব্যক্তি শ্লাঘা করে ?

Who would think much of Rama the son of the eldest queen, who has been banished for the sake of the younger queen's son and is like one stripped naked.

Q. Explain the samas in नग्नमुषितप्रख्यम् । Ans : पूर्व्वं मुषितः पश्चात् नग्नः इति स्नातानुलिप्तवत् समासे मुषितनग्नः इत्येवं भवितुमर्हति । तथाहि "पूर्व्वकाल-एक-सर्व्व-जरत्-पुराण-नव केवलाः समानाधिकरणेन ," इति वचनात् पूर्व्वकालस्य एव पूर्व्वनिपातः । किन्तु "राजदन्तादिषु परम्" इति 'नग्नमुषित' इत्यस्य राजदन्तादिषु पठितत्वात् मुषितपदस्य पर-

---

two words (a noun and an adjective or two adjectives) are combined in a कर्म्मधारयसमास the words denoting former time and such words as एक सर्व्व &c. are placed first. Thus first मुषितः and then नग्नः is मुषितनग्नः (See below)

** But of the compound words such as राजदन्तः अग्रेवणम् लिप्तवासितम्, नग्नमुषितम्, the words दन्त, वन, वासित, मुषित take the last place. So नग्नमुषितः, instead of मुषितनग्नः ।

राक्षसान् वटुयज्ञेषु पिण्डीशूरान्निरस्तवान्।
यद्यसौ कूपमाण्डूकि किं तवैतावति कः श्रयः॥ ८५॥

निपातः। ततः नगुमुषितसुल्यः इति नगुमुषितप्रख्यः। नित्यसमासः (अस्वपदविग्रहः) Q. Show fitness of नगुमुषितः। Ans: This is appropriately used of Rama who was first robbed of his kingdom and then banished. ८४।

85. Principal part —कूपमाण्डूकि (सम्बोधनम्) एतावति (विषयाधिकरणं) तव (सम्ब) कः (विश) श्रयः (कर्तृ) (भवति)। Sub sentence:— यदि (व्यम्) असौ (कर्तृ) वटुयज्ञेषु (आधारे) राक्षसान् (कर्म) निरस्तवान्। Adj. to राक्षसान्—पिण्डीशूरान्।

Prose order :—यदि असौ वटुयज्ञेषु पिण्डीशूरान् राक्षसान् निरस्तवान् (अयि) कूपमाण्डूकि! एतावति तव कः श्रयः (भवति)।

Substance:—त्वं खलु कूप-मण्डूक इव स्वल्पं जानासि। रामो यान् भोजनपटून् राक्षसान् क्षुद्रब्राह्मणयज्ञेषु निहतवान् तान् विना नापरं वीरं राक्षसमेतृसि, अतएव रामपराक्रमेण गर्विंतासि।

Explanation in tika form :—यदि असौ रामः वटूनां ब्राह्मणानां यज्ञेषु अध्वरेषु पिण्डां भोजने एव शूरान् भोजनपटून्, कार्य्यान्तरासमानित्यर्थः। "पात्रे समितादयश्च" इति समासः।* राक्षसान् निरस्तवान् दूरीकृतवान् तदा अयि कूपमाण्डूकि! मण्डूकस्य भेकस्य अपत्यं स्त्री माण्डूकी, कूपे माण्डूकी इव तत्सम्बोधने, "पात्रे समितादयश्च" इति समासः। एतेन अनहङ्कृतत्वादन्येवीरास्त्वया न दृष्टा इति ते श्रयः गर्व्वः विश्वयो वा तव न युज्यते इति भावः। कूपमण्डूकीति पाठे ङीबादीप्। इतंपथ्यावत्तम्।

Change of V :—राक्षसाः पिण्डीशूराः निरस्ताः अमुना, केन श्रयेन भूयते।

Derivations :—वटु—वट-उः। यज्ञ—यज्-नः। निरस्तवान्—निर्-अस्-तवत्, लुङ्—आख्यात्। माण्डूकी—मण्डूक-अपत्यार्थे अण्, ङीबा-

* See sloka 41.

मत्पराक्रमसंच्छिन्नराज्यभोगपरिच्छदः।
युक्तं ममैव किं वक्तुं दरिद्राति यथा हरिः॥ ८६॥

ङीप्। (मज्जति वर्षासमयम् इति मण्डूकः ऊकण् प्रत्ययः। अयः—ञि-अप्।

যদিও রাম নিকৃষ্ট ব্রাহ্মণগণ কর্তৃক অনুষ্ঠিত যজ্ঞে ভোজনপটু রাক্ষসদিগকে দূরীকৃত করিয়াছে তথাপি অয়ি অল্পদর্শিনি! এই সামান্য বিষয়ের নিমিত্ত গর্ব্ব অথবা বিস্ময় প্রকাশ করা যাইতে পারে না।

Thou little knowing she-frog in a well, what reason is there in thy wonder, if he, in the sacrifice of the insignificant Brahmans has overthrown such demons as are heroes only in dinner.

Q. Show the fitness of बटु। Ans:—अत्र बटुपदेन क्षुद्रा ब्राह्मणाः तेषाञ्च यज्ञे नहि शूरराक्षसानाम् गतिः सम्भवति इति गम्यते।

Q Give the patronymic form of मण्डूकः। Ans : "ढक् च मण्डूकात्" इति मण्डूकशब्दात् ढक्, अण्, इञ् च स्युः। यथा माण्डूकेयः, माण्डूकः, माण्डूकिः। ८५।

86. Principal part:—Consisting of 2 sentences :—(1) यथा (अयम्) हरिः (कर्त्तृ) दरिद्राति। (2) मम (कर्त्तृ) किम् (अयम्) वक्तुम् (अयम्) युक्तम्। मत्...परिच्छदः—Adj. to हरिः।

Prose order :—मत्पराक्रमसंच्छिन्नराज्यभोगपरिच्छदः हरिः यथा दरिद्राति (तत्) किं ममैव वक्तुं युक्तम्?

Substance :—नाहम् अर्हामि स्वयं वक्तुं यथा मत्पराक्रमेण इन्द्रः नष्टराज्यभोगादिः सन् दुर्गतः सेवकः इति।

Explanation in tika form :—मम पराक्रमः विक्रमः तेन संच्छिन्नाः अपहृताः राज्यं स्वाराज्यं भोगः सुखानुभवः तथा परिच्छदः छत्रचामरादिर्यस्य तादृशः हरिः इन्द्रः यथा येन प्रकारेण दरिद्राति यां यां दरिद्रदशाम् अवलम्बते। क्षीणशक्तिः सन् दुर्गतिमाप्नोति किं ममैव मया एव वक्तुं युक्तम् युज्यते? युज् धातोः कर्म्मणि क्तः, एतदिति शेषः। आत्मगुणवादस्य लज्जा-

निर्लज्जो विमदः स्वामी धनानां हृतपुष्पकः ।
अध्यास्तेऽस्तगिरं यस्मात् कस्तन्मावेति कारणम् ॥ ८७ ॥

'कारत्वात् न मया कथ्यते इत्यर्थः । मत्कृतया राघवः अतीव क्षीणपराक्रमः इति भावः । "मतिबुद्धिपूजार्थेभ्यश्च" इत्यत्र 'चकारः, अनुक्तसमुच्चयार्थः, अतः युक्तम् इति वर्त्तमाने क्तः । "क्तस्य च वर्त्तमाने" इति मम इत्यत्र कर्त्तरि षष्ठी । [केषाञ्चिन्मते 'तत् किं युक्तम्' इति युज्धातोः अकर्म्मकत्वे कर्त्तरि क्तः । तथात्वे 'मम' इति पदम् वक्तुम् इति भावविहितस्य कर्त्तरि विवक्षायां षष्ठी ।] उक्तं पथ्यावक्त्रम् ।

Change of V.—...परिच्छदेन हरिणा दरिद्रायते । No further change. In changing युक्तम् into active voice the meaning of the root would be different.

Derivation:—संक्षिप्त—सं-क्षिप-कर्म्मणि क्तः । लट्—क्षिपति, लुङ्—अक्षैप्सीत् । परिच्छद्—परि-छद-अच् । युक्तम्—युज-भावे क्त । दरिद्राति—दरिद्रा लट् तिप् । लुङ्—अदरिद्रीत्, अदरिद्रासीत्, लिट्—ददरिद्रौ, दरिद्रामास &c. 'ददरिद्र' वो० ।

ইন্দ্র যদিও আমার পরাক্রমে রাজ্যভোগ ও পরিচ্ছদে বঞ্চিত হইয়াছে তথাপি সে কথা আমার স্বয়ং বলা কি উচিত ?

Is it meet I would myself say how Indra 'pines in poverty' having his enjoyments of royalty and his equipments curtailed by my power.

Q. Give the different meanings of हरि both as a noun and an adjective.. Ans :—"यमानिलेन्द्रचन्द्रार्क-विष्णुसिंहांशुवाजिषु शुकाहिकपिभेकेषु हरिर्ना, कपिले त्रिषु ।" Q. Give the meaning of the root युज् in the passive voice. Ans : युज् in its passive form means "to be fit or suitable". Q. Change the voice in the above. Ans : See above. ८८ ।

87. Principal sentence:—कः (कर्त्ता) कारणं (कर्म्म) न (अ) अवैति । तत्—Adj. to कारणम् । Correlative sentence :—धनानां (सम्ब) स्वामी (कर्त्ता) यस्मात् (हेतौ पञ्चमी) अन्तर्गिरं (कर्म्म संज्ञा) अध्यास्ते । Adj. to स्वामी—निर्लज्जः, विमदः and हृतपुष्पकः ।

Prose order :—निर्लज्जः विमदः हृतपुष्पकः धनानां स्वामी यस्मात् अन्तर्गिरं अध्यास्ते, कः तत् कारणं न अवैति ?

Substance :—मम भ्राता कुवेरः यत् लज्जां विहाय, दत्त्वा च मह्यं पुष्पकं कैलासमाश्रित्य वर्त्तते मत्पराक्रम एव तस्य कारणम् इति सर्व्वे एव जानन्ति ।

Explanation in tika form :—लज्जातो निष्क्रान्तः निर्लज्जः "निरादयः क्रान्ताद्यर्थे पञ्चम्या *" इति पञ्चमी तत्पुरुषः । तथा विगतः मदो गर्व्वो यस्य स विमदः अपहृतगर्व्वः, हृतं पुष्पकं तदाख्यं विमानं यस्य तथाभूतः धनानां स्वामी धनदः कुवेरः यस्मात् कारणात् गिरेः कैलासस्य अन्तः मध्ये अन्तर्गिरं, अथवा गिरौ इति अन्तर्गिरम्, विभक्त्यर्थेऽव्ययीभावः । "गिरेश्च सेनकस्य **" इति समासान्तः टच् प्रत्ययः । अध्यास्ते अधिवसति "अधिशीङ्स्थासाम्" इति अन्तर्गिरमित्यस्य कर्म्मसंज्ञा । कः जनः तत् कारणं मत्पराक्रमरूपं न अवैति जानाति अपितु सर्व्व एव इत्यर्थः ।

Allusion in निर्लज्ज :—विश्रवसोऽपत्यं कुवेरः तपसा ब्रह्माणं परितोष्य लब्धपुष्पकः धनराजश्च सन् पितरम् उपगम्य वासार्थं पीडादिहीनं स्थानं ययाचे, उपदिष्टश्च पित्रा लङ्काराज्येऽभिषिक्तस्तत्र उवास । विश्रवसश्च अपरपुत्रः कैकसी-

---

* The words निर् &c. (when the thing denoted is gone beyond) are compounded with what ends with the 5th case affix ; Thus : कौशाम्ब्याः निर्गतः निष्कौशाम्बिः ।

** In an अव्ययीभाव समास with गिरि, in deference to the opinion of Senaka, let the affix टच् take place optionally.

भिन्ननौक इव ध्यायन् मत्तो विभ्यद्‌यमः स्वयं ।
क्षणिमानं दधानेन मुखेनास्ते निरद्यतिः ॥ ८८ ॥

गर्भजातः रावणः ब्रह्मणो लब्धवरः सन् मातामहादेशात् कुबेरं लङ्कां ययाचे। कुबेरश्च पित्रादेशात् लङ्कां विहाय कैलासम् अध्युवास। Allussion in हृत-पुष्पकः।—अथ गच्छता कालेन रावणं लोकसन्तापकं श्रुत्वा तदुपदेशार्थं कुबेरो दूतं रावणं प्रति प्रेषयामास। रावणस्तु तदुपदेशात् संक्रुद्धः निहत्य दूतं कुबेर-जयाय प्रस्थितः। ततः समुपस्थिते युद्धे रावणः कुबेरं विजित्य तस्मात् पुष्पकम् अपहृतवान् इति रामायणम्। उ, का, १ १५।

Change of voice:—निर्लङ्केन विमदेन स्वामिना हृतपुष्पकेण अध्यास्यते केन अवेयते।

Derivation :—लङ्का—रम-कः निपातनम्, स्त्रीत्वात् टाप्। स्वामी—स्व-आमिनच्। अध्यास्ते—अधि-आस्-लट् ते। लुङ्—आसिष्ट। लिट्—आसा-चक्रे। अवैति—अव-इण्-लट् ति। लिट्—इयाय। लुङ्—अगात्।

ধনেশ্বর যে জন্য লঙ্কা হইতে দূরীকৃত ও অপহৃতপুষ্পক হইয়া দীনের ন্যায় কৈলাস পর্ব্বতের মধ্যে বাস করিতেছে, কোন ব্যক্তি সেই কারণ অবগত নহে ?

Who is it, that does not know the reason why the Lord of Wealth has taken up his 'abode' in the midst of a mountain, his celestial car having been robbed of, himself driven out from Lanka, and his vanity all gone.

Q. Explain the allusions in निर्लङ्क and हृतपुष्पकः।
Ans :—See above. Q. Parse अभ्रगिरम्। Ans : See above. ८०

88. Principal part :—यमः (कर्त्ता) भिन्ननौकः इव (उपमान कर्त्ता) आस्ते। मुखेन (उपलक्षणे तृतीया)। क्षणिमानं—दधानेन इत्यस्य कर्म्म। Adj. to मुखेन—दधानेन। स्वयं (अयम् प्रकृत्यादिभ्यः तृतीया)। Adj. to यमः—ध्यायन्, बिभ्यत्, and निरद्यतिः। मत्तः—भीयोगे पञ्चमी।

Prose order :—कृष्णिमानं दधानेन मुखेन (उपलक्षितः) यमः स्वयं मत्तः बिभ्यत् भिन्ननौक इव ध्यायन् निरुद्यतिः आस्ते ।

Substance :—अपरेषु का कथा स्वयं यमोऽपि मत्सकाशात् भयमुपगतः भग्ननौकः वणिक् इव स्वस्य असामर्थ्यम् चिन्तयन् म्लानमुखः निरुद्योगः वर्त्तते ।

Explanation in tika form :—कृष्णिमानं कृष्णवर्णत्वं "वर्णदृढादिभ्यः ष्यञ्" * इति चकारात् इमनिच् प्रत्ययः । दधानेन धाधातोः शानच्, धारयता मुखेन उपलक्षितः वैलक्षण्यादिति भावः । "इत्थम्भूतलक्षणे" इति तृतीया । यमः मत्तः मत्सकाशात् बिभ्यत् त्रसन् "भीत्रार्थानां भयहेतुः" इति पञ्चमी । भिन्ना विदारिता नौः यस्य स विपन्नपोतः वणिगिव "उरः प्रभृतिभ्यः कप्" ** इति समासान्तः कप् प्रत्ययः । स्वयं ध्यायन् चिन्तयन् स्वयमेव आत्मनोऽसामर्थ्यं जानाति न तु अन्येन बोधितः इत्यर्थः । अथवा स्वयं साक्षात् मत्तः बिभ्यदित्यन्वयः । नास्ति उद्यतिरुद्यमो यस्य स निरुद्यतिः निरुद्यम आस्ते । एतेन दिक्पतीनां जयादहमेव सुप्रसिद्धः न तु तव भर्त्ता, इत्युक्तम् । उक्तं पथ्यावक्त्रम् ।

Change of V.—भिन्ननौकेन इव ध्यायता बिभ्यता...यमेन आस्यते निरुद्यतिना ।

Derivation :—नौः—नुद्-डौ । ध्यायन्—ध्यै-शतृ । लुङ्—अध्यासीत् । मत्तः—अस्मद्-पञ्चम्यास्तसिल् । बिभ्यत्—भी-शतृ । लुङ्—अभैषीत् । लिट्—बिभाय बिभयाञ्चकार &c । कृष्णिमानं—कृष्ण-इमनिच् । दधानेन—धा-शानच् । लुङ्—अधात्, अधित । निरुद्यतिः—निर्-उत्-यम-क्तिः ।

যে বণিকের নৌকা ভগ্ন হইয়াছে সে যেমন অসমর্থ বোধে উদ্যমহীন হয়, সেইরূপ যমও আমার নিকট হইতে ভয় পাইয়া ম্লানমুখে নিশ্চেষ্ট হইয়া আছে ।

* ष्यञ् as well as इमनिच् comes after words signifying colour or such words as दृढ़, वृढ़, भृश, कृश &c. Thus कार्ष्ण्यं, कृष्णिमन् ।

** उरःप्रभृतयः यथा ;—उरस्, सर्पिस्, उपानह्, पुमान्, अनडुह्, पयस्, नौ &c,

समुद्रोपत्यका हैमी पर्व्वताधित्यका पुरी।
रत्नपारायणं नाम्ना लङ्केति मम मैथिलि॥ ८९॥

Pluto himself in fear of me, remains inactive, brooding over like a ship-wrecked-merchant bearing a face gloomy.

Q. Comment gram. on भिन्ननौकः। Ans: See above. Q. Account for the 5th case affix in मत्तः। Ans: See above. Q. Account for तृतीया in मुखेन। Ans: उपलक्षणे तृतीया। ८८।

89. Principal part:—मैथिलि (सम्बो) लङ्का (इति योगे प्रथमा) इति (व्यं) नाम्ना (उपलक्षणे तृतीया) मम पुरी (कर्त्री) अस्ति। Adj. to पुरी—समुद्रोपत्यका, हैमी, पर्व्वताधित्यका, and रत्नपारायणम्।

Prose order:—हे मैथिलि! लङ्का इति नाम्ना (ख्याता) समुद्रोपत्यका, हैमी, पर्व्वताधित्यका, रत्नपारायणं मम पुरी (अस्ति)।

Substance:—हे वैदेहि! लङ्का मम पुरी। समुद्रस्तस्याः उपत्यका, सा त्रिकूटस्य उपरि संस्थिता। अतोऽसौ अन्यैर्दुरधिगता रत्नैः शोभते।

Explanation in tika form:—एवं स्वपौरुषं प्रदर्श्य सम्प्रति सीताप्रलोभनं जनयन् आह समुद्रेत्यादि। हे मैथिलि मिथिलतनये सीते। "मथनात् मिथिलो जातः मिथिला येन निर्म्मिता"। इति मिथिलसंज्ञा। लङ्का, "क्वचिन्निपातेनाभिधानम्" इति अभिहिते प्रथमा। इति नाम्ना ख्याता समुद्र एव उपत्यका आसन्नभूमिर्यस्याः सा समुद्रोपत्यका हेम्नः विकारा हैमी सुवर्णमयी "प्राणिरजतादिभ्योऽञ्" इति विकारे अञ्। पर्व्वतस्य त्रिकूटस्य अधित्यका उपरिस्थिता "उपत्यकाद्रेरासन्ना भूमिरूर्द्ध्वमधित्यका" इत्यमरः। उपाधिभ्यां त्यकन् इति 'उप' 'अधि' इत्युभयाभ्यां त्यकन्। त्रिकूटपर्व्वतोपरि लङ्कायाः स्थितत्वे यथा रामायणम्। "दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्व्वतः। तस्याग्रे तु विशाला सा महेन्द्रस्य पुरी यथा। लङ्का नाम पुरी रम्या"। तथा रत्नानां पारं अवसानं अयन्ते बुध्यन्ते तत्परीक्षकाः अत्रेति रत्नपारायणं सर्व्वरत्नस्थानमित्यर्थः। स्वभावात् अजहल्लिङ्गता। एवम्भूता मम पुरी राजधानी

आवासे सिक्तसम्मृष्टे गन्धैस्त्वं लिप्तवासिता।
अर्थितोऽसुगन्धिस्रक् तस्यां वस मया सह ॥ ९० ॥

अस्ति इति शेषः। दुर्गावस्थित्या न हि ते पराभवशङ्का, रत्नोपचयात् समृद्धिं च भोक्ष्यसे, अतः एतत्स्थानत्यागेन तत्र ते गमनमतीव सुखमिति भावः। वृत्तं पथ्यावक्त्रम्।

Change of V.—समुद्रोपत्यकया, हैम्या पर्व्वताधित्यकया पुर्य्या रत्नपारायणेन भूयते।

Derivation.—समुद्र —सम्-उन्द रक्। उपत्यका—उप-त्यकन्-स्त्रीत्वात् टाप्। हैमी—हेमन् विकारे अञ्। पर्व्वत—पर्व्व-अतच्। अधित्यका—अधि-त्यकन्-स्त्रीत्वाट्टाप्। पारायणं—पार-अय-अधिकरणे ल्युट्। लङ्का—रम-कः। मैथिलि—मिथिला-अपत्यार्थे अण्, स्त्रीत्वाद्ङीप् सम्बोधने।

अयि मैथिलि! त्रिकूटोपरिस्थित समुद्रसन्निहित सुवर्णमयी ও নানাবিধ রত্নপরিপূর্ণ লঙ্কা আমার রাজধানী।

Princess of Mithila! my golden city by the name of Lanka situated on a table land by the sea side, is the principal abode of gems.

Q. Give the meaning of रत्नपारायणम्। Ans: रत्नानां पारम्-अवसानम् अयन्ते बुध्यन्ते तत्परीक्षकाः अत्र इति रत्नपारायणम्, सर्व्वरत्नस्थानमित्यर्थः। अत्र पारायणपदेन रत्नसाकल्यं द्योतितम्। यदाह हलायुधः "साकल्यवचनं प्राज्ञैः पारायणमुदाहृतम्" इति। Q. Explain the syntactical relation between रत्नपारायणम् and लङ्का। Ans: रत्नपारायणमिति पदं लङ्का इत्यस्य विशेषणम्। स्त्रीलिङ्गस्य क्लीबलिङ्ग-विशेषणत्वे कारणम् अजहल्लिङ्गता इति। Parse लङ्का and नाम्ना। Ans: See above. ८६।

90. Principal part:—तस्यां (अधि) आवासे (अधि) मया (सहयोगे ३) सह (अव्य) वस [Adj. to त्वं—लिप्तवासिता and अर्थि-



तीव्रसुगन्धिस्रक्। गन्धैः—द्रव्यैः। लिप्त इत्यनेन अन्वयः। सिक्तसंमृष्टे—Adj. to आवासे।

Prose order :—तस्यां सिक्तसंमृष्टे आवासे गन्धैः लिप्तवासिता अर्पितोरुसुगन्धिस्रक् त्वं मया सह वस।

Substance :—मम हि जलसिक्ते विशोधिते च गृहे सुगन्धैः चर्चिता पुष्पमालासुशोभिता सती त्वं मया सह वसन्ती सुखिता भव इति।

Explanation in tika form :—तस्यां पुर्य्यां पूर्व्वं सिक्ते आर्द्रीकृते पश्चात् संमृष्टे शोधिते सिक्तसंमृष्टे, स्नातानुलिप्तादिवत् समासः। आवासे गृहे, गन्धयन्ति इति गन्धाः चन्दनादयः चन्दनादिभिः पूर्व्वं लिप्ता पश्चात् वासिता धूपिता पूर्व्ववत् समासः। "वासिता करिणीनार्य्योः वासितं सुरभीकृते। ज्ञानमात्रे खगाराबे वासितं वस्त्रवेष्टिते" इति विश्वः। तथा अर्पिता न्यस्ता उर्व्वी महती सुगन्धिः सुरभिः स्रक् माला यस्यां तादृशी सती त्वं मया सह वस। प्रार्थनायां लोट्। "गन्धस्येदुत् पूति सु सुरभिभ्यः"* इति इकारः अन्त्यादेशः। अलं वनवासेन स्रक्चन्दनादिभिः भोग्यवस्तुभिः परिवृता मया सह वसन्ती सुखम् उपभुङ्क्ष्व इति भावः। वृत्तं पथ्यावक्त्रम्।

Change of V.—त्वया लिप्तवासितया...स्रजा...उष्यताम्।

Derivation :—आवासः—आ-वस अधिकरणे घञ्। सिक्त—सिच-कर्म्मणि क्तः। लट्—सिञ्चति, सिञ्चते; लुङ्—असिचत्, असिचत असिक्त। संमृष्ट—सं-मृज-कर्म्मणि क्तः। लट्—मार्ष्टि, मृष्टः, मार्जन्ति, मृजन्ति। लुङ्—अमार्क्षीत्, अमार्जीत्। लिप्त—लिप-क्तः। लट्—लिम्पति, लिम्पते। लुङ्—अलिपत् अलिपत, अलिप्त। वासित—वस-णि कर्म्मणि क्तः। स्रक्—सृज-क्विप्। वस—वस-लोट् हि। लुङ्—अवात्सीत्।

তুমি জলসিক্ত ও বিশোধিত গৃহে গন্ধদ্রব্যে অঙ্গাদি বিলেপনি ও বাসিত করিয়া ও সুগন্ধি পুষ্পমালায় সুশোভিত হইয়া আমার সহিত সেই লঙ্কায় গিয়া বাস কর।

---

* इ comes after गन्ध preceded by उत्, पूति, सु and सुरभि in a समास। Thus in the बहुव्रीहि समास instead of सुगन्ध we find सुगन्धि। so are पूतिगन्धि, उद्गन्धि and सुरभिगन्धिः।

सङ्गच्छ पौंस्नि स्त्रैणं मां युवानं तरुणी शुभे ।
राघव: प्रोष्यपापीयान् जहीहि तमकिञ्चनम् ॥ ९१ ॥

There dost thou dwell with me, in a house 'watered' and cleansed, thyself being besmeared and perfumed, with large fragrant garlands placed over thee.

Q. Show the gram. connection of गन्धै: । Ans : "क्रियान्वयि कारकम्," इति कारकस्य क्रियया एव अन्वय: स्यात् । अत: लिप्त इति क्रियया गन्धै: इति करणकारकस्य अन्वय: । Q. Distinguish between सुगन्ध and सुगन्धि । Ans : सु गन्ध: इति सुगन्ध: कर्मधारय: । सु गन्ध: यस्य स सुगन्धि: सद्गन्धवान् इत्यर्थ: । बहुव्रीहिणा विशेषणत्वम्, इ: इति अन्त्यादेशश्च । Or See Canto II. Sl. 11. ९० ।

91. Principal sentence :—(1) पौंस्नि ! शुभे ! (त्वं) मां (कर्म) संगच्छ । Adj. to मां—स्त्रैणं and युवानम् । Adj. to त्वं—तरुणी (2) राघव: (भवति) । Adj. to राघव:—प्रोष्यपापीयान् । (3) तं (कर्म) जहीहि त्वम् । Adj. to तम्—अकिञ्चनम् ।

Prose order :—हे पौंस्नि ! शुभे ! तरुणी (त्वं) स्त्रैणं युवानं मां संगच्छ । राघव: प्रोष्यपापीयान् (भवति) । तम् अकिञ्चनं जहीहि ।

Substance :—त्वमेव पुरुषोपभोगयोग्या अतीव शोभसे । अहञ्च नारीयोग्य: । राघवस्तु दूरगत: स्वामिकर्त्तव्यम् अनाचरन् पापीयान् संवृत्त: । धनहीनञ्च तं त्यज तावत् इति ।

Explanation in tika form :—पुमांसम् अर्हति तद्धिताय वा भवतीति पौंस्नी, तत्सम्बोधने हे पौंस्नि ! हे पुरुषयोग्ये पुरुषहिते वा "स्त्रीपुंसाभ्यां नञ् स्नञौ भवनात्"* इति स्नञ्प्रत्यय: । शोभते इति शुभा । कप्रत्यय: । हे शुभे कल्याणि तरुणी युवती त्वं स्त्रैणं स्त्रीयोगम् अर्हति अथवा स्त्रीभ्यो हित:.

---

* नञ् and स्नञ् come after स्त्री and पुंस् respectively in the senses specified in the aphorisms as far as "धान्यानाम् भवने क्षेत्रे खञ्" । Thus स्त्रैण and पौंस्न can be formed in

इति स्त्रैण: पूर्ववत् नञ् प्रत्ययः। युवानं मां संगच्छ अङ्गीकुरु। प्रार्थनायां लोट्। "समो गम्यृच्छीत्यादिना आत्मनेपदं न भवति सकर्मकत्वात्। ननु ममापि तादृश: भर्त्तास्तीति चेदाह राघव इति। राघवः रामः प्रोष्य देशान्तरं गत्वा पापीयान् पापवत्तरः इति प्रोष्यपापीयान्, विदेशावस्थानात् पत्नीपालने असमर्थः असौ अतिशयेन पापाचारः संवृत्तः इत्यर्थः। मयूरव्यंसकादित्वात् समासः। पापवत् शब्दात् ईयसुनि "विन्मतोर्लुक्" * इति मतुपः लुक्। पक्षे पापिष्ठः। अतएव नास्ति किञ्चन यस्येति अकिञ्चनः तम् अकिञ्चनं दरिद्रं "निः-स्वास्त्विकिञ्चनदुर्विधा" इति कोषः। मयूरव्यंसकादयश्च इति समासः। तं जहीहि त्यज। हा धातोः लोटि। पक्षे जहाहि जहिहि। इत्थं पथ्यावक्त्रम्।

Change of voice :—संगम्यै अहं स्त्रैण:...युवा तरुण्या। राघवेण प्रोष्यपापीयसा (भूयते)। स अकिञ्चनः हीयताम्।

Derivation :—संगच्छ—सं-गम् लोट् हि। पौंस्नि—पुमस्-स्नञ्-स्त्रीत्वाद् ईप्। स्त्रैणं—स्त्री नञ्। शुभे—शुभ-कः-टाप। पापीयान्—पापवत्-ईयसुन्। जहीहि—हा लोट्-हि। पक्षे जहाहि, जहिहि।

হে পুরুষযোগ্যে কল্যাণি! তুমি তরুণবয়স্কা। আমি নারীর উপযুক্ত আমাকে ভজনা কর। রাম প্রবাসে গমন করিয়া স্বামিকর্ত্তব্য পালনে বিমুখ সুতরাং পাপী হইয়াছে। সে নির্ধন, তাহাকে পরিত্যাগ কর।

Thou young and befitting a male consort, join me who am young and befit women ; Raghava being an exile has been viler. Abandon that destitute person.

Q. Is there any समास in प्रोष्यपापीयान्। Ans : "मयूर-व्यंसकादयश्च" इति समासः। Q. Derive पापीयान् and decline

---

the senses of भव (being); समूह (collection) आगत (come from) ; हित (profitable, wholesome, kind) &c.

* विन् and मतुप् before इष्ठ and ईयसुन् elide. Thus अतिशयेन पापवान्, पापिष्ठः पापीयान्।

अश्नीतपिबतीयन्ती प्रसिता स्मरकर्मणि ।
वशीकृत्य दशग्रीवं मोदस्व वरमन्दिरे ॥ ९२ ॥

it. Ans : पापं विद्यते यस्य असौ पापवान् । ततः अतिशयेन पापवान् इति पापीयान् । Declension : पुंसि, पापीयान् पापीयांसौ पापीयांसः, पापीयसा पापीयोभ्याम् &c. स्त्रियाम्—पापीयसी पापीयस्यौ पापीयस्यः &c: नदीवत् । क्लीबे—पापीयः पापीयसी पापीयांसि &c. ९१ ।

92. Principal part :—वरमन्दिरे (अधि) त्वम् (उक्त कर्त्ता) मोदस्व । Adj. to त्वम्—अश्नीतपिबतीयन्ती, and प्रसिता । स्मरकर्मणि—प्रसितयोगे सप्तमी । Incomplete verb:—वशीकृत्य । Obj. to वशीकृत्य—दशग्रीवम् ।

Prose order :—अश्नीतपिबतीयन्ती स्मरकर्मणि प्रसिता (त्वम्) दशग्रीवं वशीकृत्य वरमन्दिरे मोदस्व ।

Substance :—अन्नं भक्षयत पानीयं पिबत इत्यादि त्वां प्रति यथा सर्वदा अभिधीयते तथा इच्छन्ती त्वं कामव्यापारे तत्परा सती रावणं स्वस्य अधीनतामानीय प्रासादे वसन्ती सुखं परमुपभुङ्क्ष्व इति ।

Explanation in tika form :—अश्नीत पिबत इत्येवं सततम् अभिधीयते यस्यां क्रियायां सा अश्नीतपिबता [मयूरव्यंसकादित्वात् "आख्यातमाख्यातेन क्रियासातत्ये" * इति समासः । ताम् आत्मनः इच्छतीति अश्नीतपिबतीयन्ती, अश्नीत पिबतेति क्रियायाम् भृत्यजनान् आदिष्टुमिच्छन्ती इत्यर्थः । सुपः आत्मनः क्यच् इति क्यच्प्रत्ययः । तथा स्मरकर्मणि कामव्यापारे प्रसिता

---

* आख्यातम्=a verb "भावप्रधानम् आख्यातम्" इति यास्कः (the author of निरुक्त) । भाव=a term for an impersonal verb.

A verb is conjioned with another verb in a समास when the continuation of some action is intended. Thus is formed अश्नीतपिबता a compound word (which falls under मयूरव्यंसकादि ।) e.g. खादतमोदता, पचतभृज्जता &c..

मास्म भूर्ग्राहिणी भीरु गन्तुमुत्साहिनी भव।
उद्भासिनी च भूत्वा मे वक्षःसम्मर्दिनी भव॥ ९३॥

आधिक्ये न प्रवृत्ता "प्रसितोत्सुकाभ्यां तृतीया च" इति चकारात् सप्तमी। पक्षे स्मरकर्म्मणि प्रसृता। एवम्भूता त्वम्, दश ग्रीवा यस्येति दशग्रीवं रावणं वशीकृत्य आयत्तीकृत्य। वरमन्दिरे श्रेष्ठगृहे। मोदस्व हर्षं लभस्व सुखिनी भव इति यावत्। "देवात् वृते वरः, श्रेष्ठे त्रिषु, क्लीवे मनाक् प्रिये" इत्यमरः। वृत्तं पथ्यावक्त्रम्।

Change of V :—...पिवतीयन्त्या प्रसितया मुद्यताम्।

Derivation.—अश्नीतपिवतीयन्ती—अश्नीतपिवता-क्यच्-शतृ-स्त्रीत्वा-ङीप्। प्रसिता—प्र-सो-कर्त्तरि क्तः। ग्रीवा—गॄ-वन्। मोदस्व—मुद-लोट् स्व। मन्दिर—मन्दि-किरच्।

অশন পান করা ইত্যাদি তোমার সম্বন্ধে ভৃত্যগণ যাহাতে সর্ব্বদা বলে তাহা করাইয়া, ভোগব্যাপারে তৎপর হইয়া ও দশকন্ধরকে আপনার পদাবনত করাইয়া শ্রেষ্ঠ প্রাসাদে আনন্দ উপভোগ কর।

Desirous of having food and drink lavished, devoted to the enjoyments of love, and bringing the tenheaded Ravana to thy subjection, feel delight in the excellent house.

Q. Explain the formation of अश्नीतपिवतीयन्ती। Ans : See above. Q. Account for the 7th case affix in स्मरकर्म्मणि। Ans : See above. Q Give the different meanings of वर। Ans : See above. Q. Account for ल्यप् in वशीकृत्य। 'वशी' इति विभक्ति प्रतिरूपकमव्ययम्, साक्षात् प्रभृतिषु पठ्यते। अतः "साक्षात् प्रभृतीनि च" इति कृधातोः वैकल्पिक गतिसंज्ञत्वात् अत्र गतिसमासः। समासे च कृधातोः ल्यप्। पक्षे वशी कृत्वा।

93 Principal sentences :—(1) भीरु (सम्बो) ग्राहिणी (विश) मास्म भूः (त्वम्)। (2) गन्तुम् (अव्य) उत्साहिनी (विश) भव (त्वम्)। (3) उद्भासिनी (विश) (त्वम्) च भूत्वा (अव्य) मे (सम्बन्धे षष्ठी) वक्षःसम्मर्दिनी (विशेषणम्) भव (त्वम्)।

Prose order :—हे भीरु! याहिनी मास्म भूः, गन्तुं उत्साहिनी भव, उद्भासिनी भूत्वा च मे वचःसम्मर्दिनी भव।

Substance:—अथ दशाननवचसो वैपरीत्यम् अनुष्ठातुं यतमानां सीतां निवार्यं आह दशाननः। भीरु मम वचसो वैपरीत्याचरणे मा भव आग्रहवती, मया सह गमने उत्साहं प्रदर्शय आनन्दोच्छ्वासेन अधिकां शोभा मापद्यस्व, इदम् आलिङ्ग च माम्।

Explanation in tika form :—नाहं गमिष्यामि इत्यादिकम् आग्रहम् मोचयितुकामः दशाननः प्राह मास्मेति। हे भीरु भयशीले! ग्रह्णाति प्रतिकूलार्थमिति याहिनी प्रतिकूलार्थग्राहिणी प्रतिकूलवर्तिनी इति यावत्। मास्म भूः "स्मोत्तरे लङ् च" इति चकारात् लुङ्। मा योगे अडागम प्रतिषेधः। गन्तुम् उत्साहिनी उद्युक्ता भव। ततश्च उद्भासिनी अलङ्कारादिभिः शोभमाना भूत्वा च त्वं वचःसंमर्दिनी भव, गाढ़ालिङ्गनेन मे वचःस्थलं निपीड़य इत्यर्थः। सर्व्वत्र ग्रहादित्वात् कर्त्तरि णिनिः।* नः इति पाठे, "अस्मदो द्वयोश्च"† इति बहुवचनम्। अथवा गौरवे बहुवचनम्।

Change of V.—मास्म भावि याहिण्या, उत्साहिन्या भूयताम्, उद्भासिन्या वचःसम्मर्दिन्या भूयताम्।

Derivation.—याहिणी—ग्रह-णिनिः। भूः—भू-लुङ् स मास्मयोगे अडागमप्रतिषेधः। उत्साहिनी—उत्-सह-णिनिः। उद्भासिनी—उत्-भास-णिनिः। वचस्—वच-असुन्, सुडागमः। सम्मर्दिनी-सम्-मर्द-णिनिः।

হে ভীরু 'যাইব না' এই আগ্রহ অবলম্বন করিয়া থাকিও না।

---

* "नन्दि ग्रहि पचादिभ्यो ल्यु णिन्यचः"। ल्यु (अन) comes after नन्दि class; णिनि after ग्रह class; and अच् after पच class. ग्रह class:—ग्रह्, उत्-सह, उत्-दह, उत्-भास, स्था, मन्, सं-मर्द &c. Thus by the affix णिनि,—ग्राही, उत्साही उद्दाही, उद्भासी, स्थायी, मनी, संमर्दी। So the above sloke is intended to cite instances of ग्रहादि। † See Q. I, 2, Book iii. sl. 31.

तां प्रातिकूलिकीं मत्वा जिहीर्षुर्भीमविग्रहः।
बाहूपपीड़माश्लिष्य जगाहे द्यां निशाचरः॥ ९४॥

গমনে উৎসাহ প্রদর্শন কর। দেহকান্তি বিস্তার করিয়া আমাকে আলিঙ্গন কর।

Thou, timid one, be not 'perverse.' Be courageous to go. Being brilliant with decorations clasp my bosom close.

Q. Give the meaning of वाङ्गिणी. Ans : See above.

Q Comment gram on. भूः. Ans : See above. ९३।

94. Principal part :—निशाचरः (कर्त्तृ) द्याम् (कर्म्म) जगाहे। जिहीर्षुः and भीमविग्रहः are adjectives to निशाचरः। मत्वा and आश्लिष्य are incomplete verbs. बाहूपपीड़म्—advrb. ताम्—object to मत्वा। प्रातिकूलिकीम्—Adj. to ताम्।

Prose order :—तां प्रातिकूलिकीं मत्वा जिहीर्षुः निशाचरः भीमविग्रहः (सन्) बाहूपपीड़म् आश्लिष्य द्यां जगाहे।

Substance :—अथ सीतां पराङ्मुखीं विज्ञाय तां हर्त्तुकामः रावणः भयावहं देहमाश्रित्य बाहुभ्यां दृढ़मालिङ्ग्य आकाशमुत्पतितः।

Explanation in tika form—यदैवमभिधीयमाना न प्रतिपन्ना तदा तां सीतां प्रातिकूलिकीं प्रतिकूलवर्त्तिनीं मत्वा ज्ञात्वा ["तत्प्रत्यनुपूर्व्वमीपलोमकूलम्" * इति प्रतिकूलं वर्त्तते इत्यस्मिन् अर्थे ठक्। जिहीर्षुः हर्त्तुमिच्छुः निशाचरः राक्षसः निशायां चरति इति चरधातोः टः। रावणः भीमः भयङ्करः विग्रहः मूर्त्तिः यस्य तथोक्तः भीषणशरीरः इत्यर्थः सन् बाहूपपीड़ं बाहुभिः उपपीड्य "सप्तम्याञ्चोपपीड़रुधकर्षः" [उपपूर्व्वेभ्यः पीड़ादिभ्यः सप्तम्यन्ते

---

* ठक् (इक) comes after ईप, लोम, and कूल preceded by प्रति and अनु, and in their second case affix, in the sense of existing (वर्त्तते). Thus, प्रतीपं वर्त्तते प्रातीपिकः, अन्वीपं वर्त्तते आन्वीपिकः, प्रतिकूलं वर्त्तते प्रातिकूलिकः।

प्रशस्तीं तां समादाय यातो रात्रिञ्चरालयम्।
तूष्णींभूय भयादासाञ्चक्रिरे मृगपक्षिणः॥ ९५॥

तृतीयान्ते चोपपदे णमुल् स्यात्] इति णमुल्। आश्लिष्य आलिङ्ग्य तां गृहीत्वा द्यां जगाहे रथेन उत्पत्य आकाशं गतवान्। तत्तं पश्चात्कृतम्।

Change of V.—जिहीर्षया भीमविग्रहेण ..द्यौः निशाचरेण। जगाहे।

Derivation :—प्रातिकूलिकीम्—प्रति कूल-ठक् स्त्रीत्वाद्डीप्। जिहीर्षु—हृ-सन्-उः। बाहुपपीडम्—बाहु-उप-पीड-णमुल्। बाहु—बाध-उः। आश्लिष्य—आ-श्लिष ल्यप्। लङ्—आश्लिषत्। जगाहे—गाह लिट् ए। लट्—गाहते। लुङ्—अगाहिष्ट। निशाचर—निशा-चर-टः।

নিশাচর রাবণ সীতাকে পরাঙমুখ ভাবিয়া তাহাকে হরণ করিবার অভিলাষে ভয়াবহ মূর্ত্তি ধারণ পূর্ব্বক বাহুদ্বয় দ্বারা দৃঢ়ভাবে ধরিয়া আকাশপথে আরোহণ করিল।

Finding her perverse, the night ranger, with a desire to take her away by force, took her close in his arms and went up to the sky.

Q. Give the feminine form of निशाचर। Ans : निशाचरी, टित्वात् ङीप्। Q. Decline the base of द्याम्। Ans : द्यौः दिवौ दिवः। द्यां दिवं दिवौ दिवः। दिवा द्युभ्याम् &c. Q. Account for ङीप in प्रातिकूलिकीम्। Ans : टिड्ढाणञ् इत्यादि सूत्रे ठक ठञ कञ् क्वरपः" इत्यादिप्रयोगात् ठक् प्रत्ययान्तात् ङीप्।९४।

95. Principal sentence:—मृगपक्षिणः (कर्तृ) आसाञ्चक्रिरे। भयात्—हेतौ। यतः—('यात' इत्यस्य पञ्चम्याम्) रावणात् इत्यस्य विशेषणम्। रावणात् (कर्तृम्)—भयहेतौ पञ्चमी। रात्रिञ्चरालयम्—object to यातः। ताम्—object to समादाय (incomplete verb)। प्रशस्तीम्—Adj. to ताम्।

Prose order :—प्रशस्तीं तां समादाय रात्रिञ्चरालयं यातः (तस्मात्) भयात् मृगपक्षिणः तूष्णींभूय आसाञ्चक्रिरे।

Substance :—यदा रावणः भयविमोहितां सीतामादाय प्रस्थितः तदा तद्भयात् मृगपक्षिणोऽपि तूष्णीं स्थिताः ।

Explanation in tika form :—तद्रूपदर्शनात् वसन्तौ विभ्यतौ तां सीतां समादाय बलात् गृहीत्वा रात्रौ चरतीति रात्रिंचरः । "चरेष्टः" "रात्रेः कृतिविभाषे"ति मुम् * । तस्य आलयं लङ्कां यातः गच्छतः या धातोः शतरि यात् इति सिद्धम्, तस्य पञ्चम्येकवचने, रावणात् इति जन्यपदस्य विशेषणम् । अथवा यातः इति समापिका क्रिया या धातोः कर्त्तरि क्तः, निशाचरः इति कर्तृपदं पूर्व्वश्लोकात् आदेयम् । रावणात् आगतात् भयात् शङ्कितोः मृगाश्च पक्षिणश्च । समानजातीयानामिति वचनात् एकवद्भावो न भवति । तूष्णींभूय मौनिनो भूत्वा "मौने तु तूष्णीं तूष्णीकाम्" इत्यमरः । आसाञ्चक्रिरे स्थितवन्तः । आसेः लिट् । रावणभयात् सर्व्वे विमोहिताः नीरवं तस्थुरित्यर्थः । वृत्तं पथ्या-वक्त्रम् ।

Change of V.—मृगपक्षिभिः...आसाञ्चक्रे ।

Derivation :—वसन्तौ—वस-शतृ । लट्—वसति लिट्-उवास, ऊषतुः उवसतुः । यातः—या-शतृ, पञ्चमी । रात्रिंचर—रात्रि-चर-टः । तूष्णींभूय—तूष्णीम्-भू-ल्यप् । आसाञ्चक्रिरे—आस्-लिट्-इरे । लुङ्—आसिष्ट पक्षिन्—पक्ष (पक्ष-अः)-इन् ।

যখন রাবণ ভয়বিহ্বলা সীতাকে লইয়া রাক্ষসালয়াভিমুখে প্রস্থান করিল তখন তাহার ভয়ে মৃগপক্ষিগণও নির্ব্বাক্ হইয়া রহিল ।

The birds and beasts stood dumb in fear of him when he left for the residence of the night-ranger taking her paralysed with fear.

Q. Can there be समाहारद्वन्द्व in मृगपक्षिणः । Ans : "समान जातीयानाम्" इति वचनात् न एकवद्भावः । Q. Parse तूष्णीम् । Ans : अव्ययपदम्, अत्र तु तूष्णींभूय इति एकपदम्, गतिसमासे च ल्यप् ।

---

* मुम् (म्) comes optionally after रात्रि when some कृदन्त follows it. Thus :—रात्रिचरः, रात्रिंचरः ।

उच्चैरारस्यमानां तां कृपणां रामलक्ष्मणौ ।
जटायु: प्राप पक्षीन्द्र: परुषं रावणं वदन् ॥ ९६ ॥

Q. Parse यात:, and decline the base of it. Ans: रावणात् इति उक्तपदस्य विशेषणम्। Declension पुंसि, यान् यान्तौ यान्त:, यान्तं यात:, याता याद्भ्याम् &c. स्त्रियाम्—याती यान्ती च अन्ती नदीवत्। क्लीबे—यात् याती यान्ती यान्ति &c. ९५।

96. Principal part :—जटायु: (कर्त्तृ) ताम् (कर्म्म) प्राप। Adj. to जटायु:—पक्षीन्द्र: and वदन्। Adj. to ताम्—रारस्यमानां and कृपणाम्। रामलक्ष्मणौ—object to रारस्यमानाम्। उच्चै:—व्ययम्, क्रियाविश रावणम्—object to वदन्। परुषम्—adv: or object to वदन्।

Prose order :—रामलक्ष्मणौ उच्चै: रारस्यमानां कृपणां तां पक्षीन्द्र: जटायु: रावणं परुषं वदन् प्राप।

Substance :—हा राम हा लक्ष्मण इति उच्चै: क्रन्दन्तीं सीताम् उपागत: जटायु: तदानीं रावणं भृशम् तिरश्चकार।

Explanation in tika form :—रामलक्ष्मणौ हा राम! हा लक्ष्मण! इति शब्दौ उच्चै: महता ध्वनिना रारस्यमानां पुन: पुन: उदीरयन्तीम्। रस: शब्दकर्म्मकत्वात् क्रियासमभिहारे (Intensity and repetition of an action) यङ्। अथवा रामलक्ष्मणौ उच्चै: आह्वयन्तीमिति। शब्दकर्म्मकस्य धातो: सकर्म्मकत्वे उदाहरणम् "उपाकर्ण्येव मदत्पतङ्ग" इत्यादौ द्रष्टव्यम्। कृपणां दीनां तां सीतां पक्षीन्द्र: पक्षिराज: जटायु: "सम्पातिर्वारुणि: ख्यातो जटायुश्च जटायुषि" इति शब्दार्णव:। रावणं परुषं रूक्षवचनं निष्ठुरं यथा तथा वा वदन् तिरस्कुर्व्वन् इत्यर्थ:। अत्र परुष पदस्य विशेषणत्वेऽपि विशेष्य-वद्व्यवहार:; तथाहि, "रूक्षास्त्वप्रावयस्तदा" इति। प्राप, सीता समीपमभ्यागात्। वृत्तं पथ्यावक्त्रम्।

Change of voice :—रारस्यमाना सा कृपणा...जटायुषा प्रापे पक्षीन्द्रेण..वदता।

एते प्रकीर्णकाः अतःपरं टाधिकारः।

द्विषन् वनेचराग्र्याणां त्वमादायचरो वने।
अग्रेसरो जघन्यानां माभूः पूर्व्वसरो मम॥ ९७॥

Derivation :—रारस्यमाना—रस-यङन्त-शानच्। जटायुः—जटा-इण-उण्। वदन्—वद-शतृ। लुङ्—अवादीत्। क्रपणा—क्रप-युच्। लट्—कल्पते। लुङ्—अक्लृपत् अक्लृप्त, अकल्पिष्ट। लृट्—कल्पिष्यति, कल्पिष्यते, कल्प्स्यते।

সীতা কাতর হইয়া হা রাম হা লক্ষ্মণ বলিয়া উচ্চৈঃস্বরে ক্রন্দন করিতে লাগিলেন। পক্ষিরাজ জটায়ু রাবণকে কর্কশ ভাবে তিরস্কার করিতে করিতে সীতার সমীপে উপস্থিত হইল।

Using bitter terms to Ravana, Jatāyu the lord of birds approached to the lamentable Sita crying aloud, O Rama! O Laksmana!

Q. Parse रामलक्ष्मणौ। Ans: रारस्यमानाम् इति शब्दकर्म्मकस्य कर्म्मपदम्। Q. Give the different meanings of इन्द्र। Ans : इन्द्रः सचीपतावन्तरात्मन्यादित्ययोगयोः" इति कोषः। Q. Point out the two objects to वदन्। Ans : वदधातुः द्विकर्म्मकः। रावणमिति गौणं कर्म्म। वचनमिति मुख्यं कर्म्म।

इतः प्रभृति अधिकारकाण्डमुच्यते। यत्र एकैकं विषयमाश्रित्य लक्षणं प्रदर्शितं तदधिकारकाण्डम्। शेषलक्षणेषु प्रकीर्णकमेव द्रष्टव्यम्, एवञ्च कृत्वा अन्तरान्तरा तत्सूचनार्थं प्रकीर्णश्लोकाभिधानम्। विवक्षितस्य सर्गस्य अपरिसमाप्तत्वात् सर्गमध्ये काण्डान्तरारम्भो न दोषाय। एवञ्च अयं सर्गो मिश्रक उच्यते, द्वयोरप्यत्र प्राधान्येन विवक्षितत्वादिति।

97. Principal part—हे वनेचराग्र्याणां (सम्बन्ध) द्विषन् (सम्बोधनम्) त्वम् (कर्त्तृ) मम (सम्ब) पूर्व्वसरः (विधेयविशेषणम्) माभूः। Adj. to त्वम्—आदायचरः and अग्रसरः। वने—अधिकरणे। जघन्यानाम्—सम्बन्धे, अग्रेसर इत्यनेन सम्बन्धः।

Prose order :—हे वनेचराग्र्याणां दिषन्! वने आदायचरः, अघन्यानां चर्येचरः त्वं मम पूर्व्वसरः माभूः।

Substance.:—त्वम् ऋषीणां शत्रुरसि। सीताम् आदाय पलायसे। निकृष्टेभ्यो निकृष्टतरस्त्वं मत्पुरतो गन्तुं नैव समर्थो भवेः।

Explanation in tika form :—कीदृशं पक्षं वदन्नित्याकाङ्क्षायामाह दिषन्निति। वने चरन्तीति वनेचराः अधिकरणे "चरेष्टः"* इति ट प्रत्ययः। "तत्पुरुषे कृति बहुलम्" इति अलुक् ** तेषां अग्र्याः प्रधानाः तेषां वनेचराग्र्याणां मुनीन्द्राणां दिषन् भवो! "द्विषोऽमित्रे" इति शतृ प्रत्ययः। तत्सम्बोधने। वने आदाय सीतामिति शेषः, चरति गच्छति इति आदायचरः प्रयाणपरः "भिक्षासेनादायेषु च" इति टः † क्रियायाः कारकापेक्षायामपि यवन्तेन मयूरव्यंसकादित्वात् सापेक्षत्वेऽपि समासः। असमासेऽपि न क्षतिः। तथा अघन्यानां गोवानाम् चर्येचरः प्रथमः "पुरोऽग्रतोऽग्रेषु सर्त्तेः" ‡ टः। त्वं मम पूर्व्वः सरतोति पूर्व्वसरः अग्रगामी मा भूः न भव। "पूर्व्वे कर्त्तरि" §

---

* The affix ट comes after चर (to go) when a word in composition with it, is in the locative case. Thus :—वने चरति इति वनचरः।

** When a word with a कृत् affix is the last in a तत्पुरुष, then the elision of the 7th case affix singular takes place diversely. Thus वनेचरः वनचरः; खेचरः खचरः।

† The affix 'ट' comes after चर् (to go.) when the word in composition with it is either भिक्षा or सेना or आदाय. Thus भिक्षाचरः, सेनाचरः, आदायचरः (one who goes after having taken)

‡ The affix 'ट' comes after 'सृ' when the word in composition with it is either पुरस् or अग्रतस् or अग्रस्, अग्रेष, अग्रे। Thus पुरस्सरः, अग्रतस्सरः, (अग्रे इति एदन्तत्वं निपातितम्।)

§ See the question 3rd.

यशस्करसमाचारं ख्यातं भुवि दयाकरम्।
पितुर्वाक्यकरं रामं धिक् त्वां दुष्कृतमत्वपम् ॥ ९८ ॥

'इति टः। तिष्ठ रे प्रतिफलं दास्यामीति भावः। अयमङ्गलत्वात्, हे द्विषन् वनेचरांग्रगाणां आदायचरः भवकात्तुमिति। वृत्तं पथ्यावक्त्रम्।

Change of V :—त्वया आदायचरेण, अग्रेसरेण, पूर्व्वसरेण मा भावि।

Derivations :—द्विषन्—द्विष-शतृ। वनेचर—वने-चर-टः। अग्र्य—अग्र-यत्। 'आदायचर—आदाय-चर टः। अग्रेसरः—अग्रे-सृ टः। जघन्य—जघन-यः। पूर्व्वसर—पूर्व्व-सृ टः। माभूः—भू-लुङ् स, माङ्योगे अडागमप्रतिषेधः।

রে মুনিকুল শত্রো! তুই অধমগণের অগ্রগণ্য, বনে সীতাকে গ্রহণ করিয়া পলায়ন পর হইয়াছিস্। তুই আমার সম্মুখ দিয়া যাইতে পারিবি না।

Thou enemy of the mendicants and worst of the worse must not go from before me, range as thou dost taking Sita with thee.

Q. If द्विषन् do not indicate an enemy, should the form be retained? Ans: "द्विषोऽमित्रे" इति अमित्रार्थे एव द्विष्धातोः शतृ प्रत्ययो भवति अन्यथा लट् स्यात्। Q. Is there any समास in आदायचरः? Ans: मयूरव्यंसकादिसमासः। Q. Should it be पूर्व्वसरः, if it mean पूर्व्वं देशं सरति? Ans: पूर्व्वः सरति इति कर्तृवाचिनि उपपदे एव टः स्यात्, पूर्व्वं सरति इति कर्म्मवाचिनि तु उपपदे न टः स्यात्, किन्तु अण् भवेत्, तथा सति 'पूर्व्वसारः' इत्येव स्यात्। ९७।

98. Principal part :—त्वां (धिक्योगे द्वितीया) धिक् (अव्ययम्) अस्तु। Adj. to त्वाम्—अत्रपम् and दुष्कृतम्। रामम्—Obj. to दुष्कृतम्। Adj. to रामम्—यशस्करसमाचारं, (भुवि) ख्यातं, दयाकरम् and (पितुः) वाक्यकरम्। पितुः—(सम्बन्धपदम्) वाक्यम् इत्यनेन सम्बन्धः।

Prose order :—यशस्करसमाचारं भुवि ख्यातं दयाकरं पितुःवाक्यकरम् रामं दुन्वतम् अत्रपं त्वां धिक् ।

Substance:—यस्य चरितं विख्यातम्, यश्च पितुः आज्ञां पालयामास, जगद्विख्यातं दयाकरं तं रामं दुनोषि त्वम् । अतस्त्वं निर्लज्जोऽसि, धिक् त्वाम् ।

Explanation in tika form :—यशः करोतीति यशस्कर' कीर्त्तिकरः "कृञो हेतुताच्छील्यानुलोम्येषु" * इति हेतौ टः । तथाभूतः समाचारः समाचरणं चरितं यस्य सः, तथोक्तम् । पुनः किम्भूतम् ? भुवि पृथिव्यां ख्यातं प्रसिद्धं दयाकरं दयाकरणशीलं । ताच्छील्ये टः । पितुः वाक्यकरं पितृवाक्यानुष्ठाने अनुकूलम् आज्ञाकारमित्यर्थः । आनुलोम्ये टः । रामं दुन्वतम् उपतापयन्तं तथा अत्रप परस्त्रीहरणेन निर्लज्जं त्वाम् धिक् ते निन्दास्तु इति भावः । 'उभसर्वतसोः कार्य्या धिगुपर्य्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ।' इति धिक्योगे द्वितीया । एवम्भूते साध्वी यः पापम् आचरति तस्य अजननिरेवास्तु इति भावः । 'उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् । तं जनमसत्यसन्धं भगवति वसुधे कथं वहसि ।' हितोपदेशः ।

Change of V.—No V. change for want of verb ; or धिक् (त्व) भूयताम् ।

Derivation:—यशस्कर—यशस्-कृ-टः । समाचारः—सम्-आ-चर-भावे घञ् । ख्यातं—ख्या-कर्म्मणि क्तः । लट्—ख्याति, लुङ्—अख्यत् । दयाकरम्—दया-कृ-टः । वाक्यकरम्—वाक्य-कृ-टः । दुन्वन्तं—दु-शतृ । लट्—दुनोति ।

যে রামের চরিত্র খ্যাতি বিস্তার করিয়াছে, যিনি পিতৃআজ্ঞা

* The affix ट comes after 'कृ' in the sense of (1) cause, (2) habit and (3) favourableness. Thus (1) यशस्करः (that causes reputation ; (2) दयाकरः (who is in the habit of showing mercy) ; (3) पितुः वाक्यकरः–(who shows favourable disposition towards his father in doing his bidding).

अहमन्तकरो नूनं ध्वान्तस्येव दिवाकरः ।
तव राक्षस रामस्य नेयः कर्म्मकरोपमः ॥ ९९ ॥

'পালন করিয়াছেন, সেই জগদ্বিখ্যাত দয়াকর রামচন্দ্রকে ক্লেশ দিতেছিস্ । তুই নির্লজ্জ, তোকে ধিক্ ।

Fie to thee, shameless wretch, who dost trouble Rama, one whose conduct has brought him great fame, who is the seat of mercy, is celebrated throughout the worlds and has done his father's bidding.

Q. In what senses does ट come after कृ। Illustrate fully. Ans : See the footnote. Q. Account for the 2nd case affix in लाम् । Ans : See above. ९८।

99. Principal part :—हे राक्षस ! अहं (कर्त्तृ) दिवाकरः (उपमान कर्त्तृपदम्) अन्तकरः (विध) (भवामि) । Adj. to अहम्—नेय and कर्म्मकरोपमः । ध्वान्तस्य—उपमान सम्बन्ध । तव—सम्बन्ध । रामस्य—नेय इत्यनेन कर्म्मकर इत्यनेन वा सम्बन्धः । नूनम्—व्ययम् ।

Prose order :—हे राक्षस ! दिवाकरः ध्वान्तस्येव, रामस्य नेयः कर्म्मकरोपमः अहं नूनं तव अन्तकरः (भवामि) ।

Substance :—भो राक्षस ! अहं हि रामस्य वेतनग्राही भृत्य इव स्थितः । विधिनिर्द्दिष्टः सूर्य्यो यथा स्वतएव अन्धकारं विनाशयति तथा रामनिर्द्दिष्टो भृत्यः अहमपि हेलया त्वां निपातयिष्यामि इति ।

Explanation in tika form :—हे राक्षस ! दिवा दिनं करोतीति दिवाकरः "दिवा विभे"ति ट प्रत्ययः । अथवा दिवा दिवसे करः रश्मिर्यस्य स दिवाकरः सूर्य्यः ध्वान्तस्य अन्धकारस्य इव "अन्धकारो स्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः" इत्यमरः । रामस्य नेयः वश्यः "वश्यः प्रणेयः" इत्यमरः । कर्म्मकरः भृत्यः "कर्म्मणि भृतौ"* इति टः । तेन उपमा यस्येति कर्म्मकरोपमः भृतकतुल्यः

---

* ट Comes after कृ in composition with कर्म्मन्, when it denotes one to be hired by salary. (भृतिः वेतनम्). Thus कर्म्मकरः भृतकः (a hired servant)

सतामकष्करं पक्षी वैरकारं नराशिनम् ।
हन्तुं कलहकारोऽसौ शब्दकारः पपात खम् ॥ १०० ॥

इति टाधिकारः ।

अहं नूनं निश्चितं तव अन्तकरः नाशयिता भवामीति शेषः । यथा भृतकः अर्थ-ग्रहणात् आत्मानं क्रीतमिव मन्यमानः स्वामिकार्य्यसाधनाय प्राणानपि मुञ्चति तथाहं करिष्ये इति कर्म्मकरोपमशब्दस्य सार्थक्यम् । वृत्तं पथ्यावक्त्रम् ।

Change V.—मया अन्तकरेण (भूयते)...दिवाकरेण ..नैरेन० कर्म्म-करोपमेन ।

Derivation :—अन्तकरः—अन्त-कृ-टः । ध्वान्त—ध्वन-क्तः (निपातनम्) । दिवाकरः—दिवा-कृ-टः । नैरः—नी यः । कर्म्मकरः—कर्म्म-कृ-टः ।

দিবাকর যেরূপ অন্ধকার বিনাশ করে রামচন্দ্রের বশ্য ও ভৃত্য-তুল্য আমিও তোকে সেইরূপ বিনাশ করিব ।

Thou demon, obedient as I am to Rama, like a bondman, I will surely put an end to thee as the sun does to darkness.

Q. Distinguish between कर्म्मकर and कर्म्मकारः । Ans : भृतकार्थे-टः ; अन्यत्र अण् । अतः कर्म्मकरः इति ट प्रत्यये भृतकः (one hired for service). अन्यार्थे कर्म्मकारः । Q. Explain the propriety of the simile ध्वान्तस्येव दिवाकरः । Ans : रावणस्य कृष्णवर्णतया ध्वान्तेन सह औपम्यम् । जटायोः तेजस्विनः सूर्य्येण समाधिः । दिनकरः यथा स्वतुः एव तमः नाशयति तथा अहं त्वां हेलया हनिष्यामि इति गम्यार्थः ९९ ।

101. Principal part :—(असौ) पक्षी (कर्त्तृ) खम् (कर्म्म) पपात । हन्तुम्—Infinitive mood. नराशिनम्—Object to हन्तुम् । Adj to नराशिनम्—अकष्करम् and वैरकारम् । सताम्—सम्ब । Adj. to पक्षी—असौ & कलहकारः ।

Prose order :—कलहकारः असौ पक्षी सताम् अकष्करं वैरकारं नराशिनं हन्तुं शब्दकारः (सन्) खं पपात ।

अतःपरं प्रकीर्णकाः। *

धुन्वन् सर्व्वपथीनं खे वितानं पक्षयोरसौ।
मांसशोणितसन्दर्शं तुण्डघातमयुध्यत ॥ १०१ ॥

Substance.—अथासौ जटायुः वाग्युद्धकारी नरभोजिनम् रावणं हन्तुम् आकाशे उत्पतितः। रावणोहि साधून् सर्व्वथा पीड़यति वैरञ्च विदधाति इति।

Explanation in tika form—कलहं करोतीति कलहकारः वाग्युद्धकारी "न शब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्रपदेषु" इति ट प्रत्यये प्रतिषिद्धे "कर्म्मणि अण्"। † असौ पक्षी जटायुः सतां साधूनां भरुष्करं पीड़ाकरम्। "अर्शोऽस्त्रियामीर्म्ममरुः क्लीवे" इति अरुस् शब्दः व्रणार्थकोऽपि पीड़ोपलक्षणपरः। वैरकारं वैरकरणशीलं पूर्व्ववत् अण्। नराशिनं नरमांसभक्षकं राक्षसम् इत्यर्थः। हन्तुं विनाशयितुं शब्दकारः शब्दकरणशीलः सन् "न शब्दे"त्यादिना पूर्व्ववत् अण्। खम् आकाशं पपात जगाम। शब्दपातमिति पाठे शब्दस्य पातो यत्रेति खविशेषणम्, यावद्दूरं शब्दगमनं तावद्दूरमित्यर्थः। यद्वा शब्दस्येव पातो गतिर्यत्रेति पतनक्रियाविशेषणं, एतेन 'यथा शब्दस्य शीघ्रगमनं तथासे'ति ध्वनितम् इति। इति टाधिकारः।

Change of V.—पक्षिणा...कलहकारेण...अमुना...शब्दकारेण पेते।

Derivation.—अरुष्करं—अरुस्-कृ टः। पक्षी—पक्ष इन्। वैरकारम्—वैर-कृ-अण्। नराशिनम्—नर-अश णिनिः। कलहकार—कलह-कृ-अण्। शब्दकारः—शब्द-कृ-अण्। पपात—पत-लिट्। युद्ध—अपप्तत्।

রাবণ সাধু লোকের পীড়াদায়ক। সে সর্ব্বদা কলহপর। ঐ জটায়ু পক্ষী নরভোজীকে বিনাশ করিবার জন্য চীৎকার করিয়া আকাশে উঠিল।

Thus quarreling the bird rose up shouting to the sky, in order to to kill the hostile canibal, the trouble to the pious.

---

* Miscellany.

† अण् (अ) comes after a root in composition with its objective case. As. कुम्भं करोति इति कुम्भकारः।

The bird bent on fight went up to the sky raising a cry, to kill the meat-eating enemy, the troublesome one to the righteous.

101. Principal part :—पक्षी (कर्त्ता) अयुध्यत । धुन्वन्—Adj. to पक्षी । वितानं—object to धुन्वन् । सर्व्वपथीनं—Adj. to वितानम् । पक्षयोः—सम्बन्धे षष्ठी । मांसशोणितसन्दर्शं and तुण्डघातम् are adverbs. खे—अधिकरणम् ।

Prose order :—पक्षी खे सर्व्वपथीनं पक्षयोः वितानं धुन्वन् मांसशोणितसन्दर्शं तुण्डघातम् अयुध्यत ।

Substance :—अथ जटायुः विस्तृतं पक्षद्वयं सर्व्वतो विस्तारयन् प्रकम्पयंश्च तत् तथा युद्धम् घोरमकरोत् यथा चञ्चाघातेन क्षतस्थमांसकृन्तनम् शोणितपातश्च अलक्ष्यत ।

Explanation in tika form :—इतः प्रकीर्य्यकश्लोकानाह, धुन्वन्नित्यादि । पक्षी पक्षी खे आकाशे सर्व्वे पन्थानः इति सर्व्वपथाः । "ऋक् पूरब्धूःपथामानक्षे" * इति समासान्तोऽकारः । तान् व्याप्नोतीति तं सर्व्वपथीनं "तत् सर्व्वादेः पथ्यङ्ग कर्म्मपत्र पात्रं व्याप्नोति" इति खः । † पक्षयोः वितानं विस्तारं विस्तृतपक्षयुगलमित्यर्थः । धुन्वन् कम्पयन्, मांसशोणितसन्दर्शं कात्स्न्येन मांसं शोणितञ्च संदृश्य (रावणस्य इति शेषः) इति मांसशोणितसन्दर्शम्, "कर्म्मणि दृशिविदोः साकल्ये" ‡ इति णमुल् । तुण्डेन चञ्चा घातो हननं

* पन्थाम् अ अनक्षे इति पदच्छेदः । अ Comes after ऋच् पुर् अप् धुर् and पथिन् in a समास, except when धुर् comes after अक्ष । Thus अर्द्धर्चः, विष्णुपुरम्, विमलापम्, राज्यधुरा । रम्यपथो देशः, सर्व्वपथाः । But with अक्ष there is no अ as in अक्षधूः ।

† ख (ईन) comes after पथिन् अङ्ग कर्म्मन् पत्र and पात्र preceded by सर्व्व &c in the sense of pervasion. Thus सर्व्वपथान् व्याप्नोति इति सर्व्वपथीनः ; सर्व्वाङ्गीणः, सर्व्वकर्म्मीणः &c. See P. 332.

‡ णमुल् comes after दृश् and विद preceded by their

यथा इति तुण्डघातं यथा स्यात् तथा अयुध्यत तुण्डाघातैः अस्त्रीः शरीरात् मांसं क्षरन् शोणितञ्च व्यावयन् युद्धमकरोत् इत्यर्थः। तुण्डाघातमित्यत्र "करणे हनः" * इति न णमुल् "हिंसार्थानाञ्च समानकर्म्मकाणाम्" † इति समानकर्म्मकत्वाभावात् अकर्म्मकत्वात् युधेः। तेन भावे घञ्। इत्थं पश्यावकम्।

Change of V.—धुन्वता...अयुध्यत।

Derivation.—धुन्वन्—धु-शतृ प्रथमा। लट्—"धूनोति चम्पक वनानि धुनोत्यशोकम्। चूतं धुनाति धुवति स्फुटितातिमुक्तम्। वायुर्विधूनयति चम्पक पुष्परेणून्। यत्कानने धवति चन्दनमञ्जरीञ्च" इति कविरहस्यम्। सर्व्वपथीनम् —सर्व्वपथ-खः। वितानम्—वि-तन-घञ्। पक्ष—पक्ष-सः। मांस—मन-सः। सन्दर्श—सम् दृश-णमुल्। अयुध्यत—युध लङ् त। (दिवादिः) लुङ्—अयुद्ध।

উক্ত জটায়ু সর্ব্বপথব্যাপী বিস্তৃত পক্ষদ্বয় প্রকম্পিত করিয়া এইরূপে যুদ্ধ করিতে লাগিল যে চঞ্চুঘাতে মাংস ও শোণিত সম্পূর্ণ উঠিয়া আসিতে লাগিল।

The bird as he shook his extensive wings pervading all place, fought with the 'strokes' of his beak, 'bringing out to sight Ravan's flesh and blood.

---

objects when they denote totality. Thus कात्स्न्र्येन (totally) मांसं शोणितञ्च संदृश्य इति मांसशोणितसन्दर्शम्।

* णमुल् comes after हन् in composition with its instrumental case,

† But in तुण्डाघातम् अयुध्यत The final verb is intransitive and the rule हिंसार्थानाञ्च &c asserts that णमुल् takes place after हन् if the object of हन् be also the object of the final verb. अयुध्यत being intrasitive it can not govern the same object and so the rule करणे हनः can not be applied to the above case.

न बिभाय न जिह्राय न चक्राम न विव्यथे।
आघ्नानो विध्यमानोऽपि रणान्निववृते न च ॥ १०२ ॥

Q. Decline सर्व्वपथ। Ans : सर्व्वपथाः, सर्व्वपथान्, सर्व्वपथैः, सर्व्वपथेभ्यः &c. Q. Can तुरङ्गाघातम् be formed of चमुण्? Ans : See above. १०१।

102. Principal parts :—(1) असौ न बिभाय, । (2) (असौ) न जिह्राय। (3) (असौ) न चक्राम। (4) असौ न विव्यथे। (5) (असौ) न च रणात् निववृते। Adj. to असौ—आघ्नानः and विध्यमानः।

Prose order :—आघ्नानः (असौ) न बिभाय, न जिह्राय, न चक्राम, न विव्यथे, विध्यमानोऽपि रणात् न च निववृते।

Substance :—बालो प्रहर्त्तुमिच्छन् भीतिमगमत्, प्रहारनिष्फलता-मवेत्य न च लज्जामवाप। क्लान्तिमवाप व्यथां वा, न प्रहारात् विरतोऽभूत्। बाणविद्धोऽपि युद्धक्षेत्रात् न च पलायितः।

Explanation in tika form :—असौ पक्षी आघ्नानः प्रहरन् "आङः यम हनः" * इति हन्तेरात्मनेपदम्। न बिभाय न भीतः। न च जिह्राय, मया ताडितोऽपि न हत इति न लज्जते स्म। न चक्राम, न च प्रहरण-क्रियायाम् असमर्थो बभूव। न विव्यथे न च पीडितो बभूव। सर्व्वथा रावणो-ऽयं दुर्जेयः, इति विचिन्त्य न मनसि व्यथितोऽभूत् इत्यर्थः। विध्यमानः परैः ताड्यमानोऽपि, व्यध् धातोः कर्म्मणि शानच्। न च रणात् युद्धात् निववृते न विरतः, क्षमतात्साहसात्। यथा परैः हन्यमानोऽपि न विव्यथे पीडां भेजे बलाधिकत्वादिति भावः। धातूनां मध्ये लिटि प्रयोगः। इत्तं पथ्यावक्त्रम्।

Change of V.—बिभ्ये जिह्रे—चक्रमे...आघ्नानेन, विध्यमानेन...।

Derivation :—बिभाय—भी-लिट् ण। पक्षे—बिभयाञ्चकार, बिभया-ञ्चकार, बिभयाम्बभूव। लट्—बिभेति, बिभीतः, बिभ्यति। जिह्राय—ह्री लिट् ण। पक्षे—जिह्रयाञ्चकार, जिह्रयाम्बभूव, जिह्रयामास। चक्राम—क्रम लिट्-

---

* The roots यम् and हन् preceded by आ, take आत्मनेपद।

पिशाचमुखधौरेयं सच्छन्नकवचं रथम् ।
युधि कद्रथवद्भीमं बभञ्ज ध्वजशालिनम् ॥ १०३ ॥

'म । लट्—क्लाम्यति (दिवादिः) क्लामति, क्लम्यति (भ्वादि) लुङ्—अक्लमीत् अक्लमत् । विव्यथे—व्यथ-लिट् ए । लट्—व्यथते । आघ्नानः—आ-हन-शानच् । विध्यमानः—व्यध-शानच्, कर्मणि । निववृते—नि-वृत्-लिट् ए । लट्-वर्त्तते । लुङ्- अवृतत्, अवर्त्तिष्ट ।

সে দশাননকে প্রহার করতঃ ভীত লজ্জিত ক্লান্ত বা ব্যথিত হয় নাই। রাবণ কর্ত্তৃক বিদ্ধ হইয়াও যুদ্ধ স্থান হইতে পলায়ন করিল না।

He did not entertain fear, nor was he ashamed, nor did he get tired, nor was he pained. Striking and himself wounded he did not retreat from the fight.

Q. Account for आत्मनेपद in आघ्नानः Ans : See above. १०१

एते प्रकीर्णकाः ।

103. Principal part :—(जटायुः) युधि (अधिकरणम्) रथं (कर्म) कद्रथवत् (क्रियाविशेषणं) बभञ्ज । Adj. to रथम्—पिशाचमुख धौरेयं, सच्छन्नकवचं, भीमं and ध्वजशालिनम् ।

Prose order :—(जटायुः) युधि पिशाचमुखधौरेयं सच्छन्नकवचं भीमं ध्वजशालिनं (रावणस्य) रथम् कद्रथवत् बभञ्ज ।

Substance:—योऽसौ रावणस्य रथः पिशाचमुखाश्वैः वाहितोऽभूत्, यत्र च छन्नकवचादिकम् अवर्त्तत, ध्वजयुक्तं तं भीषणं रथं जटायुः अप्रशस्तं रथमिव विचूर्णितमकरोत् ।

Explanation in tika form :—जटायुः युधि संग्रामे धुरं वहन्तीति धौरेया अश्वाः "धुरो यड्ढकौ" * इति ढक् । पचे धुर्य्याः । पिशाचस्य मुखं पिशाचमुखम् तदिव मुखं येषां ते पिशाचमुखाः "सप्तम्युपमाने"त्यादिना उत्तर-

---

* यत्, यथा धुर्य्यः, ढक् (एय), यथा धौरेय ।

पदलोपी समास: । * पिशाचमुखा: धौरेया: यत्र तं पिशाचमुखधौरेयं, सत् शोभनं विद्यमानं वा शस्त्रं कवचञ्च यस्मिन् तं भीमं भयानकम् ध्वजेन शालिनं शोभितुं शीलमस्येति ध्वजशालिनं पताकाशोभितं, यद्वा ध्वजयुक्तं, शालिङ्कत्थ. किब् प्रत्ययान्त: तदन्तमाह । अथवा धातूनामनेकार्थत्वात् शालिरत्र दीप्त्यर्थं । रथं यानम्, कद्रथवत् कुत्सितं रथमिव "रथवदयोश्च" इति को: कदादेश: † बभञ्ज भग्नवान् । रावणस्य सुहृद् रथमतिनिकृष्टरथमिव हेलया भग्नमकरोत् इत्यर्थ: । वृत्तं पथ्यावृक्तम् ।

Change of V.—...धौरेय:...कवच: रथ: भीम: बभञ्जे ध्वजशाली ।

Derivation :—धौरेय—धुर-ढक् । रथम्—रम-थक् । युधि—युध-क्किप् सप्तमी । कद्रथवत्—कद्रथ-वति: । भीम—भी-मक् । बभञ्ज—भञ्ज-लिट् अ । युद्—अभांक्षीत् ।

रावণের রথের অশ্ব সকল পিশাচমুখ। তাহার রথে সুন্দর ছত্র ও কবচ ছিল। যুদ্ধক্ষেত্রে জটায়ু সেই ধ্বজমনাথ রথ সামান্য রথের ন্যায় চূর্ণ করিল।

He broke, in the midst of the fight, the tremendous car like a bad one, the car that was being carried by horses of goblin face, had a banner, an umbrella and an armour.

Q. Give the different meanings of भीम: । Ans : "भीमो भयङ्करेऽपि स्यात् भीम: पाण्डव शङ्करौ" । १०२

---

* The word preceded by one of the 7th case (सप्तम्यन्त) or by one which is an object to be compared with, vanishes. Thus कण्ठे स्थित: काल: becomes कण्ठकाल: । पिशाचमुख-मिव मुखं यस्य becomes पिशाचमुख: ।

† 'कत्' is Substituted for कु before रथ and वद, Thus कु रथ: कद्रथ., so is कद्वद: ।

अत:परं अमधिकार:।

सन्त्रासयाञ्चकारारिं सुरान् पिप्राय पश्यत:।

स त्याजयाञ्चकाराथ सीतां विंशतिबाहुना॥ १०४॥

104. Principal sentences :—(1) स: (कर्त्ता) अरिं (कर्म्म) सन्त्रासयाञ्चकार। (2) अथ (स:) विंशतिबाहुना (प्रयोज्यकर्त्तरि तृतीया) सीतां (कर्म्म) त्याजयाञ्चकार। (3) स: सुरान् (कर्म्म) पिप्राय। पश्यत:—Adj. to सुरान्।

Prose order :—स अरिं सन्त्रासयाञ्चकार, अथ (स:) विंशतिबाहुना सीतां त्याजयाञ्चकार, (अत:) (स:) पश्यत: सुरान् पिप्राय।

Substance :—जटायु: शत्रुं भीतमकरोत्, अथ दर्शकान् देवान् प्रीणयाञ्चकार, रावणहस्तात् सीताम् विश्लिष्टामकरोत्।

Explanation in tika form:—स पक्षी अरिं रावणं सन्त्रासयाञ्चकार सम्यक् भीतमकरोत्। त्रासे: अकर्म्मकत्वात् "गतिबुद्ध्यादिना" अणिकर्त्त: अरे: कर्म्मत्वम्। * अथ त्रासानन्तरं विंशति: बाहवो यस्य तेन विंशतिबाहुना रावणेन सीतां त्याजयाञ्चकार त्याजितवान्। जटायु: दशाननहस्तेभ्य: सीताम् विश्लिष्टामकरोत् इत्यर्थ:। गत्यर्थादिषु त्यजेरग्रहणात् अणिकर्त्त: तृतीयैव भवति। अत: पश्यत: युद्धमवलोकयत: सुरान् देवान् पिप्राय प्रीणितवान्। अत्र त्रासनं सीतात्याजनञ्च देवानां प्रीते: कारणम् बोध्यम्।

---

* "गतिबुद्धि प्रत्यवसानार्थ शब्द कर्म्मकाकर्म्मकाणाम् अणि-कर्त्ता स णौ।" The verbs expressive of motion (गति), knowing (बुद्धि) dining (प्रत्यवसान) and such verbs as have sounds for their objects, or intransitive verbs, get their nominatives changed into objectives, in their causative state. Thus देवदत्त: ग्रामं गच्छति। अहं देवदत्तं ग्रामम् गमयामि। ग्रन्थ: अत्र तिष्ठति। अहम् ग्रन्थम् अत्र स्थापयामि। so in the above श्लोक, अरि: सन्त्रसति; जटायु: अरिं सन्त्रासयाञ्चकार। But other verbs except

अभीतो रावण: कामाश्चक्रे शस्त्रैर्निराकुलः।
भूयस्तं बेभिदाञ्चक्रे नखतुण्डायुध: खगः ॥ १०५ ॥

Change of V :—सन्त्रासयाञ्चक्रे अरिः सुराः पप्रच्छ: पिप्रियिरे तेन त्याजयाञ्चक्रे सीता।

Derivation.—सन्त्रासयाञ्चकार—सम्-त्रस णिच्-लिट्। अरि-ऋ इः। मर—मृ-क्त्। पिप्राय—प्री-लिट्-अ। प्रीणाति—प्रीणीते (लट्)। त्याजयाञ्चकार—त्यज-णिच्-लिट्। बाहु—बाध-कुः।

জটায়ু শত্রুর ত্রাস জন্মাইয়া দিয়াছিল। যে দৈবগণ যুদ্ধ দেখিতেছিলেন তাহাদিগকে প্রীত করিয়াছিল। বিংশতি বাহু দশাননকে সীতা ত্যাগ করাইয়াছিল।

He terrified the enemy, delighted the gods who were witnessing the fight and then made the twenty-handed Ravan part with Sita.

Q. Name some indeclinables that have both positive and negative senses. Ans : अलमिति अव्ययं वारणार्थे सामर्थ्यार्थे च प्रयुज्यते। वारणार्थे यथा, अलं विवादेन। सामर्थ्यार्थे यथा, अलं मल्लो मल्लाय। "अलं भूषण पर्य्याप्ति शक्ति वारण वाचकम्।" So are the following :—अन्तरेण—"अन्तरेण पदं विद्यात् विना मध्यार्थयोरपि।" नाना—"नाना शब्दो विनार्थेऽपि तथानेकोभयार्थयोः।" अन्तरा ;—"अन्तरा तु विनार्थे स्यात्, मध्यार्थे निकटार्थयोः।" खलु ;—"खलु स्यात् वाक्यभूषायाम् जिज्ञासायाञ्च सान्त्वने वीप्सा मान निषेधेषु पूरणे पदवाक्ययोः।" निर् ;—"निर् निषेधे च निश्चये।" इति सर्व्वत्र मेदिनी। १०४।

105. Principal sentence:—(1) रावणः (कर्त्तृ) शस्त्रैः (उपलक्षणे तृतीया) कामाश्चक्रे। Adj. to रावणः—अभीतः and निराकुलः।

---

the above mentioned ones, can not, in their causative state, change their nominatives into the objectives but into the instrumental cases. Thus instead of, जटायुः 'विंशतिबाहु' सीतां त्याजयाञ्चकार, we get 'विंशतिबाहुना' सीतां त्याजयाञ्चकार।

हन्तुं क्रोधवशादीहाञ्चक्राते तौ परस्परम् ।
न वा पलायाञ्चक्रे विहंयाञ्चक्रे न राक्षसः ॥ १०६ ॥

(2) खगः (कर्त्तृ) तं वेभिदाञ्चक्रे । Adj. to खगः—नखतुण्डायुधः । भूयः—adverb.

Prose order :—असीतः निराकुलः रावणः अस्त्रैः (उपलक्षितः) कासाञ्चक्रे । नखतुण्डायुधः खगः भूयः तं वेभिदाञ्चक्रे ।

Substance :—अथ रावणः सीताम् विमुच्य निराकुलः अस्त्राणि गृहीत्वा कुत्सितमभाषत । जटायुरपि चञ्च्वा नखैश्च तं भूयो विदारितवान् ।

Explanation in tika form :—असीतः त्यक्तसीतः अतएव निराकुलः पूर्व्वं बाहुभिः सीताग्रहणे व्याकुलः आसीत् अधुना तदभावात् सुस्थिरः अस्त्रैः उपलक्षितः सन् (उपलक्षणे ३या) कासाञ्चक्रे कुत्सितमभिहितवान्. एह्येहि खगाधम इति उत्कटम् आह्वयते स्म इति भावः । कासृ शब्दकुत्सायामिति धातोः लिट् । यद्वा धातूनामनेकार्थत्वात् युयुधे इत्यर्थः । नखतुण्डानि एव आयुधानि यस्य तथाभूतः खगः पक्षी जटायुः भूयः पुनरपि तं रावणं वेभिदाञ्चक्रे अत्यर्थं भिन्नवान् । नखाघातैः तुण्डाघातैश्च सर्व्वं क्षतविक्षतं चकार इत्यर्थः । भिदेर्यङन्तात् लिटि रूपम् ।

Change of voice:—असीतेन रावणेन निराकुलेन । स...नखतुण्डायुधेन खगेन ।

Derivation :—कासाञ्चक्रे—कास-लिट् ए । वेभिदाञ्चक्रे—भिद-यङ् लुक्-लिट् ए । खग—ख-गम-ड: ।

রাবণ সীতানির্ম্মুক্ত হইয়া নিরাকুল ভাবে নানা অস্ত্র গ্রহণ করিয়া ভৎসনা করিতে আরম্ভ করিল । জটায়ুও নখ ও চঞ্চু প্রহারে তাহার দেহ ক্ষত বিক্ষত করিতে লাগিল।

Being relieved of Sita, Ravana with weapons in his hand, used strong terms, and the bird again pierced him with beak and claws.

Q. Show fitness of निराकुल । Ans : (Look into the explanation.) Q. Analyse वेभिदाञ्चक्रे । Ans : (See above.) १०५

106. Principal sentence:—(I) तौ (कर्त्तृ) क्रोधवशात् (हेतौ पञ्चमी) परस्परम् (कर्म) हन्तुं (infinitive mood) ईहाञ्चक्राते। (2) विः (कर्त्तृ) न वा (अव्ययद्वयं) पलायाञ्चक्रे । (3) राक्षसः (कर्त्तृ) न (अं) दयाञ्चक्रे ।

Prose order :—तौ क्रोधवशात् परस्परं हन्तुम् ईहाञ्चक्राते, विः न वा पलायाञ्चक्रे । राक्षसः न दयाञ्चक्रे ।

Substance :—तौ च जटायुरावणौ क्रोधात् अन्योन्यं विनाशयितुं चेष्टाम् अकुरुताम् । रावणशरपीडितोऽपि जटायुः न विमुखोऽभूत्, रावणश्च न तस्मिन् कृपापर आसीत् ।

Explanation in tika form :—तौ जटायुरावणौ क्रोधवशात् कोपाधीनतया, परस्परम् अन्योन्यं "कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये" * तथा "समासवच्च बहुलम्" इति न समासः । हन्तुं व्यापादयितुम् ईहाञ्चक्राते चेष्टां कृतवन्तौ । विः पतत्रिः पक्षी "वि विष्किर पतत्रयः ।" इत्यमरः । न वा नैव "वा स्यात् विकल्पोपमयोरेवार्थेऽपि समुच्चये" † इति विश्वः । पलायाञ्चक्रे अदुद्रवत् । परापूर्वस्य अयतेः "उपसर्गस्य अयतौ" ** इति रेफस्य लत्वम् । राक्षसश्च न दयाञ्चक्रे पक्षिणं खलूहं कथं व्यापादयामि इति नानुकम्पते स्म ।

Change of voice :—ईहाञ्चक्रे ताभ्यां विना पलायाञ्चक्रे राक्षसेन दयाञ्चक्रे ।

---

* The सर्वनाम are duplicated to denote reciprocity of action. "समासवच्च बहुलम् ।" in the case of अन्य and पर the requisites of a समास are not needed. Thus instead of परःपर, अन्यान्य we get परःपरः i. e. परस्पर, and अन्यःअन्य, i. e. अन्योन्य । see foot note Page 50.

† विकल्प (option), उपमा (simile), एवार्थे (positively) समुच्चय (and)

** र in a उपसर्ग followed by the root अय is substituted by ल ।

उपासाञ्चक्रिरे द्रष्टुं देवगन्धर्व्वकिन्नराः ॥
छलेन पक्षी लोलूयाञ्चक्रे क्रव्यात् पतत्रिणः ॥ १०७ ॥

Derivation :—ईहाञ्चक्राते—ईह लिट् आते। लट्—ईहते। लुङ्-ऐहिष्ट। पलायाञ्चक्रे—परा-अय-लिट् ए। लट्—अयते। लुङ्—आयिष्ट। दयाञ्चक्रे—दय-लिट्-ए। लट् दयते। लुङ् —अदयिष्ट। वि—वयति पक्षौ विस्तारयति इति विः। वेञ्-ङिः।

তাহারা উভয়ে পরস্পরকে হনন করিবার জন্য চেষ্টা করিতে লাগিল। জটায়ু পলায়ন করিল না, রাক্ষসও তাহার প্রতি দয়া করিল না।

Both in rage attempted to kill each other. The bird did not fly away, nor did the demon pity.

Q. Change the voice in the above. Ans : See above. Q. Account for the reduplicated form in परस्पर। Ans : See above Q, Give the derivative meanings of विः। Ans : See above, १०६।

107. Principal sentence :—(1) देवगन्धर्व्वकिन्नराः (कर्त्तृ) द्रष्टुम् (अव्ययम्) उपासाञ्चक्रिरे। (2) क्रव्यात् (कर्त्तृ) छलेन (प्रकृत्यादिना तृतीया) पतत्रिणः (सम्बन्धे षष्ठी) पक्षौ (कर्म्म) लोलूयाञ्चक्रे।

Prose order :—देवगन्धर्व्वकिन्नराः द्रष्टुम् उपासाञ्चक्रिरे। क्रव्यात् छलेन पतत्रिणः पक्षौ लोलूयाञ्चक्रे।

Substance :—देवाः देवयोनयश्च तयोः संग्रामम् अवलोकयितुम् अन्तिके एव समुपस्थिताः। अतः राक्षसः अधर्म्मयुद्धमवलम्ब्य जटायोः पक्षद्वयं समूलं चिच्छेद।

Explanation in tika form :—दीव्यन्तीति देवाः पचाद्यच्। गानमेषां धर्म्मः इति गन्धर्व्वाः पृषोदरादित्वात् साधु। कुत्सिताः नराः किन्नराः अश्वमुखत्वात्। ते द्रष्टुं युद्धदर्शनाय उपासाञ्चक्रिरे अभिक्रमाजन्मुरित्यर्थः। क्रव्यं मांसम् अत्तीति क्रव्यात् राक्षसः छलेन कपटेन। बलेन इति पाठान्तरम्।

प्रलुठितमवनौ विलोक्य कृत्तम्
दृग्रवदनः खचरोत्तमं प्रहृष्यन्।
रथवरमधिरुह्य भीमधुर्य्यम्
स्वपुरमगात् परिगृह्य रामकान्ताम्॥ १०८॥

पतत्रिणः पक्षिणः जटायोः पक्षौ लोलूयाञ्चक्रे अत्यर्थं चिच्छेद। आमूलं छिन्नवान् इत्यर्थः। कृत्तम् पक्षाभ्यामिति शेषः।

Change of V :—उपासाञ्चक्रे देवगन्धर्व्वकिन्नरैः।—लोलूयाञ्चक्राते क्रव्यादा पक्षौ।

Derivation :—उपासाञ्चक्रिरे—उप,आस-लिट् इरे। लट्—उपासते। लुङ्—उपासिष्ट। पक्ष—पक्ष-अः। लोलूयाञ्चक्रे—लू यङन्त-लिट्। लट् लुनाति, लुनीते। लुङ्—अलावीत्, अलविष्ट। क्रव्यात्...क्रव्य-अद्-क्विप्।

দেব দানব কিন্নর সকলে যুদ্ধ দেখিবার জন্য নিকটে উপস্থিত হইল। রাক্ষস ছল করিয়া জটায়ুর পক্ষদ্বয় আমূলে ছিন্ন করিল।

The gods, the Gandharvas and the Kinnaras came near to see the fight. The demon, the eater of raw-flesh, cut down, by a trick, the two wings of the bird.

Q. Explain the fitness of छलेन here. Ans. छलेन वर्त्तन् कौशलेन वा शत्रुः जेतव्यः' इति शास्त्रवचनम्। रावणस्तु बलं कौशलञ्च प्रयुज्य अकृतकार्य्यः पश्चात् छलप्रयोगेनैव जटायुं विजितवान् इति रावणस्य अयशस्करत्वं ध्वनितम्। Q. Decline the stem of क्रव्यात्। Ans. क्रव्याद् शब्दस्य रूपं यथा, क्रव्यात् क्रव्यादौ क्रव्यादः। क्रव्यादा क्रव्याद्भ्याम् &c. १०७।

108. Principal part :—दशवदनः (कर्त्ता) स्वपुरम् (कर्म्म) अगात्। —Adj. to दशवदनः—प्रहृष्यन्। विलोक्य, अधिरुह्य and परिगृह्य are incomplete verbs of which खचरोत्तमं, रथवरम् and रामकान्ताम् are objects respectively. Adj. to खचरोत्तमं—कृत्तम् and प्रलुठितम्। अवनौ—अधिकरणे। भीमधुर्य्यम्—Adj. to रथवरम्।

Prose order :—क्षतम् अवनौ प्रलुठितं खचरोत्तमं विलोक्य प्रहृष्यन् दशवदनः भीमधुर्य्यं रथवरम् अधिरुह्य रामकान्तां परिगृह्य खपुरम् अगात्।

Substance :—अथ जटायुम् छिन्नपक्षम् भूमौ च लुठितमवलोक्य दशाननः प्रीतः सन् पिशाचमुखैरश्वैः उपेतम् रथमारुह्य सीतया सह लङ्कांप्रति चलितः।

Explanation in tika form :—क्षतं छिन्नं लूनपक्षत्वात्, अतएव अवनौ अवति रक्षति जनान् इति अवनिः तस्यां मेदिन्यां, भूमौ इति यावत्। "क्ष्मावनि मेदिनी मही" इत्यमरः। प्रलुठितं विलुठितं पतितमित्यर्थः। खे चरन्तीति खचराः पक्षिणः तेषु उत्तमं जटायुं विलोक्य दृष्ट्वा प्रहृष्यन् निहतो विघ्नकारी इति हर्षं अनुभवन् दशवदनः रावणः, भीमा भीषणा धुर्य्या अश्वा यत्र तथाभूतं रथवरं अरण्यादुपागतं पुष्पकाख्यम् अधिरुह्य रामकान्तां सीतां परिगृह्य तथैव धारयित्वा खस्य पुः खपुरम् "ऋक् पूरप् धूः पथाम् अ अनक्षे" इति समासान्तः अः, अथवा खस्य पुरं तत्, लङ्काम् अगात् अगमत्। लुङि इणः गादेशः। सर्गशेषे भिन्नवृत्तत्वात् अत्र पुष्पिताग्रावृत्तम्।

छन्दः—पुष्पिताग्रा नाम वृत्तम् तल्लक्षणम् "अयुजि न-युग-रेफतो यकारः, युजि तु न-जौ जरगाश्च पुष्पिताग्रा"।

न न र य

प्र लु ठि। तं म वं। नौ वि लो। क्य क्ष त म्

अयुग्मे

न ज ज र ग

द श व। द नः ख। च रो त्तं। म म् प्र हृ। ष्य न्

युग्मे

Change of V :—प्रहृष्यता दशवदनेन—अगायि।

Derivations :—प्रलुठित—प्र-लुठ कर्त्तरि क्तः। लट्—लुठति, लोठति लोठते। "मणिर्लुठति पादेषु"। क्वचित् काचोऽपि लोठति।", कविरहस्यम्। अवनौ—अव-अनिः। क्षतम्—क्षत्-कर्म्मणि क्तः। लट—क्षणति, लुङ्-अक्षणीत्।

ঈশ্বর—ঈশ-বরট্‌ঃ। প্রহৃষ্যন্—প্র-হৃষ-শতৃ। লট্ হৃষ্যতি। লুঙ্—অহৃষৎ, অহর্ষীৎ। ধুর্য্য—ধুর্-য। অগাৎ—ইণ-লুঙ্ ব। কান্তা—কম-ত-টাপ্। পরিগৃহ্য—পরি-গ্রহ-ল্যপ্। লুঙ্—অগ্রহীৎ।

দশানন ছিন্নপক্ষ পক্ষীন্দ্র জটায়ুকে ভূমিতলে বিলুণ্ঠিত দেখিয়া হৃষ্ট হইল এবং পিশাচমুখ অশ্বদ্বারা বাহিত রথে আরোহণ করিয়া রামপত্নীকে গ্রহণপূর্ব্বক নিজ পুরাভিমুখে প্রস্থান করিল।

The tenheaded Ravana being glad to see him maimed and rolling on the ground, mounted the excellent car with terrible horses, and left for his city taking with him the beloved wife of Rama.

Q. Account for the different metre at the end of the canto. Ans: "एकार्थमयैः पद्यैः अवसानेऽन्यवृत्तकैः" इति आलङ्कारिकवचनप्रामाण्यात् सर्गशेषे वृत्तान्तरम्।

CALCUTTA UNIVERSITY QUESTIONS

OF THE

F. A. EXAMINATION

[With their proper answers or references to answers in the text]

1878.

Examiner—Rev. Dr. K. M. Banerjee.

वस्त्रमश्लिष्ट समाकुलत्वा-
न्नासेदुषः केकयमादपायम् ।
गोमायुसारङ्गगणाश्च सम्यक्-
नायासिषुर्भीममरासिषुश्च ॥ २६ तृतीये ॥

स प्रीतिमानेत्य पुरं प्रवेक्ष्यन्
शुश्राव घोषं न जनौघजन्यम् ।
आकर्णयामास न वेदनादान्-
नचोपलेभे वणिजां पणायाः ॥ २७ ॥

चक्रन्दुरुच्चैर्नृपतिं समेत्य
तं मातरोऽभ्यर्णमुपागतास्ताः ।
पुरोहितामात्यमुखाश्च योधाः
विरुद्धमन्युप्रतिपूर्णमन्याः ॥ २८ ॥

दिदृक्षमाणः परितः ससीतं
रामं यदा नैक्षत लक्ष्मणञ्च ।
रोरुद्यमानः स तदाभ्यपृच्छद्-
यथावदाख्यन्नथ वृत्तमस्मै ॥ २९ ॥

आबद्धभीमभ्रुकुटीविभङ्गः
संश्रीयमानाक्षपरीद्धनेत्रः । ३० । (P. 231-239)

1. With what does आसेदुषः agree ? Parse it. [For Ans. See text P. 232. L. 14.]

2. What special meanings have सम्यक् and भीमं in the above lines ?

[Ans : सम्यक् अनुकूलम् । भीमं भयानकम्, नतु "पाण्डव मध्यमः" ।]

3. What part of the verb is प्रोषिवान्, and what is its root ? Is there any other word in the above extract which is grammatically a similar part of the verb ?

[Ans : N. B. A part of a verb means any form in way of conjugation and is often misinterpreted by many The part of the verb of प्रोषिवान् is the 3rd person singular लिट्, for which क्वसु is substituted here. The root is वस् । There are other words In the same extract which are similar parts of the verb, viz :-प्रयाव, आकर्णयामास and उपलेभे all of which are Third person singular लिट् ।]

4. Give the renderings in English of the following phrases in the fewest words you can :—वर्त्मन् अमहिष्ट, पुरं प्रवेक्ष्यन्, जनोघजन्यं, चक्रन्दुः नृपतिं. (See P. 233-35-36)

5. Analyse the following compounds and give the meaning of each word ;

पुरोहितामात्यमुखाः ।
विस्मयमन्युप्रतिपूर्णमन्याः ॥ (P. 235)

[For Ans : look into the explanation • P. 236.]

6. With what verbs are केवलमात् and अभ्यर्णम् to be taken ?

[Ans : केवलमात् is to be taken with अमंइष्ट, while अभ्यर्णम् with संनिय ।]

7. Translate the following passages into English as literally as you can.—

तस्याः सामन्यमानाया लोलूयावान् रघूत्तमः ।
असिं कौक्षेयमुद्यम्य चकारापनसं मुखम् ॥ २१ चतुर्थे ॥
अहं शूर्पणखा नाम्ना नूनं नाज्ञायिषि त्वया
दण्डोऽयं क्षेत्रियो येन मय्यपातीति साब्रवीत् ॥ २२ ॥
पर्य्यशासीद्द्विविष्ठासौ संदर्श्य भयदं वपुः ।
अपिस्फवच्च मन्यूनां निनंसु विक्रमं मुहुः ॥ २३ ॥
खरदूषणयोर्भ्रात्रोः पर्य्यदेविष्ट सा पुरः ।
विजियाह्वयिषूरामं दण्डकारण्यवासिनोः ॥ २४ ॥
क्षते सौभागिनेयस्य भरतस्य विवासितौ ।
पित्रा दौर्भागिनेयौ यौ पश्यतं चेष्टितं तयोः ॥ २५ ॥
मम रावणनाथाया भगिन्या युवयोः पुरः ।
अयं तापसकात् ध्वंसः क्षमध्वं यदि वः क्षमम् ॥२६॥ (See P. 340-348).

8. Give the etymology of लोलूयावान्, कौक्षेयं, शूर्पणखा and द्विविष्ठा ।

[Ans: See P. 342, L. 7, 9. ; R. 345, L. 5 ; शूर्पणखा— शूर्प to measure, अच् प्रत्ययः, means winnowing basket ; One having her finger nails like winnowing baskets.

9, Give the roots of निनंसुः and अपिस्फवत्. Give their third person singular present (लट्) also.

[Ans—See P. 343, L. 6, 7 ; लट् नमति ।]

10. What part of the verb is क्षमध्वं ? Give the third singular present, Aorist and second future that is to say लट्, लुङ् and लुट् ।

[Ans : क्षम धातोः लोटि मध्यमपुरुष बहुवचनरूपम् । क्षमते लट्, अक्षमिष्ट लुङ्, क्षमिता लुट् ।]

11. Translate the following passage into your own Vernacular.

अभिज्यचापः स्थिरबाहुमुष्टि

रुदञ्चिताक्षोऽञ्चितदक्षिणोरुः ।

तान् लक्ष्मणः सन्नतवामजङ्घो

जघान शुद्धेषुरमन्दकर्षी ॥ ३१ ॥ द्वितीये ॥

गाधेयद्विष्टं विरसं रसन्तं

रामोऽपि मायाचणमस्रपुष्टः ।

स्थास्नुं रणे स्मेरमुखो जगाद

मारीचमुच्चैर्वचनं महार्थम् ॥ ३२ ॥

आत्मम्भरिस्त्वं पिशितैर्नराणां

फलेग्रहीन् हंसि वनस्पतीनाम् ।

शौवस्तिकत्वं विभवा न येषां

व्रजन्ति तेषां दयसे न कस्मात् ॥ ३३ ॥

अद्मो द्विजान् देवयजीन् निहन्मः

कुर्म्मः पुरं प्रेतनराधिवासम् ।

धर्म्मो ह्ययं दाशरथे निजो नो

नैवाध्यकारिष्महि वेदवृत्ते ॥ ३४ ॥ (P. 128-134)

N. B.—The original words in the text are not themselves to be reproduced in the translation unless where it be absolutely necessary.

12. Give the roots of अद्मः and निहन्मः and their third person singular perfect (लिट्)

[Ans : See page 135. L. 21, The third person singular लिट् of हन् is जघान ।]

13. Parse अध्यकारिष्महि ।

[Ans : See P. 135, L. 25. add, agreeing with its object वस्त्रम् । The nominative being विधाता ।]

वनस्पतीनां सरसां नदीनां
तेजस्विनां कान्तिभृतां दिशाञ्च ।
निर्याय तस्याः स पुरः समन्ता-
च्छ्रियं दधानां शरदं ददर्श ॥

14. With what does दधानां agree and what does it govern ?

[Ans : दधानाम् agrees with शरदम्, governing श्रियम् ।]

15. What governs the genitive plural substantives in the above lines ?

[Ans : The genitive plural substantives viz. वनस्पतीनाम्, सरसाम्, नदीनाम्, and दिशाम्, are governed by श्रियम् ।]

वसूनि तोयं घनवत् व्यकारीत्
सहासनं गोत्रभिदाध्यवात्सीत् ।
न त्र्यम्बकादन्यमुपास्थितासौ
यशांसि सर्व्वेषुभृतां निरास्थत् ॥ ३ ॥ प्रथमे ॥

16. Give the roots of व्यकारीत्, उपास्थित and निरास्थत and the third person plural present and perfect (लट् and लिट्)

[Ans : The roots are कृ, स्था and अस respectively. Third person plural लट—विकिरन्ति, उपतिष्ठन्ते, and निरस्यन्ति । लिट्— विचकरुः, उपतस्थिरे, and निरासुः ।]

1879.

Examiner.—Rev, K. M. Banerjee D. L.

1. *a*. Translate into English the following extract :—

आतिथ्यमेभ्यः परिनिर्विवप्सोः
कल्पद्रुमा योगबलेन पेतुः ।

धामप्रथिम्नी बदिमान्वितानि
वासांसि च द्राघिमवन्त्यदृक्षः ॥ ४२ ॥ तृतीये ॥
आम्रां प्रतीयुर्विनयादुपाध्युः
अंगुः संरागं ननृतुः सहावम् ।
सविभ्रमं नैसुरुदारमूचुः
स्निग्धोत्तमाद्या वनिताश्च सम्यिम् ॥ ४३ ॥
वस्त्रान्नपानं शयनञ्च नाना
कृत्वावकाशे रुचिसम्प्रक्लृप्तम् ।
तान् प्रीतिमानाह मुनिस्ततः स्म
निवस्तु माद्यं पिबतास्त भैष्मम् ॥ ४४ ॥
ते भुक्तवन्तः ससुखं वसित्वा
वासांस्युषित्वा रजनीं प्रभाते ।
द्रुतं समध्वा रथवाजिनाभि
मन्दाकिनीं रम्यवनां समीयुः ॥ ४५ ॥
वैखानसेभ्यः श्रुतरामवार्त्ता
ततो विचित्राश्रमपर्वतिसह्यम् ।
चमं विहाय रथिनावनत्र
मार्गैर्हरिंऽद्रिं प्रति चित्रकूटम् ॥ ४६ ॥ (P. 261-269)

b. Undo the Sandhi and separate the words in the following groups parsing, and giving the meanings of each word :

द्राघिमवन्त्यदृक्षः (P. 261, L. 25.26.
निवस्तमाद्यं पिबतास्त (P. 266, L. 1.)

[Ans : For parsing and meaning see P. 262, L. 15 ; P. 266, L. 15 &c. ; and the above lines,]

c. Give the roots of the verbs in the same groups in the preceding questions.

[Ans : The groups of the verbs here consist of निवसम्, आसम्, पिबत and भत । For their roots see 266. L. 25 &c.]

d What part of the verb is आनंहिरे ? (See P, 270, 13) What other verbs have the same form in the same tense ?

[Ans. The verbs that have the same form with आनहिरे are अश् and the roots beginning with ऋ or beginning with अ, but the latter ending in compound consonants such as अर्ह् ऋज &c. But आञ्छ takes the optional form.]

समूलकाषं चकषूरदन्त (तृतीये ४८) (P 275)

2. *a*, What is the meaning of समूलकाषं [See for Ans. P. 276, L. 4, 8, 9, 10] and why is the last vowel long in चकषु ? [For Ans. see P, 277, l. 9]

मा गाः पुत्रं वीर भरं बहासुभं (तृतीये ५१) (P 277)

b Parse गाः, and भरं [Ans : मा-योगात् अगाः इत्यस्य 'गाः' इति स्थितिः । इन् धातोः लङि मध्यम पुरुषैकवचने, त्वम् इति कर्त्तृपदेन अन्वितत्वम् । See P. 281, L. 24. and P. 280, L. 3.]

c. Give the meaning of the following lines in English

अथाकसुप्त' बहुमन्यसे चेत् (P. 283)

यदीश्रिषे त्वं न मयि स्थिते च । (५३) तृतीये

मा मां प्रयुङ्क्‌थाः कुलकीर्त्तिलोपे (५४) (P 286)

व्रज भरत गृहीत्वा पादुके त्वं मदीये (५६) (P 290)

पुरी रामस्य जुह्वाञ्चकार ज्वलने वपुः ॥ चतुर्थे ५ ॥ (P 299)

d. Separate यदीश्रीषे and parse each word. [For Ans ; See P. 284. L. 5, and add ईश्रिषे—ईश धातोः वर्त्तमाने कर्त्तरि मध्यमपुरुषैकवचने, त्वम् इति कर्त्तृपदेन अन्वितत्वम् ।]

सुतोऽपि गङ्गासलिलैः पवित्रा

सहाश्रमात्मानममस्त मन्युः ।

सप्रीतयो राघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश ॥ वतौये ॥ १८ ॥
प्रतीयुषा पूर्ददृशे जनेन
द्यौर्भानुशीतांशु-निराकृतेव ।
राजन्वत्व-समन्वितापि
शोकान्धकार-क्षत-सर्वचेष्टा ॥ १९ ॥
विलोक्य रामेण विना सुमन्त्र-
मध्योष्ट सत्त्वात् पतितः सुतार्त्तः ।
मधूनि नेत्रोदक्लिप्त गात्रे-
मंभोरमे न व्यवसिष्ट वक्तुं ॥ २० ॥
आसिष्ट नैकत्र शुचा व्यरंसीत्
कृताकृतेभ्यः क्षितिपालभाग्भ्यः ।
स चन्दनोशीरमृणालदिग्धः ।
शोकाग्निनागात् सुनिवासभूयम् ॥ २१ ॥ P, 216-222)

3. *a*. Translate the above lines into your own Vernacular.

b. Parse अधीयन्, giving its root. Is it transitive or intransitive ? Answer fully.

[For Ans :—See P. 216, L. 11 ; and P. 217, L. 2 and compare the Q. 1 therein,]

c. Give the root of श्वसन् and its third person singular लट् and विधिलिङ् (present and potential).

[For Ans : See P, 217, L, 9, श्वसिति-लट्, श्वस्यात्-विधिलिङ्]

d. Parse प्रतीयुषा. What would that word be in the nominative singular ?

[Cf, Q. 2, P, 219, जनेन इत्यस्य विशेषणम् । प्रतीयिवान्]

e. In what case and gender is पूः ? Turn it into the genitive (sixth case) singular.

(For Ans : See P, 218, L. 11 ; स्थितां यद्यं कवचने—पुरः।)

f. Who are here likened to the sun, moon and stars.

[For Ans : See P. 219, L. 2, 3;]

g. Give all the verbs in लुङ् or Aorist in the above extract and their several third persons singular in लट् (present tense).

[See p, 217, 219, 220, 223]

4. *a.* Point out in any of the above extracts a verb governing the sixth or genitive case and one governing the third or instrumental case, showing also the nouns in the governed case.

[For Ans : See P, 217, L, 1 ;P. 216, L. 24.]

भवन्तं कार्त्तवीर्यो यो दोःसहस्रमचीकरत् ।

जिगाय तस्य हन्तारं स रामं सार्वलौकिकम् ॥११॥ पञ्चमे (P. 414)

b. What characters are here referred to, and what was the speaker's motive in referring to them ?

[Ans : भवन्तम् refers to रावण, सः to दाशरथिःरामः ; रामम् to परशुरामम् । मारिचः रामतेजोवर्णनेन दशाननं रणात् निवारयति ।]

c. What sort of Samasa is दोःसहस्रम् ?

[For Ans : See P. 414, L. 17, 19 ; begin with :—अत्र त्रिविधः समासः, बहुव्रीहिः तृतीया समासश्च ।]

5. *a.* What are the peculiar terminations in the declensions of pronouns other than अस्मद् and युष्मद् in the dative, ablative, and locative singular masculine and feminine ?

[Ans : स्मै स्यै, स्मात् स्याः, स्मिन् स्याम् are the peculiar terminations]

b. To what pronouns may the affixes चित् and चन be added and how is the meaning affected thereby ?

[Ans : चित् or चन is added to किम्, to signify some unknown person, causing the interrogative sense to drop.]

c. Decline तद् in the feminine gender.

[Ans : सा ते ता:, ताम् ते ता:, तया ताभ्याम् तस्यै, तस्या:, तस्या: तासाम्, तस्याम् &c.]

1880

Examiner.—Babu Nilmani Muketjea, M. A,

अरण्ययाने सुकरे पिता मां

प्रायुङ्क्त राज्ये बत दुष्करे त्वाम् ।

म्लाना: शुचं वीर भरं वहामु-

मामापि राजेव वैद्य: कनीयान् ॥ तृतीये ५१ ॥

कृती श्रुती वृद्धमतेषु धीमान्

त्वं पैतृकं चित्तधनं न कुर्या: ।

विच्छिद्यमानेऽपि कुले परस्य

पुंस: कथं स्यादिह पुत्रकाम्या ॥ ५२ ॥

पश्चाद्वनमुतं यदमन्यसे चेत्

यदाश्रिते त्वं न मयि स्थिते च ।

किं के व्यतिष्ठन् यदि तात पार्श्वे

अधीहि भक्तां मम याहि पृथ्वीम् ॥ ५३ ॥

उदीरतां राज्यधुरां प्रमोद्,

कथं कनीयानहमुत्सहेय ।

मा मां प्रयुङ्क्था: कुलकीर्त्तिलोपे

प्रावय रामं भरतोऽपि धर्म्यम् ॥ ५४ ॥

ऊर्ज्जस्वलं हस्तितुरङ्गमेतत्

अमूनि रत्नानि च राजभाञ्जि ।

राजन्यकं चैतदहं क्षितीन्द्र

त्वयि स्थिते स्वामिनि आत्मनैतत् ॥ ५५ ॥ (P, 279-288)

1. *a*. Translate the above into English.

b. Parse इष्टमतेषु in the fifth line, कुर्व्वे in the seventh. कुलकीर्त्तिलोपे in the eleventh, and राजन्यकं in the fifteenth.

[For Ans : See P. 282, L. 15 ; P. 283, L. 4 ; p, 286, L 6 ; एतानि इति जन्यपदस्य विशेषणम् ।]

c. Account for the use of the potential (विधिलिङ्) in the Sixth and eighth line.

[Ans : "हेतु हेतुमतोर्लिङ्" इति कार्य्यकारण गमकत्वात् विधिलिङ् ।

2. Turn the following stanzas into plain prose, divesting them of such words as have unusual grammatical terminations.

लतानुपातं कुसुमान्यगृह्णात्

स नद्यवस्कन्दमुपास्पृशच्च ।

कुतूहलाच्चारुशिलोपवेशं

काकुत्स्थ ईषत् स्मयमान आस्त ॥ द्वितीये ११ ॥ (P. 87)

[Ans : N. B, to divest लतानुपातम्, नद्यवस्कन्दम् and चारुशिलोपवेशम् insert लता: लता: अनुपात्य ; नदीम्, नदीम्, अवस्कन्द्य, चारुशिला: चारुशिला: उपविश्य । and give the simple prose as in the text]

महीयमाना भवतातिमात्रं

सुराध्वरे वज्रधरेणेव ।

दिवोऽपि वज्रायुधभूषणाया

ह्रिणीयते वीरवती न भूमिः ॥ १८ (P. 143)

[Ans : N, B, In turning into prose, instead of the words महीयमाना, घस्मरेण, जित्वरेण, and ह्रीणीयते insert पूज्यमाना, बहुभक्षकेण, जयशीलेन, and लज्जते ।)

इति ब्रुवाणो मधुरं हितञ्च ।
तमाश्रिणत् मैथिलयज्ञभूमिम् ।
रामं मुनिः प्रीतमना महात्मा
यशांसि राज्ञां निजिहीर्षयिष्यन् ॥ ४० ॥ (P. 148)

[Ans : In turning into prose instead of निजिहीर्षयिष्यन् insert निर्हर्तुम् इच्छां कारयिष्यन् ।)

भ्रांशिष्ट जाताञ्जिहिषस्तदासा-
श्रुतक्षमानो भरतो गुरूणाम् ॥ तृतीये २५ ॥ (P, 229)

[Ans : In turning into prose, Instead of जाताञ्जिहिषः insert जातगमनेच्छः)

3. Convert the first stanza into the active and the second into the passive voice, substituting throughout Aorist (लुङ्) forms for the perfect (लिट्) ones.

बलिर्बबन्धे जलधिर्ममन्थे
जह्रेऽमृतं दैत्यकुलं विजिग्ये ।
कल्पान्तदुःस्था वसुधा तथोहे
येनैष भारोऽतिगुरुर्न तस्य ॥ द्वितीये ३६ ॥ (P. 145)

छायामपाकुर्नगरस्य मार्गान्
ध्वजान् बबन्धुर्मुमुचुः सधूपान् ।
दिशश्च पुष्पैर्ववकरुर्विचित्रै-
रर्थेषु राज्ञा निपुणा नियुक्ताः ॥ तृतीये ५ ॥ (P. 192)

[For Ans, See P, 147. L. 9 ; P. 193. L. 12. लुङ् forms:— अभान्त्सीत्, अमन्थीत्, अहार्षीत्, व्यजैषीत्, अवाक्षीत् । But the passive लुङ् forms of the rest are औचिषत, अमागत्षत, अमुचत, अकारिषत ।

4. असंस्कृत्रिमसंव्यानामनुप्त्रिमफलाशनी ।
अभृत्रिमपरीवारी पर्य्यभूतां तथापि माम् ॥ चतुर्थे ३७ ॥
नि:श्रेयसमवाप्तासि भ्रातृभ्यां प्रत्यभाषि सा ।
प्राणिषस्त्वमनाथायां प्रजास्वपि मा रुदः ॥ ३८ ॥
जक्षिमोऽनपराधेऽपि नरान् नक्तन्दिवं वयम् ।
कुतस्त्यं भीरु यत्तेभ्यो दुष्कृतोऽपि क्षमामहे ॥ ३९ ॥
तौ चतुर्द्दशसाहस्रबलौ निर्ययतुस्ततः ।
पारश्वधिकधानुष्कशाक्तीकप्रासिकान्वितौ ॥ ४० ॥
अथ सम्पततो भीमान् विशिखै रामलक्ष्मणौ ।
बहुमूर्द्ध्नो द्विमूर्द्धांश्च त्रिमूर्द्धांश्चाहतां मृधे ॥ ४१ ॥
तैर्वृक्णरुग्णसंभुग्नक्षुण्णभिन्नविपन्नकैः ।
निमग्नोद्विग्नसंक्नूयैः पप्रे दीनैश्च मेदिनी ॥ ४२ ॥ (P. 250-356)

a. Translate the above into your own Vernacular.

b. "Account for इ in प्राणिषः. [Ans. रुद स्वप् श्वस् अन् जक्ष इत्येतेषां इट् विधानात् अत्र इट्] Give the verbal nouns of all the past participles (क्त) used in the last stanza.

[Ans. व्रश्च—व्रश्चनम् ; रुज्—रोगः ; भुज्—भोगः ; क्षुद्—क्षोदः ; भिद्—भेदः ; वि-पद्—विपत्तिः ; मस्ज्—मज्जनम् ; उत्-विज्—उद्वेगः ; क्नूय्—क्नूयनम् ।]

d. Analyse into their component parts, संव्यान, निःश्रेयसं, and कुतस्त्यम्.

[Ans. See P, 350 L, 22 ; P, 351, L, 23, P, 353, L 11,]

5. Give the full meaning of the following in your own words in Sanskrit :—

विग्रहस्तव शक्रेण बृहस्पतिपुरोधसा ।
सार्द्धं कुमारसेनान्या गुप्तस्यासीति को भयः ॥ पञ्चमे ७ ।

ईदृशं नाथ नाथार्थं विनता कृतमात्मना ।

नांशायसूमिदं सर्व्वं प्रमाथन् चारकुर्म्मणः ॥ ९ ॥

हतसु पाशैर्मितैः खट्वारूढः प्रमादवान् ।

पानशौण्डः स्त्रियं नेता नात्यन्तीनत्वमुन्मनाः ॥ १० ॥

अध्वरेष्वभिषिक्तस्य सोमसुत्वन आंग्रमात् ।

अग्नं महेन्द्रियं भागमेति दुश्च्यवनोऽधुना ॥ ११ ॥ (P. 373 380)

[Ans, write the substance as given in the text]

6. Comment grammatically on the following extracts and render them into English :

मस्याणु पार्यसन जिलराधि (Canto I; sl, 16), [Ans See P. 40, L 17 ; P. 38. L. 23,] ; रथीगणं विपत्रुमविचतात्मा canto II. Sl 21) [Ans : See P. 108 L. 23,] अन्यो व्यतिसे तु ममापि धर्म्मः ; अर्द्धदिवसे प्रविहन्मि येन (canto ii. sl 35) Ans. See P' 137, L. 15 ; L. 18, 19] सखीतयो राघवयोरधीयन् (canto III, sl, 18) । Ans See Q. 1, P, 217

1881.

Examiner—Pandit Mahesh Chandra Nyayaratnu C, I. E.

1. ✓ गिरेर्नितम्बे मरुता विभिन्नं

तोयावशेषेण हिमाभमभ्रम् ।

सरित्समुद्रस्य तु यमादधानं

शैलाधिपस्यानुचकार लक्ष्मीम् ॥ ८ ॥ द्वितीये ॥ (P. 82)

विद्युत्प्रभाख्यं स वरं प्रभाती

यदीव श्रीघं व्यधयत् विपक्षः ।

अर्थे दुरापे किमुत प्रभावी

न प्रासनेऽवास्थित यो गुरूणाम् ॥ २४ । तृतीये ॥ (P. 88)

मृगयुमिव मृगीऽथ दृष्टिकेर्षा

दिशमिव दाहवतीं मरावुदन्यन् ।

रघुतनयमुपाययौ विमूर्त्तौ
विषमदिवोदमुखं पतत्रिराजम् ॥ ४४ ॥ त्रयुर्थ ॥ (P. 358)

भागीपुरुषिकां पश्य मम सद्रवकान्तिभि: ।
ध्वस्तान्धकारेऽपि पुरे पूर्णेन्दी: सन्निधि: सदा ॥ २७ ॥ पञ्चमे ॥
हतरक्षुरतोयोगी रक्षोभ्य: करदो दिवि ।
मूतकतायीमभ्येति सवप: किन्न गोत्रभित् ॥ २८ ॥

Explain the above slokes (in Sanskrit if possible)

2. ऐषी: पुनर्जन्मजयाय यत्त्वं
रूपादिबोधात् न्यवृतश्च यत्ते
तत्वान्यबुद्ध: प्रतनूनि येन
ध्यानं नृपस्तत् शिवमित्यवादीत् ॥ १८ ॥ (P. 42)
प्रयास्यत: पुण्यवनाय जिष्णो:
रामस्य रोचिष्णुमुखस्य धृष्णु: ।
वैमातुर: कृत्स्नजितास्त्रशस्त्र:
सध्र्यङ् रत: श्रेयसि लक्ष्मणोऽभूत् ॥ २५ ॥ (P. 58)

a. Give the sense of the above *Slokas* in *Sanskrit.*

b. Expound the *Sandhis* in the first *Sloka* and the *Samasa* in the second.

c. Give the root of ऐषी: and its first person singular active, present.

d. Account for the fourth case inflection (चतुर्थी विभक्ति) in पुनर्जन्मजयाय and पुण्यवनाय,

e, Derive जिष्णु, रोचिष्णु, धृष्णु, and सध्र्यच् ।

f, Give the nominative form of प्रयास्यत्, the accusative of श्रेयस्, the instrumental of सध्र्यच्, the dative of जिष्णु, the ablative of प्रतनु, and the locative of स्व, all in the singular number and all genders and also the genitive plural of स्व.

3, वसूनि देशांश्च निवर्तयिष्यन्
रामं नृपः संगिरमाण एव ।
तथावसज्ञौ भरताभिषेको
विषादशङ्कुश्च मतौ निषङ्क्ते ॥ ८ ॥ तृतीये ॥ (P. 197)

a, Write short explanatory notes on the words निवर्तयिष्यन् and संगिरमाणः ।

[Ans:—P. 198, L. 12; and same page line 14, 15]

b, What sense does एव bear here ?

[Ans:—P. 198, L. 16]

c. In विषादशङ्कु which *samasa* is intended—*Rupaka-samasa* or *Upaman* ? The [Examiner means उपमित and not उपमान ।]

[Ans—see Q. 2, P. 199]

4. उत्तंसं दधती वक्त्रं मुञ्चदत् लोलकुण्डलम् ।
कुर्वाणा पश्यतः शंयून् सन्विषो सुहसानना ॥१८॥ चतुर्थे ॥ (P,320)

a, Complete the sentence by supplying the nominative and the verb.

[Ans :P, 321, L. 3].

b, Write grammatical notes on the first, second, fourth, sixth and seventh words in the *sloka*.

[Ans:—Look into the Explanation P. 320, and the Questions 2 and 3, P. 321.]

5. Reproduce in sanskrit, so far as you can *Surpanakha*'s angry speech commencing:—

दण्डकामध्युवास्तां यौ वीर रक्षःप्रकाण्डको ।
गम्यां संस्क्ष्यऽक्षतातां तौ समस्तौ मुनिवर्तनौ ॥ ६ ॥ पञ्चमे ॥

[Ans:—Give, the substance of the slokas, 6, 7, 8, &c.

1882.

Examinar—Rev, K, M. Bonerjee, D, L.

1, *a,* Translate the following passages into English :—

आशीर्भिरभ्यर्च्य ततः क्षितीन्द्रं
प्रीतः प्रतस्थे मुनिराश्रमाय ।
तं पृष्ठतः प्रष्ठमियाय नम्रो
हिंस्रेषु दीप्तास्त्रधरः कुमारः ॥ २४ ॥ प्रथमे ॥
प्रयास्यतः पुण्यवनाय जिष्णोः ।
रामस्य रोचिष्णुमुखस्य धृष्णुः ।
वैमातुरः क्षत्रजितास्त्रशस्त्रः
सध्र्यङ् रतः श्रेयसि लक्ष्मणोऽभूत् ॥ २५ ॥
क्रुमति रघुसिंहे दन्दशूकान् जिघांसौ
धनुररिभिरसह्यं मुष्टिपीडं दधाने ।
व्रजति पुरतरुण्यो बद्धचित्राङ्गुलित्रे
कथमपि गुरुशोकात् मा रुदन् माङ्गलिक्यः ॥ २६ ॥
अथ जगदुरनीचै राशिषस्तस्य विप्रा
स्तुमुलकलनिनादं तूर्यमाजघ्नुरन्ये ।
अभिमतफलशंसी चारु पुस्फोर बाहु
स्तरुषु चुकुवुरुच्चैः पक्षिणश्चानुकूलाः ॥ २७ ॥ (P. 56, 63)

b, What is the derivation of प्रष्ठः ? How does it differ from पृष्ठः ।

[Ans:—See foot note P. 56.—प्रेष्ठ—प्रिय इष्ठन् ।]

c, In what case is हिंस्रेषु । By what is it governed and in what sense is it used ?

[Ans:—See Q 1, P. 57]

d, By what is the genitive रामस्य governed ?

[Ans:—सध्र्यङ्]

e, Parse प्रयास्यत: and अध्यङ् and give the meaning of the last word.

[See, Expl.]

f, Parse रघुमति and व्रजति।

[Ans : रघुसिंहे इत्यस्य विशेषणम् । मीयिचन्द्रमते व्रजति इति भावे सप्तमी ।]

g, Give the literal as well as the conventional meaning of दन्दशूकान् ।

[Ans :—Lit. अत्यर्थम् दंशनशीलान् ; Conv. M. राक्षसान् ।]

अटाट्यमानोऽरण्यानीं ससीत: सहलक्ष्मण: ।
बलाद् भुजावुत्क्षिप्य जह्रे भीमेन रक्षसा ॥ २ ॥ चतुर्थ ॥
अवाक्शिरसमुत्पादं कृतान्तेनापि दुर्दमम् ।
भङ्क्त्वा भुजौ विराधाख्यं तं तौ भुवि निचख्नतु: ॥ ३ ॥
आहिण्डातां रघुव्याघ्रौ शरभङ्गाश्रमं तत: ।
अध्यासितं श्रिया ब्राह्म्या शरण्यं शरणैषिणाम् ॥ ४ ॥
पुरो रामस्य जुहवाञ्चकार ज्वलने वपु: ।
शरभङ्ग: प्रदिश्यारात् सुतीक्ष्णमुनिकेतनम् ॥ ५ ॥
यूयं समेध्यधेत्यस्मिन्नासिषृहि वयं वने ।
इष्टा: स्थ स्वस्ति वो यात: स्वपुण्यविजितां गतिम् ॥ ६ ॥ (P. (294-300)

2, *a*, Is there any difference in meaning between अरण्यानी and अरण्य ? [Ans : See P.295, L. 7] Give the derivation of the latter, [Ans:—ऋ-अन्य:] Undo the *sandhi* in बलाद्भुजावुत्क्षिप्य and parse each word. Ans:—P. 294, L. 25, 26, 27,] Derive अवाक् and give the literal meaning of निचख्नतु: [*Ans*:—P, 296. L. 24, L. 18] Give the roots of भङ्क्त्वा and निचख्नतु: and their third singular in लुङ् (aorist) and their participles (क्त:)

[Ans:—See. P. 296, L. 23. 24; क्त—भय, खात।

Translate into English the last six lines from चतिष्ठातां to विजिता गतिं

3. *a*, Translate the following into your own Vernacular:

असंस्कृत्रिमसंव्यानावनुपघ्निमफलाशनौ ।
अध्वत्रिमपरीवारौ पर्य्यभूतां तथापि माम् ॥ ३७ ॥ चतुर्थं ॥
स्वःश्रेयसमवाप्तासि साहभ्यां प्रत्यमाषि सा ।
प्राणिवसत्त्वमामार्थं भ्रजाश्वसिहि मा रुदः ॥ ३८ ॥
अचिमोऽनपराधेऽपि नरान् नक्तन्दिवं वयम् ।
कृतस्त्वं भीरु यत्तेभ्यो दुष्कृतोऽपि क्षमामहे ॥ ३९ ॥
तौ चतुर्हस्तशाहवलौ निर्ययतुस्ततः ।
पारश्वधिकधानुष्कशाक्तीकप्रासिकान्वितौ ॥ ४० ॥
अथ सम्पततौ भीमान् त्रिशिखं रामलक्ष्मणौ ।
बहुमूर्द्धो द्विमूर्द्धांश्च त्रिमूर्द्धांश्चाहतां मृधे ॥ ४१ ॥
तैर्क्रकचसंभग्नक्षतभिन्नविपन्नकैः ।
निमग्नोन्मग्नसंक्षोभैः पर्य्यक्षीर्येव मेदिनी ॥ ४२ ; (P. 350-356)

Exhibit the samasas in the first two lines of the above extract. [Ans : P. 350] What is peculiar to the conjugation of the class of verbs to which प्राणिव: belongs ? [Ans : See above Xii. b.] Give the roots of all participles क्त in the last two lines, [Ans : P. 357]

b. Can you identify the arms mentioned above with any weapons in our days ?

[Ans:—P. 355, L. 9]

In what sense is बल used in the above extract ?

[Ans : P. 354, L. 12]

4. Translate the following sentences into English :—

करिष्यमाणं विस्मयं कार्यं किंनु कृतं परैः ॥ ६ ॥ पञ्चमे ॥ (P. 376

रामो यज्ञद्रुहो हन्ति कालकल्पशिलीमुखः ॥ १२ ॥ (P. 383)

मांसान्योषावलीढानि खादनीयानि देवताः ।

अश्नन्ति रामाद्रक्षांसि बिभ्यत्यश्नुवते दिशः ॥ १४ ॥ (P. 384)

1883.

Examiner.—Rev. K. M. Banerjee D. L.

1. *a.* Translate into English the following passages :—

विरूपोदयचारायः कुलिशी मम वक्षसि ।

अभिन्नं शतधात्मानं मन्यते बलिनं बली ॥ २५ ॥ पञ्चमे ॥

हत्वा लङ्काद्रुमालानमहमैरावतं गजम् ।

बन्धनेऽनुपयोगित्वान्नतं दृषदवत्यजम् ॥ २६ ॥

आहोपुरुषिका पश्य मम सद्रत्नकान्तिभिः ।

ध्वस्तान्धकारेऽपि पुरे पूर्णेन्दोः सन्निधिः कृता ॥ २७ ॥

हृतरत्नस्रुतीयीकी रत्नौघः करदो दिवि ।

पूतक्रतायीमर्च्यन्ति सवपुः किन्नगोत्रभित् ॥ २८ ॥

अतुल्यमहसा सार्द्धं रामेण मम विग्रहः ।

अपाकरिष्याम्येव यतिष्ये तन्निमित्तके ॥ २९ ॥

उत्पत्य खं दशग्रीवो मनोयायी मिताश्रमत् ।

समुद्रसविधावासं मारीचं प्रति चक्रमे ॥ ३० ॥

सम्पत्य तत्समीकेऽसौ तं वृत्तान्तमशिश्रवत् ।

बबु नाय सुतार्येन तेऽभ्यगादि दशाननः ॥ ३१ ॥

b. Show the humour of the first four of the above verses.

[Ans: humour of the first:—P. 403, L. 3, 4 ; of the 2nd :—P. 404, L. 13, of the 3rd—P. 406, L. 5 ; of the 4th—P. 407, L. 18 and 15.]

c. What is the meaning of रत्नौघः करदो दिवि.

[Ans : स्वर्गार्थोऽपि राजयाज्ञं वित्तं प्रयच्छन् प्रत्यर्थः। P, 407, L. 12]

d. Derive पूतक्रतायी,

[Ans : P, 407, l. 16]

e. Exhibit the *samasas* in the following word, and give their meaning and their syntactical connections :—

अतुल्यमहसा, मनीयायी, तद्विनिपत्ते, समुद्रसविधावासम्,

[Ans : P. 408, L. 20 ; मनीयायी—P. 409, L. 21 उपपद समासः। तद्विनिपत्ते P. 408, L. 25 ; समुद्रसविधावासम्—P. 409, L. 26. For the syntactical connection See the analysis at the beginning]

f. आत्मानं मन्यते बलिनम्. Can the idea conveyed here be expressed more concisely ?

[Ans : the idea of these three words may be expressed by a single word viz. बलिम्मन्य "आत्ममाने खश् च"]

g. Parse अगादि,

[Ans : गदधातोः कर्मणि लुङि प्रथमपुरुषैकवचने दशाननः इत्यनेन अन्वयः]

h. Give the roots of अत्ययम् and यतिष्ये, and their third person singular, लुङ् (aorist.) and लिट् (perfect).

[the roots are इण and यत। लुङि अगात्, अयतिष्ट, लिटि इयाय, येते।]

2. *a*. Translate the following into your own Vernacular,

उदक्षिपन् पट्टदुकूलकेतून्-
अवादयन् वेणुमृदङ्गकांस्यम्।

अभ्यूह्य ताराप्रथमं समन्ता-

दथानयन् कुसुमचन्दनानि ॥ २४ ॥ तृतीये ॥

श्रीवाग्निनासावदनं सवक्त्रं

कृत्वाजिने प्राक्शिरसं निधाय।

सञ्चित्य पात्राणि यथाविधान-

मृत्विग् जुहाव ज्वलितं चिताग्निम् ॥ २५ ॥

कृतेषु पिण्डोदकसञ्चयेषु

छित्त्वाभिषिक्तं प्रकृतं प्रजाभिः।

प्रत्यानिनीषु विनयेन रामं

प्रायादरण्यं भरतः सधीरः ॥ २६ ॥

शोभायमानैः ककुभोऽम्बुवानैः

अनेकपन्थानमुपेत्य सर्गैः।

शोकादभूषैरपि भूयकाया-

श्चकार नागेन्द्ररथाश्वमिश्रैः ॥ २७ ॥

उच्चिक्यिरे पुष्पफलं वनानि

सस्नुः पितॄन् पिप्रियुरापगासु।

आरेमुरित्वा पुलिनान्यमुक्तं

छायां समाश्रित्य विशश्रमुश्च ॥ २८ ॥ (B, 247-254)

b. Give the 3rd singular लुङ् of इ, चिप्, and कृ.

[Ans : P, 250, L. 10 ; P, 248, L. 11 ; अकार्षीत्]

c. Give the roots of the following words, with their third singular लट् and लुङ्—अधमन्, छित्वा, उच्चिक्यिरे, पिप्रियुः।

[Ans : ध्मा, छा, चि प्री। लट्—धमति, अच्छाति, चिनोति, प्रीणाति। लुङि—अध्मासीत्, अच्छासीत्, अप्रैषीत्]

d. Give the roots of निधाय, सञ्चित्य, प्रायात्, सर्गैः, आरेमुः and विशश्रमुः, and *t*he लट् and लिट् of the first three, with the लृट् anb लुङ् of the last three, all in *t*he 3rd singular only

[Ans : the root—धा, चि, या सृप रम्, भ्रम । लट्—दधाति चिनोति, याति, लिट्—दधौ, चिकाय चिचाय, ययौ । लृट्—सर्प्स्यति, स्रप्स्यति रंस्यते भ्रमिष्यति । लुङ्—अधास्यीत्, अयासीत्, असृपत् अरंस्त, अभ्रमत् अभ्रमीत् ।

e. How many objects does the verb नी govern in its simple state ? Are there any examples in the above extract ?

[Ans : अथानयन् इतिवत् आनयनार्थे: नी धातु: द्विकर्मक:, यापनार्थे तु न तथा । यथा, कालं नयति । उपरि तु तं प्रदेशमिति गौणं कर्म ऊह्यम् ।]

f. Point out all words in the above extract that have roots in common.

[Ans : words derived from नी—आनयन्, अभिनीय:, from चि—सञ्चित्य, सञ्चय, उच्चिक्यिरे, चिता ।

अग्न: प्रसादं त्रिजगन्महात्मा
द्यौवंशुका पुष्पचयं बभूव ।
निर्व्याजनिज्या वहते वचर
धूमो अभावे मुनिना कुमार: ॥ २० ॥ द्वितीये ॥
महीय्यमाना भवतातिमात्र'
सुराध्वरे धम्मरजित्वरेण ।
दिवोऽपि वज्रायुधभूषणाया
ह्रियीयते वीरवती न भूमि: ॥ २८ ॥ (P, 141-144)

2\. *a.* What are the respective subjects of the first four sentences in the above lines ?

[The respective subjects are :—त्रिजगन्महात्मा, द्यौ:, इज्या, and मुनिना ।]

b. Give the syntactical connection of प्रसादं and पुष्पचयम्.

[Ans : Syntactical :—अभ्यर्थित्यस्य कर्मणि द्वितीया । पुष्पचयम्— बंधुकां इत्यस्य शेषविवक्षायामपि कर्मणि द्वि: ।]

c. What part of speech is निर्व्याजम् ?

[Ans : adverb]

d. What is the meaning of मदीयमाता, and what does it refer to ?

[See P. 143, L. 25 and P. 144]

e. What would be the English equivalent of जगम्: in the above passage ?

[Ans : attained to or felt]

f. Derive चत्वर and जित्वर. What does चत्वरजित्वरेण refer to ?

g. In what case is दिव: ?

h. Who are referred to, by implication, in last two lines ?

[इन्द्र and राम are here implied]

i. How is ज्ञप्यते formed ?

[Ans : See P. 144, L. 19,]

Supplementary F. A. Examination.

1884.

Examiner—Pandit Mahesh Chandra Nyayaratna. C.I.E.

1, कैते कानिष्ठिनेयस्य ज्यैष्ठिनेयं विवासितम् ।
को बयंमुचितप्रख्यं बहमन्येत राघवम् ॥ ८४ ॥ पञ्चमे ॥
रामसानं बटुयंत्र तु पिपठीयुरात्रिरत्नवान् ।
दयस्ते कूपमाण्डूकि तवैतावति क: श्रय: ॥ ८५ ॥
निर्लज्जो विमद: स्वामी धनानां द्रुतपुष्पक: ।
अध्यासिष्टामिदं बलात् बसत्रावेति कारणम् ॥ ८७ ॥

भिन्ननौक इव ध्यायन् मन्त्री विभ्यद् यमः स्वयम् ।
क्रणिमानं दधानेन मुखेनास्ते निरुत्तरः ॥ ८८ ॥

a Translate the above extract into your own Vernacular.

b. Name and explain all the *samasas* in it,

[Ans:—See Q. 1. P. 491; पिच्छीभूतान्—See P. 492, L. 17 ; कूपमाण्डूकि—Do. L. 19; निर्लङ्कः, विमनः, इतपुण्यकः अन्तर्गिरम्—See P. 495, L. 10, 11, 12, 13]

c, Quote or refer to the verse in the preceding speech to which allusion is made in the second verse of the extract.

[Ans : Quote sl. 80 . V.]

d. Explain the allusion in (3) and the simile in (4)

[Ans:—P. 495; L. 18 &c; Simile—See P. 497, L. 10]

e. What parts of speech are ऋते and बह in (1) .

[Ans:—P. 490, L. 14,16;]

f. Derive कानिष्ठिनेय, नप and राचस,

[Ans:—P. 491. L. 6, 7; राचस-रँच-असुन्, स्वार्थे अण्]

g. Give the root of निरस्तवान् and express the meaning of the word by forms in णिङ् of the root,

[Ans:—P. 492, L 25; the णिङ् form is either निरासत्, or निरास or निरास्थत् ।]

h. In what case is अन्तर्गिरम् and why is it in that case,

[Ans :—P. 495, L. 15 &c.]

i, Account for the difference of declension in ध्यायन् and बिभ्यत् the former ending in न् and the latter in त्,

[Ans : "नाभ्यस्तात् शतुर्नुम्" इति औधातोः अभ्यस्ततया नुमागमप्रतिषेधः]

2, Explain :—

ऐषी: पुनर्जन्मजयाय यत् त्वं
रूपादिबोधात् न्यवृतस्व यत्ते ।
तत्त्वान्यबुद्धा: प्रतनूनि येन
ध्यानं नृपस्तत् शिवमित्यवादीत् ॥ १६ ॥ प्रथमे ॥ (P 42

धर्म्मोऽस्ति सत्यं तव राक्षसाय-
मन्यो व्यतिस्ते तु ममापि धर्म्मः ।
ब्रह्मद्विषस्ते प्रणिहन्मि येन
राजन्यवृत्तिर्धृतकार्म्मुकेषु: ॥ २५ ॥ द्वितीये ॥ (P 137.)

अस्माकमुक्तं बहुमन्यसे चेत्
यदीशिषे त्वं न मयि स्थिते च ।
जिह्मं व्यतिष्ठन् यदि तातवाक्यं
जहीहि शङ्कां व्रज शाधि पृथ्वीम् ॥ ५३ ॥ तृतीये (P 283)

मम रावणनाथाया भगिन्या युवयो: पुनः ।
अयं तापसकात् ध्वंस: चमिध्वं यदि व: क्षमः ॥ २१ ॥ चतुर्थे (P348

छिपन् वनेचराग्र्याणां त्वमादायचरो वने ।
अग्रेसरो जघन्यानां मभूः पूर्व्वसरी मम ॥ ६७ ॥ पञ्चमे (P 150)




LIBRARY
CALCUTTA